श्री हर्षपुष्पामृत जैन ग्रन्थमाला
ग्रन्थांक : २३६

रघुवंश - कुमारसंभव - किरातार्जुनीय
शिशुपालवध - नैषधीय - मेघदूतात्मक

# काव्यषट्कं मूलम्

( सकाव्याकारादि )

संपादक : संशोधकश्च
तपोमूर्ति पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर
पट्टधर-हालारदेशोद्धारककविरत्न
पूज्याचार्यदेव श्री विजयामृतसूरीश्वर पट्टधर

पूज्याचार्य देव श्री विजयजिनेन्द्रसूरीश्वर

प्रकाशिका :
श्री हर्षपुष्पामृत जैन ग्रन्थमाला
लाखाबावल-शांतिपुरी ( सौराष्ट्र )

श्री हर्षपुष्पामृत जैन ग्रन्थमाला-ग्रन्थांकः २३६

सं १७८८

श्री महावीरजिनेन्द्राय नमः

श्रीमणिबुद्ध्याणंदहर्षकर्पूरामृतसूरिभ्यो नमः

रघुवंश-कुमारसंभव-किरातार्जुनीय-
शिशुपालवध-नैषधीय-मेघदूतात्मकं

# :: काव्यषट्कं मूलम् ::

संपादकः संशोधकश्च
तपोमूर्ति-पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर-पट्ट-
धर--हालारदेशोद्धारककविरत्न-पूज्याचार्यदेव श्री
विजयामृतसूरीश्वर-पट्टधरः

पूज्याचार्यदेवश्रीविजयजिनेन्द्रसूरीश्वरः

प्रकाशिका :
श्री हर्षपुष्पामृत जैन ग्रन्थमाला
लाखाबावल-शान्तिपुरी (सौराष्ट्र)

मूल्य—रू०-१५०-००

प्रकाशिका–श्रीहर्षपुष्पामृत जैन ग्रन्थमाल
( लाखाबावल ) सौराष्ट्र
C/o श्रीमती जशमाबेन वी.शा. मेघजी वी.शा. वेलजी वी. दोढिया
श्रुत ज्ञान भवन ४५ दिग्विजय प्लोट, जामनगर

| वीर सं० | विक्रम सं० | सन् | प्रथमावृत्तिः |
| --- | --- | --- | --- |
| २५१७ | २०४७ | १९९१ | प्रतयः १००० |

# 卐 आभार दर्शन 卐

**प्राचीन साहित्य प्रकाशन योजनामां रघुवंश कुमारसंभव किरातार्जुनीय शिशुपालवध नैषधीयचरित अने मेघदूत** रूप आ **काव्यषट्क** अभ्यासमां उपयोगी थाय ते माटे प्रगट करेल छे. आ काव्यषट्कनुं संपादन **पू. आ. श्रीविजयजिनेन्द्रसूरीश्वरजी** महाराजे कर्युं छे.

आ ग्रन्थ श्वे. मू. जैन भण्डारो ने ५०० नकल भेंट आपी शकाय ते माटे पू०आ० श्री **विजयजिनेन्द्रसूरीश्वरजी** म. ना सदुपदेशथी **श्री हालारी वीशा ओसवाल तपागच्छ उपाश्रय अने धर्मस्थानक ट्रस्ट** दिग्विजय प्लोट **जामनगर** तथा **श्रीमती चन्द्रावती बालुभाइ खीमचन्द झवेरी ट्रष्ट रत्नपुरी** मलाड **ट्रस्ट मुम्बई** तरफथी सहकार मलेल छे. ते माटे पूज्य श्री तथा आ बने ट्रस्टोनो खूब-खूब आभार मानीए छीए.

ता० २१-९-९१
शाक मारकेट सामे,
**जामनगर** (सौराष्ट्र)

**महेता मगनलाल चत्रभुज**
व्यवस्थापक
**श्री हर्षपुष्पामृत जैन ग्रन्थमाला**

# प्रास्ताविक

संस्कृत साहित्य ए मुख्यतया आध्यात्मिक संस्कृतिनी भाषा छे. तेना अध्ययनमां आ विशेषता रही छे. जैन वाङ्मय संस्कृत अने प्राकृत भाषामां संग्रहायेलु छे. ते शास्त्रो उपरथी गुजराती भाषामां पण पुष्कल साहित्य रचायु छे.

मूल शास्त्रोना अध्ययन माटे व्याकरण काव्य साहित्य न्याय वगेरेनु अध्ययन थाय छे. तेमां जैन संस्कृतना अभ्यास माटे काव्योनु अध्ययन थाय छे.

कलिकाल सर्वज्ञ पूज्य हेमचन्द्रसूरीश्वरजी महाराजे रचेल अनेकार्थ संग्रहनी टीकानु संपादन करवानु थयु ते कैरवाकर-कौमुदी टीका तेओश्रीना पट्टधर रत्न पूज्य महेन्द्रसूरीश्वरजी महाराजे रचेल छे. ते ८०० वर्ष पहेलानी टीकामां सैंकडो शास्त्रोना उदाहरणो आप्यां छे. तेना आधार स्थानो शोधतां सैंकडो जैन जैनेतर ग्रन्थो जोवाना थया तेथी जणायु के महाकाव्यो मूल अने पद्योनी अकारादि सार्थ संपादित थाय तो अभ्यास पण उंडाणथी थाय अने आधार स्थानो सुलभ बने.

उपर छल्लो अभ्यास करनारा माटे आमां चंचुपात थवो कठीन छे. बेचार ग्रन्थोनु आ रीते संशोधन करनारे घणु उपलब्ध बनी जाय एथी जैन जैनेत्तर काव्योनुं संपादन आ कार्यो माटे जरूरी छे.

आ काव्यषट्कमां रघुवंश, कुमारसंभव, किरातार्जुनीय, शिशुपालवध, नैषधीयचरित अने मेघदूतनो समावेश थयो छे. ते ग्रन्थोनी अकारादि सूची संयुक्त रीते करी छे. तेमां पद्यनुं आद्य पद काव्यनाम, सर्ग अंक, पद्य अंक, अने पृष्ठ अंक आपेलां छे. जेथी

पद्य जोतामी साथे क्या काव्यनुं छे ते पण जाणी शकाय अने विशेष टीका वगेरे जोवानी जरूर जणाय तो ते काव्यनी टीका वि० जोइ शकाय. एक साथे काव्यो लेवाथी ग्रन्थ मोटो थइ जाय परन्तु जरूरीआतनी दृष्टिए अे जरूरी छे.

आ रीते जैन काव्यो आदि माटे पण प्रयत्न करवानी विचारणा छे. ते माटे प्रयत्न चालु छे. अनेकार्थ संग्रह टीका १४००० श्लोक प्रमाण संपादन थया पछी मूल ग्रन्थनु पण कण्ठस्थ करवा आदि माटे जरूरी जणाता गुजराती भाषातर कयुं अने ते पण प्रगट थइ गयुं छे.

आ काव्यो नवलकथा रूपे के तेना भाषान्तरो वाचवा रूपे नथी. कर्ता अने टीकाकारोए आ काव्यो द्वारा व्याकरण साहित्य, शब्दो-कोष पर्याये, समासो व्युत्पत्तिओ, अलंकारो, बन्धो छन्दो विगेरेनुं ज्ञान प्रगट कयुं छे. अने तेना साधन रूपे उदाहरणो रूपे आ काव्योनुं अध्ययन जैन संघमां थाय छे. मति मंदता, समयनो अभाव, साधनोनी प्रतिकुलता, उत्साह अने रसनी न्यूनता आ बधा कारणो थी अभ्यास पण खण्डित थाय छे. परीक्षानी दृष्टि थी अभ्यास करनारा तो वास्तविकता पामी शक्ता नथी.

पूर्वना महापुरुषोए जे काव्यो चरित्रो विगेरे रच्यां छे ते जोतां तेमनी केटली मतिनी तिव्रता हशे ? केवो क्षयोपशम हशे ? केटली अप्रमत्तता हशे ? केवी कठिनतामां पण केटलो ऊंडो अभ्यास कर्यो हशे ? साधनोनी खामी वच्चे पण मरजीवा बनीने तेमणे अगाध खेडाण करीने उंडुं रहस्य मेलवी अकाट्य अने स्थिर लखाणो कर्यां छे.

आजनी अर्थ लक्षी अने प्रमाद भरी केलवणीमां नूर ज हणाइ गयुं छे. त्यां वधु शुं आशा रखाइय शास्त्रना अध्ययन कर-

नारा पोपटना राम-राम जेवुं अध्ययन न करतां तेमनुं अध्ययन तेमने ज बोध आपतुं अने ते पोताना ज जीवनने उन्नत बनावी देता.

मनस्यन्यद् वचस्यन्यद् कार्यमन्यद्दुरात्मनाम् ।
मनस्येकं वचस्येकं कार्यमेकं महात्मनाम् ॥

उत्तम पुरुषोने छाजे तेवुं शीखवुं आचरवुं अने तेमां स्थिर रहेवुं ते अध्ययन कर्यानु आद्य फल छे. सौ ते पामो अने मलेला मानव भवने पाप पापनी मति पापना पक्षपात थी दूर करी सद्-गतिनी परंपरा द्वारा जन्म मरण रूप भवना फेराथी मुक्त बनो एज अभिलाषा.

२०४७ भाद्रपद पूर्णिमा
तपागच्छ जैन उपाश्रय
४५ दिग्विजय प्लोट
**जामनगर (सौराष्ट्र)**

हालारदेशोद्धारक पूज्याचार्यदेव-
**श्रीविजयामृतसूरीश्वर पट्टधर:**
**आचार्य जिनेन्द्रसूरि**

卐

रघुवंश-कुमारसंभव-किरातार्जुनीय-शिशुपालवध-
नैषधीय-मेघदूतात्मकस्य

# काव्यषट्कस्य अनुक्रमः

प्रथमं काव्यं

महाकवि श्री कालिदासविरचितं

## ॥ रघुवंशम् ॥


| सर्गः | सर्गनाम | पद्यानि | पृष्ठं |
|---|---|---|---|
| १ | वसिष्ठाश्रमाभिगमन | ६५ | १ |
| २ | नन्दिनीवरप्रधान | ७५ | ६ |
| ३ | | ७० | १५ |
| ४ | रघुदिग्विजयः | ८८ | २२ |
| ५ | अजस्वयंवराभिधानः | ७६ | २९ |
| ६ | स्वयंवरवर्णनः | ८६ | ३७ |
| ७ | अजेनेन्दुमतीपाणिग्रहणः | ७१ | ४५ |
| ८ | अजविलापः | ६५ | ५१ |
| ९ | मृगयावर्णनः | ८२ | ५९ |
| १० | रामावतारः | ८६ | ६८ |
| ११ | सीताविवाहवर्णनः | ९३ | ७५ |
| १२ | रावणवधः | १०४ | ८३ |
| १३ | दण्डकाप्रत्यागमनः | ७९ | ९१ |
| १४ | सीतापरित्यागः | ८७ | ९९ |
| १५ | श्रीरामस्वर्गारोहणः | १०३ | १०६ |
| १६ | कुमुद्वतीपरिणयः | ८८ | ११४ |
| १७ | अतिथिवर्णनः | ८१ | १२२ |
| १८ | वंशानुक्रमः | ५३ | १२९ |
| १९ | अग्निवर्णश्रृंगारः | ५७ | १३४ |

## द्वितीयं काव्यं

### महाकवि श्रीकालिदासविरचितं

# कुमारसम्भवम्


| सर्गः | नाम | पद्यानि | पृष्ठं |
|---|---|---|---|
| १ | उमोत्पत्तिः | ६० | १३६ |
| २ | ब्रह्मासाक्षात्कारः | ६४ | १४४ |
| ३ | मदनदहनः | ७६ | १५० |
| ४ | रतिविलापः | ४६ | १५६ |
| ५ | तपःफलोदयः | ८६ | १६० |
| ६ | उमाप्रदानः | ६५ | १७३ |
| ७ | उमापरिणयः | ९५ | १८१ |
| ८ | उमासुरतवर्णनः | ९१ | १८६ |
| ९ | कैलास गमनः | ५१ | १९७ |
| १० | कुमारोत्पत्तिः | ६० | २०२ |
| ११ | कुमारोत्पत्तिः | ५० | २०७ |
| १२ | कुमारसेनापत्यवर्णनं | ६० | २१२ |
| १३ | कुमारसेनापत्याभिषेकः | ५१ | २१७ |
| १४ | देवसेनाप्रयाणं | ५१ | २२२ |
| १५ | सुरासुरसैन्यसंघटः | ५३ | २२६ |
| १६ | सुरासुरसैन्यसंग्रामः | ५१ | २३८ |
| १७ | तारकासुरवधः | ५५ | २४२ |

## तृतीयं काव्यं

### महाकवि श्रीभारविप्रणीतं

# किरातार्जुनीयम्


| सर्गः | पद्यानि | पृष्ठं | सर्गः | पद्यानि | पृष्ठं |
|---|---|---|---|---|---|
| १ | ४६ | २५१ | १० | ६३ | ३१७ |
| २ | ५९ | २५८ | ११ | ८१ | ३२५ |
| ३ | ६० | २६३ | १२ | ५४ | ३३२ |
| ४ | ३८ | २७० | १३ | ७१ | ३३६ |
| ५ | ५२ | २७६ | १४ | ६५ | ३५० |
| ६ | ४७ | २८५ | १५ | ५६ | ३६० |
| ७ | ४० | २९२ | १६ | ६४ | ३६५ |
| ८ | ५७ | २९८ | १७ | ६४ | ३७५ |
| ९ | ७८ | ३०७ | १८ | ४८ | ३८४ |


## चतुर्थं काव्यं

### महाकवि श्रीमाघकृत

# शिशुपालवधम्


| सर्गः | सर्गनाम | पद्यानि | पृष्ठं |
|---|---|---|---|
| १ | कृष्णनारदसंभाषणं | ७५ | ३९१ |
| २ | श्रयङ्के मन्त्रवर्णनं | ११० | ४०३ |
| ३ | ,, पुरीप्रस्थानः | ८२ | ४१२ |

| सर्गः | | सर्गनाम | पद्यानि | पृष्ठं |
|---|---|---|---|---|
| ४ | अचङ्के | रैवतवर्णनं | ६८ | ४२२ |
| ५ | ,, | सेनानिवेशः | ६९ | ४३२ |
| ६ | ,, | ऋतुवर्णनं | ७९ | ४४३ |
| ७ | ,, | वनविहारः | ७५ | ४५४ |
| ८ | ,, | विहारवर्णनं | ७१ | ४६५ |
| ९ | ,, | प्रदोषवर्णनं | ८७ | ४७६ |
| १० | ,, | सुरतवर्णनः | ९१ | ४९० |


## ॥ अथोत्तरार्द्धम् ॥


| | | | | |
|---|---|---|---|---|
| ११ | अचङ्के | प्रत्यूषवर्णनः | ६७ | ५०१ |
| १२ | ,, | प्रयाणवर्णनः | ७७ | ५११ |
| १३ | ,, | श्रीकृष्णसमागमः | ६९ | ५२४ |
| १४ | ,, | श्रीकृष्णार्घदानः | ८८ | ५३५ |
| १५ | ,, | अप शकुनाविर्भावः | ९६ | ५४३ |
| १६ | ,, | दूतसंवादः | ८५ | ५५६ |
| १७ | ,, | यदुवंशक्षोभणः | ६९ | ५६३ |
| १८ | ,, | सङ्कुलयुद्धवर्णनः | ८० | ५७३ |
| १९ | ,, | ,, | १२० | ५८६ |
| २० | ,, | शिशुपालवधः | ७९ | ५९९ |
| २१ | ,, | कविवंशवर्णनम् | ५ | ६०८ |


★

## पश्चमं काव्यं

### महाकवि श्री हर्षप्रणीतं

# ॥ नैषधीयचरितम् ॥


| सर्गः | पद्यानि | पृष्ठं | सर्गः | पद्यानि | पृष्ठं |
|---|---|---|---|---|---|
| १ | १४५ | ६०९ | १२ | ११३ | ७९४ |
| २ | ११० | ६३१ | १३ | ५६ | ८११ |
| ३ | १३६ | ६४० | १४ | १०१ | ८२० |
| ४ | १२३ | ६५४ | १५ | ९३ | ८३३ |
| ५ | १३८ | ६७२ | १६ | १३१ | ८४७ |
| ६ | ११३ | ६८७ | १७ | २२२ | ८६७ |
| ७ | ११० | ७०३ | १८ | १५४ | ८८४ |
| ८ | १०९ | ७१७ | १९ | ६७ | ९०३ |
| ९ | १६० | ७३१ | २० | १६२ | ९१४ |
| १० | १३८ | ७५६ | २१ | १६३ | ९२७ |
| ११ | १३० | ७७४ | २२ | १५३ | ९४८ |


## षष्ठं काव्यं

### महाकवि श्रीकालिदासप्रणीतं

# ॥ मेघदूतम् ॥


| क्रमः | विषयः | पद्यानि | पृष्ठं |
|---|---|---|---|
| १ | पूर्व मेघः | ६३ | ९६९ |
| २ | उत्तर मेघः | ५२ | ९७९ |

| क्रमः | विषयः | पद्यानि | पृष्ठं |
|---|---|---|---|
| १ | **गुरुपरंपरापट्टावलिः** | २१ | ९८८ |
| २ | **पुस्तकारंभविधिः** | ३० | ९९० |

# ॥ १ ॥ रघुवंशम् ॥

| पृष्ठं | पंक्तिः | शुद्धं | पृष्ठं | पंक्तिः | शुद्धं |
|---|---|---|---|---|---|
| ४ | २१ | त्वात्प्रार्थना | ६१ | १६ | ०पवन० |
| ५ | २६ | गुरुर्गुरु० | ६३ | ५ | अनुभवन्न० |
| ७ | २२ | आराधय | ६८ | १७ | प्राङ्मन्था |
| १० | ४ | विलोक० | ७३ | २० | सैकताम्भा |
| १० | ४ | ०रक्षणां | ७७ | १० | कङ्कतसूचाम् |
| १० | ५ | पूर्णरन्ध्रैः | ८५ | १६ | वृषस्यन्ती |
| १० | ७ | कम्पित | ८६ | ११ | उदायुधाना |
| ११ | १६ | शरं | ९२ | ८ | धरदानवक्षः |
| १२ | १३ | प्रयत्नः | ९३ | १८ | गन्धश्च |
| १५ | २ | ०निष्ठयु | ९९ | २१ | सौधोद्गत |
| १६ | १० | ०वार्थम० | १०३ | ८ | संधामिव |
| १७ | १९ | विधिवद्वि० | १०४ | १५ | रामानुजे |
| १९ | १० | वक्तुमुत्तरम् | १०७ | २४ | पाटयामास |
| २५ | २० | जय० | ११० | ११ | हिमक्लिष्ट |
| २६ | १९ | ०नीकेवि० | ११० | १६ | इवेन्दुना |
| २८ | २२ | प्राप्तैः | ११२ | ६ | कविमाहवा |
| ३३ | २ | ताध्वा | ११४ | ३ | भक्ता |
| ३३ | ३ | तान्तः | ११५ | २० | क्रीडा |
| ३७ | १२ | ०दुपमेयका० | ११६ | २० | सैन्यै |
| ४१ | १८ | गोवर्धन० | ११७ | १० | सूर्युहंसा |
| ४८ | १२ | बाला० | ११७ | २० | पौरसख: |
| ५२ | ६ | ०धर्मसु | ११८ | १५ | विमुञ्चदम्भः |

| पृष्ठं | पंक्तिः | शुद्धम् | पृष्ठं | पंक्तिः | शुद्धम् |
|---|---|---|---|---|---|
| ११९ | ३ | भङ्गु | १२८ | १८ | षष्ठ |
| ११९ | ५ | सविशेष | १२९ | १४ | मेकवीरः |
| ११९ | १३ | तत्पराणां | १३० | १९ | भोग्यम् |
| ११९ | २४ | लोलाश्च | १३३ | १३ | सर्वाङ्गीण |
| १२० | ५ | नितम्बोऽम्बिन्दु | १३६ | ११ | तमनघ |

# ॥ २ ॥ कुमारसंभवम् ॥

| पृष्ठं | पंक्तिः | शुद्धम् | पृष्ठं | पंक्तिः | शुद्धम् |
|---|---|---|---|---|---|
| १४२ | ९ | वोचिविलग्नमध्या | १९९ | २० | ०बन्धनाय |
| १४२ | १० | नवयौवनेन | २०० | १७ | ०राजहंसीं |
| १४३ | ७ | यदि | २०५ | १५ | सुधासारैरि० |
| १४६ | ६ | दैन्यमाश्रितः | २०६ | ५ | सूर्यसंबद्ध० |
| १४८ | १९ | कामोऽयं | २०६ | २२ | परितापमथा० |
| १५४ | ३-१७ | किञ्चि० | २०७ | १३ | प्रह्वैः |
| १५९ | १४ | पास्यति ते स | २१४ | १४ | स्वर्गैकबन्धो |
| १६० | १ | तदिदं | २३८ | १८ | बाढं |
| १६२ | २१ | कन्दुकलीलयापि | २३९ | १५ | युद्ध्वा |
| १७९ | ११ | विचिन्वन्ति | २३९ | २५ | अपारेऽसृक्सरित्पुरे |
| १८४ | ११ | प्रभावात्प्रसिद्ध० | २४१ | १८ | प्रत्याश्चसमन्त० |
| १८५ | ५ | हरिं | २४७ | १० | ०वसुधा० |
| १८८ | २२ | माधत्त | २५० | २३ | कालिदासकृतौ |
| १९२ | १९ | ०स्टजाङ्गणं | | | |

# ॥ ३ ॥ किरातार्जुनीयम् ॥

| पृष्ठं | पंक्ति | शुद्धम् | पृष्ठं | पंक्तिः | शुद्धम् |
|---|---|---|---|---|---|
| २५१ | २२ | न हितं | ३३४ | ३ | ०मंशुभिरु० |
| २८२ | १८ | दुर्द्धूतः | ३३४ | १० | ०वानमिव |
| २९२ | १३ | गुप्तानामथ | ३३८ | १७ | पङ्कविष० |
| ३०१ | १८ | पुष्पजं | ३४१ | १३ | तपास्यमार्गदायी |
| ३०८ | ३ | अंशुपाणि० | ३४७ | १२ | कृतज्ञता |
| ३१० | १५ | क्षिप्यमाण० | ३५० | २१ | सर्वमनोरमा |
| ३१४ | १७ | हृद्यता० | ३५७ | १८ | रनेकमेकावसरं |
| ३१६ | १० | मायामिम | ३६१ | १९ | तुङ्गेशो |
| ३२३ | २ | नृपसुत | ३६२ | ३ | निशिता० |
| ३२३ | २६ | विसृतगुणेव | ३६५ | ७ | रोमाञ्चमञ्चिततरं |
| ३२४ | ३ | ससाध्यसेव | ३६६ | ५ | भूरेणुना |
| ३२५ | १४ | ०न्निसर्गाच्च | ३६६ | ५ | रामभभूसरेण |
| ३२६ | २३ | भयंकर | ३७० | १ | तां |
| ३२७ | ४ | ०दावुपप्लवौ | ३७२ | ७ | ०घूर्णित० |
| ३३२ | १९ | तत्त्वधियां | ३७५ | १९ | संप्राप्तया |
| ३३२ | २३ | वदनममितो | ३७७ | २० | शान्तर्चिषं |
| ३३३ | ५ | परिकीर्ण० | ३८५ | ६ | वल्गु |
| ३३३ | २० | तप्तुम० | | | |

卐

# ॥ ४ ॥ शिशुपालवधम् ॥

| पृष्ठं | पंक्तिः | शुद्धम् | पृष्ठं | पंक्तिः | शुद्धं |
|---|---|---|---|---|---|
| ३९१ | ९ | हरिः | ४१५ | १९ | कृतास्पदा |
| ३९१ | १७ | इत्यबोधि | ४१६ | १० | व्रीडादिवा० |
| ३९२ | २ | जटाः | ४१७ | ३ | चक्रु० |
| ३९२ | ५ | ०मौञ्जीयुज० | ४१७ | ११ | मलिन्देषु |
| ३९४ | ८ | सुमेरु० | ४१८ | २ | प्रासाद० |
| ३९४ | १७ | निर्भर० | ४२० | ५ | नीरवर्षे |
| ३९५ | २४ | व्यवसीयते | ४२१ | २५ | महाकाव्ये |
| ३९६ | १४ | फणाभृतां | ४२२ | ४ | नीलोत्पल० |
| ३९७ | ७ | कंसादि० | ४२५ | १० | सवितुः |
| ३९७ | १९ | ०दितेः | ४२५ | १८ | जलजनित |
| ३९७ | २० | ०निषूदनं | ४२६ | ९ | पश्यामो |
| ३९८ | १७ | विनोद० | ४२८ | १२ | दोधकम् |
| ३९८ | २४ | ०सदृशं | ४२९ | १ | विविध० |
| ४०१ | १७ | नमु | ४२९ | २२ | मुदमपा |
| ४०१ | २६ | संप्रति | ४३० | २ | निरोद्धुम् |
| ४०४ | २५ | संक्षिप्त | ४३० | १० | नात्र |
| ४०५ | ९ | सर्वाङ्गैः | ४३१ | १९ | जाम्बूनदे- |
| ४०६ | १५ | जीवति | ४३२ | ६ | ०नुन्नरुग्णमद्भिः |
| ४०६ | २६ | लघु० | ४३६ | १३ | उद्यन्त० |
| ४११ | २५ | पाण्डोर्भक्तिर्भवति | ४३७ | ३ | जग्मु० |
| ४१४ | २० | भुग्नशिरः सहस्र० | ४३७ | १७ | मुक्तमदाम्बुतिवतं |
| ४१४ | २४ | रथौघैः | ४३९ | २० | वलयेन |

| पृष्ठं | पंक्ति | शुद्धम् |
|---|---|---|
| ४३९ | २० | वलवेन |
| ४३९ | २३ | शनकै |
| ४४० | ११ | भोजयितु० |
| ४४० | १६ | वेश्मानि० |
| ४४० | १७ | चन्द्राकृतानि |
| ४४० | २१ | दर्पोदयो० |
| ४४१ | १६ | चुर्चु० |
| ४४२ | १७ | लीला |
| ४४२ | १७ | तरूणा |
| ४४३ | ८ | बलाकान्तः |
| ४४५ | ४ | ०मम्बुरुहां |
| ४४६ | १८ | परितापिनः |
| ४५५ | ११ | सततमनभि० |
| ४५५ | १३ | ०बहिस्ततेन |
| ४५५ | १९ | प्रियमिति |
| ४५५ | १९ | वनिता |
| ४५५ | २१ | चरणगतसखी |
| ४५६ | ११ | ०पद्मा |
| ४५६ | २२ | द्वयनिहित० |
| ४५६ | २५ | कृच्छ्रादुरु० |
| ४५६ | २६ | ०शिरोधराव० |
| ४५७ | १ | ०कलितस्ततेन |
| ४५७ | २४ | लिभिरलभि |
| ४५७ | २४ | ०जगस्य |
| ४६० | ११ | ०कमुन्नमय्य |
| ४६० | १६ | ०वलयस्वनितेन |
| ४६१ | २० | पिबति०रहस्त्वाम् |
| ४६२ | ६ | केसरेण |
| ४६३ | ६ | घनमहतामिव |
| ४६३ | २० | कलभकरोरु० |
| ४६४ | १ | ०सा सा: प्रकृत्या |
| ४६४ | १० | ०मुज्जत्तमेव कामि० |
| ४६४ | १३ | ०निरन्तराव० |
| ४६४ | १७ | तनुरभिलषितं |
| ४६४ | २० | त्तरलतया |
| ४६५ | १२ | ०चलत्पदं |
| ४६८ | २४ | ल्लोलोर्मौ |
| ४७२ | ४ | गुरुरभद्भु० |
| ४७२ | २६ | छायेव |
| ४७४ | १३ | भ्रश्यद्भि० |
| ४७४ | २५ | प्रच्योतद्भि० |
| ४७५ | २५ | ०भिलष्यता |
| ४८० | २६ | प्रथमप्रबुद्ध० |
| ४८१ | १५ | ऽप्रकरै— |
| ४८१ | १८ | स्मरजन्मधर्म० |
| ४८३ | २४ | ०मगमत्त० |
| ४८७ | १८ | ०पगूढवता |
| ५११ | २ | लभ्यते |
| ४९२ | १४ | फलदं |
| ४९४ | १ | जुधूर्णुर |
| ४९४ | २६ | ०माशु |

| पृष्ठं | पंक्ति | शुद्धम् | पृष्ठं | पंक्ति | शुद्धम् |
|---|---|---|---|---|---|
| ४६५ | १८ | तनुरुहाण्यपि | ५२५ | १८ | कुरुराज० |
| ४६८ | ७ | ०धाष्र्यासु० | ५२६ | ७ | सममेत्य |
| ४६८ | ७ | ०धाष्टर्यासु० | ५२६ | २० | नापित |
| ५०० | ११ | ०रताभिरताभ्यः | ५२८ | २६ | न्यवलयीकृत० |
| ५०१ | ४ | ०मुच्चैः | ५२९ | २६ | स्फुटममूर्न |
| ५०१ | १६ | ०कमपनीय | ५३६ | ११ | भुवः |
| ५०१ | २१ | शयितु० | ५४० | २४ | श्रीमुखेन्दु० |
| ५०३ | ९ | रज्यमानैः | ५४३ | ६ | शार्ङ्गिणि |
| ५०४ | १२ | ०निधं० | ५४४ | १७ | एष |
| ५०६ | १७ | ०धाष्ट्योदयानां | ५४५ | १ | नियतमिह |
| ५०९ | १० | भानोः | ५४५ | २ | स्फुटं भवरि |
| ५१० | ३ | हृतमद्रैः | ५४६ | १६ | ऽधिलोक० |
| ५१३ | २३ | खुरंमुद्ग० | ५५० | १ | ममीमरद्रुषा |
| ५१५ | २१ | ०राकृष्ट० | ५५१ | १० | शलूत्तमाः |
| ५१५ | २३ | उत्तुङ्ग० | ५५२ | २३ | किमहो |
| ५१६ | २६ | यथोऽपसत्रु० | ५६१ | २० | क्षतासंहतिः |
| ५१७ | २३ | रोहिणीः | ५६२ | २२ | नित्यविभूषणा |
| ५१८ | ७ | व्यासेद्० | ५८६ | १५ | शीघ्र० |
| ५२० | २२ | ०मुदयाद० | ५८८ | १९ | चिकीर्षु० |
| ५२० | २५ | कलंकषोधाः | ५९१ | २ | आलापैरिव |
| ५२१ | २ | हंसैः | ६०१ | ७ | अमनोरमतां |
| ५२१ | १० | प्रभोर्निकासाः | ६०१ | २३ | गुर्व्यस्त० |
| ५२२ | २४ | रतयंताग्रे | ६०१ | २६ | मषीभवन्तः |
| ५२२ | २५ | जवेनैव | ६०७ | १६ | ०मर्मभिस्तम् |
| ५२३ | १३ | मण्डलो | ६०७ | २३ | ०लोलाजल ★ |
| ५२५ | ४ | विनयं | | | |

| पृष्ठं | पंक्तिः | शुद्धं | पृष्ठं | पंक्तिः | शुद्धं |
|---|---|---|---|---|---|
| ६१२ | २० | ०दुर्धर्ष० | ६३६ | २६ | ०द्रुचा |
| ६१६ | ३ | ०संहितेषुणा | ६३७ | १९ | दधदम्बुद० |
| ६१८ | १ | अमी | ६३७ | २२ | ०सौधकन्धरा० |
| ६२० | १६ | वात्यान्वय० | ६३७ | २६ | घनान्यदु० |
| ६२१ | १५ | ०सचिवेन | ६३८ | ३ | अनलैः |
| ६२३ | १६ | कुसुमाद्० | ६३८ | ४ | ०पुरीपरार्ध्यताम् |
| ६२४ | २ | ०सुतः | ६३८ | १३ | ०दापणे |
| ६२५ | ९ | दधद्द्रुमाल० | ६३८ | १४ | गुञ्जन्तमलिं |
| ६२५ | १२ | प्रणीत० | ६३८ | १५ | सकलाहं |
| ६२५ | २४ | ०वाश्रयम् | ६३९ | ६ | ०शेषशायिनः |
| ६२६ | ८ | दरोद्गतैः | ६३९ | २० | ०वाङ्मुखत्वैः |
| ६२७ | ४ | चञ्चोश्चरण० | ६४० | ४ | ०पटुलक्ष्मी० |
| ६२७ | ६ | ०विनोदिनम् | ६४१ | १४ | हंसोऽप्यसौ |
| ६२७ | २२ | रेजतुरस्य | ६४१ | १९ | ०दुपैषि |
| ६२७ | २३ | ०तथाम्बुजं— | ६४४ | ८ | ०र्यदि |
| ६२९ | १२ | धरणी | ६४४ | १२ | विशेष० |
| ६२९ | १४ | ०वैलक्ष्यकृपं नृपं | ६४५ | २३ | मोहादध्यातः |
| ६३० | ५ | निर्गता | ६५१ | १५ | का खलु |
| ६३१ | १५ | ०चञ्चुपुटेन | ६५२ | ४ | त्वद्भ्रूयुगं |
| ६३२ | १८ | प्रभुं हसति | ६५४ | १८ | सरसीरस० |
| ६३३ | ५ | पृषती० | ६५५ | १३ | विदीर्य |
| ६३३ | १३ | परीक्षणे | ६५५ | २६ | मृगीदृशः |
| ६३४ | १७ | अनुरूपमिमं | ६५६ | २ | नुमितनिह्नुत० |
| ६३६ | ६ | वयं वयः | ६५६ | १३ | तदद्भुत० |

| पृष्ठं | पंक्ति | शुद्धम् | पृष्ठं | पंक्ति | शुद्धम् |
|---|---|---|---|---|---|
| ७१० | २१ | जिगीषुर्धनुषा | ७७० | २३ | तनोत्यकीर्ति |
| ७१० | २५ | कर्णौ | ७७५ | ७ | कंचि- |
| ७१३ | १२ | ०भरणाविमौ | ७७६ | १० | हंसवधलीमिव |
| ७१६ | ६ | प्रवालप्रवलारुणं | ७८२ | ८ | ०संतरण० |
| ७१८ | १ | रश्मि० | ७८३ | १५ | शीर्षशेष- |
| ७१८ | २३ | निरीक्षितं | ७८६ | ४ | कीर्ति |
| ७२० | २ | ०मूर्निजापि | ७८८ | ७१ | कुमारनिपुणां |
| ७२० | १४ | सञ्ज्ञा | ७९० | १२ | घने |
| ७२३ | २२ | प्रियाया वचनं | ७९१ | ९ | भूपमपरं |
| ७२४ | १६ | माकर्णया० | ७९३ | ४ | बह्लन० |
| ७२६ | २४ | संवर्तिका | ७९६ | २२ | ०मीयूषी |
| ७२९ | २६ | तद्दिक्षुः | ७९९ | १४ | यशोभरावलिरस्य |
| ७३१ | २ | यदीत्यमथ | ८०१ | ५ | ०जयतिमसमर्थेन |
| ७३६ | १ | ह्रियाह | ८०१ | १८ | ०रसुग्गोचर० |
| ७४४ | १ | लोभात्त | ८०२ | १४ | ०मेदुरः |
| ७४९ | ८ | परिचारिकोचिता | ८०३ | २ | काचिद्वर्त० |
| ७४९ | ११ | अधित्यकासु | ८०७ | ४ | फेनैः |
| ७५१ | १६ | समागसा | ८१८ | ११ | किर्मैलः |
| *७५३* | *२२* | *लाञ्छनोन्मृजा* | ८२२ | २४ | व्यतिभेदिनोऽपि |
| ७५७ | ५ | भैम्येव | ८२३ | १६ | निर्वापयिष्यन्निव |
| ७५९ | २६ | समेतेषु | ८२९ | २५ | ०वाराणसि |
| ७६१ | २३ | यः स्पर्धया | ८३५ | २२ | स्नपित० |
| ७६२ | १६ | समाप्तशोभा | ८३५ | २४ | स्वमुर्व्याः |
| ७६७ | २५ | पीतावदाता० | ८३९ | ३ | विधि० |
| *७६८* | *१८* | *मन्वं* | *८४२* | *६* | *कलापिसंपदः* |

| पृष्ठं | पंक्ति | शुद्धम् | पृष्ठं | पंक्ति | शुद्धम् |
|---|---|---|---|---|---|
| ६५६ | १८ | कृतत०दृढव्यथ: | ६८२ | ४ | क्षिप्नुरेन० |
| ६६१ | ६ | ०निह्नुतदर्पताम् | ६८३ | २ | विदुषापि |
| ६६२ | १६ | किममीकृता | ६८३ | १९ | मयि दृष्टे |
| ६६५ | ११ | ०रामरवत्सुधां | ६८४ | १० | धीरहो |
| ६६५ | १२ | नापिबः | ६८५ | २१ | भवतां |
| ६६६ | २३ | षड्ऋतवः | ६८८ | १२ | विश्वैकदृश्यैव |
| ६६६ | २५ | यद्भवते | ६८९ | १३ | भैमीभ्रमस्यैव |
| ६६७ | ३ | चेद- | ६९० | १४ | पर्यवश्यन् |
| ६६७ | १२ | तत्क्षणमापिथ | ६९० | १४ | त्वद्धैर्यपूजां |
| ६७३ | १६ | ०मर्षणऋग्भिः | ६९१ | ३/९ | संघट्ट्य |
| ६७४ | २ | स्तावकैरतितरां | ६९५ | ७ | मोहं च |
| ६७४ | ७ | कुमारी | ६९६ | १५ | गन्धर्ववध्वः |
| ६७५ | ८ | पृच्छ्यते | ६९६ | २१ | ०सुभ्रू- |
| ६७५ | १० | उत्तरोत्तर० | ६९९ | ४ | लघूकृतस्वं |
| ६७५ | १३ | ०मुपधाय | ६९९ | २१ | दूत्यं |
| ६७६ | १ | पर्वतेन | ७०१ | १ | प्रतिवाचमर्घे |
| ६७६ | ६ | तद्द्वारसंक्रमित० | ७०१ | २४ | र्बन्धुर्यदि |
| ६७६ | १७ | यत्पिपासु० | ७०२ | १ | प्रतीपोक्तिमति |
| ६७६ | २६ | शृण्वति | ७०२ | ७ | साधूपनीतं |
| ६७७ | ५ | पृथगथो | ७०३ | २ | पल्लवितश्चिरं |
| ६७८ | ६ | ०मपरान्नृपपुत्री | ७०५ | ११ | सपक्षैकविधो: |
| ६७९ | १५ | विशिष्य | ७०५ | १५ | अस्या: |
| ६७९ | १६ | शैशवावधि | ७०५ | २३ | कोशान्धकारादथ |
| ६८० | २६ | इत्यमुं | ७०६ | ३ | व्यधाद्द्विधे० |
| ६८० | २३ | यद्यशो | ७०६ | २४ | कुरङ्गी |

| पृष्ठं | पंक्ति | शुद्धम् |
|---|---|---|
| ८४३ | २४ | ०दर्पणार्पणम् |
| ८४७ | १ | हृत्यालेपु० |
| ८४७ | २ | हंकुर्वत्वनु० |
| ८६९ | २५ | कुरुसैन्यं |
| ८७५ | १६ | ०थैवं |
| ८७८ | २५ | नाकस्मात्वं |
| ८८० | ९ | कीर्णद्विश्मनि |
| ८८० | २२ | यत्याधारेऽमरागारे |
| ८८५ | २६ | ०र्यः |
| ८८७ | ८ | ०मितिवृत्तमाश्रिताः |
| ८८७ | ११ | शंभुदारुवनसंभुजि-क्रियामाघवस्रज० |
| ८९६ | २ | ०दर्शनसुखान्यभुंक्त |
| ९०४ | १२ | शिशिरमहसो |
| ९१५ | २१ | ०माश्लिष्ट० |
| ९१७ | ७ | सखीचित्ते |
| ९१७ | १३ | चक्षुषोः |
| ९१८ | १ | नमयन्ती |
| ९२१ | १५ | पीडयती |
| ९२३ | १४ | मीदृशि |
| ९२६ | १७ | ०दीक्षण- |
| ९२६ | १९ | ०द्राङ्निर्गतः |
| ९२७ | ८ | नृपस्तद्० |
| ९२८ | २ | ०करङ्घ्रिका० |
| ९३० | ९ | स्रङ्मयः |
| ९४४ | ६ | निकोचवत्यः |
| ९५९ | १ | विवेश |
| ९६२ | २० | विधुवास्तुमन्तम् |
| ९६४ | ३ | पश्योच्च० |
| ९६६ | २३ | रङ्कुमयं |
| ९६७ | १५ | ०मुडुगणमगणनम० |

॥ अर्हम् ॥

हालारदेशोद्धारक-पूज्याचार्यदेवश्रीविजयामृतसूरिभ्यो नमः

# काव्यषट्कम्

( रघुवंश-कुमारसंभव-किरातार्जुनीय-शिशुपालवध-
नैषध-मेघदूतात्मकम् )

—:—

॥ १ ॥ प्रथमं काव्यं ॥

महाकवि श्री कालिदासविरचितं

# :: रघुवंशम् ::

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ २ ॥
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ ३ ॥
अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां ,योगेनान्ते तनुत्यजाम् ॥ ८ ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥
वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२ ॥
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४ ॥
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ १५ ॥
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥
रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७ ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
*सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८ ॥*

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ १९ ॥
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ २० ॥
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१ ॥
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२ ॥
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३ ॥
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥
स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ २५ ॥
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ २६ ॥
न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ २७ ॥
द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८ ॥
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९ ॥
स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ ३० ॥
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ ३१ ॥

कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तथा मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ ३२ ॥
तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३ ॥
संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ ३४ ॥
अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५ ॥
स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६ ॥
मा भूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७ ॥
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८ ॥
मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ ३९ ॥
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४० ॥
श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१ ॥
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२ ॥
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥ ४३ ॥
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४ ॥

हैयंगवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ ४५ ॥
काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ४६ ॥
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥ ४७ ॥
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ ४८ ॥
वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥ ४९ ॥
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥ ५० ॥
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहंगानामालवालाम्बुपायिनाम् ॥ ५१ ॥
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥ ५२ ॥
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ ५३ ॥
अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोहयत्पत्नीं रथादवततार च ॥ ५४ ॥
तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५ ॥
विधेः सायंतनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६ ॥
तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७ ॥

तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८ ॥
अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ ५९ ॥
उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥ ६० ॥
तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१ ॥
हवीरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥ ६२ ॥
पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३ ॥
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥
किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥
नूनं मत्तः पर वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥
मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥
सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ ६८ ॥
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ ६९ ॥
तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥ ७० ॥

असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुंतुदमिवालानमनिर्वाणस्य दन्तिनः ॥ ७१ ॥
तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ ७२ ॥
इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३ ॥
सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ ७४ ॥
पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥ ७५ ॥
धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥ ७६ ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ ७७ ॥
स शापो न त्वया राजन्न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८ ॥
ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ७९ ॥
हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥
सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥ ८१ ॥
इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥ ८२ ॥
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ॥ ८३ ॥

भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ ८४ ॥

रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥ ८५ ॥

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ॥

अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ ८७ ॥

वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८ ॥

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ८९ ॥

वधूर्भक्तिमती चैनामर्चितामा तपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९० ॥

इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥ ९१ ॥

तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२ ॥

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ॥ ९३ ॥

सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ॥ ९४ ॥

निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।

तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥ ९५ ॥
( प्रहर्षिणीयम् )

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
वसिष्ठाश्रमाभिगमनो नाम प्रथमः सर्गः ॥१॥

## ॥ २ ॥ अथ द्वितीयः सर्गः ॥

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥
तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥२॥
निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥ ३ ॥
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।४।
आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ५
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ।६।
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥ ७ ॥
लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान् ॥८॥
विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥९॥

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् ।
अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ।१०।
धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णं प्रकामविस्तारफलं हरिण्यः ।११।
स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ।१२।
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ।। १३ ।।
शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने ।१४।
संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ।।१५।।
तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ।१६।
स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ।
आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलंचक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ।१८।
वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ।
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ।। २० ।।
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ।२१
वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ।२२।

गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ।२३।
तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ।।२४।।
इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ।२५।
अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।। २६ ।।
सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।२७।
तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ।२८।
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ।२९।
ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ।३०।
वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ।३१।
बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ।।३२।।
तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ।३३।
अलं महिपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ।३४।
कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ।३५।

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ।३६।
कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ।।३७।।
तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः सूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्तिः ।३८।
तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ।।३९।।
स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ।४०।
इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ।४१।
प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ।।४२।।
संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ।४३।
मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ।। ४४ ।।
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ।।४५।।
अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ।।४६।।
एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ।४७
भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ।४८।

अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ।
तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ।।५०।।
एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ।५१
निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ।५२
क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ।। ५३ ।।
कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम् ।।५४।।
सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ।५५।
भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।५६।
किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।५७।
संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते ।
तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ।५८।
तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ।।५९।।
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ।।६०।।
उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ।६१।

तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ।६२
भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ।।६३।।
ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ।। ६४ ।।
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ।।६५।।
वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।६६
इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ।।६७।।
तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ।। ६८ ।।
स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ।६९।
प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ।७०
प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ।।७१।।
श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्धातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ।। ७२ ।।
तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ।।७३।।
पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजंगेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ।। ७४ ।।

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥७५॥ (मालिनी)

॥ इति महकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः ॥ २ ॥

## ॥ ३ ॥ अथ तृतीयः सर्गः ॥

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ ।१
(वंशस्थम्)
शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥२॥
तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥
दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ।
न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः ॥५॥
उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ।६।
क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा ।
पुराणपत्रापगमादनन्तरं लतेव संनद्धमनोज्ञपल्लवा ॥ ७ ॥
दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम् ॥

निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ।९
प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसम्पदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ।१०
सुरेन्द्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः ।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः ।११
कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ।।
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ।।१३
दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ।।
अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ।।१५
जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरम् ।
अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ।।१६।।
निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि ।।१७।।
स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ।।१८
सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ।१९
न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ।
ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ।
श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ।२१

पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिनेदिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ।।२२।।
उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरंदरौ ।
तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ।।२३
रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत ।।२४।।
उवाच धात्र्या प्रथमोदितं वचो,
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया,
पितुर्मुदं तेन ततान सोऽर्भकः ।। २५ ।।
तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ।२६।
अमंस्त चानेन परार्ध्यजन्मना,
स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।
स्वमूर्तिभेदेन गुणाग्र्यवर्तिना,
पतिः प्रजानामिव सर्गमात्मनः ।। २७ ।।
स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ।२८।
अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ।२९।
धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ।।
त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ।३१।
महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ।३२।

अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद्गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ।३३।
युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः ।
वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नोचैर्विनयाददृश्यत ।।३४।।
ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ।३५।
नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम् ।
अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ।।
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसह कटप्रभेदेन करीव पार्थिवः ।।३७।।
नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ।।३८।।
ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ।३९।
विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ।
वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ।४०।
तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ।।४१।।
स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसम्भवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ।४२।
शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ।४३।
मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे ।
*अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ।४४।*
त्रिलोकनाथेन सदा मखद्विषस्-
त्वया नियम्या ननु दिव्यचक्षुषा ।

स चेत्स्वयं कर्मसु धर्मचारिणां,
त्वमन्तरायो भवसि च्युतो विधिः ॥४५॥
तदङ्गमग्र्यं मघवन्महाक्रतो-
रमुं तुरंगं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा,
मलीमसामाददते न पद्धतिम् ॥ ४६ ॥
इति प्रगल्भं रघुणा समीरितं,
वचो निशम्याधिपतिर्दिवौकसाम् ।
निवर्तयामास रथं सविस्मयः,
प्रचक्रमे च प्रतिवक्तुत्तरम् ॥ ४७ ॥
यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया,
भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥४८॥
हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं,
द्वितीयगामी नहि शब्द एष नः ॥ ४९ ॥
अतोऽयमश्वः कपिलानुकारिणा,
पितुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः,
पदं पदव्यां सगरस्य संततेः ॥ ५० ॥
ततः प्रहस्यापभयः पुरंदरं,
पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते,
न खल्वनिर्जित्य रघुं कृती भवान् ॥ ५१ ॥
स एवमुक्त्वा मघवन्तमुन्मुखः,
करिष्यमाणः सशरं शरासनम् ।

अतिष्ठदालीढविशेषशोभिना,
वपुःप्रकर्षेण विडम्बितेश्वरः ।। ५२ ।।
रघोरवष्टम्भमयेन पत्त्रिणा,
हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्तलाञ्छने,
धनुष्यमोघं समधत्त सायकम् ।। ५३ ।।
दिलीपसूनोः स बृहद्भुजान्तरं,
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ।। ५४ ।।
हरेः कुमारोऽपि कुमारविक्रमः,
सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ।। ५५ ।।
जहार चान्येन मयूरपत्त्रिणा,
शरेण शक्रस्य महाशनिध्वजम् ।
चुकोप तस्मै स भृशं सुरश्रियः,
प्रसह्य केशव्यपरोपणादिव ।। ५६ ।।
तयोरुपान्तस्थितसिद्धसैनिकं,
गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणो-
रघोमुखैरूर्ध्वमुखैश्च पत्त्रिभिः ।। ५७ ।।
अतिप्रबन्धप्रहितास्त्रवृष्टिभि-
स्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः,
स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ।। ५८ ।।

ततः प्रकोष्ठे हरिचन्दनाङ्किते,
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्रिणा,
शरासनज्यामलुनाद्बिडौजसः ॥ ५९ ॥
स चापमुत्सृज्य विवृद्धमत्सरः,
प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं,
स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ६० ॥
रघुर्भृशं वक्षसि तेन ताडितः
पपात भूमौ सह सैनिकाश्रुभिः ।
निमेषमात्रादवधूय तद्व्यथां,
सहोत्थितः सैनिकहर्षनिःस्वनैः ॥ ६१ ॥
तथापि शस्त्रव्यवहारनिष्ठुरे,
विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा,
पदं हि सर्वत्र गुणैर्निधीयते ॥ ६२ ॥
असङ्गमद्रिष्वपि सारवत्तया,
न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरंगमा-
त्किमिच्छसीति स्फुटमाह वासवः ॥ ६३ ॥
ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ॥६४॥
अमोच्यमश्वं यदि मन्यसे प्रभो,
ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः,
क्रतोरशेषेण फलेन युज्यताम् ॥ ६५ ॥

यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव संदेशहराद्विशांपतिः शृणोति लोकेश तथा विधीयताम् ।६६
तथेति कामं प्रतिशुश्रुवान्रघो-
यथागतं मातलिसारथिर्ययौ ।
नृपस्य नातिप्रमनाः सदोगृहं,
सुदक्षिणासूनुरपि न्यवर्तत ।। ६७ ।।
तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः ।
परामृशन्हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ।६८।
इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ।।६६।।
अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे,
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये,
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ।।७०।। (हरिणी)

## ।। ४ ।। अथ चतुर्थः सर्गः ।।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ।। १ ।।
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ।। २ ।।
पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ।। ३ ।।
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ।। ४ ।।
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ।। ५ ।।

परिकल्पितसांनिध्या काले काले च बन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ॥ ७ ॥
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ८ ॥
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ १० ॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ १४ ॥
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥ १५ ॥
वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥
पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ १७ ॥
प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८ ॥

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९ ॥
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१ ॥
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२ ॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३ ॥
सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥
तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥
रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः ।
भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् ॥ २९ ॥
प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३० ॥
मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१ ॥

स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२ ॥
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥
अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥
वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः ॥ ३६ ॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥
स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥
प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥

स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६ ॥
ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ॥ ४८ ॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९ ॥
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥ ५० ॥
स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५१ ॥
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ५२ ॥
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत्सह्यलग्न इवार्णवः ॥ ५३ ॥
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥
मुरलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥
अभ्यभूयत वाहानां चरतां गात्रसिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६ ॥
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेष करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ॥ ५७ ॥

अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥
सङ्ग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥ ६६ ॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥ ६७ ॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥
काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९ ॥
तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ७० ॥

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२ ॥
भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥
विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥
तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् ।
जयोदाहरण बाह्वोर्गापयामास किन्नरान् ॥ ७८ ॥
परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९ ॥
तत्राक्षोभ्यं यशोराशि निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥
चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥
तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्त्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥
सत्त्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधा-
न्राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥ ( प्रहर्षिणीयम् )
ते रेखाध्वजकुलिशातपत्त्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
रघुदिग्विजयो नाम चतुर्थः सर्गः । ४ ॥

## ॥ ५ ॥ अथ पञ्चमः सर्गः ॥

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥१॥
स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥२॥
तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ।३।
अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥४॥

कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ।५।
आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ।६।
क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ।७।
निर्वर्त्यते यैर्नियमाभिषेको,
येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छषष्ठाङ्कितसैकतानि,
शिवानि वस्तीर्थजलानि कच्चित् ॥ ८ ॥
नीवारपाकादि कडंगरीयैरामृश्यते जानपदैर्न कच्चित् ।
कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ।९।
अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥
तवार्हतो नाभिगमेन तृप्तं,
मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा,
प्राप्तोऽसि संभावयितुं वनान्माम् ॥ ११ ॥
इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ।१२।
सर्वत्र नो वार्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ।१३।
भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ।१४।
शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ।१५।

स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ।१६।
तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ।१७।
एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ।।१८।।
ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ।१९।
समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् २०
निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।२१।
सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ।२२।
इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ।। २३ ।।
गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ।।२४।।
स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थम् ।।२५।।
तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ।२६।
वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ।।२७।।
अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ।।२८।।

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ।२९।
तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ।३०।
जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ।।३१।।
अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ।३२।
किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ।३३।
आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ।।३४।।
इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ।३५।
ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ३६
रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७
उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ३८
अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ।३९।
तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम् ।
प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम् ।४०।
तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः ।
मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ।। ४१ ।।

स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्व-क्लान्तं रजोधूसरकेतु सैन्यम् ४२
अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्यःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ।४३।
निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ।
नीलोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन ॥४४॥
संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन्बृहतस्तरंगान्वार्यर्गलाभङ्ग इव प्रवृत्तः ॥४५॥
शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् ।
पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ॥ ४६ ॥
तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता ।
वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ॥ ४८ ॥
सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखा बभूवुः ।४८।
स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ॥ ४९ ॥
तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः ।
निवर्तयिष्यन्विशिखेन कुम्भे जघान नात्यायतकृष्टशार्ङ्गः ५०
स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः ।
स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे ॥ ५१ ॥
अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ।५२।
मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥ ५३ ॥
स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ।५४।

इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुम्भमयोमुखेन ।
संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्माम् ।५५।
संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ५६
संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५७
अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वम् ।
तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ५८

तथेत्युपस्पृश्य पयः पवित्रं,
सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं,
जग्राह तस्मान्निगृहीतशापात् ।। ५९ ।।

एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ।।६०।।
तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः ।
प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ।६१।
प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ।
मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ।। ६२ ।।

तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां,
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् ।
रम्यां रघुप्रतिनिधिः स नवोपकार्यां,
बाल्यात्परामिव दशां मदनोऽध्युवास ।।६३।। (वसंततिलका)

तत्र स्वयंवरसमाहृतराजलोकं,
कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ,
निद्रा चिरेण नयनाभिमुखी बभूव ।। ६४ ।।

तं कर्णभूषणनिपीडितपीवरांस,
शय्योत्तरच्छदविमर्दकृशाङ्गरागम् ।
सूतात्मजाः सवयसः प्रथितप्रबोधं,
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ ६५ ॥
रात्रिर्गता मतिमतां वर मुञ्च शय्यां,
धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।
तामेकतस्तव विभर्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्यपदावलम्बी ॥ ६६ ॥
निद्रावशेन भवताप्यनवेक्षमाणा,
पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी,
सोऽपि त्वदाननरुचि विजहाति चन्द्रः ॥६७॥
तद्वल्गुना युगपदुन्मिषितेन ताव-
त्सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ ६८ ॥
वृन्ताच्छ्लथं हरति पुष्पमनोकहानां,
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९ ॥
ताम्रोदरेषु पतितं तरुपल्लवेषु,
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाधरोष्ठे,
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥७०॥
यावत्प्रतापनिधिराक्रमते न भानु-
रह्नाय तावदरुणेन तमो निरस्तम् ।

आयोधनाग्रसरतां त्वयि वीर याते,
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥७१॥
शय्यां जहत्युभयपक्षविनीतनिद्राः,
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगा-
द्भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥ ७२ ॥
दीर्घेष्वमी नियमिताः पटमण्डपेषु,
निद्रां विहाय वनजाक्ष वनायुदेश्याः ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि,
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥७३॥
भवति विरलभक्तिर्म्लानपुष्पोपहारः,
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता-
मनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ।७४। (मालिनी)
इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः,
सपदि विगतनिद्रस्तल्पमुज्झांचकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः,
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥ ७५ ॥
अथ विधिमवसाय्य शास्त्रदृष्टं,
दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशलविरचितानुकूलवेषः,
क्षितिपसमाजमगात्स्वयंवरस्थम् ॥७६॥ (पुष्पिताग्रा)

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
अजस्वयंवराभिगमनो नाम पञ्चमः सर्गः ॥ ५ ॥

× ×

## ॥ ६ ॥ अथ षष्ठः सर्गः ॥

स तत्र मञ्चेषु मनोज्ञवेषा-
न्सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्य-
दाकृष्टलीलान्नरलोकपालान् ।१।(उपजातिः)
रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ।२।
वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम् ।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह ।।३।।
परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ।। ४ ।।
तासु श्रिया राजपरम्परासु प्रभाविशेषोदयदुर्निरीक्ष्यः ।
सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पङ्क्तिषु विद्युतेव ।।५।।
तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ।। ६ ।।
नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ।। ७ ।।
अथ स्तुते बन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके ।
संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः ।। ८ ।।
पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तांस्तूर्यस्वने मूर्च्छति मङ्गलार्थे ।९।
मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं पतिंवरा क्लृप्तविवाहवेषा ।१०।
तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ।। ११ ।।

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ।१२।
कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयांचकार ।।१३।।
विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः ।१४।
आकुञ्चिताग्राङ्गुलिना ततोऽन्यः
किंचित्समावर्जितनेत्रशोभः ।
तिर्यग्विसंसर्पिनखप्रभेण,
पादेन हैमं विलिलेख पीठम् ।। १५ ।।
निवेश्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः ।
कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ।१६।
विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकबर्हमन्यः ।
प्रियानितम्बोचितसंनिवेशैर्विपाटयामास युवा नखाग्रैः ।।१७।।
कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन ।
रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् ।।१८।।
कश्चिद्यथाभागमवस्थितेऽपि स्वसंनिवेशाद्व्यतिलङ्घिनीव ।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ।१९।
ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक्संनिकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनन्दा ।।२०।।
असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः परंतपो नाम यथार्थनामा ।।२१।।
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ।।२२।।
क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार २३

अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुराङ्गनानाम् ।२४।
एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वाङ्कमधूकमाला ।
ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा ।।२५।।
तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय ।
समीरणोत्थेव तरङ्गलेखा पद्मान्तरं मानसराजहंसीम् ।।२६।।
जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते २७
अनेन पर्यासयताश्रुबिन्दून्मुक्ताफलस्थूलतमान्स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ।२८।

निसर्गभिन्नास्पदमेकसंस्थ-
मस्मिन्द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या,
त्वमेव कल्याणि तयोस्तृतीया ।। २९ ।।

अथाङ्गराजादवतार्य चक्षु-
र्याहीति जन्यामवदत्कुमारी ।
नासौ न काम्यो न च वेद सम्य-
ग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ।। ३० ।।

ततः परं दुःप्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ ।
निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ।। ३१ ।।

अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजा-
स्त्वष्ट्रेव यत्नोल्लिखितो विभाति ।। ३२ ।।

अस्य प्रयाणेषु समग्रशक्ते-
रग्रेसरैर्वाजिभिरुत्थितानि ।

कुर्वन्ति सामन्तशिखामणीनां
प्रभाप्ररोहास्तमयं रजांसि ॥ ३३ ॥
असौ महाकालनिकेतनस्य
वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभि-
र्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ ३४ ॥
अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु ॥ ३५ ॥
तस्मिन्नभिद्योतितबन्धुपद्मे
प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या
कुमुद्वती भानुमतीव भावम् ॥ ३६ ॥
तामग्रतस्तामरसान्तराभा-
मनूपराजस्य गुणैरनूनाम् ।
विधाय सृष्टिं ललितां विधातु-
र्जगाद भूयः सुदतीं सुनन्दा ॥ ३७ ॥
सङ्ग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्तवीर्यः ॥३८॥
अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ॥३९॥
ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ॥४०॥
तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ॥४१॥
आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम् ।
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् ॥४२॥

अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितम्बकाञ्चीम् ।
प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ।४३।
तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ।४४।
सा शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकान्तरगीतकीर्तिम् ।
आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ।।४५।।
नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ४६
यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्टा ।
हर्म्याग्रसंरूढतृणाङ्कुरेषु तेजोऽविषह्यं रिपुमन्दिरेषु ।।४७।।
यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ।४८।
त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापि रुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम् ४९
संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये ।
वृन्दावने चैत्ररथादनूने निविश्यतां सुन्दरि यौवनश्रीः ।।५०।।
अध्यास्य चाम्भःपृषतोक्षितानि शैलेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु ।५१।
नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव । ५२ ।।
अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ।।५३।।
असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च ।
यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ।५४।
ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः ।
रिपुश्रियां साञ्जनबाष्पसेके बन्दीकृतानामिव पद्धती द्वे ।५५।

यमात्मनः सद्मनि संनिकृष्टो मन्द्रध्वनित्याजितयामतूर्यः ।
प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम् ॥५६॥
अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ ५७ ॥
प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ।५८।
अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य ।
इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्याम् ५९
पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ।६०।
विन्ध्यस्य संस्तम्भयिता महाद्रे-
निःशेषपीतोज्झितसिन्धुराजः ।
प्रीत्याश्वमेधावभृथार्द्रमूर्तेः,
सौस्नातिको यस्य भवत्यगस्त्यः ॥ ६१ ॥
अस्त्रं हरादाप्तवता दुराप येनेन्द्रलोकावजयाय दृप्तः ।
पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपतिः प्रतस्थे ।६२।
अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ६३
ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु ।
तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥ ६४ ॥
इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ।६५।
स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ॥ ६६ ॥
संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥ ६७ ॥

तस्यां रघोः सूनुरुपस्थितायां,
वृणीत मां नेति समाकुलोऽभूत् ।
वामेतरः संशयमस्य बाहुः,
केयूरबन्धोच्छ्वसितैर्नुनोद ।। ६८ ।।
तं प्राप्य सर्वावयवानवद्यं,
व्यावर्ततान्योपगमात्कुमारी ।
न हि प्रफुल्लं सहकारमेत्य,
वृक्षान्तरं काङ्क्षति षट्पदाली ।। ६९ ।।
तस्मिन्समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुमतीमवेक्ष्य ।
प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा ।।७०।।
इक्ष्वाकुवंश्यः ककुदं नृपाणां,
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः,
श्लाघ्यं दधत्युत्तरकोसलेन्द्राः ।। ७१ ।।
महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः ।७२।
ऐरावतास्फालनविश्लथं यः संघट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोऽधितष्ठौ ।७३।
जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः ।
अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ।। ७४ ।।
यस्मिन्महीं शासति वाणिनीनां, निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि, को लम्बयेदाहरणाय हस्तम् ।७५।
पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिम् ।।७६।।
आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयालम् ७७

असौ कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः ।
गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशं बिभर्ति ।७८।
कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ।७९।
ततः सुनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥ ८० ॥
सा यूनि तस्मिन्नभिलाषबन्धं,
शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं,
भित्त्वा निराक्रामदरालकेश्याः ॥ ८१ ॥
तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥ ८२ ॥
सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम् ।८३।
तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया सः ।
अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ।।८४।।
शशिनमुपगतेयं कौमुदी मेघमुक्तं,
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः,
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ ८५ ॥ (मालिनी)
प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमण्डलमन्यतो वितानम् ।
उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ।८६।
(पुष्पिताग्रा)

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
स्वयंवरवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

## ॥ ७ ॥ अथ सप्तमः सर्गः ॥

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् ।
स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव ।। १ ।।
सेनानिवेशान्पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः ।
भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः ।।२।।
सांनिध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोकः ३
तावत्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम् ।
वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ४
ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ।५।
आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः ।६।
प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ।। ७ ।।
विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ।। ८ ।।
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ।।९।।
अर्धाञ्चिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद्रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ।१०।
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ।। ११ ।।
ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ।१२।

स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या ।
पद्मेव नारायणमन्यथासौ लभेत कान्तं कथमात्मतुल्यम् ।१३।
परस्परेण स्पृहणीयशोभं,
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः,
पत्युः प्रजानां वितथोऽभविष्यत् ॥ १४ ॥
रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला ।
गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसङ्गतिज्ञम् ॥१५॥
इत्युद्गताः पौरवधूमुखेभ्यः,
शृण्वन्कथाः श्रोत्रसुखाः कुमारः ।
उद्भासितं मङ्गलसंविधाभिः,
संबन्धिनः सद्म समाससाद ॥ १६ ॥
ततोऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः ।
वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः ॥१७॥
महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम् ।
भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः ॥१८॥
दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः ।
वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥ १९ ॥
तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः ।
तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांचकार ॥ २० ॥
हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे ।
अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ॥ २१ ॥
आसीद्वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।
तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ।२२।
तयोरपाङ्गप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि २३

प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥२४॥
नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ।२५।
हविः शमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥२६॥
तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरम् ।
वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद्बभूव ॥ २७ ॥
तौ स्नातकैर्बन्धुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम् ।२८।
इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥२९॥
लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः ।
वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाच्छलेन ॥३०॥
स राजलोकः कृतपूर्वसंविदारम्भसिद्धौ समयोपलभ्यम् ।
आदास्यमानः प्रमदामिषं तदावृत्य पन्थानमजस्य तस्थौ ।३१।
भर्तापि तावत्क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः ।
सत्त्वानुरूपाहरणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ॥३२॥
तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ।३३।
प्रमन्यवः प्रागपि कोसलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः ।
अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ।३४
तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः ।
बलिप्रदिष्टां श्रियमाददानं त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥३५॥
तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः ।
प्रत्यग्रहीत्पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरंगः ।३६।

पत्तिः पदातिं रथिनं रथेशस्तुरङ्गसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ।३७।
नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलोपदेशान् ।
बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ।।३८।।
उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
विस्तारितः कुञ्जरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यम् ।।३९।।
मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ।४०।
रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नागः ।
स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः ।।४१।।
आवृण्वतो लोचनमार्गमाजौ रजोऽन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा बालरुणोऽभूद्रुधिरप्रवाहः ।।४२।।
स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ।।४३।।
प्रहारमूर्च्छापगमे रथस्था यन्तॄनुपालभ्य निवर्तिताश्वान् ।
यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ।४४।।
अप्यर्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः ।
संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यम् ।४५।
आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः ।
हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ।४६।
पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ।४७।
तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः ।
उद्यन्तमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण ।।४८।।
शिलीमुखोत्कृत्तशिरः फलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ।४९।

उपान्तयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि ।
केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥ ५० ॥
कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ।५१।
अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ बाहुविमर्दनिष्ठौ ।५२।
परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ।५३
व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थम् ।
पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥५४॥
परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्येत समीरणेन यतस्तु कक्षस्तत एव वह्निः ॥५५॥
रथी निषङ्गी कवची धनुष्मान्दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः ।५६।
स दक्षिणं तूणमुखेन वामं व्यापारयन्हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ५७
स रोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ।५८।
सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कटभेदिभिश्च ।
सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ।५९।
सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ।
नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥६०॥
प्रियंवदात्प्राप्तमसौ कुमारः प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ६१
ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम् ।६२।

ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ।
तेन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे ॥६३॥
शङ्खस्वनाभिज्ञतया निवृत्ता-
स्तं सन्नशत्रुं ददृशुः स्वयोधाः ।
निमीलितानामिव पङ्कजानां,
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥ ६४ ॥
सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानाम् ।
यशो हृतं संप्रति राघवेण
न, जीवितं वः कृपयेति वर्णाः ॥ ६५ ॥
स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ।
ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ॥६६॥
इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि ।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥६७॥
तस्याः प्रतिद्वन्द्विभवाद्विषादा-
त्सद्यो विमुक्तं मुखमाबभासे ।
निःश्वासबाष्पापगमात्प्रपन्नः,
प्रसादमात्मीयमिवात्मदर्शः ॥ ६८ ॥
हृष्टापि सा ह्रीविजिता न साक्षा-
द्वाग्भिः सखीनां प्रियमभ्यनन्दत् ।
स्थलीनवाम्भःपृषताभिवृष्टा,
मयूरकेकाभिरिवाभ्रवृन्दम् ॥ ६९ ॥
इति शिरसि स वामं पादमाधाय राज्ञा-
मुदवहदनवद्यां तामवद्यादपेतः ।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्ता बभूव ॥ ७० ॥
( मालिनी )

प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् ।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू-
न्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ ७१ ॥

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
अजेनेन्दुमतीपाणिग्रहणो नाम सप्तमः सर्गः ॥ ७ ॥

—✱—

## ॥ ८ ॥ अष्टमः सर्गः ॥

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ॥ १ ॥
( वैतालीयं )
दुरितैरपि कर्तुमात्मसात्प्रयतन्ते नृपसूनवो हि यत् ।
तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥ २ ॥
अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनम् ।
विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ॥ ३ ॥
स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः ।
पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ॥ ४ ॥
रघुमेव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि ॥५॥
अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव सङ्गतम् ।
पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनम् ॥ ६ ॥
सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥ ७ ॥

अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ ८ ॥
न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहामिव ।
स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥ ९ ॥
अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया ।
विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ॥१०॥
गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ॥ ११ ॥
तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ १२ ॥
रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः ।
न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥१३॥
स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः ।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥१४॥
प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥ १५ ॥
यतिपार्थिवलिङ्गधारिणौ ददृशाते रघुराघवौ जनैः ।
अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ॥ १६ ॥
अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः ।
अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ॥ १७ ॥
नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा ।
परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् ॥ १८ ॥
अनयत्प्रभुशक्तिसंपदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥१९॥
अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात् ।
इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना ॥ २० ॥

पणबन्धमुखान्गुणानजः षडुपायुङ्क्त समीक्ष्य तत्फलम् ।
रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकाञ्चनः ॥ २१ ॥
न नवः प्रभुराफलोदयात्स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् ॥ २२ ॥
इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥ २३ ॥
अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः ।
तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः ॥ २४ ॥
श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ॥२५॥
अकरोत्स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् ।
न हि तेन पथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः ॥२६॥
स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः ।
शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् ॥ २७ ॥
क्षितिरिन्दुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् ।
प्रथमा बहुरत्नसूरभूदपरा वीरमजीजनत्सुतम् ॥ २८ ॥
दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥ २९ ॥
ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्णदीधितिः ॥ ३० ॥
बलमार्तभयोपशान्तये विदुषां सत्कृतये बहुश्रुतम् ।
वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना ॥ ३१ ॥
स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजः ।
नगरोपवने शचीसखो मरुतां पालयितेव नन्दने ॥ ३२ ॥
अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः ॥ ३३ ॥

कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशिताम् ।
अहरत्किल तस्य वेगवानधिवासस्पृहयेव मारुतः ॥ ३४ ॥
भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः ।
ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलम् ॥ ३५ ॥
अभिभूय विभूतिमार्तवीं मधुगन्धातिशयेन वीरुधाम् ।
नृपतेरमरस्रगाप सा दयितोरुस्तनकोटिसुस्थितिम् ॥ ३६ ॥
क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया हृतचन्द्रा तमसेव कौमुदी ॥ ३७ ॥
वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम् ॥ ३८ ॥
उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ॥३९॥
नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता ।
प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ॥ ४० ॥
प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्त्वविप्लवात् ।
स निनाय नितान्तवत्सलः परिगृह्योचितमङ्कमङ्गनाम् ॥४१॥
पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ॥ ४२ ॥
विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ ४३ ॥
कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥४४॥
अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ ४५ ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ४६ ॥

अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ।। ४७ ।।
कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ।। ४८ ।।
ध्रुवमस्मि शठः शुचिस्मिते ! विदितः कैतववत्सलस्तव ।
परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ।। ४९ ।।
दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम प्रबलामात्मकृतेन वेदनाम् ।। ५० ।।
सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते ।
अथ चास्तमिता त्वमात्मना धिगिमां देहभृतामसारताम् ।५१।
मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ।।५२।।
कुसुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ।। ५३ ।।
तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ।। ५४ ।।
इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम् ।। ५५ ।।
शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ।।५६।।
नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ।।५७।।
इयमप्रतिबोधशायिनीं रशना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ।। ५८ ।।
कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ।। ५९ ।।

त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया ।
विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥ ६० ॥
मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतम् ॥ ६१ ॥
कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ॥६२॥
स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥६३॥
तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया ।
असमाप्य विलासमेखलां किमिदं किंनरकण्ठि सुप्यते ॥६४॥
समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ ६५ ॥
धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ ६६ ॥
गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वा वद किं न मे हृतम् ।६७।
मदिराक्षि ! मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ॥६८॥
विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥६९॥
विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥ ७० ॥
अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीम् ।
विससर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे ॥ ७१ ॥
प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् ।
न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ।७२।

अथ तेन दशाहतः परे गुणशेषामुपदिश्य भामिनीम् ।
विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ॥ ७३ ॥
स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ॥ ७४ ॥
अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥७५॥
असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथश्च्युतम् ॥७६
मयि तस्य सुवृत्त ! वर्तते लघुसंदेशपदा सरस्वती ।
शृणु विश्रुतसत्त्वसार ! तां हृदि चैनामुपधातुमर्हसि ॥ ७७ ॥
पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ ७८ ॥
चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥७९॥
स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि ॥ ८० ॥
भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवाना सुरपुष्पदर्शनात् ॥ ८१ ॥
क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥८२॥
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥८३॥
उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ॥ ८४ ॥
रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥८५॥

अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः ।
स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ ८६ ॥

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥ ८७ ॥

अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ ८८ ॥

स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ ८९ ॥

न पृथग्जनवच्छुचो वशं वशिनामुत्तम ! गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥९०॥

स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ।९१।

( तोटकं )

तेनाष्टौ परिगमितः समाः
कथंचिद्बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥ ९२ ॥

( प्रहर्षिणी )

तस्य प्रसह्य हृदयं किल शोकशङ्कुः ।
प्लक्षप्ररोह इव सौधतलं बिभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमने त्वरया स मेने ॥ ९३ ॥

( वसंततिलका )

सम्यग्विनीतमथ वर्महरं कुमार-
मादिश्य रक्षणविधौ विधिवत्प्रजानाम् ।

रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव ।। ९४ ।।
( वसंततिलका )

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकतररुचा संगतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ।।९५।।
( मन्दाक्रान्ता )

।। इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
अजविलापो नाम अष्टमः सर्गः ।। ८ ।।

## ॥ ९ ॥ नवमः सर्गः ॥

पितुरनन्तरमुत्तरकोसलान्समधिगम्य समाधिजितेन्द्रियः ।
दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः ।।१।।
( द्रुतविलंबितं )

अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितम् ।
अभवदस्य ततो गुणवत्तरं सनगरं नगरन्ध्रकरौजसः ।। २ ।।
उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् ।
बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम् ।। ३ ।।
जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः ।
क्षितिरभूत्फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ।।४।।
दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् ।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ।। ५ ।।
समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ।। ६ ।।

न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु ।
तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ।।७।।
न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ।।८।।
उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः ।
स हि निदेशमलङ्घयतामभूत्सुहृदयोहृदयः प्रतिगर्जताम् ।।९।।
अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः ।
जयमघोषयदस्य तु केवलं गजवती जवतीव्रहया चमूः ।।१०।।
अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः ।
विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ।। ११ ।।
शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरंदरः ।
स शरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः ।१२।
चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् ।
नृपतयः शतशो मरुतो यथा शतमखं तमखण्डितपौरुषम् ।।१३।।
निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।
समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीम् ।।१४।।
उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः ।
श्रियमवेक्ष्य स रन्ध्रचलामभूदनलसोऽनलसोमसमद्युतिः ।।१५।।
तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभवं च पतिव्रता ।
नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ।। १६ ।।
तमलभन्त पतिं पतिदेवताः शिखरिणामिव सागरमापगाः ।
मगधकोसलकेकयशासिनां दुहितरोऽहितरोपितमार्गणम् ।।१७।।
प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः ।
उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ।।१८।।
स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः ।
स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ।।१९।।

ऋतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः ।
कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः ॥२०॥
अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम् ।
अधिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥२१॥
अवभृथप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः ।
नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः ॥२२॥
असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता ।
दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम् ।२३।
अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् ।
यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरञ्चितविक्रमम् ॥२४॥
जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत् ।२५।
कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् ।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् ।२६।
नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः ।
अभिययुः सरसो मधुसंभृतां कमलिनीमलिनीरपतत्त्रिणः ।२७।
कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनम् ।
किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः २८
विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः ।
मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः ।२९।
सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ॥३०॥
उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥३१॥
व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमम् ।३२।

अभिनयान्परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि ३३
प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः ।
सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ३४
श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ३५
ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम् ।
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितम् ३६
शुशुभिरे स्मितचारुतराननाः
स्त्रिय इव श्लथशिञ्जितमेखलाः
विकचतामरसा गृहदीर्घिका,
मदकलोदकलोलविहंगमाः ॥ ३७ ॥
उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।
सदृशमिष्टसमागमनिर्वृतिं वनितयानितया रजनीवधूः ॥३८॥
अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।
कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ॥३९॥
हुतहुताशनदीप्ति वनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ॥ ४० ॥
अलिभिरञ्जनबिन्दुमनोहरैः,
कुसुमपङ्क्तिनिपातिभिरङ्कितः ।
न खलु शोभयति स्म वनस्थलीं,
न तिलकस्तिलकः प्रमदामिव ॥ ४१ ॥
अमदयन्मधुगन्धसनाथया किसलयाधरसंगतया मनः ।
कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ४२
अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ४३

उपचितावयवा शुचिभिः कणैरलिकदम्बकयोगमुपेयुषी ।
सदृशकान्तिरलक्ष्यत मञ्जरी तिलकजालकजालकमौक्तिकैः ४४
ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः ।
कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ॥ ४५ ॥
अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे भुजलतां जलतामबलाजनः ॥४६॥
त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ।४७।
अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः ।
नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः ॥४८॥
परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम् ।
श्रमजयात्प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ ।४९।
मृगवनोपगमक्षमवेषभृद्विपुलकण्ठनिषक्तशरासनः ।
गगनमश्वखुरोद्धतरेणुभिर्नृसविता स वितानमिवाकरोत् ।५०।
ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः ।
तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ॥५१॥
तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ।
ददृशुरध्वनि तं वनदेवताः सुनयनं नयनन्दितकोसलम् ॥५२॥
श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः ।
स्थिरतुरंगमभूमि निपानवन्मृगवयोगवयोपचितं वनम् ।५३।
अथ नभस्य इव त्रिदशायुधं कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥ ५४ ॥

तस्य स्तनप्रणयिभिर्मुहुरेणशावै-
व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारम् ॥ ५५ ॥
(वसंततिलका)

तत्प्रार्थितं जवनवाजिगतेन राज्ञा
तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति ।
श्यामीचकार वनमाकुलदृष्टिपातै-
र्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ॥ ५६ ॥
लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम् ।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसंजहार ॥ ५७ ॥
तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि ॥ ५८ ॥
उत्तस्थुषः सपदि पल्वलपङ्कमध्या-
न्मुस्ताप्ररोहकवलावयवानुकीर्णम् ।
जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥ ५९ ॥
तं वाहनादवनतोत्तरकायमीष-
द्विध्यन्तमुद्धृतसटाः प्रतिहन्तुमीषुः ।
नात्मानमस्य विविदुः सहसा वराहा
वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ॥ ६० ॥
तेनाभिघातरभसस्य विकृष्य पत्री
वन्यस्य नेत्रविवरे महिषस्य मुक्तः ।
निर्भिद्य विग्रहमशोणितलिप्तपुङ्ख-
स्तं पातयां प्रथममास पपात पश्चात् ॥६१॥
प्रायो विषाणपरिमोक्षलघूत्तमाङ्गा-
न्खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः ।

शृङ्गं सदृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ॥६२॥
व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान् ।
शिक्षाविशेषलघुहस्ततया निमेषा-
त्तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥ ६३ ॥
निर्घातोग्रैः कुञ्जलीनाञ्जिघांसु-
र्ज्यानिर्घोषैः क्षोभयामास सिंहान् ।
नूनं तेषामभ्यसूयापरोऽभू-
द्वीर्योदग्रे राजशब्दे मृगेषु ॥६४॥ (शालिनी
तान्हत्वा गजकुलबद्धतीव्रवैरा-
न्काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् ।
आत्मानं रणकृतकर्मणां गजा-
नामानृण्यं गतमिव मार्गणैरमंस्त ॥ ६५ ॥
चमरान्परितः प्रवर्तिताश्वः
क्वचिदाकर्णविकृष्टभल्लवर्षी ।
नृपतीनिव तान्वियोज्य सद्यः
सितबालव्यजनैर्जगाम शान्तिम् ॥ ६६ ॥
( औपच्छन्दसिकं )
अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥ ६७ ॥
( मालिनी )
तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकम् ।
आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः ॥६८॥
( रथोद्धता )

इति विस्मृतान्यकरणीयमात्मनः
सचिवावलम्बितधुरं धराधिपम् ।
परिवृद्धरागमनुबन्धसेवया
मृगया जहार चतुरेव कामिनी ॥ ६९ ॥
स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ।
नरपतिरतिवाहयांबभूव
क्वचिदसमेतपरिच्छदस्त्रियामाम् ॥ ७० ॥
( पुष्पिताग्रा )
उषसि स गजयूथकर्णतालैः,
पटुपटहध्वनिभिर्विनीतनिद्रः ।
अरमत मधुराणि तत्र शृण्व-
न्विहगविकूजितबन्दिमङ्गलानि ॥ ७१ ॥
अथ जातु रुरोर्गृहीतवर्त्मा
विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां-
तमसां प्राप नदीं तुरंगमेण ॥ ७२ ॥
कुम्भपूरणभवः पटुरुच्चै-
रुच्चचार निनदोऽम्भसि तस्याः ।
तत्र स द्विरदबृंहितशङ्की-
शब्दपातिनमिषुं विससर्ज ॥७३॥ (स्वागता)
नृपतेः प्रतिषिद्धमेव तत्कृ-
तवान्पङ्क्तिरथो विलङ्घ्य यत् ।
अपथे पदमर्पयन्तिहि-
श्रुतवन्तोऽपि रजोनिमीलिताः ॥ ७४ ॥
( वैतालीयं )

हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन्वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत्क्षितिपोऽपि ॥ ७५ ॥
( मत्तमयूर )

तेनावतीर्य तुरगात्प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः ।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भि-
रात्मानमक्षरपदैः कथयांबभूव ।७६। (वसंत०)

तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय ।
ताभ्यां तथागतमुपेत्य तमेकपुत्र-
मज्ञानतः स्वचरितं नृपतिः शशंस ॥ ७७ ॥

तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत्परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥ ७८ ॥

दिष्टान्तमाप्स्यति भवानपि पुत्रशोका-
दन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।
आक्रान्तपूर्वमिव मुक्तविषं भुजंगं
प्रोवाच कोसलपतिः प्रथमापराद्धः ॥ ७९ ॥

शापोऽप्यदृष्टतनयाननपद्मशोभे
सानुग्रहो भगवता मयि पातितोऽयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
बीजप्ररोहजननीं ज्वलनः करोति ॥ ८० ॥

इत्थंगते गतघृणः किमयं विधत्तां
वध्यस्तवेत्यभिहितो वसुधाधिपेन ।
एधान्हुताशनवतः स मुनिर्ययाचे
पुत्रं परासुमनुगन्तुमनाः सदारः ॥ ८१ ॥
प्राप्तानुगः सपदि शासनमस्य राजा
संपाद्य पातकविलुप्तधृतिर्निवृत्तः ।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः ॥ ८२ ॥
॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
मृगयावर्णनो नाम नवमः सर्गः ॥ ९ ॥

## ॥ १० ॥ दशमः सर्गः ॥

पृथिवीं शासतस्तस्य पाकशासनतेजसः ।
किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥ १ ॥ ( अनुटुब् )
न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥ २ ॥
अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ३ ॥
ऋष्यशृङ्गादयस्तस्य सन्तः संतानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ४ ॥
तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः ॥ ५ ॥
ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ ६ ॥
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ ७ ॥

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ८ ॥
प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥ ९ ॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥ १० ॥
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥ ११ ॥
दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ॥ १२ ॥
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ १३ ॥
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥ १४ ॥
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ १५ ॥
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १६ ॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ १७ ॥
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ १८ ॥
हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ १९ ॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ २० ॥

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ २१ ॥
चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ २२ ॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ २३ ॥
अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ २४ ॥
शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ २५ ॥
बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २६ ॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयःसंनिवृत्तये ॥ २७ ॥
प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ २८ ॥
केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २९ ॥
उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ ३० ॥
अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ ३१ ॥
महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ ३२ ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ ३३ ॥

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः ।
भयमप्रलयोद्वेलादाचख्युर्नैऋतोदधेः ॥ ३४ ॥
अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ॥ ३५ ॥
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३६ ॥
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ॥ ३७ ॥
जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ ३८ ॥
विदितं तप्यमानं च तेन मे भुवनत्रयम् ।
अकामोपनतेनेव साधोर्हृदयमेनसा ॥ ३९ ॥
कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥ ४० ॥
स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ।
स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा ॥ ४१ ॥
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः ।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ॥ ४२ ॥
धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥ ४३ ॥
सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम् ।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ॥ ४४ ॥
अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः ।
मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥ ४५ ॥
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि ।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥ ४६ ॥

मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान् ।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः ॥ ४७ ॥
रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥ ४८ ॥
पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः ।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥ ४९ ॥
अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥ ५० ॥
हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥ ५१ ॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥ ५२ ॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ॥ ५३ ॥
स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥ ५४ ॥
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ५५ ॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ ५६ ॥
सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि ।
भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥ ५७ ॥
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥ ५८ ॥
सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव संपदः ॥ ५९ ॥

गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ।
जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः ॥ ६० ॥
हेमपक्षप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६१ ॥
बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम् ।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥ ६२ ॥
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥ ६३ ॥
ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥ ६४ ॥
विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥ ६५ ॥
अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ ६६ ॥
राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥ ६७ ॥
रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ ६८ ॥
शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥ ६९ ॥
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ॥ ७० ॥
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ।
सम्यगाराधिता विद्या प्रबोधविनयाविव ॥ ७१ ॥
निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् ।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ ७२ ॥

तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ ७३ ॥
कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः ।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥ ७४ ॥
दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ ७५ ॥
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥ ७६ ॥
संतानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ॥ ७७ ॥
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥ ७८ ॥
स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ।
मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम् ॥ ७९ ॥
परस्पराविरुद्धास्ते तद्रघोरनघं कुलम् ।
अलमुद्द्योतयामासुर्देवारण्यमिवर्तवः ॥ ८० ॥
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥ ८१ ॥
तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥ ८२ ॥
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ ८३ ॥
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्मार्थकाममोक्षाणामवतार इवाङ्गवान् ॥ ८४ ॥
गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः ।
*तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ॥ ८५ ॥*

सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायै: ।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयै:
पतिरवनिपतीनां तैश्चकाशे चतुर्भि: ।। ८६ ।।
( मालिनी )

।। इति महाकवि श्री कालिदासकृतौ रघुवंशे महाकाव्ये
रामावतारो नाम दशम: सर्ग: ।।१०।।

## ।। ११ ।। एकादश: सर्ग: ।।

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां हि न वय: समीक्ष्यते ।।१।।
( रथोद्धता )

कृच्छ्रलब्धमपिलब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम् ।
अप्यसुप्रणयिनां रघो: कुले न व्यहन्यत कदाचिदर्थिता ।।२।।

यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम् ।
तावदाशु विदधे मरुत्सखै: सा सपुष्पजलवर्षिभिर्घनै: ।।३।।

तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततु: ।
भूपतेरपि तयो: प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दव: ।।४।।

तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ।।५।।

लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृप: ।
आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयो: क्षमा ।६।

मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजस: ।
रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव ।। ७ ।।

वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत ।
तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ॥ ८ ॥
तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः ।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव ॥ ९ ॥
पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ।१०।
तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः ।
वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ॥११॥
नाम्भसां कमलशोभिनां तथा शाखिनां च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ॥१२॥
स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः ।
विग्रहेण मदनस्य चारुणा सोऽभवत्प्रतिनिधिर्न कर्मणा ॥१३॥
तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि ।
निन्यतुः स्थलनिवेशिताटनी लीलयेव धनुषी अधिज्यताम् १४
ज्यानिनादमथ गृह्णती तयोः प्रादुरास बहुलक्षपाछविः ।
ताडका चलकपालकुण्डला कालिकेव निबिडा बलाकिनी ।१५।
तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ।१६।
उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम् ।
तां विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः ।१७।
यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत् ॥१८॥
बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् ॥१९॥
राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥२०॥

नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात् ।
ज्योतिरिन्धननिपाति भास्करात्सूर्यकान्त इव ताडकान्तकः २१
वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान् ।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ।।२२।।
आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् ।
बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम् ।।२३।।
तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः ।
लोकमन्धतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव ।२४।
वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् ।
संभ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ।२५।
उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन् ।
रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम् ।। २६ ।।
तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान् ।
किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते ।। २७ ।।
सोऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतम् ।
तेन शैलगुरुमप्यपातयत्पाण्डुपत्रमिव ताडकासुतम् ।। २८ ।।
यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया ।
तं क्षुरप्रशकलीकृतं कृती पत्रिणां व्यभजदाश्रमाद्बहिः ।।२९।।
इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः ।।३०।।
तौ प्रणामचलकाकपक्षकौ भ्रातराववभृथाप्लुतो मुनिः ।
आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना ।। ३१ ।।
तं न्यमन्त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी ।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ।।३२।।
तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत ।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ।। ३३ ।।

प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी ।
स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ॥३४॥
राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः ।
अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ॥ ३५ ॥
तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू ।
मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ।३६।
यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्धनः ।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ॥ ३७ ॥
तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ।३८।
अब्रवीच्च भगवन्मतङ्गजैर्यद्बृहद्भिरपि कर्म दुष्करम् ।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ॥३९॥
ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा धनुर्भृतः ।
ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे ४०
प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथवा गिरा कृतम् ।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ।४१।
एवमाप्तवचनात्स पौरुषं काकपक्षकधरेऽपि राघवे ।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ॥ ४२ ॥
व्यादिदेश गणशोऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः ।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ॥ ४३ ॥
तत्प्रसुप्तभुजगेन्द्रभीषणं वीक्ष्य दाशरथिराददे धनुः ।
विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः ॥ ४४ ॥
आततज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः ॥४५॥
भज्यमानमतिमात्रकर्षणात्तेन वज्रपरुषस्वनं धनुः ।
भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत् ॥ ४६ ॥

दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः ।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत् ।४७।
मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम् ।
संनिधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ।४८।
प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम् ।
भृत्यभावि दुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति ।४९।
अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग्द्विजः ।
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम् ।५०।
तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान्वचनमग्रजन्मनः ।
उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ।५१।
आससाद मिथिलां स वेष्टयन्पीडितोपवनपादपां बलैः ।
प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम् ।५२।
तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ ।
कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ।। ५३ ।।
पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम् ।
यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ।।५४।।
ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः ।
सामदानविधिभेदविग्रहाः सिद्धिमन्त इव तस्य भूपतेः ।।५५।।
ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन्कृतार्थताम् ।
सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसंनिभः ।। ५६ ।।
एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः ।
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ।५७।
तस्य जातु मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम् ।५८।
लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः ।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ।५९।

श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः ।
अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥६०॥
भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे ।
क्षत्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ।६१।
तत्प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ।
अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्तमित्यलघयत्स तद्व्यथाम् ।
तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे ।
यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ॥६३॥
पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् ।
यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ॥६४॥
येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा ।
वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥६५॥
अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः ।
क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन् ॥ ६६ ॥
तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् ।
बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ।६७।
नाम राम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे ।
हृद्यमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ॥ ६८ ॥
अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥ ६९ ॥
तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः ।
अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ॥७०॥
क्षत्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः ।
सुप्तसर्प इव दण्डघट्टनाद्रोषितोऽस्मि तव विक्रमश्रवात् ।७१।
मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षणोः ।
तन्निशम्य भवता समर्थये वीर्यशृङ्गमिव भग्नमात्मनः ॥७२॥

अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात् ।
व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ।।७३।।
बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ रिपू मम मतौ समागसौ ।
धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्तिमपहर्तुमुद्यतः ।।७४।।
क्षत्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि ।
पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेऽपि यः ।७५।
विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया ।
खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम् ।।७६।।
तन्मदीयमिदमायुधं ज्यया सङ्गमय्य सशरं विकृष्यताम् ।
तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया ।। ७७ ।।
कातरोऽसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम ।
ज्यानिघातकठिनाङ्गुलिर्वृथा बध्यतामभययाचनाञ्जलिः ७८
एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः ।
तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ।। ७९ ।।
पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ८०
तेन भूमिनिहितैककोटि तत्कार्मुकं च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ।। ८१ ।।
तावुभावपि परस्परस्थितौ वर्धमानपरिहीनतेजसौ ।
पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ।८२।
तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसंनिभः ।। ८३ ।।
न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्त्रिणा हन्मि लोकमुत ते मखार्जितम् ।८४।
प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम् ।
गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ।८५।

भस्मसात्कृतवतः पितृद्विष पात्रसाच्च वसुधां ससागराम् ।
आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ८६
तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ।
पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम् ।८७।
प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् ।
भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः ।८८।
राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत् ।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये ।।८९।।
राजसत्त्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा ।
नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः ।।९०।।
साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ।९१।

तस्मिन्गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम् ।
तस्याभवत्क्षणशुचः परितोषलाभः
कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ।। ९२ ।।
(वसंत०)

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ।।९३।।
(मालिनी)

।। इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
सीताविवाहवर्णनो नामैकादशः सर्गः ।। ११ ।।

★

## ॥ १२ ॥ अथ द्वादशः सर्गः ॥

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरवोषसि ॥ १ ॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥ २ ॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥
तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ ॥
सा किलाश्वसिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥ ५ ॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः ।
द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम् ॥ ६ ॥
पित्रा दत्तां रुदन् रामः प्राङ्महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥ ७ ॥
दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजाऽपि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम् ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥
विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत्पराङ्मुखः ॥ १३ ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥
चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥ १५ ॥
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥
तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम् ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ॥ १८ ॥
दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ॥१९॥
रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् ।
कदाचिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥ २१ ॥
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥
तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः ।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥ २४ ॥
प्रययावातिथेयेषु वसन् ऋषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥

बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥२६॥
अनसूयातिसृष्टेन पुण्यगन्धेन काननम् ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् ॥ २७ ॥
संध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥ २९ ॥
तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥ ३० ॥
पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥ ३१ ॥
रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्ता व्यालीव मलयद्रुमम् ॥ ३२ ॥
सा सीतासंनिधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥ ३३ ॥
कलत्रवानहं बाले कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ॥३४॥
ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता ।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाक् ॥३५॥
संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥ ३६ ॥
फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् ।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥ ३७ ॥
इत्युक्त्वा मैथिलीं भर्तुरङ्के निविशतीं भयात् ।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ॥ ३८ ॥

लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम् ।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम् ॥ ३९ ॥
पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥ ४० ॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥ ४१ ॥
प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम् ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् ॥ ४२ ॥
मुखावयवलूनां तां नैर्ऋता यत्पुरो दधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम् ॥ ४३ ॥
उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः ।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥
एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥ ४५ ॥
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥ ४६ ॥
तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥ ४७ ॥
तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्त्रिभिः ॥ ४८ ॥
तस्मिन्रामशरोत्कृत्ते बले महति रक्षसाम् ।
उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन ॥ ४९ ॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम् ।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ॥ ५० ॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराऽभवत् ॥ ५१ ॥

निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्धसु ॥ ५२ ॥
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम् ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥ ५४ ॥
स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥
तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात्परा ववृतिरे क्रियाः ॥ ५६ ॥
वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ॥ ५७ ॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५८ ॥
इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥ ५९ ॥
प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥
दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥
तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥ ६२ ॥
निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६३ ॥
प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥

स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम् ॥ ६५ ॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥ ६६ ॥
स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्तिभिः ॥ ६७ ॥
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमाविश्य चोदितः ॥ ६८ ॥
तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ ६९ ॥
स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥ ७० ॥
तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ ७१ ॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसाम् ।
दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥ ७२ ॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनखन्यासः शैलरुग्णमतंगजः ॥ ७३ ॥
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनाम् ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ॥ ७४ ॥
कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥ ७५ ॥
गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।
दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥
ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा ॥ ७७ ॥

स मारुतिसमानीतमहौषधिहतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ७८ ॥
स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ॥ ७९ ॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८० ॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ ८१ ॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२ ॥
निर्ययावथ पौलस्त्य पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३ ॥
रामं पदातिमालोक्य लंङ्केशं च वरूथिनम् ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरंदरः ॥ ८४ ॥
तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥ ८५ ॥
मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् ॥ ८६ ॥
अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥
भुजमूर्धोरुबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे ह्ययथापूर्वो मातृवंश इव स्थितः ॥ ८८ ॥
जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलासमराति बह्वमन्यत ॥ ८९ ॥
तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९० ॥

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥ ९१ ॥
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ।
अन्योन्यजयसंरम्भो ववृधे वादिनोरिव ॥ ९२ ॥
विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि ।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥ ९३ ॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्परशरत्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥
अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९५ ॥
राघवो रथमप्राप्तां तामाशां च सुरद्विषाम् ।
अर्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम् ॥ ९६ ॥
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥ ९७ ॥
तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम् ॥ ९८ ॥
तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम् ॥ ९९ ॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ॥ १०० ॥
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनःसंधानशङ्किनाम् ॥ १०१ ॥

अथ मदगुरुपक्षैर्लोकपालद्विपाना-
मनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः
सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥ १०२ ॥
*(मालिनी)*

यन्ता हरेः सपदि संहृतकार्मुकज्य-
माप‍ृच्छ्य राघवमनुष्ठितदेवकार्यम् ।
नामाङ्करावणशराङ्कितकेतुयष्टि-
मूर्ध्वं रथं हरिसहस्रयुजं निनाय ॥ १०३ ॥
( वसंत० )

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् १०४
(हरिणी)

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
रावणवधो नाम द्वादशः सर्गः ॥ १२ ॥

## ॥ १३ ॥ अथ त्रयोदशः सर्गः ॥

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच १
वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ २ ॥
गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥ ३ ॥
गर्भं दधत्यर्कमरीचयोऽस्मद्विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ॥४॥
तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥५॥

नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ।।६।।
पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ।।७।।
रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ।
अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तवक्त्राभरणं बभूव ।। ८ ।।
मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः ।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ।।९।।
ससत्त्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वात् ।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् १०
मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेनान् ।
कपोलसंसर्पितया य एषां व्रजन्ति कर्णक्षणचामरत्वम् ।।११।।
वेलानिलाय प्रसृता भुजङ्गा महोर्मिविस्फूर्जथुनिर्विशेषाः ।
सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ।।१२।।
तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ।
ऊर्ध्वाङ्कुरप्रोतमुखं कथंचित्क्लेशादपक्रामति शङ्खयूथम् ।१३।
प्रवृत्तमात्रेण पयांसि पातुमावर्तवेगाद्भ्रमता घनेन ।
आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ।१४।
दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ।।१८।।
वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि ।
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ।।१६।।
एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ।।१७।।
कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम् ।
एषा विदूरीभवतः समुद्रात्सकानना निष्पततीव भूमिः ।।१८।।

क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ।१९।
असौ महेन्द्रद्विपदानगन्धिस्त्रिमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते ।।२०।।
करेण वातायनलम्बितेन स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।
आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ।।२१।।
अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।
अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि २२
सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।२३।
त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ।।२४।।
मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि २५
एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ।।२६।।

गन्धश्च धाराहतपल्वलानां
कादम्बमर्धोद्गतकेसरं च ।
स्निग्धाश्च केकाः शिखिनां बभूवु-
र्यस्मिन्नसह्यानि विना त्वया मे ।।२७।।

पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि ।।२८।।
आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः ।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः ।२९।
उपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ।३०।

अत्राविमुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।
द्वन्द्वानि दूरान्तरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि ।३१।

इमां तटाशोकलतां च तन्वीं
स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः
सौमित्रिणा साश्रुरहं निषिद्धः ॥ ३२ ॥

अमूर्विमानान्तरलम्बिनीनां
श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।
प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो
गोदावरीसारसपङ्क्तयस्त्वाम् ॥ ३३ ॥

एषा त्वया पेशलमध्ययापि घटाम्बुसंवर्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे ।३४।
अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥३५॥
भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भः परिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ३६
त्रेताग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम् ।
घ्रात्वा हविर्गन्धि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ३७
एतन्मुनेर्मानिनि शातकर्णेः पञ्चाप्सरो नाम विहारवारि ।
आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ।३८।
पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीतः पञ्चाप्सरोयौवनकूटबन्धम् ।३९।
तस्यायमन्तर्हितसौधभाजः प्रसक्तसंगीतमृदङ्गघोषः ।
वियद्गतः पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ।४०।
हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ४१

अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि ।
नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ।४२।
एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ।४३।
वाचंयमत्वात्प्रणतिं ममैष कम्पेन किंचित्प्रतिगृह्य मूर्ध्नः ।
दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते ।४४।
अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ।४५।
छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ।।४६।।
धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ।४७।
एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ।४८।
अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ।।४९।।
अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात्फलबन्धिवृक्षम् ।
वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावम् ।। ५० ।।
अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यम्बकमौलिमालम् ।५१।
वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ५२
त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ।५३।
क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ।।५४।।

क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥५५॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ।५६।
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ५७
समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ५८
पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ५९
पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः ।
ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।६०।
जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।
तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥६१॥
यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् ।
सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम् ६२
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूवियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव ॥ ६३ ॥
विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ६४
अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन्संरक्षितां त्वामिव लक्ष्मणो मे ६५
असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।
वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ।६६।
पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यन्तगतामभोक्ता ।
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ।६७।

एतावदुक्तवति दाशरथौ तदीया-
मिच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयाभि-
रुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ।। ६८ ।।
(वसंत०)

तस्मात्पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्तः ।
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ।। ६९ ।।

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
सभ्रातरं भरतमर्घ्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ
तद्भक्त्यपोढपितृराज्यमहाभिषेके ।। ७० ।।

श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान्प्ररोहजटिलानिव मन्त्रिवृद्धान् ।
अन्वग्रहीत्प्रणमतः शुभदृष्टिपातै-
र्वार्तानुयोगमधुराक्षरया च वाचा ।। ७१ ।।

दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरःप्रहर्ता ।
इत्यादृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ।। ७२ ।।

सौमित्रिणा तदनु संससृजे स चैन-
मुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन
क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ।।७३।।

रामाज्ञया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान् ।

तेषु क्षरत्सु बहुधा मदवारिधाराः
शैलाधिरोहणसुखान्युपलेभिरे ते ॥ ७४ ॥
सानुप्लवः प्रभुरपि क्षणदाचराणां
भेजे रथान्दशरथप्रभवानुशिष्टः ।
मायाविकल्परचितैरपि ये तदीयै-
र्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥ ७५ ॥
भूयस्ततो रघुपतिर्विलसत्पताक-
मध्यास्त कामगति सावरजो विमानम् ।
दोषातनं बुधबृहस्पतियोगदृश्य-
स्तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ ७६ ॥
तत्रेश्वरेण जगतां प्रलयादिवोर्वीं
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रा-
त्प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ ७७ ॥
लङ्केश्वरप्रणतिभङ्गदृढव्रतं त-
द्वन्द्यं युगं चरणयोर्जनकात्मजायाः ।
ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधो-
रन्योन्यपावनमभूदुभयं समेत्य ॥ ७८ ॥
क्रोशार्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्यमार्यः
साकेतोपवनमुदारमध्युवास ॥ ७९ ॥

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
दण्डकाप्रत्यागमनो नाम त्रयोदशः सर्गः ॥१३॥

★

## ॥ १४ ॥ अथ चतुर्दशः सर्गः ॥

भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने ।
अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ॥ १ ॥
उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ ।
विस्पष्टमस्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात् ।२।
आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः ॥३॥
ते पुत्रयोर्नैर्ऋतशस्त्रमार्गानार्द्रानिवाङ्गे सदयं स्पृशन्त्यौ ।
अपीप्सितं क्षत्त्रकुलाङ्गनानां न वीरसूशब्दमकामयेताम् ॥४॥
क्लेशावहा भर्तुरलक्षणाहं सीतेति नाम स्वमुदीरयन्ती ।
स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववन्दे ॥ ५ ॥
उत्तिष्ठ वत्से ननु सानुजोऽसौ वृत्तेन भर्ता शुचिना तवैव ।
कृच्छ्रं महत्तीर्ण इति प्रियार्हां तामूचतुस्ते प्रियमप्यमिथ्या ।६।
अथाभिषेकं रघुवंशकेतोः प्रारब्धमानन्दजलैर्जनन्योः ।
निर्वर्तयामासुरमात्यवृद्धास्तीर्थाहृतैः काञ्चनकुम्भतोयैः ॥७॥
सरित्समुद्रान्सरसीश्च गत्वा रक्षःकपीन्द्रैरुपपादितानि ।
तस्यापतन्मूर्ध्नि जलानि जिष्णोर्विन्ध्यस्य मेघप्रभवा इवापः ८ः
तपस्विवेषक्रिययापि तावद्यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदितासीत्पुनरुक्तदोषा ॥ ९ ॥
समौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानन्दितपौरवर्गः ।
विवेश सौधोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीम् ॥१०॥
सौमित्रिणा सावरजेन मन्दमाधूतबालव्यजनो रथस्थः ।
धृतातपत्रो भरतेन साक्षादुपायसंघात इव प्रवृद्धः ॥ ११ ॥
प्रासादकालागुरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना ।
वनान्निवृत्तेन रघूत्तमेन मुक्ता स्वयं वेणिरिवाबभासे ॥ १२ ॥

श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीम् ।
प्रासादवातायनदृश्यबन्धैः साकेतनार्योऽञ्जलिभिः प्रणेमुः ।१३।
स्फुरत्प्रभामण्डलमानुसूयं सा बिभ्रती शाश्वतमङ्गरागम् ।
रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता वह्निगतेव भर्त्रा ।।१४।।
वेश्मानि रामः परिबर्हवन्ति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः ।
बाष्पायमाणो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश ।।१५।।
कृताञ्जलिस्तत्र यदम्ब सत्यान्नाभ्रश्यत स्वर्गफलाद्गुरुर्नः ।
तच्चिन्त्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः ।१६।
तथैव सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंविधाभिः ।
संकल्पमात्रोदितसिद्धयस्ते क्रान्ता यथा चेतसि विस्मयेन ।१७।
सभाजनायोपगतान्स दिव्यान्मुनीन्पुरस्कृत्य हतस्य शत्रोः ।
शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानम् ।१८।
प्रतिप्रयातेसु तपोधनेषु सुखादविज्ञातगतार्धमासान् ।
सीतास्वहस्तोपहृताग्र्यपूजान्रक्षःकपीन्द्रान्विससर्ज रामः ।१९।
तच्चात्मचिन्तासुलभं विमानं हृतं सुरारेः सह जीवितेन ।
कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त ।।२०।।
पितुर्नियोगाद्वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः ।
धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम् ।।२१।।
सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत् ।
षडाननापीतपयोधरासु नेता चमूनामिव कृत्तिकासु ।। २२ ।।
तेनार्थवाँल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् ।
तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री ।।२३।।
स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा ।
उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या ।२४।
तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु ।
प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन् ।

अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपाण्डुरेण ।
आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन ॥ २६ ॥
तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्राम् ।
विलज्जमानां रहसि प्रतीतः पप्रच्छ रामां रमणोऽभिलाषम् २७
सा दष्टनीवारबलीनि हिंस्रैः संबद्धवैखानसकन्यकानि ।
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ॥२८॥
तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः ।
आलोकयिष्यन्मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह ॥२९॥
ऋद्धापणं राजपथं स पश्यन्विगाह्यमानां सरयूं च नौभिः ।
विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे ।३०।
स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।
सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ॥३१॥
निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयम् ।
अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः ॥३२॥
कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण ।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे ॥ ३३ ॥
किमात्मनिर्वादकथामुपेक्षे जायामदोषामुत संत्यजामि ।
इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः ॥३४॥
निश्चित्य चानन्यनिवृत्ति वाच्यं
त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् ।
अपि स्वदेहात्किमुतेन्द्रियार्था-
द्यशोधनानां हि यशो गरीयः ॥ ३५ ॥
स संनिपात्यावरजान्हतौजा-
स्तद्विक्रियादर्शनलुप्तहर्षान् ।
कौलीनमात्माश्रयमाचचक्षे
तेभ्यः पुनश्चेदमुवाच वाक्यम् ॥ ३६ ॥

राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥३७॥
पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः ।३८।
तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः ।
त्यक्ष्यामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव ॥ ३९ ॥
अवैमि चैनामनघेति किंतु लोकापवादो बलवान्मतो मे ।
छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ४०
रक्षोवधान्तो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय ।
अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ४१
तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः ।
यद्यर्थिता निर्हृतवाच्यशल्यान्प्राणान्मया धारयितुं चिरं वः ४२
इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम् ।
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा ।४३।
स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः ।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ।४४।
प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ।४५।
स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥ ४६ ॥
अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरंगैः ।
रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे ॥ ४७ ॥
सा नीयमाना रुचिरान्प्रदेशान्प्रियंकरो मे प्रिय इत्यनन्दत् ।
नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ॥४८॥
जुगूह तस्याः पथि लक्ष्मणो यत्सव्येतरेण स्फुरता तदक्ष्णा ।
आख्यातमस्यै गुरु भावि दुःखमत्यन्तलुप्तप्रियदर्शनेन ॥४९॥

सा दुर्निमित्तोपगताद्विषादात्सद्यः परिम्लानमुखारविन्दा ।
राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः ॥५०॥
गुरोर्नियोगाद्वनितां वनान्ते
साध्वीं सुमित्रातनयो विहास्यन् ।
अवार्यतेवोत्थितवीचिहस्तै-
र्जह्नोर्दुहित्रा स्थितया पुरस्तात् ॥ ५१ ॥
रथात्स यन्त्रा निगृहीतवाहात्तां भ्रातृजायां पुलिनेऽवतार्य ।
गङ्गां निषादाहृतनौविशेषस्ततार संधामिव सत्यसंधः ॥५२॥
अथ व्यवस्थापितवाक्कथंचित्सौमित्रिरन्तर्गतबाष्पकण्ठः ।
औत्पातिकं मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ॥५३॥
ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥५४॥
इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः ।
इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत् ।५५।
सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः ।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः ।५६।
न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द ।५७।
आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ।५८।
सीता समुत्थाप्य जगाद वाक्यं
प्रीतास्मि ते सौम्य चिराय जीव ।
बिडौजसा विष्णुरिवाग्रजेन
भ्रात्रा यदित्थं परवानसि त्वम् ॥ ५९ ॥
श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः ।
प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति ॥ ६० ॥

वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ।६१।
कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः ।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ।।६२।।
उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः ।
तदास्पदं प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती ।६३।
निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ।६४।
किंवा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन् ।
स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ।।६५।।
साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ६६
नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः ।
निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ।६७।
तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ।६८।
नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ।।६९।।
तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ।७०।
तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववन्दे ।
तस्यै मुनिर्दोहदलिङ्गदर्शी दाश्वान्सुपुत्राशिषमित्युवाच ।७१।
जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा ।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतम् ७२
उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।
त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ।।७३।।

तवोरुकीर्तिः श्वशुरः सखा मे
सतां भवोच्छेदकरः पिता ते ।
धुरि स्थिता त्वं पतिदेवतानां
किं तन्न येनासि ममानुकम्प्या ॥ ७४ ॥
तपस्विसंसर्गविनीतसत्त्वे तपोवने वीतभया वसास्मिन् ।
इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते ॥ ७५ ॥
अशून्यतीरां मुनिसंनिवेशैस्तमोपहन्त्रीं तमसां वगाह्य ।
तत्सैकतोत्सङ्गबलिक्रियाभिः संपत्स्यते ते मनसः प्रसादः ।७६।
पुष्पं फलं चार्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो मुनिकन्यकास्त्वाम् ।
पयोघटैराश्रमबालवृक्षान्संवर्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक्तनयोपपत्तेः स्तनंधयप्रीतिमवाप्स्यसि त्वम् ॥७८॥
अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः ।
सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय ।७९।
तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु ।
निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु ।
ता इङ्गुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः ।
तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ॥ ८१ ॥
तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा विधिनातिथिभ्यः ।
वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासंततये बभार ॥८२॥
अपि प्रभुः सानुशयोऽधुना स्यात्किमुत्सुकः शक्रजितोऽपि हन्ता ।
शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ॥ ८३ ॥
बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥८४॥
निगृह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः ।
स भ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास ।८५।

तामेकभार्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य ।
वक्षस्यसंघट्टसुखं वसन्ती रेजे सपत्नीरहितेव लक्ष्मीः ॥८६॥
सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः
सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥८७॥
(मन्दाकान्ता)

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
सीतापरित्यागो नाम चतुर्दशः सर्गः ॥१४॥

## ॥ १५ ॥ अथ पञ्चदशः सर्गः ॥

कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥ १ ॥
लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः ॥ २ ॥
अवेक्ष्य रामं ते तस्मिन्न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम् ॥३॥
प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् ।
धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः ॥ ४ ॥
ते रामाय वधोपायमाचख्युर्विबुधद्विषः ।
दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति ॥ ५ ॥
आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः ।
करिष्यन्निव नामास्य यथार्थमरिनिग्रहात् ॥ ६ ॥
यः कश्चन रघूणां हि परमेकः परंतपः ।
अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः ॥ ७ ॥

अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी ।
ययौ वनस्थलीः पश्यन्पुष्पिताः सुरभीरभीः ॥ ८ ॥
रामादेशादनुगता सेना तस्यार्थसिद्धये ।
पश्चादध्ययनार्थस्य धातोरधिरिवाभवत् ॥ ९ ॥
आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥ १० ॥
तस्य मार्गवशादेका बभूव वसतिर्यतः ।
रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने ॥ ११ ॥
तमृषिः पूजयामास कुमारं क्लान्तवाहनम् ।
तपःप्रभावसिद्धाभिर्विशेषप्रतिपत्तिभिः ॥ १२ ॥
तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती ।
सुतावसूत संपन्नौ कोशदण्डाविव क्षितिः ॥ १३ ॥
संतानश्रवणाद्भ्रातुः सौमित्रिः सौमनस्यवान् ।
प्राञ्जलिर्मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ ॥१४॥
स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः ।
वनात्करमिवादाय सत्त्वराशिमुपस्थितः ॥ १५ ॥
धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ।
क्रव्याद्गणपरीवारश्चिताग्निरिव जंगमः ॥ १६ ॥
अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।
रुरोध संमुखीनो हि जयो रन्ध्रप्रहारिणाम् ॥ १७ ॥
नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनम् ।
दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः ॥ १८ ॥
इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया ।
प्रांशुमुत्पाटयमास मुस्तास्तम्बमिव द्रुमम् ॥ १९ ॥
सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः ।
गात्रं पुष्परजः प्राप न शाखी नैरृतेरितः ॥ २० ॥

विनाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलम् ।
प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ॥ २१ ॥
ऐन्द्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः ।
सिकतात्वादपि परां प्रपेदे परमाणुताम् ॥ २२ ॥
तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः ।
एकताल इवोत्पातपवनप्रेरितो गिरिः ॥ २३ ॥
कार्ष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन् ।
आनिनाय भुवः कम्पं जहाराश्रमवासिनाम् ॥ २४ ॥
वयसां पङ्क्तयः पेतुर्हतस्योपरि विद्विषः ।
तत्प्रतिद्वन्द्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः ॥ २५ ॥
स हत्वा लवणं वीरस्तदा मेने महौजसः ।
भ्रातुः सोदर्यमात्मानमिन्द्रजिद्वधशोभिनः ॥ २६ ॥
तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः ।
शुशुभे विक्रमोदग्रं व्रीडयावनतं शिरः ॥ २७ ॥
उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः ।
निर्ममे निर्ममोऽर्थेषु मधुरां मधुराकृतिः ॥ २८ ॥
या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता ॥ २९ ॥
तत्र सौधगतः पश्यन्यमुनां चक्रवाकिनीम् ।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥ ३० ॥
सखा दशरथस्यापि जनकस्य च मन्त्रकृत् ।
संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधिः ॥ ३१ ॥
स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ।
कविः कुशलवावेव चकार किल नामतः ॥ ३२ ॥
साङ्गं च वेदमध्याप्य किंचिदुत्क्रान्तशैशवौ ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम् ॥ ३३ ॥

रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
तद्वियोगव्यथां किंचिच्छिथिलीचक्रतुः सुतौ ॥ ३४ ॥
इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात्पतिवत्नीषु पत्नीष्वासन्द्विसूनवः ॥ ३५ ॥
शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते ।
मथुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥ ३६ ॥
भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् ।
मैथिलीतनयोद्गीतनिःस्पन्दमृगमाश्रमम् ॥ ३७ ॥
वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीम् ।
लवणस्य वधात्पौरैरीक्षितोऽत्यन्तगौरवम् ॥ ३८ ॥
स ददर्श सभामध्ये सभासद्भिरुपस्थितम् ।
रामं सीतापरित्यागादसामान्यपतिं भुवः ॥ ३९ ॥
तमभ्यनन्दत्प्रणतं लवणान्तकमग्रजः ।
कालनेमिवधात्प्रीतस्तुराषाडिव शार्ङ्गिणम् ॥ ४० ॥
स पृष्टः सर्वतो वार्तमाख्यद्राज्ञे न संततिम् ।
प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात् ॥ ४१ ॥
अथ जानपदो विप्रः शिशुमप्राप्तयौवनम् ।
अवतार्याङ्कशय्यास्थं द्वारि चक्रन्द भूपतेः ॥ ४२ ॥
शोचनीयासि वसुधे या त्वं दशरथाच्च्युता ।
रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता ॥ ४३ ॥
श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः ।
ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत् ॥ ४४ ॥
स मुहूर्तं क्षमस्वेति द्विजामाश्वास्य दुःखितम् ।
यानं सस्मार कौबेरं वैवस्वतजिगीषया ॥ ४५ ॥
आत्तशस्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः ।
उच्चचार पुरस्तस्य गूढरूपा सरस्वती ॥ ४६ ॥

राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते ।
तमन्विष्य प्रशमयेर्भवितासि ततः कृती ॥ ४७ ॥
इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियाम् ।
दिशः पपात पत्रेण वेगनिष्कम्पकेतुना ॥ ४८ ॥
अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम् ।
ददर्श कंचिदैक्ष्वाकस्तपस्यन्तमधोमुखम् ॥ ४९ ॥
पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः ।
आत्मानं शम्बुकं नाम शूद्रं सुरपदार्थिनम् ॥ ५० ॥
तपस्यनधिकारित्वात्प्रजानां तमघावहम् ।
शीर्षच्छेद्यं परिच्छिद्य नियन्ता शास्त्रमाददे ॥ ५१ ॥
स तद्वक्त्रं हिमाक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत् ॥ ५२ ॥
कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम् ।
तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना ॥ ५३ ॥
रघुनाथोऽप्यगस्त्येन मार्गसंदर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ॥ ५४ ॥
कुम्भयोनिरलंकारं तस्मै दिव्यपरिग्रहम् ।
ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ॥ ५५ ॥
तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना ।
पश्चान्निववृते रामः प्राक्परासुर्द्विजात्मजः ॥ ५६ ॥
तस्य पूर्वोदितां निन्दां द्विजः पुत्रसमागतः ।
स्तुत्या निवर्तयामास त्रातुर्वैवस्वतादपि ॥ ५७ ॥
तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः ।
मेघाः सस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ॥ ५८ ॥
दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः ।
न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि ॥ ५९ ॥

उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ ।
अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ॥ ६० ॥
श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः ।
अनन्यजानेः सैवासीद्यस्माज्जाया हिरण्मयी ॥ ६१ ॥
विधेरधिकसंभारस्ततः प्रववृते मखः ।
आसन्यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ॥ ६२ ॥
अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥ ६३ ॥
वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किंनरस्वनौ ।
किं तद्येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥ ६४ ॥
रूपे गीते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ॥ ६५ ॥
तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥ ६६ ॥
वयोवेषविसंवादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ॥ ६७ ॥
उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥ ६८ ॥
गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥ ६९ ॥
अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥ ७० ॥
स तावाख्याय रामाय मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः संपरिग्रहम् ॥ ७१ ॥
तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि ।
दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥ ७२ ॥

ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥ ७३ ॥
इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥ ७४ ॥
अन्येद्युरथ काकुत्स्थः संनिपात्य पुरौकसः ।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥ ७५ ॥
स्वरसंस्कारवत्यासौ पुत्राभ्यामथ सीतया ।
ऋचेवोदर्चिषं सूर्यं रामं मुनिरुपस्थितः ॥ ७६ ॥
काषायपरिवीतेन स्वपदार्पितचक्षुषा ।
अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ॥ ७७ ॥
जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः ।
तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः ॥ ७८ ॥
तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः ।
कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात् ॥ ७९ ॥
अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः ।
आचम्योदीरयामास सीता सत्यां सरस्वतीम् ॥ ८० ॥
वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे ।
तथा विष्वंभरे देवि मामन्तर्धातुमर्हसि ॥ ८१ ॥
एवमुक्ते तया साध्व्या रन्ध्रात्सद्योभवाद्भुवः ।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ॥ ८२ ॥
तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी ।
समुद्ररशना साक्षात्प्रादुरासीद्वसुंधरा ॥ ८३ ॥
सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् ।
मा मेति व्याहरत्येव तस्मिन्पातालमभ्यगात् ॥ ८४ ॥
धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः ।
गुरुर्विधिबलापेक्षी शमयामास धन्विनः ॥ ८५ ॥

ऋषीन्विसृज्य यज्ञान्ते सुहृदश्च पुरस्कृतान् ।
रामः सीतागतं स्नेहं निदधे तदपत्ययोः ।। ८६ ।।
युधाजितश्च संदेशात्स देशं सिन्धुनामकम् ।
ददौ दत्तप्रभावाय भरताय भृतप्रजः ।। ८७ ।।
भरतस्तत्र गन्धर्वान्युधि निर्जित्य केवलम् ।
आतोद्यं ग्राहयामास समत्याजयदायुधम् ।। ८८ ।।
स तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः ।
अभिषिच्याभिषेकार्हौ रामान्तिकमगात्पुनः ।। ८९ ।।
अङ्गदं चन्द्रकेतुं च लक्ष्मणोऽप्यात्मसंभवौ ।
शासनाद्रघुनाथस्य चक्रे कारापथेश्वरौ ।। ९० ।।
इत्यारोपितपुत्रास्ते जननीनां जनेश्वराः ।
भर्तृलोकप्रपन्नानां निवापान्विदधुः क्रमात् ।। ९१ ।।
उपेत्य मुनिवेषोऽथ कालः प्रोवाच राघवम् ।
रहःसंवादिनौ पश्येदावां यस्तं त्यजेरिति ।। ९२ ।।
तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः ।
आचख्यौ दिवमध्यास्व शासनात्परमेष्ठिनः ।। ९३ ।।
विद्वानपि तयोर्द्वाःस्थः समयं लक्ष्मणोऽभिनत् ।
भीतो दुर्वाससः शापाद्रामसंदर्शनार्थिनः ।। ९४ ।।
स गत्वा सरयूतीरं देहत्यागेन योगवित् ।
चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः ।। ९५ ।।
तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषि ।
राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ।। ९६ ।।
स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् ।
शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम् ।। ९७ ।।
उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः ।
अन्वितः पतिवात्सल्याद्गृहवर्जमयोध्यया ।। ९८ ।।

जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ।
कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ॥ ९९ ॥
उपस्थितविमानेन तेन उक्तानुकम्पिना ।
चक्रे त्रिदिवनिश्रेणिः सरयूरनुयायिनाम् ॥ १०० ॥
यद्गोप्रतरकल्पोऽभूत्संमर्दस्तत्र मज्जताम् ।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥ १०१ ॥
स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्तिषु ।
त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ॥ १०२ ॥
निर्वर्त्यैवं दशमुखशिरश्छेदकार्यं सुराणां
विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्रतिष्ठाम् ।
लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च ॥१०३॥
(मन्दाक्रान्ता)

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये श्रीरामस्वर्गारोहणो नाम पञ्चदशः सर्गः ॥१५॥

## ॥ १६ ॥ अथ षोडशः सर्गः ॥

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च ।
चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारि ॥१॥
ते सेतुवार्तागजबन्धमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवन्ध्यैः ।
अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः ॥२॥
चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम् ।
सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः ॥३॥
अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत् ॥ ४ ॥

सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः ।
जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं बन्धुमतो बबन्ध ॥५॥
अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥६॥
लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते ।
बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ।७।
का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ।८।
तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन ।
तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ६
वस्वौकसारामभिभूय साहं सौराज्यबद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ।१०।
विशीर्णतल्पाट्टशतो निवेशः पर्यस्तशालः प्रभुणा विना मे ।
विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघम् ॥११॥
निशासु भास्वत्कलनूपुराणां यः संचरोऽभूदभिसारिकाणाम् ।
नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः ॥
आस्फालितं यत्प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत् ।
वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम् १३
वृक्षेशया यष्टिनिवासभङ्गान्मृदङ्गशब्दापगमादलास्याः ।
प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वम् ॥१४॥
सोपानमार्गेषु च येषु रामानिक्षिप्तवत्यश्चरणान्सरागान् ।
सद्यो हतन्यङ्कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे ।१५।
चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः ।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ॥१६॥
स्तम्भेषु योषित्प्रतियातनानामुत्क्रान्तवर्णक्रमधूसराणाम् ।
स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोकपट्टाः फणिभिर्विमुक्ताः १७

कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु ।
त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्च्छन्ति न चन्द्रपादाः ।१८।

आवर्ज्य शाखाः सदयं च यासां,
पुष्पाण्युपात्तानि विलासिनीभिः ।
वन्यैः पुलिन्दैरिव वानरैस्ताः,
क्लिश्यन्त उद्यानलता मदीयाः ॥ १९ ॥

रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवापि ।
तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः ।२०।

बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवन्ति ।
उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि ॥२१॥

तदर्हसीमां वसतिं विसृज्य मामभ्युपैतुं कुलराजधानीम् ।
हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिम् ॥२२

तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणाम् ।
पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ॥२३॥

तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस ।
श्रुत्वा त एनं कुलराजधान्याः साक्षात्पतित्वे वृतमभ्यनन्दन् ।२४

कुशावतीं श्रोत्रियसात्स कृत्वा,
यात्रानुकूलेऽहनि सावरोधः ।
अनुद्रुतो वायुरिवाभ्रवृन्दैः,
सैन्यैरयोध्याभिमुखः प्रतस्थे ॥ २५ ॥

सा केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः ।
सेना रथोदारगृहा प्रयाणे तस्याभवज्जंगमराजधानी ॥२६॥

तेनातपत्रामलमण्डलेन प्रस्थापितः पूर्वनिवासभूमिम् ।
बभौ बलौघः शशिनोदितेन वेलामुदन्वानिव नीयमानः ।२७।

तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सोढुम् ।
वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन ॥२८॥

उद्यच्छमाना गमनाय पश्चात्पुरे निवेशे पथि च व्रजन्ती ।
सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार ।।२९।।
तस्य द्विपानां मदवारिसेकात्खुराभिघाताच्च तुरंगमाणाम् ।
रेणुः प्रपेदे पथि पङ्कभावं पङ्कोऽपि रेणुत्वमियाय नेतुः ।।३०।।
मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना ।
चकार रेवेव महाविरावा बद्धप्रतिश्रुन्ति गुहामुखानि ।।३१।।
स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः ।
व्यलङ्घयद्विन्ध्यमुपायनानि पश्यन्पुलिन्दैरुपपादितानि ।।३२।।
तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नवालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ।।३३।।
स पूर्वजानां कपिलेन रोषाद्भस्मावशेषीकृतविग्रहाणाम् ।
सुराऽलयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे ।।३४।।
इत्यध्वनः कैश्चिदहोभिरन्ते कूलं समासाद्य कुशः सरय्वाः ।
वेदिप्रतिष्ठान्विततताध्वराणां यूपानपश्यच्छतशो रघूणाम् ।३५।

आधूय शाखाः कुसुमद्रुमाणां
स्पृष्ट्वा च शीतान्सरयूतरङ्गान् ।
तं क्लान्तसैन्यं कुलराजधान्याः
प्रत्युज्जगामोपवनान्तवायुः ।। ३६ ।।
अथोपशल्ये रिपुमग्नशल्य-
स्तस्याः पुरः पौरसखः स राजा ।
कुलध्वजस्तानि चलध्वजानि
निवेशयामास बली बलानि ।। ३७ ।।
तां शिल्पिसंघाः प्रभुणा नियुक्ता-
स्तथागतां संभृतसाधनत्वात् ।
पुरं नवीचक्रुरपां विसर्गा-
न्मेघा निदाघग्लपितामिवोर्वीम् ।। ३८ ।।

ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ।
उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामास रघुप्रवीरः ॥३९॥
तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य ।
यथार्हमन्यैरनुजीविलोकं संभावयामास यथाप्रधानम् ॥४०॥
सा मन्दुरासंश्रयिभिस्तुरंगैः शालाविधिस्तम्भगतैश्च नागैः ।
पूराबभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी ॥४१॥
वसन्स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायाम् ।
न मैथिलेयः स्पृहयांबभूव भर्त्रे दिवो नाप्यलकेश्वराय ॥४२॥
अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम् ।
निःश्वासहार्यांशुकमाजगाम घर्मः प्रियावेषमिवोपदेष्टुम् ।४३।
अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते ।
आनन्दशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ।४४।
प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी ।
उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्ताम् ।
दिने दिने शैवलवन्त्यधस्तात्सोपानपर्वाणि विमुञ्चदम्भः ।
उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं बभूव ॥ ४६ ॥
वनेषु सायंतनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु ।
प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ।४७।
स्वेदानुविद्धार्द्रनखक्षताङ्के भूयिष्ठसंदष्टशिखं कपोले ।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ।४८।
यन्त्रप्रवाहैः शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य ।
शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमन्तः ॥४९॥
स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम् ।५०।
आपिञ्जरा बद्धरजःकणत्वा-
न्मञ्जर्युदारा शुशुभेऽर्जुनस्य ।

दग्ध्वापि देहं गिरिशेन रोषा-
त्खण्डीकृता ज्येव मनोभवस्य ॥ ५१ ॥
मनोज्ञगन्धं सहकारभङ्गं पुराणशीधुं नवपाटलं च ।
संबन्धता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः ।५२।
जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकान्तौ ।
तापापनोदक्षमपादसेवौ स चोदयस्थौ नृपतिः शशी च ।।५३।।
अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ।
विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव ।५४।
स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्राम् ।
विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ॥ ५५ ॥
सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः ।
सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदङ्गनाभिः ॥ ५६ ॥
परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी ।
नौसंश्रयः पार्श्वगतां किरातीमुपात्तबालव्यजनां बभाषे ।५७।
पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलिताङ्गरागैः ।
संध्योदयः साभ्र इवैष वर्णं पुष्यत्यनेकं सरयूप्रवाहः ॥ ५८ ॥
विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः ।
तद्बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासाम् ।५९।
एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवत्यः ।
गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात्प्लवन्ते ६०
अमी शिरीषप्रसवावतंसाः,
प्रभ्रंशिनो वारिविहारिणीनाम् ।
पारिप्लवाः स्रोतसि निम्नगायाः
शैवाललोलाञ्छलयन्ति मीनान् ॥ ६१ ॥
आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु शीकरेषु ।
पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न छिदुरोऽपि हारः ६२

आवर्तशोभा नतनाभिकान्तेर्भङ्गो भ्रुवां द्वन्द्वचराः स्तनानाम् ।
जातानि रूपावयवोपमानान्यदूरवर्तीनि विलासिनीनाम् ।६३।
तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम् ।
श्रोत्रेषु संमूर्च्छति रक्तमासां गीतानुगं वारिमृदङ्गवाद्यम् ।६४।
संदष्टवस्त्रेष्वबलानितम्बेष्विन्दुप्रकाशान्तरितोडुतुल्याः ।
अमी जलापूरितसूत्रमार्गा मौनं भजन्ते रशनाकलापाः ।।६५।।
एताः करोत्पीडितवारिधारा दर्पात्सखीभिर्वदनेषु सिक्ताः ।
वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान्वारिलवान्वमन्ति ।। ६६ ।।
उद्बन्धकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफलपत्रवेष्टः ।
मनोज्ञ एव प्रमदामुखानामम्भोविहाराकुलितोऽपि वेषः ।६७।
स नौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु ।
स्कन्धावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः ।६८।

ततो नृपेणानुगताः स्त्रियस्ता,
भ्राजिष्णुना सातिशयं विरेजुः ।
प्रागेव मुक्ता नयनाभिरामाः,
प्राप्येन्द्रनीलं किमुतोन्मयूखम् ।। ६९ ।।
वर्णोदकैः काञ्चनशृङ्गमुक्तै-
स्तमायताक्ष्यः प्रणयादसिञ्चन् ।
तथागतः सोऽतितरां बभासे,
सधातुनिष्यन्द इवाद्रिराजः ।। ७० ।।

तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां ताम् ।
आकाशगङ्गारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ।।७१।।
यत्कुम्भयोनेरधिगम्य रामः कुशाय राज्येन समं दिदेश ।
तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज ।। ७२ ।।
स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव ।
दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श ।। ७३ ।।

जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् ।
सेहेऽस्य न भ्रंशमतो न लोभात्स तुल्यपुष्पाभरणो हि धीरः ७४
ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान् ।
वन्ध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादाः ।७५।
कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते ।
नागेन लौल्यात्कुमुदेन नूनमुपात्तमन्तर्ह्रदवासिना तत् ।७६।।
ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः ।
गारुत्मतं तीरगतस्तरस्वी भुजंगनाशाय समाददेऽस्त्रम् ।।७७।।
तस्मिन्ह्रदः संहितमात्र एव क्षोभात्समाविद्धतरङ्गहस्तः ।
रोधांसि निघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास ।।७८।।
तस्मात्समुद्रादिव मथ्यमानादुद्वृत्तनक्रात्सहसोन्ममज्ज ।
लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजंगराजः ।७९।
विभूषणाप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशां पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसंजहार प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ।।८०।।
त्रैलोक्यनाथप्रभवं प्रभावात्कुशं द्विषामङ्कुशमस्त्रविद्वान् ।
मानोन्नतेनाप्यभिवन्द्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो बभाषे ।८१।
अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वाम् ।
सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातम् ।।८२।।
कराभिघातोत्थितकन्दुकेयमालोक्य बालातिकुतूहलेन ।
ह्रदात्पतज्ज्योतिरिवान्तरिक्षादादत्त जैत्राभरणं त्वदीयम् ।८३।
तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन ।। ८४ ।।
इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम् ।
आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव पादयोस्ते ।।८५।।

इत्यूचिवानुपहृताभरणः क्षितीशं
श्लाघ्यो भवान्स्वजन इत्यनुभाषितारम् ।

संयोजयां विधिवदास समेतबन्धुः
कन्यामयेन कुमुदः कुलभूषणेन ॥ ८६ ॥
(वसन्त०)

तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते,
माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य ।
दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगन्ता-
न्गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः ॥ ८७ ॥
(मन्दा०)

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं,
लब्ध्वा बन्धुं तमपि च कुशः पञ्चमं तक्षकस्य ।
एकः शङ्कां पितृवधरिपोरत्यजद्वैनतेया-
च्छान्तव्यालामवनिमपरः पौरकान्तः शशास ।८८।

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
कुमुद्वतीपरिणयो नाम षोडशः सर्गः ॥ १६ ॥

## ॥ १ ॥ अथ सप्तदशः सर्गः ॥

अतिथिं नाम काकुत्स्थात्पुत्रं प्राप कुमुद्वती ।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १ ॥

स पितुः पितृमान्वंशं मातुश्चानुपमद्युतिः ।
अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥ २ ॥

तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ॥ ३ ॥

जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः ।
अमन्यतैकमात्मानमनेकं वशिना वशी ॥ ४ ॥

स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ।
जघान समरे दैत्यं दुर्जयं तेन चावधि ॥ ५ ॥
तं स्वसा नागराजस्य कुमुदस्य कुमद्वती ।
अन्वगात्कुमुदानन्दं शशाङ्कमिव कौमुदी ॥ ६ ॥
तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी ॥ ७ ॥
तदात्मसंभवं राज्ये मन्त्रिवृद्धाः समादधुः ।
स्मरन्तः पश्चिमामाज्ञां भर्तुः सङ्ग्रामयायिनः ॥ ८ ॥
ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः ।
विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम् ॥ ९ ॥
तत्रैनं हेमकुम्भेषु संभृतैस्तीर्थवारिभिः ।
उपतस्थुः प्रकृतयो भद्रपीठोपवेशितम् ॥ १० ॥
नदद्भिः स्निग्धगम्भीरं तूर्यैराहतपुष्करैः ।
अन्वमीयत कल्याणं तस्याविच्छिन्नसंतति ॥ ११ ॥
दूर्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरान् ।
ज्ञातिवृद्धैः प्रयुक्तान्स भेजे नीराजनाविधीन् ॥ १२ ॥
पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ।
उपचक्रमिरे पूर्वमभिषेक्तुं द्विजातयः ॥ १३ ॥
तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत ।
सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ॥ १४ ॥
स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स बन्दिभिः ।
प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः ॥ १५ ॥
तस्य सन्मन्त्रपूताभिः स्नानमद्भिः प्रतीच्छतः ।
*ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ॥ १६ ॥*
स तावदभिषेकान्ते स्नातकेभ्यो ददौ वसु ।
यावतैषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः ॥ १७ ॥

ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् ।
सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः ॥ १८ ॥
बन्धच्छेदं स बद्धानां वधार्हाणामवध्यताम् ।
धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवाम् ॥ १९ ॥
क्रीडापतत्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः ।
लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् ॥ २० ॥
ततः कक्ष्यान्तरन्यस्तं गजदन्तासनं शुचि ।
सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः ॥ २१ ॥
तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः ।
आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥ २२ ॥
तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम् ।
प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना ॥ २३ ॥
चन्दनेनाङ्गरागं च मृगनाभिसुगन्धिना ।
समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम् ॥ २४ ॥
आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान् ।
आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥ २५ ॥
नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये ।
विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥ २६ ॥
स राजककुदव्यग्रपाणिभिः पार्श्ववर्तिभिः ।
ययावुदीरितालोकः सुधर्मानवमां सभाम् ॥ २७ ॥
वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥ २८ ॥
शुशुभे तेन चाक्रान्तं मङ्गलायतनं महत् ।
श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवम् ॥ २९ ॥
बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः ।
रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः ॥ ३० ॥

प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम् ।
मूर्तिमन्तममन्यन्त विश्वासमनुजीविनः ॥ ३१ ॥
स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्वजाम् ।
क्रममाणश्चकार द्यां नागेनैरावतौजसा ॥ ३२ ॥
तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामलत्विषा ।
पूर्वराजवियोगौष्म्यं कृत्स्नस्य जगतो हृतम् ॥ ३३ ॥
धूमादग्नेः शिखाः पश्चादुदयादंशवो रवेः ।
सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ॥ ३४ ॥
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ।
शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इव ध्रुवम् ॥ ३५ ॥
अयोध्यादेवताश्चैनं प्रशस्तायतनार्चिताः ।
अनुदध्युरनुध्येयं सांनिध्यैः प्रतिमागतैः ॥ ३६ ॥
यावन्नाश्यायते वेदिरभिषेकजलाप्लुता ।
तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः ॥ ३७ ॥
वसिष्ठस्य गुरोर्मन्त्राः सायकास्तस्य धन्विनः ।
किं तत्साध्यं यदुभये साधयेयुर्न संगताः ॥ ३८ ॥
स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान्व्यवहारानतन्द्रितः ॥ ३९ ॥
ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान्विज्ञापनाफलैः ॥ ४० ॥
प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः ।
तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः ॥ ४१ ॥
यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् ।
सोऽभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ॥ ४२ ॥
वयोरूपविभूतीनामेकैकं मदकारणम् ।
तानि तस्मिन्समस्तानि न तस्योत्सिषिचे मनः ॥ ४३ ॥

इत्थं जनितरागासु प्रकृतिष्वनुवासरम् ।
अक्षोभ्यः स नवोऽप्यासीद्दृढमूल इव द्रुमः ॥ ४४ ॥
अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः ।
अतः सोऽभ्यन्तरान्नित्यान्षट् पूर्वमजयद्रिपून् ॥ ४५ ॥
प्रसादाभिमुखे तस्मिंश्चपलापि स्वभावतः ।
निकषे हेमरेखेव श्रीरासीदनपायिनी ॥ ४६ ॥
कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ ४७ ॥
न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत्किंचिद्व्यभ्रस्येव विवस्वतः ॥ ४८ ॥
रात्रिंदिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥ ४९ ॥
मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः ।
स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ॥ ५० ॥
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥ ५१ ॥
दुर्गाणि दुर्ग्रहाण्यासंस्तस्य रोद्धुरपि द्विषाम् ।
नहि सिंहो गजास्कन्दो भयाद्गिरिगुहाशयः ॥ ५२ ॥
भव्यमुख्याः समारम्भाः प्रत्यवेक्ष्या निरत्ययाः ।
गर्भशालिसधर्माणस्तस्य गूढं विपेचिरे ॥ ५३ ॥
अपथेन प्रववृते न जातूपचितोऽपि सः ।
वृद्धो नदीमुखेनैव प्रस्थानं लवणाम्भसः ॥ ५४ ॥
कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः ।
कस्य कार्यः प्रतीकारः स तन्नैवोदपादयत् ॥ ५५ ॥
शक्येष्वेवाभवद्यात्रा तस्य शक्तिमतः सतः ।
समीरणसहायोऽपि नाम्भःप्रार्थी दवानलः ॥ ५६ ॥

न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ॥ ५७ ॥
हीनान्यनुपकर्तृणि प्रवृद्धानि विकुर्वते ।
तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः ॥ ५८ ॥
परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम् ।
ययावेभिर्बलिष्ठश्चेत्परस्मादास्त सोऽन्यथा ॥ ५९ ॥
कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः ।
अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते ॥ ६० ॥
परकर्मापहः सोऽभूदुद्यतः स्वेषु कर्मसु ।
आवृणोदात्मनो रन्ध्रं रन्ध्रेषु प्रहरन्रिपून् ॥ ६१ ॥
पित्रा संवर्धितो नित्यं कृतास्त्रः सांपरायिकः ।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥ ६२ ॥
सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः ।
स चकर्ष परस्मात्तदयस्कान्त इवायसम् ॥ ६३ ॥
वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव ।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥ ६४ ॥
तपो रक्षन्स विघ्नेभ्यस्तस्करेभ्यश्च संपदः ।
यथास्वमाश्रमैश्चक्रे वर्णैरपि षड्ंशभाक् ॥ ६५ ॥
खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् ।
दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ॥ ६६ ॥
स गुणानां बलानां च षण्णां षण्मुखविक्रमः ।
बभूव विनियोगज्ञः साधनीयेषु वस्तुषु ॥ ६७ ॥
इति क्रमात्प्रयुञ्जानो राजनीतिं चतुर्विधाम् ।
आतीर्थादप्रतीघातं स तस्याः फलमानशे ॥ ६८ ॥
कूटयुद्धविधिज्ञेऽपि तस्मिन्सन्मार्गयोधिनि ।
भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरगामिनी ॥ ६९ ॥

प्रायः प्रतापभग्नत्वादरीणां तस्य दुर्लभः ।
रणो गन्धद्विपस्येव गन्धभिन्नान्यदन्तिनः ॥ ७० ॥

प्रवृद्धौ हीयते चन्द्रः समुद्रोऽपि तथाविधः ।
स तु तत्समवृद्धिश्च न चाभूत्ताविव क्षयी ॥ ७१ ॥

सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः ।
उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिनः ॥ ७२ ॥

स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन् ।
तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः ॥ ७३ ॥

दुरितं दर्शनेन घ्नंस्तत्त्वार्थेन नुदंस्तमः ।
प्रजाः स्वतन्त्रयांचक्रे शश्वत्सूर्य इवोदितः ॥ ७४ ॥

इन्दोरगतयः पद्मे सूर्यस्य कुमुदेऽशवः ।
गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम् ॥ ७५ ॥

पराभिसंधानपरं यद्यप्यस्य विचेष्टितम् ।
जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत् ॥ ७६ ॥

एवमुद्यन्प्रभावेण शास्त्रनिर्दिष्टवर्त्मना ।
वृषेव देवो देवानां राज्ञां राजा बभूव सः ॥ ७७ ॥

पञ्चमं लोकपालानामूचुः साधर्म्ययोगतः ।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम् ॥ ७८ ॥

दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम् ।
दधुः शिरोभिर्भूपाला देवाः पौरंदरीमिव ॥ ७९ ॥

ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ ।
यथा साधारणीभूतं नामास्य धनदस्य च ॥ ८० ॥

इन्द्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभू-
द्यादोनाथः शिवजलपथः कर्मणे नौचराणाम् ।

पूर्वापेक्षी तदनु विदधे कोषवृद्धिं कुबेर-
स्तस्मिन्दण्डोपनतचरितं भेजिरे लोकपालाः ।८१।
( मन्दा० )

।। इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
अतिथिवर्णनो नाम सप्तदशः सर्गः ।।१७।।

## ।। १८ ।। अथ अष्टादशः सर्गः ।।

स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ।
अनूनसारं निषधान्नगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव ।। १ ।।
तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननन्द यूना ।
सुवृष्टियोगादिव जीवलोकः सस्येन संपत्तिफलोन्मुखेन ।।२।।
शब्दादि निर्विश्य सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः ।
कौमुद्वतेयः कुमुदावदातैर्द्यामर्जितां कर्मभिरारुरोह ।। ३ ।।
पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः ।
एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ।। ४ ।।
तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः ।
यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ।५।
नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजम् ।
ख्यातं नभःशब्दमयेन नाम्ना कान्तं नभोमासमिव प्रजानाम् ।६।
तस्मै विसृज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वम् ।
मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ।। ७ ।।
तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्याहृतपुण्डरीका यं पुण्डरीकाक्षमिव श्रिता श्रीः ।८।
क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षम् ।
क्ष्मां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षान्ततरश्चचार ।९।

अनीकिनीनां समरेऽग्रयायी तस्यापि देवप्रतिमः सुतोऽभूत् ।
व्यश्रूयतानीकपदावसानं देवादि नाम त्रिदिवेऽपि यस्य ।।१०।।
पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन ।
पुत्रस्तथैवात्मजवत्सलेन स तेन पित्रा पितृमान्बभूव ।। ११ ।।
पूर्वस्तयोरात्मसमे चिरोढामात्मोद्भवे वर्णचतुष्टयस्य ।
धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकम् ।१२।
वशी सुतस्तस्य वशंवदत्वात्स्वेषामिवासीद्द्विषतामपीष्टः ।
सकृद्विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान्ग्रहीतुम् ।१३।
अहीनगुर्नाम स गां समग्रामहीनबाहुद्रविणः शशास ।
यो हीनसंसर्गपराङ्मुखत्वाद्युवाप्यनर्थैर्व्यसनैर्विहीनः ।। १४ ।।
गुरोः स चानन्तरमन्तरज्ञः पुंसां पुमानाद्य इवावतीर्णः ।
उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दिगीशश्चतुरो बभूव ।। १५ ।।
तस्मिन्प्रयाते परलोकयात्रां जेतर्यरीणां तनयं तदीयम् ।
उच्चैःशिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रम् ।
तस्याभवत्सूनुरुदारशीलः शिलः शिलापट्टविशालवक्षाः ।
जितारिपक्षोऽपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमानः ।१७।
तमात्मसंपन्नमनिन्दितात्मा कृत्वा युवानं युवराजमेव ।
सुखानि सोऽभुङ्क्त सुखोपरोधि वृत्तं हि राज्ञामुपरुद्धवृत्तम् ।१८।
तं रागबन्धिष्ववितृप्तमेव, भोगेषु सौभाग्यविशेषभोग्यम् ।
विलासिनीनामरतिक्षमापि जरा वृथा मत्सरिणी जहार ।१९।
उन्नाभ इत्युद्गतनामधेयस्तस्यायथार्थोन्नतनाभिरन्ध्रः ।
सुतोऽभवत्पङ्कजनाभकल्पः कृत्स्नस्य नाभिर्नृपमण्डलस्य ।२०।
ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः ।
बभूव वज्राकरभूषणायाः पतिः पृथिव्याः किल वज्रणाभः २१
तस्मिन्गते द्यां सुकृतोपलब्धां तत्संभवं शङ्खणमर्णवान्ता ।
उत्खातशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ।।२२।।

तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः ।
वेलातटेषूषितसैनिकाश्वं पुराविदो यं व्युषिताश्वमाहुः ।।२३।।
आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर्विश्वसहो विजज्ञे ।
पातुं सहो विश्वसखः समग्रां विश्वंभरामात्मजमूर्तिरात्मा २४
अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनये नयज्ञः ।
द्विषामसह्यः सुतरां तरूणां हिरण्यरेता इव सानिलोऽभूत् ।२५।
पिता पितॄणामनृणस्तमन्ते वयस्यनन्तानि सुखानि लिप्सुः ।
राजानमाजानुविलम्बिबाहुं कृत्वा कृती वल्कलवान्बभूव ।२६।
कौसल्य इत्युत्तरकोसलानां पत्युः पतङ्गान्वयभूषणस्य ।
तस्यौरसः सोमसुतः सुतोऽभून्नेत्रोत्सवः सोम इव द्वितीयः ।२७।
यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयं गतिमाजगाम ।
ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम् ।२८।
तस्मिन्कुलापीडनिभे विपीडं सम्यङ्महीं शासति शासनाङ्काम् ।
प्रजाश्चिरं सुप्रजसि प्रजेशे ननन्दुरानन्दजलाविलाक्ष्यः ।।२९।।
पात्रीकृतात्मा गुरुसेवनेन स्पष्टाकृतिः पत्त्ररथेन्द्रकेतोः ।
तं पुत्रिणां पुष्करपत्त्रनेत्रः समारोपयदग्रसंख्याम् ।। ३० ।।
वंशस्थितिं वंशकरेण तेन संभाव्य भावी स सखा मघोनः ।
उपस्पृशन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषु त्रिदशत्वमाप ।। ३१ ।।
तस्य प्रभानिर्जितपुष्परागं पौष्यां तिथौ पुष्यमसूत पत्नी ।
तस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनाः पुष्य इव द्वितीये ।३२।
महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा ।
तस्मात्सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरुः ।३३।
ततः परं तत्प्रभवः प्रपेदे ध्रुवोपमेयो ध्रुवसंधिरुर्वीम् ।
यस्मिन्नभूज्ज्यायसि सत्यसंधे संधिर्ध्रुवः संनमतामरीणाम् ।३४।
सुते शिशावेव सुदर्शनाख्ये दर्शात्ययेन्दुप्रियदर्शने सः ।
मृगायताक्षो मृगयाविहारी सिंहादवापद्विपदं नृसिंहः ।।३५।।

स्वर्गामिनस्तस्य तमैकमत्यादमात्यवर्गः कुलतन्तुमेकम् ।
अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार ।।३६।।
नवेन्दुना तन्नभसोपमेयं शावैकसिंहेन च काननेन ।
रघोः कुलं कुड्मलपुष्करेण तोयेन चाप्रौढनरेन्द्रमासीत् ।३७।
लोकेन भावी पितुरेव तुल्यः संभावितो मौलिपरिग्रहात्सः ।
दृष्टो हि वृण्वन्कलभप्रमाणोऽप्याशाः पुरोवातमवाप्य मेघः ३८
तं राजवीथ्यामधिहस्ति यान्तमाधोरणालम्बितमग्र्यवेशम् ।
षड्वर्षदेशीयमपि प्रभुत्वात्प्रैक्षन्त पौराः पितृगौरवेण ।।३९।।
कामं न सोऽकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय ।
तेजोमहिम्ना पुनरावृतात्मा तद्व्याप चामीकरपिञ्जरेण ।४०।
तस्मादधः किंचिदिवावतीर्णावसंस्पृशन्तौ तपनीयपीठम् ।
सालक्तकौ भूपतयः प्रसिद्धैर्ववन्दिरे मौलिभिरस्य पादौ ।४१।
मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या ।
शब्दो महाराज इति प्रतीतस्तथैव तस्मिन्युयुजेऽर्भकेऽपि ।४२।
पर्यन्तसंचारितचामरस्य कपोललोलोभयकाकपक्षात् ।
तस्याननादुच्चरितो विवादश्चस्खाल वेलास्वपि नार्णवानाम् ।
निर्वृत्तजाम्बूनदपट्टशोभे न्यस्तं ललाटे तिलकं दधानः ।
तेनैव शून्यान्यरिसुन्दरीणां मुखानि स स्मेरमुखश्चकार ।४४।
शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि भूषणेन ।
नितान्तगुर्वीमपि सोऽनुभावाद्धुरं धरित्र्या बिभरांबभूव ।४५।
न्यस्ताक्षरामक्षरभूमिकायां कार्त्स्न्येन गृह्णाति लिपिं न यावत् ।
सर्वाणि तावच्छ्रुतवृद्धयोगात्फलान्युपायुङ्क्त स दण्डनीतेः ४६
उरस्यपर्याप्तनिवेशभागा प्रौढीभविष्यन्तमुदीक्षमाणा ।
संजातलज्जेव तमातपत्रच्छायाच्छलेनोपजुगूह लक्ष्मीः ।४७।
अनश्नुवानेन युगोपमानमबद्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गत्सरुणापि चासीद्रक्षावती तस्य भुजेन भूमिः ।४८।

न केवलं गच्छति-तस्य काले
ययुः शरीरावयवा विवृद्धिम् ।
वंश्या गुणाः खल्वपि लोककान्ताः
प्रारम्भसूक्ष्माः प्रथिमानमापुः ॥ ४९ ॥

स पूर्वजन्मान्तरदृष्टपाराः
स्मरन्निवाक्लेशकरो गुरूणाम् ।
तिस्रस्त्रिवर्गाधिगमस्य मूलं
जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥ ५० ॥

व्यूह्य स्थितः किंचिदिवोत्तरार्धमुन्नद्धचूडोऽञ्चितसव्यजानुः ।
आकर्णमाकृष्टसबाणधन्वा व्यरोचतास्त्रेषु विनीयमानः ॥५१॥

अथ मधु वनितानां नेत्रनिर्वेशनीयं
मनसिजतरुपुष्पं रागबन्धप्रवालम् ।
अकृतकविधि सर्वाङ्गीणमाकल्पजातं
विलसितपदमाद्यं यौवनं स प्रपेदे ॥ ५२ ॥

प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः
समधिकतररूपाः शुद्धसंतानकामैः ।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥ ५३ ॥

॥ इति महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये
वंशानुक्रमो नाम अष्टादशः सर्गः ॥ १८ ॥

## ॥ १९ ॥ अथ एकोनविंशः सर्गः ॥

अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसम् ।
शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥१॥
तत्र तीर्थसलिलेन दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः ।
सौधवासमुटजेन विस्मृतः संचिकाय फलनिःस्पृहस्तपः ॥२॥
लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी ।
भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥३॥
सोऽधिकारमभिकः कुलोचितं काश्चन स्वयमवर्तयत्समाः ।
संनिवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोऽभवत् ॥ ४ ॥
कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदङ्गनादिषु ।
ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥ ५ ॥
इन्द्रियार्थपरिशून्यमक्षमः सोढुमेकमपि स क्षणान्तरम् ।
अन्तरेव विहरन्दिवानिशं न व्यपैक्षत समुत्सुकाः प्रजाः ॥६॥
गौरवाद्यदपि जातु मन्त्रिणां दर्शनं प्रकृतिकाङ्क्षितं ददौ ।
तद्गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितम् ॥ ७ ॥
तं कृतप्रणतयोऽनुजीविनः कोमलात्मनखरागरूषितम् ।
भेजिरे नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहणम् ॥ ८ ॥
यौवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दीर्घिकाः ।
गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः ॥ ९ ॥
तत्र सेकहृतलोचनाञ्जनैर्धौतरागपरिपाटलाधरैः ।
अङ्गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतकाभिर्मुखैः ॥ १० ॥
घ्राणकान्तमधुगन्धकर्षिणीः पानभूमिरचनाः प्रियासखः ।
अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः ॥११॥
सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरङ्गनाः ।
ताभिरप्युपहृतं मुखासवं सोऽपिबद्बकुलतुल्यदोहदः ॥ १२ ॥

अङ्कमङ्कपरिवर्तनोचिते तस्य निन्यतुरशून्यतामुभे ।
वल्लकी च हृदयंगमस्वना वल्गुवागपि च वामलोचना ।।१३।।
स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ।
नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जयत् ।१४।
चारु नृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलः पिबन्नत्यजीवदमरालकेश्वरौ ।। १५ ।।
तस्य सावरणदृष्टसंधयः काम्यवस्तुषु नवेषु सङ्गिनः ।
वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः समागमाः ।।१६।।
अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितम् ।
मेखलाभिरसकृच्च बन्धनं वञ्चयन्प्रणयिनीरवाप सः ।।१७।।
तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ।
शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशङ्किनो वचः ।।१८।।
लौल्यमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः ।
वर्तते स्म स कथंचिदालिखन्नङ्गुलीक्षरणसन्नवर्तिकः ।।१९।।
प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितम् ।
निन्युरुत्सवविधिच्छलेन तं देव्य उज्झितरुषः कृतार्थताम् ।२०।
प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखण्डनव्यथाः ।
प्राञ्जलिः प्रणयिनीः प्रसादयन्सोऽधुनोत्प्रणयमन्थरः पुनः ।२१।
स्वप्नकीर्तितविपक्षमङ्गनाः प्रत्यभैत्सुरवदन्त्य एव तम् ।
प्रच्छदान्तगलिताश्रुबिन्दुभिः क्रोधभिन्नवलयैर्विवर्तनैः ।।२२।।
क्लृप्तपुष्पशयनाँल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ।
अन्वभूत्परिजनाङ्गनारतं सोऽवरोधभयवेपथूत्तरम् ।। २३ ।।
नाम वल्लभजनस्य ते मया प्राप्य भाग्यमपि तस्य काङ्क्ष्यते ।
लोलुपं ननु मनो ममेति तं गोत्रविस्खलितमूचुरङ्गनाः ।।२४।।
चूर्णबभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितम् ।
उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ।२५।

स स्वयं चरणरागमादधे योषितां न च तथा समाहितः ।
लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितम्बिभिः ॥२६॥
चुम्बने विपरिवर्तिताधरं हस्तरोधि रशनाविघट्टने ।
विघ्नितेच्छमपि तस्य सर्वतो मन्मथेन्धनमभूद्वधूरतम् ॥२७॥
दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः ।
छायया स्मितमनोज्ञया वधूर्ह्रीनिमीलितमुखीश्चकार सः ।२८।
कण्ठसक्तमृदुबाहुबन्धनं न्यस्तपादतलमग्रपादयोः ।
प्रार्थयन्त शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुम्बनम् ।२९।
प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेषमतिशक्रशोभिनम् ।
पिप्रिये न स तथा यथा युवा व्यक्तलक्ष्म परिभोगमण्डनम् ।३०।
मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमननवस्थितं प्रियाः ।
विद्म हे शठ पलायनच्छलान्यञ्जसेति रुरुधुः कचग्रहैः ॥३१॥
तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्य योषितः ।
अध्यशेरत बृहद्भुजान्तरं पीवरस्तनविलुप्तचन्दनम् ॥ ३२ ॥
संगमाय निशि गूढचारिणं चारदूतिकथितं पुरोगताः ।
वञ्चयिष्यसि कुतस्तमोवृतः कामुकेति चकृषुस्तमङ्गनाः ।३३।
योषितामुडुपतेरिवार्चिषां स्पर्शनिर्वृतिमसाववाप्नुवन् ।
आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ॥ ३४ ॥
वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः ।
शिल्पकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलोभयन् ।३५।
अङ्गसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन् ।
स प्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह मित्रसंनिधौ ॥३६॥
अंसलम्बिकुटजार्जुनस्रजस्तस्य नीपरजसाङ्गरागिणः ।
प्रावृषि प्रमदबर्हिणेष्वभूत्कृत्रिमाद्रिषु विहारविभ्रमः ॥३७॥
विग्रहाश्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे ।
आचकाङ्क्ष घनशब्दविक्लवास्ता विवृत्य विशतीर्भुजान्तरम् ३८

कार्तिकीषु सवितानहर्म्यभाग्यामिनीषु ललिताङ्गनासखः ।
अन्वभुङ्क्त सुरतश्रमापहां मेघमुक्तविशदां स चन्द्रिकाम् ।३९।
सैकतं च सरयूं विवृण्वतीं श्रोणिबिम्बमिव हंसमेखलम् ।
स्वप्रियाविलसितानुकारिणीं सौधजालविवरैर्व्यलोकयत् ।४०।
मर्मरैरगुरुधूपगन्धिभिर्व्यक्तहेमरशनैस्तमेकतः ।
जह्रुराग्रथनमोक्षलोलुपं हैमनैर्निवसनैः सुमध्यमाः ।।४१।।
अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु ।
तस्य सर्वसुरतान्तरक्षमाः साक्षितां शिशिररात्रयो ययुः ।४२।
दक्षिणेन पवनेन संभृतं प्रेक्ष्य चूतकुसुमं सपल्लवम् ।
अन्वनैषुरवधूतविग्रहास्तं दुरुत्सहवियोगमङ्गनाः ।। ४३ ।।
ताः स्वमङ्कमधिरोप्य दोलया प्रेङ्खयन्परिजनापविद्धया ।
मुक्तरज्जु निबिडं भयच्छलात्कण्ठबन्धनमवाप बाहुभिः ।४४।
तं पयोधरनिषिक्तचन्दनैर्मौक्तिकग्रथितचारुभूषणैः ।
ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलम्बिमणिमेखलैः प्रियाः ४५
यत्स लग्नसहकारमासवं रक्तपाटलसमागमं पपौ ।
तेन तस्य मधुनिर्गमात्कृशश्चित्तयोनिरभवत्पुनर्नवः ।। ४६ ।।
एवमिन्द्रियसुखानि निर्विशन्नन्यकार्यविमुखः स पार्थिवः ।
आत्मलक्षणनिवेदितानृतूनत्यवाहयदनङ्गवाहितः ।। ४७ ।।
तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः ।
आमयस्तु रतिरागसंभवो दक्षशाप इव चन्द्रमक्षिणोत् ।।४८।।
दृष्टदोषमपि तन्न सोऽत्यजत्सङ्गवस्तु भिषजामनाश्रवः ।
स्वादुभिस्तु विषयैर्हृतस्ततो दुःखमिन्द्रियगणो निवार्यते ।४९।
तस्य पाण्डुवदनाल्पभूषणा सावलम्बगमना मृदुस्वना ।
राजयक्ष्मपरिहानिराययौ कामयानसमवस्थया तुलाम् ।।५०।।
व्योम पश्चिमकला स्थितेन्दु वा पङ्कशेषमिव घर्मपल्वलम् ।
राज्ञि तत्कुलमभूत्क्षयातुरे वामनार्चिरिव दीपभाजनम् ।५१।

बाढमेष दिवसेषु पार्थिवः कर्म साधयति पुत्रजन्मने ।
इत्यदर्शितरुजोऽस्य मन्त्रिणः शश्वदूचुरघशङ्किनीः प्रजाः ।५२।
स त्वनेकवनितासखोऽपि सन्पावनीमनवलोक्य संततिम् ।
वैद्ययत्नपरिभाविनं गदं न प्रदीप इव वायुमत्यगात् ।। ५३ ।।
तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा ।
रोगशान्तिमपदिश्य मन्त्रिणः संभृते शिखिनि गूढमादधुः ।५४।
तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी ।
साधु दृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियम् ।। ५५ ।।
तस्यास्तथाविधनरेन्द्रविपत्तिशोका-
दुष्णैर्विलोचनजलैः प्रथमाभितप्तः ।
निर्वापितः कनककुम्भमुखोज्झितेन
वंशाभिषेकविधिना शिशिरेण गर्भः ।। ५६ ।।
(वसन्त०)
तं भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजाना-
मन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ।
मौलैः सार्धं स्थविरसचिवैर्हेमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ५७
(मन्दाक्रान्ता)

।। इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अग्निवर्णशृङ्गारो नामैकोनविंशः सर्गः ।। १९ ।।

**।। समाप्तं रघुवंशम् ।।**

॥ अर्हम् ॥

पू. पं. श्री आणंदविजयगणिभ्यो नमः ।

महाकवि श्री कालिदास-विरचितं

# ॥ कुमारसम्भवम् ॥

## ॥ १ ॥ अथ प्रथमः सर्गः ॥

( इन्द्रवज्रा उपेन्द्रवज्रा उपजातिः वा )

अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः ।१।
यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च, पृथूपदिष्टां दुदुहुर्धरित्रीम् ।२।
अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः ।३।
यश्चाप्सरोविभ्रममण्डनानां, संपादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागा-मकालसंध्यामिव धातुमत्ताम् ।।४।।
आमेखलं संचरतां घनानां, छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते, शृङ्गाणि यस्यातपवन्ति सिद्धाः ।५।
पदं तुषारस्रुतिधौतरक्तं, यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-र्मुक्ताफलैः केसरिणां किराताः ।६।
न्यस्ताक्षरा धातुरसेन यत्र, भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणा-मनङ्गलेखक्रिययोपयोगम् ।।७।।
यः पूरयन्कीचकरन्ध्रभागा-न्दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किंनराणां, तानप्रदायित्वमिवोपगन्तुम् ८
कपोलकण्डूः करिभिर्विनेतुं, विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः, सानूनि गन्धः सुरभीकरोति ।।९।।

वनेचराणां वनितासखानां, दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्या-मतैलपूराः सुरतप्रदीपाः ।।१०।।
उद्वेजयत्यङ्गुलिपार्ष्णिभागा-न्मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्ता, भिन्दन्ति मन्दां गतिमश्वमुख्यः ।११।
दिवाकराद्रक्षति यो गुहासु, लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने, ममत्वमुच्चैः शिरसां सतीव ।१२।
लाङ्गूलविक्षेपविसर्पिशोभै-रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं, कुर्वन्ति बालव्यजनैश्चमर्यः ।१३।
यत्रांशुकाक्षेपविलज्जितानां, यदृच्छया किंपुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बा-स्तिरस्करिण्यो जलदा भवन्ति १४
भागीरथीनिर्झरसीकराणां, वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातै-रासेव्यते भिन्नशिखण्डिबर्हः ।।१५।।
सप्तर्षिहस्तावचितावशेषा-ण्यधो विवस्वान्परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि, प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ।।१६।।
यज्ञाङ्गयोनित्वमवेक्ष्य यस्य, सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं, शैलाधिपत्यं स्वयमन्वतिष्ठत् ।१७।
स मानसीं मेरुसखः पितॄणां, कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीया-मात्मानुरूपां विधिनोपयेमे ।१८।
कालक्रमेणाथ तयोः प्रवृत्ते, स्वरूपयोग्ये सुरतप्रसङ्गे ।
मनोरमं यौवनमुद्वहन्त्या, गर्भोऽभवद्भूधरराजपत्न्याः ।।१९।।
असूत सा नागवधूपभोग्यं, मैनाकमम्भोनिधिबद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रा-ववेदनाज्ञं कुलिशक्षतानाम् ।२०।
अथावमानेन पितुः प्रयुक्ता, दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा, तां जन्मने शैलवधूं प्रपेदे ।।२१।।
सा भूधराणामधिपेन तस्यां, समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां, नीताविवोत्साहगुणेन संपत् ।२२।

प्रसन्नदिक्पांसुविविक्तवातं, शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजंगमानां, सुखाय तज्जन्मदिनं बभूव ।२३।
तया दुहित्रा सुतरां सवित्री, स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दा-दुद्भिन्नया रत्नशलाकयेव ।। २४ ।।
दिने दिने सा परिवर्धमाना, लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषा-ञ्ज्योत्स्नान्तराणीव कलान्तराणि ।।
तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा, पश्चादुमाख्यां सुमुखी जगाम २६
महीभृतः पुत्रवतोऽपि दृष्टि-स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते, द्विरेफमाला सविशेषसङ्गा ।२७।
प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी, तया स पूतश्च विभूषितश्च ।२८।
मन्दाकिनीसैकतवेदिकाभिः, सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां, क्रीडारसं निर्विशतीव बाल्ये ।२९।
तां हंसमालाः शरदीव गङ्गां,महौषधिं(धी)नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले, प्रपेदिरे प्राक्तनजन्मविद्याः ।।३०।।
असंभृतं मण्डनमङ्गयष्टे-रनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं, बाल्यात्परं साथ वयः प्रपेदे ।३१।
उन्मीलितं तूलिकयेव चित्रं, सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ।। ३२ ।।
अभ्युन्नताङ्गुष्ठनखप्रभाभि-र्निक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां, स्थलारविन्दश्रियमव्यवस्थाम् ३३
सा राजहंसैरिव संनताङ्गी, गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-रादित्सुभिर्नूपुरसिञ्जितानि ।।३४।।
वृत्तानुपूर्वे च न चातिदीर्घे, जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातु-र्लावण्य उत्पाद्य इवास यत्नः ३५

नागेन्द्रहस्तास्त्वचि कर्कशत्वा-देकान्तशैत्यात्कदलीविशेषाः ।
लब्ध्वापि लोके परिणाहि रूपं, जातास्तदूर्वोरुपमानबाह्याः ३६
एतावता नन्वनुमेयशोभि, काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यद्गिरिशेन पश्चा-दनन्यनारीकमनीयमङ्कम् ।३७।
तस्याः प्रविष्टा नतनाभिरन्ध्रं, रराज तन्वी नवलोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य, तन्मेखलामध्यमणेरिवार्चिः ।३८।
(गम्भीरनाभीह्लदसंनिधाने, रराज नीला नवलोमराजिः ।
मुखेन्दुभीरुस्तनचक्रवाक-चञ्चच्युता शैवलमञ्जरीव ।।)
मध्येन सा वेदिविलग्नमध्या, वलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेव, कामस्य सोपानमिव प्रयुक्तम् ।।३९।।
अन्योन्यमुत्पीडयदुत्पलाक्ष्याः, स्तनद्वयं पाण्डु तथा प्रवृद्धम् :
मध्ये यथा श्याममुखस्य तस्य, मृणालसूत्रान्तरमप्यलभ्यम् ।४०।
शिरीषपुष्पाधिकसौकुमार्यौ, बाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य, यौ कण्ठपाशौ मकरध्वजेन ।४१।
निर्भर्त्सिताशोकदलप्रसूति, पाणिद्वयं चारुनखं तदीयम् ।
नवोदितेन्दुप्रतिमस्य शोभां, व्योम्नः प्रदोषे विफलीचकार ।।
कण्ठस्य तस्याः स्तनबन्धुरस्य, मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव, साधारणो भूषणभूष्यभावः ।४२।
चन्द्रं गता पद्मगुणान्न भुङ्क्ते, पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला, द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ४३
पुष्पं प्रवालोपहितं यदि स्या-न्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्या-स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ४४
स्वरेण तस्याममृतस्रुतेव, प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा, श्रोतुर्वितन्त्रीरिव ताड्यमाना ४५
(कर्णद्वयस्थं नगराजपुत्र्या-स्ताटङ्कयुग्मं सुतरां रराज ।
मत्वा भविश्रीं त्रिपुरारिपत्नीं, तां सेवमानाविव पुष्पवन्तौ ।।

ताटङ्कपत्रं विरराज तस्याः, शैलात्मजायाः श्रवणद्वयस्थम् ।
मत्वा भवित्रीं मदनारिपत्नीं, सेवासमेताविव पुष्पवन्तौ ।।)
प्रवातनीलोत्पलनिर्विशेष-मधीरविप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्य-स्ततो गृहीतं नु मृगाङ्गनाभिः ४६
तस्याः शलाकाञ्जननिर्मितेव, कान्तिर्भ्रुवोरायतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः, स्वचापसौन्दर्यमदं मुमोच ४७
लज्जा तिरश्चां यदि चेतसि स्या-दसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्यु-र्वालप्रियत्वं शिथिलं चमर्यः ।४८।
सर्वोपमाद्रव्यसमुच्चयेन, यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्ना-देकस्थसौन्दर्यदिदृक्षयेव ।।४६।।
तां नारदः कामचरः कदाचि-त्कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं, प्रेम्णा शरीरार्धहरां हरस्य ।।५०।।
गुरुः प्रगल्भेऽपि वयस्यतोऽस्या-स्तस्थौ निवृत्तान्यवराभिलाषः ।
ऋते कृशानोर्न हि मन्त्रपूत-मर्हन्ति तेजांस्यपराणि हव्यम् ५१
अयाचितारं न हि देवदेव-मद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधु-र्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ।५२।
यदैव पूर्वे जनने शरीरं, सा दक्षरोषात्सुदती ससर्ज (स्वयमुत्ससर्ज)
तदाप्रभृत्येव विमुक्तसङ्गः, पतिः पशूनामपरिग्रहोऽभूत् ।५३।
स कृत्तिवासास्तपसे य(जि)तात्मा, गङ्गाप्रवाहोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि, किंचित्क्वणत्किंनरमध्युवास ५४
गणा नमेरुप्रसवावतंसा, भूर्जत्वचः स्पर्शवतीर्दधानाः ।
मनःशिलाविच्छुरिता निषेदुः, शैलेयनद्धेषु शिलातलेषु ।५५।
तुषारसंघातशिलाः खुराग्रैः, समुल्लिखन्दर्पकलः ककुद्मान् ।
दृष्टः कथंचिद्गवयैर्विविग्नै-रसोढसिंहध्वनिरुन्ननाद ।। ५६ ।।
तत्राग्निमाधाय समित्समिद्धं, स्वमेव मूर्त्यन्तरमष्टमूर्तिः ।
स्वयं विधाता तपसः फलानां, केनापि कामेन तपश्चचार ५७

अनर्घ्यमर्घ्येण तमद्रिनाथः, स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम् ।५८।
प्रत्यर्थिभूतामपि तां समाधेः, शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते, येषां न चेतांसि त एव धीराः ५९
अवचितबलिपुष्पा वेदिसंमार्गदक्षा,
नियमविधिजलानां बर्हिषां चोपनेत्री ।
गिरिशमुपचचार प्रत्यहं सा सुकेशी,
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ।।६०।।
(मालिनी)

।। इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्य
उमोत्पत्तिर्नाम प्रथमः सर्गः ।। १ ।।

—●—

## ।। २ ।। द्वितीयः सर्गः ।।

तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ।। १ ।।
तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ।। २ ।।
अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ।। ३ ।।
नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ।। ४ ।।
यदमोघमपामन्तरुप्तं बीजमज त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ।। ५ ।।

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥
स्त्रीपुंसावात्मभागौ(वौ) ते भिन्नमूर्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥
स्वकालपरिमाणेन व्यस्तरात्रिदिवस्य ते ।
यौ तु स्वप्नाऽवबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥
जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥ १० ॥
द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चाऽसि प्राकाम्यं ते विभूतिषु ॥ ११ ॥
उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥ १२ ॥
त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ १३ ॥
त्वं पितॄणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चाऽसि विधाता वेधसामपि ॥ १४ ॥
त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।
वेद्यं च वेदिता चाऽसि ध्याता ध्येयं ज यत्परम् ॥ १५ ॥
इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयंगमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १६ ॥
पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १७ ॥
स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य वः ।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥ १८ ॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ १९ ॥
प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥ २० ॥
किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥
कुबेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥ २२ ॥
यमोऽपि विलिखन्भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥ २३ ॥
अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ २४ ॥
पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते ।
अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५ ॥
आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्धानः क्षतहुंकारशंसिनः ॥ २६ ॥
लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥
तद्ब्रूत वत्साः ! किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ २८ ॥
ततो मन्दानिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥
स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥
एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३१ ॥

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥
पुरे तावन्तमेवाऽस्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥
सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते ।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥
व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्ताऽनिलाऽधिकम् ॥ ३५ ॥
पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥
तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥ ३७ ॥
ज्वलन्मणिशिखाश्चैनं बासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजंगाः पर्युपासते ॥ ३८ ॥
तत्कृताऽनुग्रहापेक्षी तं मुहुर्दूतहारितैः ।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥ ३९ ॥
इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः ॥ ४० ॥
तेनाऽमरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ॥ ४१ ॥
वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।
चामरैः सुरबन्दीनां बाष्पसीकरवर्षिभिः ॥ ४२ ॥
उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः ।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ॥ ४३ ॥
मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम सांप्रतम् ॥ ४४ ॥

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात्पथि ॥ ४५ ॥
यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥ ४६ ॥
उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ४७ ॥
तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः ।
वीर्यवन्त्यौषधानीव विकारे सांनिपातिके ॥ ४८ ॥
जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा ।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम् ॥ ४९ ॥
तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥ ५० ॥
तदिच्छामो विभो ! स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५१ ॥
गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥ ५२ ॥
वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥ ५३ ॥
संपत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम् ।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥ ५४ ॥
इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ ५५ ॥
वृतं तेनेदमेव प्राङ्मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥ ५६ ॥
संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥ ५७ ॥

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम् ।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना ।। ५८ ।।

उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शंभोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ।। ५९ ।।

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ।। ६० ।।

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ।। ६१ ।।

इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः ।। ६२ ।।

तत्र निश्चित्य कन्दर्पमगमत्पाकशासनः ।
मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा ।। ६३ ।।

अथ स ललितयोषिद्भ्रूलताचारुशृङ्ग
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ।।६४।।

(मालिनी)

।। इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये ब्रह्मसाक्षात्कारो नाम द्वितीयः सर्गः ।। २ ।।

## ॥ ३ ॥ तृतीयः सर्गः ॥

तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात ।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥
स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् ॥२॥
आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत्ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते ॥ ३ ॥
केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः ।
यावद्भवत्याहितसायकस्य मत्कार्मुकस्याऽस्य निदेशवर्ती ॥ ४ ॥
असम्मतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः ।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥ ५ ॥
अध्यापितस्योशनसाऽपि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ।६।
कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ।७।
कयासि कामिन् ! सुरतापराधात्पादानतः कोपनयाऽवधूतः ।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥८॥

प्रसीद विश्राम्यतु वीर ! वज्रं
शरैर्मदीयैः कतमः सुराऽरिः ।
बिभेतु मोघीकृतबाहुवीर्यः
स्त्रीभ्योऽपि कोपस्फुरिताऽधराभ्यः ॥ ९ ॥

तव प्रसादात्कुसुमायुधोऽपि
सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्याऽपि पिनाकपाणे-
*र्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥ १० ॥*

अथोरुदेशादवतार्य पादमाक्रान्तिसम्भावितपादपीठम् ।
सङ्कल्पिताऽर्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ।११

सर्वं सखे ! त्वय्युपपन्नमे-
तदुभे ममाऽस्त्रे कुलिशं भवांश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं
त्वं सर्वतोगामि च साधकं च ।। १२ ।।

अवैमि ते सारमतः खलु त्वां
कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य
कृष्णेन देहोद्वहनाय शेषः ।। १३ ।।

आशंसता बाणगतिं वृषाऽङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव । १४ ।

अमी हि वीर्यप्रभवं भवस्य
जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो
ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ।। १५ ।।

तस्मै हिमाद्रेः प्रयतां तनुजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ।१६।

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः १७

तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ।१८।

तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगति कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ।। १९ ।।

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म न चाऽतिहिंस्रमहो बताऽसि स्पृहणीयवीर्यः ।२०।

मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताऽशनस्य ।२१।
तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ।। २२ ।।
स माधवेनाऽभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ।२३।
तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती ।
सङ्कल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ।। २४ ।।
कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज । २५ ।
असूत सद्यःकुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ।। २६ ।।
सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ।। २७ ।।

वर्णप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः ।। २८ ।।

बालेन्दुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ।२९।
लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालाऽरुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ।। ३० ।।
मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ।। ३१ ।।
चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ।।३२।।

हिमव्यपायाद्विशदाऽधराणा-मापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गम: किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ।।३३।।
तपस्विन: स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथञ्चिदीशा मनसां बभूवु: ।३४।
तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसाऽनुविद्धं द्वन्द्वानि भावं क्रियया विवव्रु: ।३५।
मधु द्विरेफ: कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमान: ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसार: ।३६।
ददौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणु: ।
अर्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा ।३७।
गीतान्तरेषु श्रमवारिलेशै: किञ्चित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे ।।३८।।
पर्याप्तपुष्पस्तबकस्तनाभ्य: स्फुरत्प्रवालोष्ठमनोहराभ्य: ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ।।३९।।
श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हर: प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्ना: समाधिभेदप्रभवो भवन्ति ।
लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्र: ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ४१
निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ।।४२।।
दृष्टिप्रपातं परिहृत्य तस्य काम: पुर:शुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ।।४३।।
स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ।। ४४ ।।
पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम् ।
उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ।।४५।।

भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम् ।।४६।।
किञ्चित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ।। ४७ ।।
अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् ।४८।
कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ४९
मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् ।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ।।५०।।
स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ५१
निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ।। ५२ ।।
अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ।।५३।।
आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव ।५४।
स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ।
सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाऽधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टि-र्लीलारविन्देन निवारयन्ती ।।५६।।
तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ।५७।
भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ।५८।

ततो भुजंगाधिपते: फणाग्रैरध: कथंचिद्धृतभूमिभाग: ।
शनै: कृतप्राणविमुक्तिरीश: पर्यङ्कबन्धं निबिडं बिभेद ।।५९।।
तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ।। ६० ।।
तस्या: सखीभ्यां प्रणिपातपूर्वं स्वहस्तलून: शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चय: पल्लवभङ्गभिन्न:।६१।
उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ।।६२।।
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतय: कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ।६३।
कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षु: ।
उमासमक्षं हरबद्धलक्ष्य: शरासनज्यां मुहुराममर्श ।। ६४ ।।
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ।६५।
प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ।६६।
हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशि: ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ।६७।
विवृण्वती शैलसुतापि भावमङ्गै: स्फुरद्बालकदम्बकल्पै: ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ।।६८।।
अथेन्द्रियक्षोभमयुग्मनेत्र: पुनर्वशित्वाद्बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ।।६९।।
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ।।७०।।
तप:परामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चि: सहसा तृतीयादक्ष्ण: कृशानु: किल निष्पपात ।७१।

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्माऽवशेषं मदनञ्चकार ।।७२।।
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ।। ७३ ।।
तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसंनिकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ।।७४।।

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित् ।। ७५ ।।

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ।। ७६ ।।

।। इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
मदनदहनो नाम तृतीयः सर्गः ।। ३ ।।

## ।। ४ ।। चतुर्थः सर्गः ।।

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ।।१।।
(वियोगिनी वृत्तम्)
अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ।।२।।
अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ हरकोपाऽनलभस्म केवलम् ।।३।।
अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ।।४।।

उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया ।
तदिदं गतमीदृशो दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥५॥
क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ॥६॥
कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥७॥
स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ।
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ॥८॥
हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥९॥
परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥१०॥
रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः ।
*वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥११॥*
नयनान्यरुणानि घूर्णयन्वचनानि स्खलयन्पदे पदे ।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥१२॥
अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति ॥१३॥
हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः ।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥१४॥
अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥१५॥
प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥१६॥
शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च ।
सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे ।१७।

रचितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥१८॥
विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः ।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥१९॥
अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि ॥२०॥
मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि ॥२१॥
क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥२२॥
ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत् ॥२३॥
क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ।२४।
अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः ॥२५॥
तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥२६॥
इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त कि स्थितम् ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥२७॥
अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥२८॥
अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव ।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ॥२९॥
गत एव न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥३०॥

विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता ।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ।। ३१ ।।
तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ।।३२।।
शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ।। ३३ ।।
अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ।। ३४ ।।
कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः ।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम् ।३५।
तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ।३६।
इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ ।
अविभज्य परत्र तं मया सहितः पास्यति स बान्धवः ।।३७।।
परलोकविधौ च माधव स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा ।।३८।।
इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत् ।।३९।।
कुसुमायुधपत्नि दुर्लभस्तव भर्ता न चिराद्भविष्यति ।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि ।।४०।।
अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः ।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ।।४१।।
परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ।।४२।।
इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम् ।
अशनेरमृतस्य चोभयोर्वशितश्चाम्बुधराश्च योनयः ।।४३।।

तादिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः ।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ॥ ४४ ॥

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-
माश्वासयत्सुचरितार्थपदैर्वचोभिः ॥ ४५ ॥
(वसंत०)

अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयांबभूव ।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम् ४६

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
रतिविलापो नाम चतुर्थः सर्गः ॥ ४ ॥

## ॥ ५ ॥ पञ्चमः सर्गः ॥

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
( वंशस्थम् )

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ।२।
निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ।३।
मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।।४।।

इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात् ।

क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ।। ५ ।।

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ।६।

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया
जगाम गौरीशिखरं शिखण्डिमत् ।। ७ ।।

विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति ।। ८ ।।

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ।।६।।

प्रतिक्षणं सा कृतरोमविक्रियां व्रताय
मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रसनागुणास्पदम् ।। १० ।।

विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ।। ११ ।।

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ।। १२ ।।

पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥
अतन्द्रिता सा स्वयमेव वृक्षका-
न्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥
अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहला-
त्पुरः सखीनाममिमीत लोचने ॥ १५ ॥
कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ।१६।
विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ।१७।
यदा फलं पूर्वतपःसमाधिना
न तावता लभ्यममंस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमार्दवं
तपो महत्सा चरितुं प्रचक्रमे ॥ १८ ॥
क्लमं ययौ कन्दुलीलयापि या
तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं
मृदु प्रकृत्या च ससारमेव च ॥ १९ ॥
शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ।

विजित्य नेत्रप्रतिघातिनीं
प्रभामनन्यदृष्टिः सवितारमैक्षत ।। २० ।।
तथातितप्तं सवितुर्गभस्तिभि-
र्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम् ।। २१ ।।
अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः ।। २२ ।।
निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसंभृतेन सा ।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ।। २३ ।।
स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ।। २४ ।।
शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयै-
र्महातपः साक्ष्य इव स्थिताः क्षपाः ।। २५ ।।
निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावति ।। २६ ।।

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसंपदां सरोजसंधानमिवाकरोदपाम् ॥२७॥

स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥

मृणालिकापेलवमेवमादिभि-
र्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

सुराः समुद्वीक्ष्य नगेन्द्रकन्यया
कृतं तपः शंभुवशक्रियाक्षमम् ।
ययाचिरे तं प्रणिपत्य दुःखिताः
पतिं चमूनां सुतमाजिहेतुम् ॥ १ ॥ (प्र)

अथाजिनाषाढधरः प्रगल्भवा-
ग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥
अपि त्वदावर्जितवारिसंभृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥
अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥
यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥
विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥
अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि ।
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥
प्रयुक्तसत्कारविशेषमात्मना
न मां परं संप्रतिपत्तुमर्हसि ।

यतः सतां संनतगात्रि संगतं
मनीषिभिः साप्तपदीनमुच्यते ॥३९॥
अतोऽत्र किंचिद्भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥
कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपः फलं स्यात्किमतः परं वद ॥ ४१ ॥
भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि त्वयि ॥ ४२ ॥
अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत्पन्नगरत्नसूचये ॥ ४३ ॥
किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥
दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥

निवेदितं निःश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥४६॥
अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७ ॥
मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥४८॥
अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः ॥ ४९ ॥
कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसंचितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥
इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥
सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत्कुतूहलम् ।

यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥
इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहा-
त्पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥
असह्यहुंकारनिवर्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥ ५४ ॥
तदाप्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसंघातशिलातलेष्वपि ॥ ५५ ॥
उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किंनरराजकन्यका
वनान्तसंगीतसखीररोदयत् ॥ ५६ ॥
त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ ! व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धना ॥ ५७ ॥
यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

यदा च तस्याभिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥
द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥ ६० ॥
न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥
अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥
अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥
यथा श्रुतं वेदविदांवर ! त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥
अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्तसे ।

अमङ्गलाभ्यासरतिं विचिन्त्य
तं तवानुवृत्तिं न च कर्तुमुत्सहे ।। ६५ ।।
अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शंभोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ।। ६६ ।।
त्वमेव तावत्परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं गजा-
जिनं शोणितबिन्दुवर्षि च ।। ६७ ।।
चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ।। ६८ ।।
अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन्हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ।। ६९ ।।
इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
*विलोक्य वृद्धोक्षमधिष्ठितं त्वया*
महाजनः स्मेरमुखो भविष्यति ।। ७० ।।
द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ।।७१।।

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥
निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥ ७३ ॥
इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥
उवाच चैनं परमार्थतो हरं न
वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥७५॥
विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥७६॥
अकिंचनः सन्प्रभवः स संपदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥
विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।

कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥
तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्म रजोविशुद्धये ।
तथाहि नृत्याभिनयक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥
असंपदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोरुणाङ्गुली ॥ ८० ॥
विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥
अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥
निवार्यतामालि किमप्ययं बटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥ ८३ ॥
इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥८५॥
(वसंत०)

अद्यप्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
तपःफलोदयो नाम पञ्चमः सर्गः ॥ ५ ॥

## ॥ ६ ॥ षष्ठः सर्गः ॥

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥ १ ॥
तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी ॥ २ ॥
स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान्सप्त सस्मार स्मरशासनः ॥ ३ ॥
ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन्पुरः प्रभोः ॥ ४ ॥
आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु ।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु ॥ ५ ॥
मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥ ६ ॥

अधःप्रस्थापिताश्वेन समावर्जितकेतुना ।
सहस्ररश्मिना साक्षात्सप्रणाममुदीक्षिताः ॥ ७ ॥
आसक्तबाहुलतया सार्धमुद्धृतया भुवा ।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ॥ ८ ॥
सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ॥ ९ ॥
प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ॥ १० ॥
तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ॥ ११ ॥
तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ॥ १२ ॥
तद्दर्शनादभूच्छंभोर्भूयान्दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम् ॥ १३ ॥
धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥ १४ ॥
अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥ १५ ॥
यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥ १६ ॥
यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याविषयं मनोविषयमात्मनः ॥ १७ ॥
यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥ १८ ॥
सत्यमर्काच्च सोमाच्च परमध्यास्महे मदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव ॥ १९ ॥

त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥ २० ॥
या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥ २१ ॥
साक्षाद्दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा ।
प्रसीद कथयात्मानं न धियां पथि वर्तसे ॥ २२ ॥
किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।
अथ विश्वस्य संहर्ता भागः कतम एष ते ॥ २३ ॥
अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु ।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम् ॥२४॥
अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः ।
उपचिन्वन्प्रभां तन्वीं प्रत्याह परमेश्वरः ॥ २५ ॥
विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः ।
ननु मूर्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः ॥ २६ ॥
सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः ।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ॥ २७ ॥
अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ॥ २८ ॥
तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः ।
विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः ॥ २९ ॥
उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसंबन्धं वित्त मामप्यवञ्चितम् ॥ ३० ॥
एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते ।
भवत्प्रणीतमाचारमामनन्ति हि साधवः ॥ ३१ ॥
आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्ये पुरंध्रीणां प्रगल्भता ॥ ३२ ॥

तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम् ।
महाकोशीप्रपातेऽस्मिन्संगमः पुनरेव नः ॥ ३३ ॥
तस्मिन्संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ॥ ३४ ॥
ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमास्पदम् ॥ ३५ ॥
ते चाकाशमसिश्याममुत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा समरंहसः ॥ ३६ ॥
अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ॥ ३७ ॥
गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥ ३८ ॥
जितसिंहभया नागा यत्राश्वा बिलयोनयः ।
यक्षाः किंपुरुषाः पौराः योषितो वनदेवताः ॥ ३९ ॥
शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ॥ ४० ॥
यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता ॥ ४१ ॥
यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ॥ ४२ ॥
यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥ ४३ ॥
यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् ।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ॥ ४४ ॥
भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ॥ ४५ ॥

संतानकतरुच्छायासुप्तविद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं गन्धवद्गन्धमादनम् ॥ ४६ ॥
अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसंधिसुकृतं वञ्चनामिव मेनिरे ॥ ४७ ॥
ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः ।
अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥ ४८ ॥
गगनादवतीर्णा सा यथावृद्धपुरस्सरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥ ४९ ॥
तानर्घ्यानर्घ्यमादाय दूरात्प्रत्युद्ययौ गिरिः ।
नमयन्सारगुरुभिः पादन्यासैर्वसुंधराम् ॥ ५० ॥
धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ॥ ५१ ॥
विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्मभिः ॥ ५२ ॥
तत्र वेत्रासनासीनान्कृतासनपरिग्रहः ।
इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ॥ ५३ ॥
अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥ ५४ ॥
मूढं बुद्धमिवात्मानं हैमीभूतमिवायसम् ।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ॥ ५५ ॥
अद्यप्रभृति भूतानामधिगम्योऽस्मि शुद्धये ।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ॥ ५६ ॥
अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥ ५७ ॥
जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥ ५८ ॥

भवत्संभावनोत्थाय परितोषाय मूर्च्छते ।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥ ५९ ॥
न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥ ६० ॥
कर्तव्यं वो न पश्यामि स्याच्चेत्किं नोपपद्यते ।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥ ६१ ॥
तथापि तावत्कस्मिंश्चिदाज्ञां मे दातुमर्हथ ।
विनियोगप्रसादा हि किंकराः प्रभविष्णुषु ॥ ६२ ॥
एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥ ६३ ॥
इत्यूचिवांस्तमेवार्थं गुहामुखविसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥ ६४ ॥
अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥ ६५ ॥
उपपन्नमिदं सर्वमतः परमपि त्वयि ।
मनसः शिखराणां च सदृशी ते समुन्नतिः ॥ ६६ ॥
स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते ।
चराचराणां भूतानां कुक्षिराधारतां गतः ॥ ६७ ॥
गामधास्यत्कथं नागो मृणालमृदुभिः फणैः ।
आ रसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥ ६८ ॥
अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः ।
पुनन्ति लोकान्पुण्यत्वात्कीर्तयः सरितश्च ते ॥ ६९ ॥
यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया ॥ ७० ॥
तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ।
त्रिविक्रमोद्यतस्यासीत्स तु स्वाभाविकस्तव ॥ ७१ ॥

यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया ।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥ ७२ ॥
काठिन्यं स्थावरे काये भवता सर्वमर्पितम् ।
इदं तु ते भक्तिनम्रं सतामाराधनं वपुः ॥ ७३ ॥
तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ॥ ७४ ॥
अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः, सार्धचन्द्रं बिभर्ति यः ॥ ७५ ॥
कलितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ७६ ॥
योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥ ७७ ॥
स ते दुहितरं साक्षात्साक्षी विश्वस्य कर्मणाम् ।
वृणुते वरदः शंभुरस्मत्संक्रामितैः पदैः ॥ ७८ ॥
तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥ ७९ ॥
यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥ ८० ॥
प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥ ८१ ॥
उमा वधूर्भवान्दाता याचितार इमे वयम् ।
वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥ ८२ ॥
अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुतासंबन्धविधिना भव विश्वगुरोर्गुरुः ॥ ८३ ॥
एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ ८४ ॥

शैलः संपूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ॥ ८५ ॥
मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ॥ ८६ ॥
इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ॥ ८७ ॥
एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥ ८८ ॥
एतावदुक्त्वा तनयामृषीनाह महीधरः ।
इयं नमति वः सर्वास्त्रिलोचनवधूरिति ॥ ८९ ॥
ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम् ॥ ९० ॥
तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम् ।
अङ्कमारोपयामास लज्जमानामरुन्धती ॥ ९१ ॥
तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् ।
वरस्यानन्यपूर्वस्य विशोकामकरोद्गुणैः ॥ ९२ ॥
वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना ।
ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः ॥ ९३ ॥
ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ ९४ ॥
पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ९५
(पुष्पिताग्रा)

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
उमाप्रदानो नाम षष्ठः सर्गः ॥ ६ ॥

## ॥ ७ ॥ सप्तमः सर्गः ॥

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान्सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥१॥
वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरंध्रिवर्गम् ।
आसीत्पुरं सानुमतोऽनुरागादन्तःपुरं चैककुलोपमेयम् ॥ २ ॥
संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरं स्वर्ग इवाबभासे ३
एकैव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ॥४॥
अङ्काद्ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त ।
संबन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम ॥५॥
मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः ।६।
सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम् ।
निर्नाभि कौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलंचकार ॥ ७ ॥
बभौ च संपर्कमुपेत्य बाला नवेव दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्करेखा ॥ ८ ॥
तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ॥९॥
विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः ॥ १० ॥
सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥
तस्मात्प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम् १२

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं
क्षणं व्यलम्बन्त पुरोनिषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने संनिहितेऽपि नार्यः ॥ १३ ॥
धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् ।
पर्याक्षिपत्काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना ॥१४॥
विन्यस्तशुक्लागुरु चक्रुरङ्गं
गोरोचनापत्रविभक्तमस्याः ।
सा चक्रवाकाङ्कितसैकतायाः
स्त्रिस्रोतसः कान्तिमतीत्य तस्थौ ॥ १५ ॥
लग्नद्विरेफं परिभूय पद्मं समेघलेखं शशिनश्च बिम्बम् ।
तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम् ।१६।
कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभाद्बबन्ध चक्षूंषि यवप्ररोहः ॥१७॥
रेखाविभक्तः सुविभक्तगात्र्याः
किंचिन्मधूच्छिष्टविमृष्टरागः ।
कामप्यभिख्यां स्फुरितैरपुष्य-
दासन्नलावण्यफलोऽधरोष्ठः ॥ १८ ॥
पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशी-
र्माल्येन तां निर्वचनं जघान ॥ १९ ॥
तस्याः सुजातोत्पलपत्रकान्ते
प्रसाधिकाभिर्नयने निरीक्ष्य ।
न चक्षुषोः कान्तिविशेषबुद्ध्या
कालाञ्जनं मङ्गलमित्युपात्तम् ॥ २० ॥

सा संभवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद्विहंगैरिव लीयमानैरामुच्यमानाभरणा चकासे ॥ २१ ॥
आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः ॥ २२ ॥
अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च ।
कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य ॥ २३ ॥
उमास्तनोद्भेदमनु प्रवृद्धो मनोरथो यः प्रथमं बभूव ।
तमेव मेना दुहितुः कथंचिद्विवाहदीक्षातिलकं चकार ॥ २४ ॥
बबन्ध चास्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसंनिवेशाम् ।
धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम् ॥२५॥
क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा ।
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना ॥२६॥
तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता ।
अकारयत्कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम् ॥२७॥
अखण्डितं प्रेम लभस्व पत्यु-
रित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरभाजा
पश्चात्कृताः स्निग्धजनाशिषोऽपि ॥ २८ ॥
इच्छाविभूत्योरनुरूपमद्रि-
स्तस्याः कृती कृत्यमशेषयित्वा ।
सभ्यः सभायां सुहृदास्थितायां
तस्थौ वृषाङ्कागमनप्रतीक्षः ॥ २९ ॥
तावद्भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम् ।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्पुरशासनस्य ॥३०॥

तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण ।
स एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे ।३१।
बभूव भस्मैव सिताङ्गरागः कपालमेवामशेखरश्रीः ।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः ।३२।
शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम् ।
सांनिध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः ।३३।
यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ।।३४।।
दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ।३५।
इत्यद्भुतैकप्रभवः प्रभावात्पसिद्धनेपथ्यविधेर्विधाता ।
आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श ।।३६।।
स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे ।।३७।।
तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः ।
मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरीक्षम् ।३८।
तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे ।
बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव ।।३९।।
ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः ।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ।।४०।।
उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ।।४१।।
मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।
समुद्रगारूपविपर्ययेऽपि सहंसपाते तव लक्ष्यमाणे ।। ४२ ।।
*तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।*
जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम् ।४३।

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ ४४
तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः ।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः ॥४५॥
कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान्संभावयामास यथाप्रधानम् ।४६।
तस्मै जयाशीः ससृजे पुरस्तात्सप्तर्षिभिस्तान्स्मितपूर्वमाह ।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति ॥ ४७ ॥
विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार ताराधिपखण्डधारी ४८
खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिंकिणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन्मुहुः प्रोतघने विषाणे ।४९।
स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः ॥ ५० ॥
तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः ।
स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः ॥५१॥
तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती ।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥५२॥
वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ ॥ ५३ ॥
ह्रीमानभूद्भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद ।५४।
स प्रीतियोगाद्विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य ।
प्रावेशयन्मन्दिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पम् ॥ ५५ ॥
तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि ५६

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः ।५७।
प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ।५८।
विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ।। ५९ ।।
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ।६०।
अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद्रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ।।६१।।
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ।। ६२ ।।
तावत्पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे ।
प्रासादशृङ्गाणि दिवापि कुर्वञ्ज्योत्स्नाभिषेकद्विगुणद्युतीनि ६३

तमेकदृश्यं नयनैः पिबन्त्यो
नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां
सर्वात्मना चक्षुरिव प्रविष्टा ।। ६४ ।।

स्थाने तपो दुश्चरमेतदर्थ-
मपर्णया पेलवयापि तप्तम् ।
या दास्यमप्यस्य लभेत नारी
सा स्यात्कृतार्था किमुताङ्कशय्याम् ।। ६५ ।।

परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ।। ६६ ।।

न नूनमारूढरुषा शरीर-
मनेन दग्धं कुसुमायुधस्य ।
व्रीडादमुं देवमुदीक्ष्य मन्ये
संन्यस्तदेहः स्वयमेव कामः ।। ६७ ।।
अनेन संबन्धमुपेत्य दिष्टया मनोरथप्रार्थितमीश्वरेण ।
मूर्धानमालि क्षितिधारणोच्चमुच्चैस्तरं वक्ष्यति शैलराजः ६८
इत्योषधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ।। ६९ ।।
तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ।।७०।।
तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन्प्रशस्तमारम्भमिवोत्तमार्थाः ।७१।
तत्रेश्वरो विष्टरभाग्यथावत्सरत्नमर्घ्यं मधुमच्च गव्यम् ।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत्सर्वममन्त्रवर्जम् ।। ७२ ।।
दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः ।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ।। ७३ ।।
तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या ।
प्रसन्नचेतःसलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः ।७४।
तयोः समापत्तिषु कातराणि किंचिद्व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि ।७५।
तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः ।
उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम् ।७६।
रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुंगवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ।७७।
प्रयुक्तपाणिग्रहणं यदन्यद्वधूवरं पुष्यति कान्तिमग्र्याम् ।
सांनिध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ।७८।

प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ।।७९।।
तौ दंपती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ ।
स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षम् ।
सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद्वदनं निनाय ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ।।८१।।
तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद्बभूव ।। ८२ ।।
वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी ।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति ।८३।
आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ।८४।
ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ।।८५।।
इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ।।८६।।
वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्यचिन्तास्तिमितो बभूव ।
क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कनकासनस्थौ ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम् ।।८८।।
पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्यायतनालदण्डमाधत्तः लक्ष्मीः कमलातपत्रम् ।।८९।।
द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ।। ९० ।।
तौ संधिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम् ।।९१।।

देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य ।
शापावसाने प्रतिपन्नमूर्तेर्ययाचिरे पञ्चशरस्य सेवाम् ॥९२॥

तस्यानुमेने भगवान्विमन्युर्व्यापारमात्मन्यपि सायकानाम् ।
कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति ।९३।

अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण ।
कनककलशयुक्तं भक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात् ।९४।

नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृताक्षेपमीशः ।
अपि शयनसखीभ्यो दत्तवाचं कथंचि-
त्प्रमथमुखविकारैर्हासयामास गूढम् ॥ ९५ ॥
(मालिनी)

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
उमापरिणयो नाम सप्तमः सर्गः ॥ ७ ॥

## ॥ ८ ॥ अष्टमः सर्गः ॥

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत्कामदोहदमनोहरं वपुः ॥ १ ॥
(रथोद्धता)

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ।२।

कैतवेन शयिते कुतूहलात्पार्वती प्रति मुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये विद्युताहतमिव न्यमीलयत् ।।३।।
नाभिदेशनिहितः सकम्पया शंकरस्य रुरुधे तया करः ।
तद्दुकूलमथ चाभवत्स्वयं दूरमुच्छ्वसितनीविबन्धनम् ।।४।।
एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत्प्रमुखवर्तिनि प्रिये ।।५।।
अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ।। ६ ।।
शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ।।७।।
चुम्बनेष्वधरदानवर्जितं खिन्नहस्तसदयोपगूहनम् ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ।।८।।
यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत् ।
यद्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत् ।।९।।
रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे ।।१०।।
दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया ।।
नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् ।
भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ।।१२।।
वासराणि कतिचित्कथंचन स्थाणुना रतमकारि चानया ।
ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् १३
सस्वजे प्रियमुरोनिपीडनं प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ।।१४।।
भावसूचितमदृष्टविप्रियं दार्ढ्यभाक्क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम् ।।१५।।

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकवृत्तिभाक् ।१६।
शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदाक्षिणीकृतम् ॥१७॥
दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत्क्षणं मौलिचन्द्रशकलेन शूलिनः ॥१८॥
चुम्बनादलकचूर्णदूषितं शंकरोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥१९॥
एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमात्रमवसद्वृषध्वजः ॥ २० ॥
सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम् ।
तत्र तत्र विजहार संपत(चर)न्नप्रमेयगतिना ककुद्मता ।२१।
मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतः कृती ।
हेमपल्लवविभङ्गसंस्तरानन्वभूत्सुरतमर्दनक्षमान् ॥ २२ ॥
पद्मनाभचरणाङ्किताश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः ।
मन्दरस्य कटकेषु चावसत्पार्वतीवदनपद्मषट्पदः ॥ २३ ॥
रावणध्वनितभीतया तया कण्ठसक्तदृढबाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ।२४।
तस्य जातु मलयस्थलीरतेर्धूतचन्दनलतः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ॥२५॥
हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।
सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥२६॥
तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥२७॥
इत्यभौममनुभूय शंकरः पार्थिवं च दयितासखः सुखम् ।
लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत ॥२८॥

तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम् ।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम् ॥२९॥
पद्मकान्तिमरुणत्रिभागयोः संक्रमय्य तव नेत्रयोरिव ।
संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥ ३० ॥
सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ॥३१॥
दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥३२॥
स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ॥३३॥
पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता ।
लब्धया प्रतिमया सरोम्भसां तापनीयमिव सेतुबन्धनम् ।३४।
उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः ।
दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव ॥३५॥
एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः ।
हीयमानमहरत्ययातपं पीवरोरु पिबतीव बर्हिणः ॥३६॥
पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता भाति किंचिदिव शेषवत्सरः ।३७।

आविशद्भिरुटजाङ्गणं मृगै-
मूर्लसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्न्य(ग्नि)धेनवो
बिभ्रति श्रियमुदीरिताग्नयः ॥ ३८ ॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥३९॥
दूरमग्र(लग्न)परिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥४०॥

सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ।४१।
सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ।।४२।।
खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत्प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम् ।४३।
संध्ययाप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।
येन पूर्वमुदये पुरस्कृता नानुयास्यति कथं तमापदि ।।४४।।
रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति संध्ययानया वर्तिकाभिरिव साधुमण्डिताः ४५
सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु भानुना संविभक्तमिव सांध्यमातपम् ।४६।
अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ।।४७।।
तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ४८
निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपमामाललाप विजयामहेतुकम् ।। ४९ ।।
ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ।। ५० ।।
मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ।।५१।।
निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेवते तेन मानिनि ममात्र गौरवम् ।।५२।।
तामिमां तिमिरवृद्धिपीडितां शैलराजतनयेऽधुना स्थिताम् ।
एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ।।५३।।

सांध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।
सांपरायवसुधासशोणितं मण्डलाग्रमिव तिर्यगुज्झितम् ।।५४।।
यामिनीदिवससंधिसंभवे तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं दिक्षु दीर्घनयने विजृम्भते ।। ५५ ।।
नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरौघवेष्टितो गर्भवास इव वर्तते निशि ।।५६।।
शुद्धमाविलमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं धिङ्महत्त्वमसतां हृतान्तरम् ।।५७।।
नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि पूर्वदिङ्मुखं कैतकैरिव रजोभिराहृतम् ।।५८।।
मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः ।५९।
रुद्धनिर्गमनमा दिनक्षयात्पूर्वदृष्टतनु चन्द्रिकास्मितम् ।
एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिनोदितम् ।।६०।।
पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ।।६१।।
शक्यमोषधिपतेर्नवोदयाः कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ।। ६२ ।।
अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ।।६३।।
पश्य पार्वति नवेन्दुरश्मिभिर्भिन्नसान्द्रतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितं सप्रसादमिव मानसं सरः ।। ६४ ।।
रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ।६५।
उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता वेधसा हि गुणदोषयोर्गतिः ।।६६।।

चन्द्रपादजनितप्रवृत्तिभिश्चन्द्रकान्तजलबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डिनः ।।६७।।
कल्पवृक्षशिखरेषु संप्रति संप्रस्फुरद्भिरिव पश्य सुन्दरि ।
हारयष्टिरचनामिवांशुभिः कर्तुमागतकुतूहलः शशी ।।६८।।
उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः ।६९।
एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमा निबन्धनात् ।७०।
पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डिके बलाद्व्यज्यते विपरिवृत्तमंशुकम् ।७१।
शक्यमङ्गुलिभिरुत्थितैरधः शाखिनां पतितपुष्पपेशलैः ।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ।। ७२ ।।
एष चारुमुखि योग्यतारया युज्यते तरलबिम्बया शशी ।
साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ।।७३।।
पाकभिन्नशरकाण्डगौरयोरुल्लसत्प्रकृतिजप्रसादयोः ।
रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षिण चन्द्रिका ।७४।
लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रति स्वयम् ।
त्वामियं स्थितिमतीमुपागता गन्धमादनवनाधिदेवता ।।७५।।
आर्द्रकेसरसुगन्धि ते मुखं मत्तरक्तनयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मदः करिष्यति ।७६।
मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शंकरस्तामपाययत पानमम्बिकाम् ।७७।
पार्वती तदुपयोगसंभवां विक्रियामपि सती मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मितामाम्रतेव सहकारतां ययौ ।।७८।।
तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ।।७९।।

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दु मदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥
तां विलम्बितपनीयमेखलामुद्वहञ्जघनभारदुर्वहाम् ।
ध्यानसंभृतविभूतिरीश्वरः प्राविशन्मणिशिलागृहं रहः ॥८१॥
तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ।८२।
क्लिष्टकेशमवलुप्तचन्दनं व्यत्ययार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभून्न तृप्तये ॥८३॥
केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्प्रतिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥८४॥
स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः किंनरैरुषसि गीतमङ्गलः ॥८५॥
तौ क्षणं शिथिलितोपगूहनौ दंपती चलितमानसोर्मयः ।
पद्मभेदपिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः ॥८६॥
ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७॥

स प्रजागरकषायलोचनं
गाढदन्तपरिताडिताधरम् ।
आकुलालकमरंस्त रागवा-
न्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥८८॥

तेन भिन्नविषमोत्तरच्छदं
मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये
नोज्झितं चरणरागलाञ्छितम् ॥८९॥

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदनात् ॥९०॥

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां साग्रमेका निशेव ।
न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥९१॥

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
उमासुरतवर्णनं नामाष्टमः सर्गः ॥८॥

## ॥ ९ ॥ नवमः सर्गः ॥

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः ॥ १ ॥
(उपजाति)

सुकान्तकान्तामणितानुकारं कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ॥२॥
विशृङ्खलं पक्षतियुग्ममीषद्दधानमानन्दगतिं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपादमितस्ततो मण्डलकैश्चरन्तम् ॥३॥
रतिद्वितीयेन मनोभवेन ह्रदात्सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थमिवाभ्यनन्दत्क्षणमिन्दुमौलिः ॥४॥
तस्याकृतिं कामपि वीक्ष्य दिव्यामन्तर्भवच्छद्मविहंगमग्निम् ।
विचिन्तयन्संविविदे स देवो भ्रूभङ्गभीमश्च रुषा बभूव ॥५॥
स्वरूपमास्थाय ततो हुताशस्त्रसन्वलत्कम्पकृताञ्जलिः सन् ।
प्रवेपमानो नितरां स्मरारिमिदं वचो व्यक्तमथाभ्युवाच ॥६॥
असि त्वमेको जगतामधीशः स्वर्गौकसां त्वं विपदो निहंसि ।
ततः सुरेन्द्रप्रमुखाः प्रभो त्वामुपासते दैत्यवरैर्विधूताः ॥७॥
त्वया प्रियाप्रेमवशंवदेन शतं व्यतीये सुरतादृतूनाम् ।
रहःस्थितेन त्वदवीक्षणार्तो दैन्यं परं प्राप सुरैः सुरेन्द्रः ॥८॥

त्वदीयसेवावसरप्रतीक्षैरभ्यर्थितः शक्रमुखैः सुरैस्त्वाम् ।
उपागतोऽन्वेष्टुमहं विहंगरूपेण विद्वन्समयोचितेन ॥ ९ ॥
इति प्रभो चेतसि संप्रधार्य तन्नोऽपराधं भगवन्क्षमस्व ।
पराभिभूता वद किं क्षमन्ते कालातिपातं शरणार्थिनोऽमी ।१०।
प्रभो प्रसीदाशु सृजात्मपुत्रं यं प्राप्य सेनान्यमसौ सुरेन्द्रः ।
स्वर्लोकलक्ष्मीप्रभुतामवाप्य जगत्त्रयं पाति तव प्रसादात् ।११।

स शंकरस्तामिति जातवेदो-
विज्ञापनामर्थवतीं निशम्य ।
अभूत्प्रसन्नः परितोषयन्ति
गीर्भिर्गिरीशा रुचिराभिरीशम् ॥१२॥

प्रसन्नचेता मदनान्तकारः
स तारकारेर्जयिनो भवाय ।
शक्रस्य सेनाधिपतेर्जयाय
व्यचिन्तयच्चेतसि भावि किंचित् ॥१३॥

युगान्तकालाग्निमिवाविषह्यं परिच्युतं मन्मथरङ्गभङ्गात् ।
रतान्तरेतः स हिरण्यरेतस्यथोर्ध्वरेतास्तदमोघमाधात् ॥१४॥
अथोष्णबाष्पानिलदूषितान्तं विशुद्धमादर्शमिवात्मदेहम् ।
बभार भूम्ना सहसा पुरारिरेतःपरिक्षेपकुवर्णमग्निः ॥१५॥

त्वं सर्वभक्षो भव भीमकर्मा
कुष्ठाभिभूतोऽनल धूमगर्भः ।
इत्थं शशापाद्रिसुता हुताशं
रुष्टा रतानन्दसुखस्य भङ्गात् ॥ १६ ॥

दक्षस्य शापेन शशी क्षयीव
प्लुष्टो हिमेनेव सरोजकोशः ।
वहन्विरूपं वपुरुग्ररेत-
श्चयेन वह्निः किल निर्जगाम ॥ १७ ॥

स पावकालोकरुषा विलक्षां
स्मरत्रपास्मेरविनम्रवक्त्राम् ।
विनोदयामास गिरीन्द्रपुत्रीं
शृङ्गारगर्भैर्मधुरैर्वचोभिः ॥ १८ ॥
हरो विकीर्णं घनघर्मतोयैर्नेत्राञ्जनाङ्कं हृदयप्रियायाः ।
द्वितीयकौपीनचलाञ्चलेनाहरन्मुखेन्दोरकलङ्किनोऽस्याः ।१९।
मन्देन खिन्नाङ्गुलिना करेण कम्प्रेण तस्या वदनारविन्दात् ।
परामृशन्घर्मजलं जहार हरः सहेलं व्यजनानिलेन ॥२०॥
रतिश्लथं तत्कबरीकलापमंसावसक्तं विगलत्प्रसूनम् ।
स पारिजातोद्भवपुष्पमय्या स्रजा बबन्धामृतमूर्तिमौलिः ।२१।
कपोलपाल्यां मृगनाभिचित्रपत्रावलीमिन्दुमुखः सुमुख्याः ।
स्मरस्य सिद्धस्य जगद्विमोहमन्त्राक्षरश्रेणिमिवोल्लिलेख ।२२।
रथस्य कर्णाविभि तन्मुखस्य ताटङ्कचक्रद्वितयं न्यधात्सः ।
जगज्जिगीषुर्विषमेषुरेष ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥
तस्याः स कण्ठे पिहितस्तनाग्रां
न्यधत्त मुक्ताफलहारवल्लीम् ।
या प्राप मेरुद्वितयस्य मूर्ध्नि
स्थितस्य गाङ्गौघयुगस्य लक्ष्मीम् ॥२४॥
नखव्रणश्रेणिवरे बबन्ध नितम्बबिम्बे रशनाकलापम् ।
चलत्स्वचेतोमृगबन्धनाय मनोभुवः पाशमिव स्मरारिः ॥२५॥
भालेक्षणाग्नौ स्वयमञ्जनं स
भङ्क्त्वा दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाक्ष्याः पुलकोपगूढे
कण्ठे विनीलेऽङ्गुलिमुज्जघर्ष ॥ २६ ॥
अलक्तकं पादसरोरुहाग्रे सरोरुहाक्ष्याः किल संनिवेश्य ।
स्वमौलिगङ्गासलिलेन हस्तारुणत्वमक्षालयदिन्दुचूडः ॥२७॥

भस्मानुलिप्ते वपुषि स्वकीये सहेलमादर्शतलं विमृज्य ।
नेपथ्यलक्ष्म्याः परिभावनार्थमदर्शयज्जीवितवल्लभां सः ।२८।
प्रियेण दत्ते मणिदर्पणे सा संभोगचिह्नं स्ववपुर्विभाव्य ।
त्रपावती तत्र घनानुरागं रोमाञ्चदम्भेन बहिर्बभार ।।२९।।
नेपथ्यलक्ष्मीं दयितोपक्लृप्तां सस्मेरमादर्शतले विलोक्य ।
अमंस्त सौभाग्यवतीषु धुर्यामात्मानमुद्भूतविलक्षभावा ।।३०।।
अन्तः प्रविश्यावसरेऽथ तत्र
स्निग्धे वयस्ये विजया जया च ।
सुसंपदोपाचरतां कलानामङ्के
स्थितां तां शशिखण्डमौलेः ।। ३१ ।।
व्यधुर्बहिर्मङ्गलगानमुच्चैर्वैतालिकाश्चित्रचरित्रचारु ।
जगुश्च गन्धर्वगणाः सशङ्खस्वनं प्रमोदाय पिनाकपाणेः ।३२।
ततः स्वसेवावसरे सुराणां
गणांस्तदालोकनतत्पराणाम् ।
द्वारि प्रविश्य प्रणतोऽथ नन्दी
निवेदयामास कृताञ्जलिः सन् ।।३३।।
महेश्वरो मानसराजहंसीं करे दधानस्तनयां हिमाद्रेः ।
संभोगलीलालयतः सहेलं हरो बहिस्तानभि निर्जगाम ।।३४।।
क्रमान्महेन्द्रप्रमुखाः प्रणेमुः शिरोनिबद्धाञ्जलयो महेशम् ।
प्रालेयशैलाधिपतेस्तनूजां देवीं च लोकत्रयमातरं ते ।।३५।।
यथागतं तान्विबुधान्विसृज्य प्रसाद्य मानक्रियया प्रतस्थे ।
स नन्दिना दत्तभुजोऽधिरुह्य वृषं वृषाङ्कः सह शैलपुत्र्या ।३६।
मनोतिवेगेन ककुद्मता स प्रतिष्ठमानो गगनाध्वनोऽन्तः ।
वैमानिकैः साञ्जलिभिर्ववन्दे विहारहेलागतिभिर्गिरीशः ।३७।
स्वर्वाहिनीवारिविहारचारी रतान्तनारीश्रमशान्तिकारी ।
तौ पारिजातप्रसवप्रसङ्गी मरुत्सिषेवे गिरिजागिरीशौ ।।३८।।

पिनाकिनापि स्फटिकाचलेन्द्रः कैलासनामा कलिताम्बरांशः ।
धृतार्धसोमोऽद्भुतभोगिभोगो विभूतिधारी स्व इव प्रपेदे ।३९।
विलोक्य यत्र स्फटिकस्य भित्तौ
सिद्धाङ्गनाः स्वं प्रतिबिम्बमारात् ।
भ्रान्त्या परस्या विमुखीभवन्ति
प्रियेषु मानग्रहिला नमस्सु ॥ ४० ॥
सुबिम्बितस्य स्फटिकांशुगुप्तेश्चन्द्रस्य चिह्नप्रकरः करोति ।
गौर्यार्पितस्येव रसेन यत्र कस्तूरिकायाः शकलस्य लीलाम् ।४१।
यदीयभित्तौ प्रतिबिम्बिताङ्गमात्मानमालोक्य रुषा करीन्द्राः ।
मत्तान्यकुम्भिभ्रमतोऽतिभीमदन्ताभिघातव्यसनं वहन्ति ।।४२।
निशासु यत्र प्रतिबिम्बितानि ताराकुलानि स्फटिकालयेषु ।
दृष्ट्वा रतान्तच्युततारहारमुक्ताभ्रमं बिभ्रति सिद्धवध्वः ।४३।
नभश्चरीमण्डनदर्पणश्रीः सुधानिधिर्मूर्धनि यस्य तिष्ठन् ।
अनर्घ्यचूडामणितामुपैति शैलाधिनाथस्य शिवालयस्य ।।४४।।
समीयिवांसो रहसि स्मरार्ता
रिरंसवो यत्र सुराः प्रियाभिः ।
एकाकिनोऽपि प्रतिबिम्बभाजो
विभान्ति भूयोभिरिवान्विताः स्वैः ।।४५।।
देवोऽपि गौर्या सह चन्द्रमौलिर्यदृच्छया स्फाटिकशैलशृङ्गे ।
शृङ्गारचेष्टाभिरनारताभिर्मनोहराभिर्व्यहरच्चिराय ।।४६।।
देवस्य तस्य स्मरसूदनस्य हस्तं समालिङ्ग्य सुविभ्रमश्रीः ।
सा नन्दिना वेत्रभृतोपदिष्टमार्गा पुरोगेण कलं चचाल ।४७।
चलच्छिखाग्रो विकटाङ्गभङ्गः
सुदन्तुरः शुष्कसुतीक्ष्णतुण्डः ।
भ्रुवोपदिष्टः स तु शंकरेण
तस्या विनोदाय ननर्त भृङ्गी ।। ४८ ।।

कण्ठस्थलीलोलकपालमाला दंष्ट्राकरालाननमभ्यनृत्यत् ।
प्रीतेन तेन प्रभुणा नियुक्ता काली कलत्रस्य मुदे प्रियस्य ।४६।
भयंकरौ तौ विकटं नदन्तौ विलोक्य बाला भयविह्वलाङ्गी ।
सरागमुरसङ्गमनङ्गशत्रोर्गाढं प्रसह्य स्वयमालिलिङ्ग ।५०।
उत्तुङ्गपीनस्तनपिण्डपीडं ससंभ्रमं तत्परिरम्भमीशः ।
प्रपद्य सद्यः पुलकोपगूढः स्मरेण रूढप्रमदो ममाद ।। ५१ ।।

इति गिरितनुजाविलासलीला-
विविधविभङ्गिभिरेष तोषितः सन् ।
अमृतकरशिरोमणिर्गिरीन्द्रे
कृतवसतिर्वशिभिर्गणैर्ननन्द ।५२। (पुष्पिताग्रा)

।। इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
कैलासगमनो नाम नवमः सर्गः ।। ९ ।।

## ।। १० ।। दशमः सर्गः ।।

आससाद सुनासीरं सदसि त्रिदशैः सह ।
एष त्र्यम्बकं तीव्रं वहन्वह्निर्महन्महः ।। १ ।।
सहस्रेण दृशामीशः कुत्सिताङ्गं च सादरम् ।
दुर्दर्शनं ददर्शाग्निं धूम्रधूमितमण्डलम् ।। २ ।।
दृष्ट्वा तथाविधं वह्निमिन्द्रः क्षुब्धेन चेतसा ।
व्यचिन्तयच्चिरं किंचित्कन्दर्पद्वेषिरोषजम् ।। ३ ।।
स विलक्ष्यमुखैर्देवैर्वीक्ष्यमाणः क्षणं क्षणम् ।
उपाविशत्सुरेन्द्रेणादिष्टं सादरमासनम् ।। ४ ।।
हव्यवाह त्वयासादि दुर्दशेयं दशा कुतः ।
इति पृष्टः सुरेन्द्रेण स निःश्वस्य वचोऽवदत् ।। ५ ।।

अनतिक्रमणीयात्ते शासनात्सुरनायक ।
पारावतं वपुः प्राप्य वेपमानोऽतिसाध्वसात् ॥ ६ ॥
अभिगौरि रतासक्तं जगामाहं महेश्वरम् ।
कालस्येव स्मराराते: स्वं रूपमहमासदम् ॥ ७ ॥
दृष्ट्वा छद्मविहङ्गं मां सुज्ञो विज्ञाय जम्भभित् ।
ज्वलज्ज्वालानले होतुं कोपनो माममन्यत ॥ ८ ॥
वचोभिर्मधुरैः सार्थविनम्रेण मया स्तुवः ।
प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ॥ ९ ॥
शरण्यः सकलत्राता मामत्रायत शंकरः ।
क्रोधाग्नेर्ज्वलतो ग्रासात्त्रासतो दुर्निवारतः ॥ १० ॥
परिहृत्य परीरम्भरभसं दुहितुर्गिरेः ।
कामकेलिरसोत्सेकाद्व्रीडया विरराम सः ॥ ११ ॥
रङ्गभङ्गच्युतं रेतस्तदामोघं सुदुर्वहम् ।
त्रिजगद्दाहकं सद्यो मद्विग्रहमधिन्यधात् ॥ १२ ॥
दुर्विषह्येण तेनाहं तेजसा दहनात्मना ।
निर्दग्धमात्मनो देहं दुर्वहं वोढुमक्षमः ॥ १३ ॥
रौद्रेण दह्यमानस्य महसातिमहीयसा ।
मम प्राणपरित्राणप्रगुणो भव वासव ॥ १४ ॥
इति श्रुत्वा वचो वह्नेः परितापोपशान्तये ।
हेतुं विचिन्तयामास मनसा विबुधेश्वरः ॥ १५ ॥
तेजोदग्धानि गात्राणि पाणिनास्य परामृशन् ।
किंचित्कृपीटयोनिं तं दिवस्पतिरभाषत ॥ १६ ॥
प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान्पितृन्मनुष्यांस्त्वमेकस्तेषां मुखं यतः ॥ १७ ॥
त्वयि जुह्वति होतारो हवींषि ध्वस्तकल्मषाः ।
भुञ्जन्ति स्वर्गमेकस्त्वं स्वर्गप्राप्तौ हि कारणम् ॥ १८ ॥

हवींषि मन्त्रपूतानि हुताश त्वयि जुह्वतः ।
तपस्विनस्तपःसिद्धिं यान्ति त्वं तपसां प्रभुः ।। १९ ।।
निधत्से हुतमर्काय स पर्जन्योऽभिवर्षति ।
ततोऽन्नानि प्रजास्तेभ्यस्तेनासि जगतः पिता ।। २० ।।
अन्तश्चरोऽसि भूतानां तानि त्वत्तो भवन्ति च ।
ततो जीवितभूतस्त्वं जगतः प्राणदोऽसि च ।। २१ ।।
जगतः सकलस्यास्य त्वमेकोऽस्युपकारकृत् ।
कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते ।। २२ ।।
अमीषां सुरसंघानां त्वमेकोऽर्थसमर्थने ।
विपत्तिरपि संश्लाघ्योपकारव्रतिनोऽनल ।। २३ ।।
देवी भागीरथी पूर्वं भक्त्यास्माभिः प्रतोषिता ।
निमज्जतस्तवोदीर्णं तापं निर्वापयिष्यति ।। २४ ।।
गङ्गां तद्गच्छ मा कार्षीर्विलम्बं हव्यवाहन ।
कार्येष्ववश्यकार्येषु सिद्धये क्षिप्रकारिता ।। २५ ।।
शंभोरम्भोमयी मूर्तिः सैव देवी सुरापगा ।
त्वत्तः स्मरद्विषो बीजं दुर्धरं धारयिष्यति ।। २६ ।।
इत्युदीर्य सुनासीरो विरराम स चानलः ।
तद्विसृष्टस्तमापृच्छ्य प्रतस्थे स्वर्धुनीमभि ।। २७ ।।
हिरण्यरेतसा तेन देवी स्वर्गतरङ्गिणी ।
तीर्णाध्वना प्रपेदे सा निःशेषक्लेशनाशिनी ।। २८ ।।
स्वर्गारोहणनिःश्रेणिर्मोक्षमार्गाधिदेवता ।
उदारदुरितोद्गारहारिणी दुर्गतारिणी ।। २९ ।।
महेश्वरजटाजूटवासिनी पापनाशिनी ।
सरागान्वयनिर्वाणकारिणी धर्मधारिणी ।। ३० ।।
विष्णुपादोदकोद्भूता ब्रह्मलोकादुपागता ।
त्रिभिः स्रोतोभिरश्रान्तं पुनाना भुवनत्रयम् ।। ३१ ।।

जातवेदसमायान्तमूर्मिहस्तैः समुत्थितैः ।
आजुह्वावार्थसिद्ध्यै तं सुप्रसादधरेव सा ॥ ३२ ॥
समिलद्भिर्मरालैः सा कलं कूजद्भिरुन्मदैः ।
ददे श्रेयांसि दुःखानि निहन्मीति तमभ्यधात् ॥ ३३ ॥
कल्लोलैरुद्गतैरर्वाचीनं तटमभिद्रुतैः ।
प्रीतेव तमभीयाय स्वर्धुनी जातवेदसम् ॥ ३४ ॥
अथाभ्युपेतस्तापार्तो निममज्जानलः किल ।
विपदा परिभूताः किं व्यवस्यन्ति विलम्बितुम् ॥ ३५ ॥
गङ्गावारिणि कल्याणकारिणि श्रमहारिणि ।
स मग्नो निर्वृतिं प्राप पुण्यभारिणि तारिणि ॥ ३६ ॥
तत्र माहेश्वरं धाम संचक्राम हविर्भुजः ।
गङ्गायामुत्तरंगायामन्तस्तापविपद्धृति ॥ ३७ ॥
कृशानुरेतसो रेतस्यादत्ते सरिता तया ।
निश्चक्राम ततः सौख्यं हव्यवाहो वहन्बहु ॥ ३८ ॥
सुधासारैरिवाम्भोभिरभिषिक्तो हुताशनः ।
यथागतं जगामाथ परां निर्वृतिमादधत् ॥ ३९ ॥
सा सुदुर्विहं गङ्गा धाम कामजितो महत् ।
आदधाना परीतापमवाप व्योमवाहिनी ॥ ४० ॥
बहिरार्ता युगान्ताग्नेस्तप्तानीव शिखाशतैः ।
हित्वोष्णानि जलान्यस्या निर्जग्मुर्जलजन्तवः ॥ ४१ ॥
तेजसा तेन रौद्रेण तप्तानि सलिलान्यपि ।
समुदञ्चन्ति चण्डानि दुर्धराणि बभार सा ॥ ४२ ॥
जगच्चक्षुषि चण्डांशौ किंचिदभ्युदयोन्मुखे ।
जग्मुः षट् कृत्तिका माघे मासि स्नातुं सुरापगाम् ॥ ४३ ॥
शुभ्रैरभ्रंकषैरूर्मिशतैः स्वर्गनिवासिनाम् ।
कथयन्तीमिवालोकावगाहाचमनादिकम् ॥ ४४ ॥

सुस्नातानां मुनीन्द्राणां बलिकर्मोचितैरलम् ।
बहिः पुष्पोत्करैः कीर्णतीरां दूर्वाक्षतान्वितैः ॥ ४५ ॥
ब्रह्मध्यानपरैर्योगपरैर्ब्रह्मासनस्थितैः ।
योगनिद्रागतैर्योगपट्टबन्धैरुपाश्रिताम् ॥ ४६ ॥
पादाङ्गुष्ठाग्रभूमिस्थैः सूर्यबद्धदृष्टिभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणाद्भिरुपसेविताम् ॥ ४७ ॥
अथ दिव्यां नदीं देवीमभ्यनन्दन्विलोक्य ताः ।
कं नाभिनन्दयत्येषा दृष्टा पीयूषवाहिनी ॥ ४८ ॥
चन्द्रचूडामणिर्देवो यामुद्वहति मूर्धनि ।
यस्या विलोकनं पुण्यं श्रद्दधुस्ता मुदा हृदि ॥ ४९ ॥
दिव्यां विष्णुपदीं देवीं निर्वाणपददेशिनीम् ।
नीर्धूतकल्मषां मूर्ध्ना सुप्रह्वास्ता ववन्दिरे ॥ ५० ॥
सौभाग्यैः खलु सुप्रापां मोक्षप्रतिभुवं सतीम् ।
भक्त्यात्र तुष्टुवुस्तां ताः श्रद्दधाना दिवोधुनीम् ॥ ५१ ॥
मुक्तिस्त्रीसङ्गदूत्यज्ञैस्तत्र ता विमलैर्जलैः ।
प्रक्षालितमलाः सस्नुः सुस्नातास्तपसान्विताः ॥ ५२ ॥
स्नात्वा तत्र सुलभ्यायां भाग्यैः परिपचेलिमैः ।
चरितार्थं स्वमात्मानं बहु ता मेनिरे मुदा ॥ ५३ ॥
कृशानुरेतसो रेतस्तासामभिकलेवरम् ।
अमोघं संचचाराथ सद्यो गङ्गावगाहनात् ॥ ५४ ॥
रौद्रं सुदुर्धरं धाम दधाना दहनात्मकम् ।
परितापवापुस्ता मग्ना इव विषाम्बुधौ ॥ ५५ ॥
अक्षमा दुर्वहं वोढुमम्बुनो बहिरातुराः ।
अग्निं ज्वलन्तमन्तस्ता दधाना इव निर्ययुः ॥ ५६ ॥
*अमोघं शांभवं बीजं* सद्यो नद्योज्झितं महत् ।
तासामभ्युदरं दीप्तं स्थितं गर्भत्वमागमत् ॥ ५७ ॥

सुज्ञा विज्ञाय ता गर्भभूतं तद्वोढुमक्षमा: ।
विषादमदधु: सद्यो गाढं भर्तृभिया ह्रिया ।। ५८ ।।
तत: शरवणे सार्धं भयेन व्रीडया च ता: ।
तद्गर्भजातमुत्सृज्य स्वान्गृहानभिनिर्ययु: ।। ५९ ।।
ताभिस्तत्रामृतकरकलाकोमलं भासमानं
तद्विक्षिप्तं क्षणमभिनभोगर्भमभ्युज्जिहानै: ।
स्वैस्तेजोभिर्दिनपतिशतस्पर्धमानैरमानै-
र्वक्त्रै: षड्भि: स्मरहरगुरुस्पर्धयेवाजनीव ।। ६० ।।
( मन्दाक्रान्ता )

।। इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
कुमारोत्पत्तिर्नाम दशम: सर्ग ।। १० ।।

## ।।११।। एकादश: सर्ग: ।।

अभ्यर्थ्यमाना विबुधै: समग्रै: प्रह्वै सुरेन्द्रप्रमुखैरुपेत्य ।
तं पाययामास सुधातिपूर्णं सुरापगा स्वं स्तनमाशु मूर्ता ।।१।।
पिबन्स तस्या: स्तनयो: सुधौघं
क्षणं क्षणं साधु समेधमान: ।
प्रापाकृतिं कामपि षड्भिरेत्य
निषेव्यमाण: खलु कृत्तिकाभि: ।। २ ।।
भागीरथीपावककृत्तिकानामानन्दबाष्पाकुललोचनानाम् ।
तं नन्दनं दिव्यमुपात्तुमासीत्परस्परं प्रौढतरो विवाद: ।। ३ ।।
अत्रान्तरे पर्वतराजपुत्र्या समं शिव: स्वैरविहारहेतो: ।
नभो विमानेन विगाहमानो मनोतिवेगेन जगाम तत्र ।। ४ ।।
निसर्गवात्सल्यवशाद्विवृद्धचेत:प्रमोदौ गलदश्रुनेत्रौ ।
अपश्यतां तं गिरिजागिरीशौ षडाननं षड्दिनजातमात्रम् ।५।

अथाह देवी शशिखण्डमौलिं कोऽयं शिशुर्दिव्यवपुः पुरस्तात् ।
कस्याथवा धन्यतमस्य पुंसो मातास्य का भाग्यवतीषु धुर्या ।६।
स्वर्गापगासावनलोऽयमेताः षट् कृत्तिकाः किं कलहायमानाः ।
पुत्रो ममायं न तवायमित्थं मिथ्येति वैलक्ष्यमुदाहरन्ति ।।७।।
एतेषु कस्येदमपत्यमीशाखिलत्रिलोकीतिलकायमानम् ।
अन्यस्य कस्याप्यथ देवदैत्यगन्धर्वसिद्धोरगराक्षसेषु ।। ८ ।।
श्रुत्वेति वाक्यं हृदयप्रियायाः कौतूहलिन्या विमलस्मितश्रीः ।
सान्द्रप्रमोदोदयसौख्यहेतुभूतं वचोऽवोचत चन्द्रचूडः ।। ९ ।।
जगत्त्रयीनन्दन एष वीरः प्रवीरमातुस्तव नन्दनोऽस्ति ।
कल्याणि कल्याणकरः सुराणां त्वत्तोऽपरस्याः कथमेष सर्गः ।।
देवी त्वमेवास्य निदानमास्से सर्गे जगन्मङ्गलगानहेतोः ।
सत्यं त्वमेवेति विचारयस्व रत्नाकरे युज्यत एव रत्नम् ।११।
अतः शृणुष्वावहितेन वृत्तं बीजं यदग्नौ निहितं मया तत् ।
संक्रान्तमन्तस्त्रिदशापगायां ततोऽवगाहे सति कृत्तिकासु ।१२।
गर्भत्वमाप्तं तदमोघमेतत्ताभिः शरस्तम्बमधि न्यधायि ।
बभूव तत्रायमभूतपूर्वो महोत्सवोऽशेषचराचरस्य ।। १३ ।।
अशेषविश्वप्रियदर्शनेन धुर्या त्वमेतेन सुपुत्रिणीनाम् ।
अलं विलम्ब्याचलराजपुत्रि स्वपुत्रमुत्सङ्गतले निधेहि ।।१४।।
अथेति वादिन्यमृतांशुमौलौ शैलेन्द्रपुत्री रभसेन सद्यः ।
सान्द्रप्रमोदेन सुपीनगात्री धात्री समस्तस्य चराचरस्य ।।१५।।
किरीटबद्धाञ्जलिभिर्नभःस्थैर्नमस्कृता सत्वरनाकिलोकैः ।
विमानतोऽवातरदात्मजं तं ग्रहीतुमुत्कण्ठितमानसाभूत् ।१६।

स्वर्गापगापावककृत्तिकादी-
न्कृताञ्जलीनानमतोऽपि भूयः ।
हित्वोत्सुका तं सुतमासासद
पुत्रोत्सवे माद्यति का न हर्षात् ।। १७ ।।

प्रमोदबाष्पाकुललोचना सा न तं ददर्श क्षणमग्रतोऽपि ।
परिस्पृशन्ती करकुड्मलेन सुखान्तरं प्राप किमप्यपूर्वम् ।१८।
सविस्मयानन्दविकस्वरायाः शिशुर्गलद्बाष्पतरंगितायाः ।
विवृद्धवात्सल्यरसोत्तराया देव्या दृशोर्गोचरतां जगाम ।।१९।।
तमीक्षमाणा क्षणमीक्षणानां सहस्रमाप्तुं विनिमेषमैच्छत् ।
सा नन्दनालोकनमङ्गलेषु क्षणंक्षणं तृप्यति कस्य चेतः ।।२०।।
विनम्रदेवासुरपृष्ठगाभ्यामादाय तं पाणिसरोरुहाभ्याम् ।
नवोदयं पार्वणचन्द्रचारुं गौरी स्वमुत्सङ्गतलं निनाय ।।२१।।
स्वमङ्कमारोप्य सुधानिधानमिवात्मनो नन्दनमिन्दुवक्त्रा ।
तमेकमेषा जगदेकवीरं बभूव पूज्या धुरि पुत्रिणीनाम् ।।२२।।
निसर्गवात्सल्यरसौघसिक्ता सान्द्रप्रमोदामृतपूरपूर्णा ।
तमेकपुत्रं जगदेकमाताभ्युत्सङ्गिनं प्रस्रविणी बभूव ।। २३ ।।
अशेषलोकत्रयमातुरस्याः षाण्मातुरः स्तन्यसुधामधासीत् ।
सुरस्रवन्त्याः किल कृत्तिकाभिर्मुहुर्मुहुः सस्पृहमीक्ष्यमाणः ।२४।
सुखाश्रुपूर्णेन मृगाङ्कमौलेः कलत्रमेकेन मुखाम्बुजेन ।
तस्यैकनालोद्गतपञ्चपद्मलक्ष्मीं क्रमात्पञ्चवदनीं चुचुम्ब ।२५।
हैमी फलं हेमगिरेर्लतेव विकस्वरं नाकनदीव पद्मम् ।
पूर्वेव दिङ्नूतनमिन्दुमाभास्तं पार्वती नन्दनमादधाना ।।२६।।
प्रीतात्मना सा प्रयतेन दत्तहस्तावलम्बा शशिशेखरेण ।
कुमारमुत्सङ्गतले दधाना विमानमभ्रंलिहमारुरोह ।।२७।।

महेश्वरोऽपि प्रमदप्ररूढ-
रोमोद्गमो भूधरनन्दनायाः ।
अङ्कादुपादत्त तदङ्कतः सा
तस्यास्तु सोऽप्यात्मजवत्सलत्वात् ।।२८।।
दधानया नेत्रसुधैकसत्रं
पुत्रं पवित्रं सुतया तयाद्रेः ।

संश्लिष्यमाणः शशिखण्डधारी
विमानवेगेन गृहाञ्जगाम ॥ २९ ॥
अधिष्ठितः स्फाटिकशैलशृङ्गे तुङ्गे निजं धाम निकामरम्यम् ।
महोत्सवाय प्रमथप्रमुख्यान्पृथून्गणाञ्शंभुरथादिदेश ॥३०॥
पृथुप्रमोदः प्रगुणो गणानां
गणः समग्रो वृषवाहनस्य ।
गिरीन्द्रपुत्र्यास्तनयस्य जन्मन्य-
थोत्सवं सववृते विधातुम् ॥ ३१ ॥
स्फुरन्मरीचिच्छुरिताम्बराणि
संतानशाखिप्रसवाञ्चितानि ।
उच्चिक्षिपुः काञ्चनतोरणानि
गणा वराणि स्फटिकालयेषु ॥ ३२ ॥
दिक्षु प्रसर्पंस्तदधीश्वराणामथामराणामिव मध्यलोके ।
महोत्सवं शंसितुमाहतोऽन्यैर्दध्वान धीरः पटहः पटीयान् ।३३।
महोत्सवे तत्र समागतानां गन्धर्वविद्याधरसुन्दरीणाम् ।
संभावितानां गिरिराजपुत्र्या गृहेऽभवन्मङ्गलगीतकानि ।३४।
सुमङ्गलोपायनपात्रहस्तास्तं मातरो मातृवदभ्युपेताः ।
विधाय दूर्वाक्षतकानि मूर्ध्नि निन्युः स्वमङ्कं गिरिजातनूजम् ॥
ध्वनत्सु तूर्येषु सुमन्द्रमङ्क्यालिङ्ग्योर्ध्वकेष्वप्सरसो रसेन ।
सुसंधिबन्धं ननृतुः सुवृत्तगीतानुगं भावरसानुविद्धम् ॥३६॥
वाता ववुः सौख्यकराः प्रसेदुराशा विधूमो हुतभुग्दिदीपे ।
जलान्यभूवन्विमलानि तत्रोत्सवेऽन्तरिक्षं प्रससाद सद्यः ।३७।
गम्भीरशङ्खध्वनिमिश्रमुच्चैर्गृहोद्भवा दुन्दुभयः प्रणेदुः ।
दिवौकसां व्योम्नि विमानसंघा विमुच्य पुष्पप्रचयान्प्रसस्रुः ॥
इत्थं महेशाद्रिसुतासुतस्य जन्मोत्सवे संमदयांचकार ।
चराचरं विश्वमशेषमेतत्परं चकम्पे किल तारकश्रीः ॥३९॥

ततः कुमारः समुदां निदानैः स बाललीलाचरितैर्विचित्रैः ।
गिरीशगौर्योर्हृदयं जहार मुदे न हृद्या किमु बालकेलिः ।।४०।।
महेश्वरः शैलसुता च हर्षात्सतर्षमेकेन मुखेन गाढम् ।
अजातदन्तानि मुखानि सूनोर्मनोहराणि क्रमतश्चुचुम्ब ।४१।
क्वचित्स्खलद्भिः क्वचिदस्खलद्भिः क्वचित्प्रकम्पैः क्वचिदप्रकम्पैः
बालः स लीलाचलनप्रयोगैस्तयोर्मुदं वर्धयति स्म पित्रोः ।४२।
अहेतुहासच्छुरिताननेन्दुर्गृहाङ्गणक्रीडनधूलिधूम्रः ।
मुहुर्वदन्किंचिदलक्षितार्थं मुदं तयोरङ्कगतस्ततान ।। ४३ ।।
गृह्णन्विषाणे हरवाहनस्य स्पृशन्नुमाकेसरिणं सलीलम् ।
स भृङ्गिणः सूक्ष्मतरं शिखाग्रं कर्षन्बभूव प्रमदाय पित्रोः ।४४।
एको नव द्वौ दश पञ्च सप्तेत्यजीगणन्नात्ममुखं प्रसार्य ।
महेशकण्ठोरगदन्तपङ्क्तिं तदङ्कगः शैशवमौग्ध्यमैशिः ।।४५।।
कपर्दिकण्ठान्तकपालदाम्नोऽङ्गुलिं प्रवेश्याननकोटरेषु ।
दन्तानुपात्तुं रभसी बभूव मुक्ताफलभ्रान्तिकरः कुमारः ।४६।
शंभोः शिरोऽन्तः सरितस्तरंगान्विगाह्य गाढं शिशिरान्रसेन ।
स जातजाड्यं निजपाणिपद्ममतापयद्भालविलोचनाग्नौ ।४७।
किंचित्कलं भङ्गुरकंधरस्य नमज्जटाजूटधरस्य शंभोः ।
प्रलम्बमानं किल कौतुकेन चिरं चुचुम्बे मुकुटेन्दुखण्डम् ।४८।
इत्थं शिशोः शैशवकेलिवृत्तैर्मनोभिरामैर्गिरिजागिरीशौ ।
मनोविनोदैकरसप्रसक्तौ दिवानिशं नाविदतां कदाचित् ।।४९।।
इति बहुविधं बालक्रीडाविचित्रविचेष्टितं
ललितललितं सान्द्रानन्दं मनोहरमाचरन् ।
अलभत परां वृद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शास्त्रं शस्त्रं विवेद विभुर्यया ।।५०।।
(हरिणी)

।। इति कवि श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
कुमारोत्पत्तिर्नामैकादशः सर्गः ।।११।।

## ॥ १२ ॥ द्वादशः सर्गः ॥

अथ प्रपेदे त्रिदशैरशेषैः क्रूरासुरोपप्लवदुःखितात्मा ।
पुलोमपुत्रीदयितोऽन्धकारिं पक्षीव तृष्णातुरितः पयोदम् ॥१॥
दृप्तारिसंत्रासखिलीकृतास्स कथंचिदम्भोदविहारमार्गात् ।
अवाततारादिगिरिं गिरीशगौरीपदन्यासविशुद्धमिन्द्रः ॥२॥
संक्रन्दनः स्यन्दनतोऽवतीर्य मेघात्मनो मातलिदत्तहस्तः ।
पिनाकिनोऽथालयमुच्चचाल शुचौ पिपासाकुलितो यथाम्भः ॥३॥
इतस्ततोऽथ प्रतिबिम्बभाजं विलोकमानः स्फटिकाद्रिभूमौ ।
आत्मानमप्येकमनेकधा स व्रजन्विभोरास्पदमाससाद ॥ ४ ॥
विचित्रचञ्चन्मणिभङ्गिसङ्गं सौवर्णदण्डं दधतातिचण्डम् ।
स नन्दिनाधिष्ठितमध्यतिष्ठत्सौधाङ्गणद्वारमनङ्गशत्रोः ॥५॥
ततः स कक्षाहितहेमदण्डो नन्दी सुरेन्द्रं प्रतिपद्य सद्यः ।
प्रतोषयामास सुगौरवेण गत्वा शशंस स्वयमीश्वरस्य ॥ ६ ॥
भ्रूसंज्ञयानेन कृताभ्यनुज्ञः सुरेश्वरं तं जगदीश्वरेण ।
प्रवेशयामास सुरैः पुरोगः समं स नन्दी सदनं सदस्य ॥ ७ ॥
स चण्डिभृङ्गिप्रमुखैर्गरिष्ठैर्गणैरनेकैर्विविधस्वरूपैः ।
अधिष्ठितं संसदि रत्नमय्यां सहस्रनेत्रः शिवमालुलोके ॥८॥
कपर्दमुद्बद्धमहीनमूर्धरत्नांशुभिर्भासुरमुल्लसद्भिः ।
दधानमुच्चैस्तरमिद्धधातोः सुमेरुशृङ्गस्य समत्वमाप्तम् ॥९॥
बिभ्राणमुत्तुङ्गतरङ्गमालां गङ्गां जटाजूटतटं भजन्तीम् ।
गौरीं तदुत्सङ्गजुषं हसन्तीमिव स्वफेनैः शरदभ्रशुभ्रैः ॥१०॥
गङ्गातरङ्गप्रतिबिम्बितैः स्वैर्बहूभवन्तं शिरसा सुधांशुम् ।
चलन्मरीचिप्रचयैस्तुषारगौरैर्हिमद्योतितमुद्वहन्तम् ॥ ११ ॥
भालस्थले लोचनमेधमानधामाधरीभूतरवीन्दुनेत्रम् ।
युगान्तकालोचितहव्यवाहं मीनध्वजप्लोषणमादधानम् ॥१२॥

महार्हरत्नाञ्चितयोरुदारं स्फुरत्प्रभामण्डलयोः समन्तात् ।
कर्णस्थिताभ्यां शशिभास्कराभ्यामुपासितं कुण्डलयोश्छलेन १३
स्वबद्धया कण्ठिकयेव नीलमाणिक्यमय्या कुतुकेन गौर्याः ।
नीलस्य कण्ठस्य परिस्फुरन्त्या कान्त्या महत्या सुविराजमानम्

कालार्दितानां त्रिदशासुराणां
चितारजोभिः परिपाण्डुराङ्गम् ।
महन्महेभाजिनमुद्गताभ्र-
प्रालेयशैलश्रियमुद्वहन्तम् ॥ १५ ॥

पाणिस्थितब्रह्मकपालपात्रं वैकुण्ठभाजापि निषेव्यमाणम् ।
नरास्थिखण्डाभरणं रणान्तमूलं त्रिशूलं कलयन्तमुच्चैः ।१६।
पुरातनीं ब्रह्मकपालमालां कण्ठे वहन्तं पुनराश्वसन्तीम् ।
उद्गीतवेदां मुकुटेन्दुवर्षत्सुधाभरौघाप्लवलब्धसंज्ञाम् ॥१७॥
सलीलमङ्कस्थितया गिरीन्द्रपुत्र्या नवाष्टापदवल्लिभासा ।
विराजमानं शरदभ्रखण्डं परिस्फुरन्त्याचिररोचिषेव ॥१८॥
हस्तान्धकप्राणहरं पिनाकं महासुरस्त्रीविधवत्वहेतुम् ।
करेण गृह्णन्तमगृह्यमन्यैः पुरा स्मरप्लोषणकेलिकारम् ॥१९॥
भद्रासनं काञ्चनपादपीठं महार्हमाणिक्यविभङ्गिचित्रम् ।
अधिष्ठितं चन्द्रमरीचिगौरैरुद्वीज्यमानं चमरैर्गणाभ्याम् ।२०।

शस्त्रास्त्रविद्याभ्यसनैकसक्ते सविस्मयैरेत्य गणैः सुदृष्टे ।
नीराज्यमाने स्फटिकाचलेन सानन्दनिर्दिष्टदृशं कुमारे ॥२१॥

तथाविधं शैलसुताधिनाथं
पुलोमपुत्रीदयितो निरीक्ष्य ।
आसीत्क्षणं क्षोभपरो नु कस्य
मनो न हि क्षुभ्यति धामधाम्नि ॥२२॥

विकस्वराम्भोजनश्रिया तं
दृशां सहस्रेण निरीक्षमाणः ।

रोमालिभिः स्वर्गपतिर्बभासे
पुष्पोत्कराकीर्ण इवाम्रशाखी ।। २३ ।।
दृष्ट्वा सहस्रेण दृशां महेशमभूत्कृतार्थोऽतितरां महेन्द्रः ।
सर्वाङ्गजातं तदथो विरूपमिव प्रियाकोपकरं विवेद ।।२४।।
ततः कुमारं कनकाद्रिसारं पुरंदरः प्रेक्ष्य धृतास्त्रशस्त्रम् ।
महेश्वरोपान्तिकवर्तमानं शत्रोर्जयाशां मनसा बबन्ध ।।२५।।
श्रीनीलकण्ठ द्युपतिः पुरोऽस्ति त्वयि प्रणामावसरं प्रतीच्छन् ।
सहस्रनेत्रेऽत्र भव त्रिनेत्र दृष्ट्या प्रसादप्रगुणो महेश ।। २६ ।।
इति प्रबद्धाञ्जलिरेत्य नन्दी निधाय कक्षामभि हेमवेत्रम् ।
प्रसादपात्रं पुरतो भविष्णुरथ स्मरारातिमुवाच वाचम् ।२७।
पुरा सुरेन्द्रं सुरसङ्घसेव्यं त्रिलोकसेव्यस्त्रिपुरासुरारिः ।
प्रीत्या सुधासारनिधारिणेव ततोऽनुग्राह विलोकनेन ।।२८।।
किरीटकोटिच्युतपारिजातपुष्पोत्करेणानमितेन मूर्ध्ना ।
स्वर्गैकवन्द्यो जगदेकवन्द्यं तं देवदेवं प्रणनाम देवः ।। २९ ।।
अनेकलोकैकनमस्क्रियार्हं महेश्वरं तं त्रिदशेश्वरः सः ।
भक्त्या नमस्कृत्य कृतार्थतायाः पात्रं पवित्रं परमं बभूव ।३०।
सुभक्तिभाजामधि पादपीठं प्रान्तक्षितिं नम्रतरैः शिरोभिः ।
ततः प्रणेमुः पुरतो गणानां गणाः सुराणां क्रमतः पुरारिम् ३१
गणोपनीते प्रभुणोपदिष्टः शुभासने हेममये पुरस्तात् ।
प्रापोपविश्य प्रमुदं सुरेन्द्रः प्रभुप्रसादो हि मुदे न कस्य ।।३२।।
क्रमेण चान्येऽपि विलोकनेन संभाविताः सस्मितमीश्वरेण ।
उपाविशंस्तोषविशेषमाप्ता दृग्गोचरे तस्य सुराः समग्राः ।३३।
अथाह देवो बलवैरिमुख्यान्गीर्वाणवर्गान्करुणार्द्रचेताः ।
कृताञ्जलीकानसुराभिभूतान्ध्वस्तश्रियः श्रान्तमुखानवेक्ष्य ३४
अहो बतानन्तपराक्रमाणां दिवौकसो वीरवरायुधानाम् ।
हिमोदबिन्दुग्लपितस्य किं यः पद्मस्य दैन्यं दधते मुखानि ।३५।

स्वर्गौकसः स्वर्गपरिच्युताः किं स्वपुण्यराशौ सुमहत्तमेऽपि ।
चिह्नं चिरोढं न तु यूयमेते निजाधिपत्यस्य परित्यजध्वम् ।३६।
दिवौकसो देवगृहं विहाय मनुष्यसाधारणतामवाप्ताः ।
यूयं कुतः कारणतश्चरध्वं महीतले मानभृतो महान्तः ।३७।
अनन्यसाधारणसिद्धमुच्चैस्तद्दैवतं धाम निकामरम्यम् ।
कस्मादकस्मान्निरगाद्भवद्भ्यश्चिरार्जितं पुण्यमिवापचारात् ।
दिवौकसो वो हृदयस्य कस्मा-
त्तथाविधं धैर्यमहार्यमार्याः ।
अगादगाधस्य जलाशयस्य
ग्रीष्मातितापादिवशादिवाम्भः ।। ३९ ।।
सुराः सुराधीशपुरःसराणां समीयुषां वः सममातुराणाम् ।
तद्ब्रूत लोकत्रयजित्वरार्तिं महासुरात्तारकतो विरुद्धम् ।४०।
पराभवं तस्य महासुरस्य निषेद्धुमेकोऽहमलंभविष्णुः ।
दावानलप्लोषविपत्तिमन्यो महाम्बुदार्तिं हरते वनानाम् ।४१।
इतीरिते मन्मथमर्दनेन सुराः सुरेन्द्रप्रमुखा मुखेषु ।
सान्द्रप्रमोदाश्रुतरङ्गितेषु दधुः श्रियं सत्वरमाश्वसन्तः ।४२।
ततो गिरीशस्य गिरां विरामे जगाद लब्धेऽवसरे सुरेन्द्रः ।
भवन्ति वाचोऽवसरे प्रयुक्ता ध्रुवं फलाविष्टमहोदयाय ।४३।
ज्ञानप्रदीपेन तमोपहेनाविनश्वरेणास्खलितप्रभेण ।
भूतं भवद्भावि च यच्च किंचित्सर्वज्ञ सर्वं तव गोचरं तत् ।४४।
दुर्वारदोर्दण्डमदुःसहेन यत्तारकेणामरघस्मरेण ।
तदीशतामाप्तवता निरस्ता वयं दिवोऽमी वद किं न वेत्सि ।४५।
विधेरमोघं स वरप्रसादमासाद्य सद्यस्त्रिजगज्जिगीषुः ।
सुरानशेषानहकप्रमुख्यान्दोर्दण्डचण्डो मनुते तृणाय ।। ४६ ।।
स्तुत्या पुरास्माभिरुपासितेन पितामहेनेति निरूपितं नः ।
सेनापतिः संयति दैत्यमेतं पुरः स्मरारातिसुतो निहन्ति ।४७।

अहो ततोऽनन्तरमद्ययावत्सुदुःसहां तस्य पराभवार्तिम् ।
विषेहिरे हन्त हृदन्तशल्यमाज्ञानिवेशं त्रिदिवौकसोऽमी ॥४८॥
निदाघधामक्लमविक्लवानां नवीनमम्भोदमिवौषधीनाम् ।
सुनन्दनं नन्दनमात्मनो नः सेनान्यमेतं स्वयमादिश त्वम् ।४९।
त्रैलोक्यलक्ष्मीहृदयैकशल्यं समूलमुत्खाय महासुरं तम् ।
अस्माकमेषां पुरतोभवन्सन्दुःखापहारं युधि यो विधत्ते ॥५०॥
महाहवे नाथ तवास्य सूनोः शस्त्रैः शितैः कृत्तशिरोधराणाम् ।
महासुराणां रमणीविलापैर्दिशो दशैता मुखरीभवन्तु ॥५१॥
महारणक्षोणिपशूपहारीकृतेऽसुरे तत्र तवात्मजेन ।
बन्दिस्थितानां सुदृशां करोतु वेणिप्रमोक्षं सुरलोक एषः ।५२।
इत्थं सुरेन्द्रे वदति स्मरारिः सुरारिदुश्चेष्टितजातरोषः ।
कृतानुकम्पस्त्रिदशेषु तेषु भूयोऽपि भूताधिपतिर्बभाषे ॥५३॥
अहो अहो देवगणाः सुरेन्द्रमुख्याः शृणुध्वं वचनं ममैते ।
विचेष्टते शंकर एष देवः कार्याय सज्जो भवतां सुताद्यैः ।५४।
पुरा मयाकारि गिरीन्द्रपुत्र्याः प्रतिग्रहोऽयं नियतात्मनापि ।
तत्रैष हेतुः खलु तद्भवेन वीरेण यद्वध्यत एव शत्रुः ॥ ५५ ॥
अत्रोपपन्नं तदमी नियुज्य कुमारमेनं पृतनापतित्वे ।
निघ्नन्तु शत्रुं सुरलोकमेष भुनक्तु भूयोऽपि सुरैः सहेन्द्रः ।५६।
इत्युदीर्य भगवांस्तमात्मजं घोरसंगरमहोत्सवोत्सुकम् ।
नन्दनं हि जहि देवविद्विषं संयतीति निजगाद शंकरः ॥५७॥
शासनं पशुपतेः स कुमारः स्वीचकार शिरसावनतेन ।
सर्वथैव पितृभक्तिरतानामेष एव परमः खलु धर्मः ॥ ५८ ॥
असुरयुद्धविधौ विबुधेश्वरे पशुपतौ वदतीति तमात्मजम् ।
गिरिजया मुमुदे सुतविक्रमे सति न नन्दति का खलु वीरसूः ।

सुरपरिवृढः प्रौढं वीरं कुमारमुमापते-
र्बलवदमरारातिस्त्रीणां दृगञ्जनभञ्जनम् ।

जगदभयदं सद्यः प्राप्य प्रमोदपरोऽभव-
द्ध्रुवमभिमते पूर्णे को वा मुदा न हि माद्यति ।६०।
(हरिणी)

।। इति कवि-श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
कुमारसैनापत्यवर्णनं नाम द्वादशः सर्गः ।।१२।।

## ।। १३ ।। त्रयोदशः सर्गः ।।

प्रस्थानकालोचितचारुवेषः स स्वर्गिवर्गैरनुगम्यमानः ।
ततः कुमारः शिरसा नतेन त्रैलोक्यभर्तुः प्रणनाम पादौ ।१।
जहीन्द्रशत्रुं समरेऽमरेशपदं स्थिरत्वं नय वीर वत्स ।
इत्याशिषा तं प्रणमन्तमीशो मूर्धन्युपाघ्राय मुदाभ्यनन्दत् ।२।
प्रह्वीभवन्नम्रतरेण मूर्ध्ना नमश्चकाराङ्घ्रियुगं स्वमातुः ।
तस्याः प्रमोदाश्रुपयःप्रवृष्टिस्तस्याभवद्वीरवराभिषेकः ।।३।।
तमङ्कमारोप्य सुता हिमाद्रेराश्लिष्य गाढं सुतवत्सला सा ।
शिरस्युपाघ्राय जगाद शत्रुं जित्वा कृतार्थीकुरु वीरसूं माम् ।४।
उद्दामदैत्येशविपत्तिहेतुः श्रद्धालुचेताः समरोत्सवस्य ।
आपृच्छ्य भक्त्या गिरिजागिरीशौ ततः प्रतस्थेऽभिदिवं कुमारः ।
देवं महेशं गिरिजां च देवीं
ततः प्रणम्य त्रिदिवौकसोऽपि ।
प्रदक्षिणीकृत्य च नाकनाथ-
पूर्वाः समस्तास्तमथानुजग्मुः ।। ६ ।।
अथ व्रजद्भिस्त्रिदशैरशेषैः स्फुरत्प्रभाभासुरमण्डलैस्तैः ।
नभो बभासे परितो विकीर्णं दिवापि नक्षत्रगणैरिवोग्रैः ।।७।।
रराज तेषां व्रजतां सुराणां मध्ये कुमारोऽधिककान्तिकान्तः ।
नक्षत्रताराग्रहमण्डलानामिव त्रियामारमणो नभोन्ते ।। ८ ।।

गिरीशगौरीतनयेन सार्धं पुलोमपुत्रीदयितादयस्ते ।
उत्तीर्य नक्षत्रपथं मुहूर्तात्प्रपेदिरे लोकमथात्मनीनम् ॥ ९ ॥
ते स्वर्गलोकं चिरकालदृष्टं महासुरत्रासवशंवदत्वात् ।
सद्यः प्रवेष्टुं न विषेहिरे तत्क्षणं व्यलम्बन्त सुराः समग्राः ।१०।
पुरो भव त्वं न पुरो भवामि नाहं पुरोगोऽस्मि पुरःसरस्त्वम् ।
इत्थं सुरास्तत्क्षणमेव भीताः स्वर्गं प्रवेष्टुं कलहं वितेनुः ।११।
सुरालयालोकनकौतुकेन मुदा शुचिस्मेरविलोचनास्ते ।
दधुः कुमारस्य मुखारविन्दे दृष्टिं द्विषत्साध्वसकातरान्ताम् १२
सहेलहासच्छुरिताननेन्दुस्ततः कुमारः पुरतो भविष्णुः ।
स तारकापातमपेक्षमाणो रणप्रवीरो हि सुरानवोचत् ॥१३॥
भीत्यालमद्य त्रिदिवैकसोऽमी स्वर्गं भवन्तः प्रविशन्तु सद्यः ।
अत्रैव मे दृक्पथमेतु शत्रुर्महासुरो वः खलु दृष्टपूर्वः ॥ १४ ॥
स्वर्लोकलक्ष्मीकचकर्षणाय दोर्मण्डलं वल्गति यस्य चण्डम् ।
इहैव तच्छोणितपानकेलिमल्लाय कुर्वन्तु शरा ममैते ॥१५॥
शक्तिर्ममासावहतप्रचारा प्रभावसारा सुमहःप्रसारा ।
स्वर्लोकलक्ष्म्या विपदावहारेः शिरो हरन्ती दिशतान्मुदं वः १६
इत्यन्धकारातिसुतस्य दैत्यवधाय युद्धोत्सुकमानसस्य ।
सर्वं शुचिस्मेरमुखारविन्दं गीर्वाणवृन्दं वचसा ननन्द ॥१७॥
सान्द्रप्रमोदात्पुलकोपगूढः सर्वाङ्गसंफुल्लसहस्रनेत्रः ।
तस्योत्तरीयेण निजाम्बरेण निरुञ्छनं चारु चकार शक्रः ।१८।
घनप्रमोदाश्रुतरंगिताक्षैर्मुखैश्चतुर्भिः प्रचुरप्रसादैः ।
अथो अचुम्बद्विधिरादिवृद्धः षडाननं षट्सु शिरःसु चित्रम् १९
तं साधु साध्वित्यभितः प्रशस्य मुदा कुमारं त्रिपुरासुरारेः ।
आनन्दयन्वीर जयेति वाचा गन्धर्वविद्याधरसिद्धसंघाः ।२०।
दिव्यर्षयः शत्रुविजेष्यमाणं तमभ्यनन्दन्किल नारदाद्याः ।
निरुञ्छनं चक्रुरथोत्तरीयैश्चामीकरीयैर्निजवल्कलैश्च ॥२१॥

ततः सुरः शक्तिधरस्य तस्यावष्टम्भतः साध्वसमुत्सृजन्तः ।
उत्सेहिरे स्वर्गमनन्तशक्तेर्गन्तुं वनं यूथपतेरिवेभाः ।।२२।।
अथाभिपृष्ठं गिरिजासुतस्य पुरंदरारातिवधं चिकीर्षोः ।
सुरा निरीयुस्त्रिपुरं दिधक्षोरिव स्मरारेः प्रमथः समन्तात् ।२३।
सुराङ्गणानां जलकेलिभाजां प्रक्षालितैः संततमङ्गरागैः ।
प्रपेदिरे पिञ्जरवारिपूरां स्वर्गौकसः स्वर्गधुनीं पुरस्तात् ।२४।
दिग्दन्तिनां वारिविहारभाजां कराहतैर्भीमतरैस्तरंगैः ।
आप्लावयन्तीं मुहुरालवालश्रेणिं तरूणां निजतीरजानाम् ।२५।
लीलारसाभिः सुरकन्यकाभिर्हिरण्मयीभिः सिकताभिरुच्चैः ।
माणिक्यगर्भाभिरुपाहिताभिः प्रकीर्णतीरां वरवेदिकाभिः ।२६।
सौरभ्यलुब्धभ्रमरोपगीतैर्हिरण्यहंसावलिकेलिलोलैः ।
चामीकरीयैः कमलैर्विनिद्रैश्च्युतैः परागैः परिपिङ्गतोयाम् ।२७।
कुतूहलाद्द्रष्टुमुपागताभि-
स्तीरस्थिताभिः सुरसुन्दरीभिः ।
अभ्यूर्मिराजिप्रतिबिम्बिताभि-
र्मुदं दिशन्तीं व्रजतां जनानाम् ।। २८ ।।
ननन्द सद्यश्चिरकालदृष्टां विलोक्य शक्रः सुरदीर्घिकां ताम् ।
अदर्शयत्सादरमद्रिपुत्रीमहेशपुत्राय ततः पुरोगः ।। २९ ।
स कार्तिकेयः पुरतः परीतः सुरैः समस्तैः सुरनिम्नगां ताम् ।
अपूर्वदृष्टामवलोकमानः सविस्मयः स्मेरविलोचनोऽभूत् ।३०।
उपेत्य तां तत्र किरीटकोटिन्यस्ताञ्जलिर्भक्तिपरः कुमारः ।
गीर्वाणवृन्दैः प्रणुतां प्रणुत्य नम्रेण मूर्ध्ना मुदितो ववन्दे ।३१।
प्रणर्तितस्मेरसरोजराजिः पुरः परीरम्भमिलन्महोर्मिः ।
कपोलपालिश्रमवारिहारि भेजे गुहं तं सरितः समीरः ।।३२।।
ततो व्रजन्नन्दननामधेयं लीलावनं जम्भजितः पुरस्तात् ।
विभिन्नभग्नोद्धृतशालसंघं प्रेक्षांचकार स्मरशत्रुसूनुः ।।३३।।

सुरद्विपोपप्लुतमेवमेतद्वनं
बलस्य द्विषतो गतश्रि ।
इत्थं विचिन्त्यारुणलोचनोऽभू-
द्भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात् ॥ ३४ ॥

निर्लूनलीलोपवनामपश्यद्दुःसचरीभूतविमानमार्गाम् ।
विध्वस्तसौधप्रचयां कुमारो विश्वैकसाराममरावतीं सः ।३५।
गतश्रियं वैरिवराभिभूतां दशां सुदीनामभितो दधानाम् ।
नारीमवीरामिव तामवेक्ष्य स बाढमन्तः करुणापरोऽभूत् ।३६।
दुश्चेष्टिते देवरिपौ सरोषस्तस्याविषण्णः समराय चोत्कः ।
तथाविधां तां स विवेश पश्यन्सुरैः सुराधीश्वरराजधानीम् ।३७।

दैतेयदन्त्यावलिदन्तघातैः
क्षुण्णान्तराः स्फाटिकहर्म्यपङ्क्तीः ।
महाहिनिर्मोकदिनद्धजालाः
स वीक्ष्य तस्यां विषसाद सद्यः ॥३८॥

उत्कीर्णचामीकरपङ्कजानां दिग्दन्तिदानद्रवदूषितानाम् ।
हिरण्यहंसव्रजवर्जितानां विदीर्णवैदूर्यमहाशिलानाम् ॥ ३९ ॥
आविर्भवद्वालतृणाञ्चितानां तदीयलीलागृहदीर्घिकाणाम् ।
स दुर्दशां वीक्ष्य विरोधिजातां विषादवैलक्ष्यभरं बभार ।४०।
तद्दन्तिदन्तक्षतहेमभित्ति सुतन्तुजालाकुलरत्नजालाम् ।
निन्ये सुरेन्द्रेण पुरोगतेन स वैजयन्ताभिधमात्मसौधम् ॥४१॥
निर्दिष्टवर्त्मा विबुधेश्वरेण सुरैः समग्रैरनुगम्यमानः ।
स प्राविशत्तं विविधाश्मरश्मिच्छिन्नेन सोपानपथेन सौधम् ४२
निसर्गकल्पद्रुमतोरणं तं स पारिजातप्रसवस्रगाढ्यम् ।
दिव्यैः कृतस्वस्त्ययनं मुनीन्द्रैरन्तःप्रविष्टप्रमदं प्रपेदे ॥४३॥
पादौ महर्षेः किल कश्यपस्य कुलादिवृद्धस्य सुरासुराणाम् ।
प्रदक्षिणीकृत्य कृताञ्जलिः सन्षड्भिः शिरोभिः स नतैर्ववन्दे ४४

स देवमातुर्जगदेकवन्द्यौ पादौ तथैव प्रणनाम कामम् ।
मुनेः कलत्रस्य च तस्य भक्त्या प्रह्वीभवञ्शैलसुतातनूजः ।४५।

स कश्यपः सा जननी सुराणां तमेधयामासतुराशिषा द्वौ ।
तया यया नैकजगज्जिगीषुं जेता मृधे तारकमुग्रवीर्यम् ।४६।

स्वदर्शनार्थं समुपेयुषीणां सुदेवतानामदितिश्रितानाम् ।
पादौ ववन्दे पतिदेवतास्तमाशीर्वचोभिः पुनरभ्यनन्दन् ।४७।

पुलोमपुत्रीं विबुधाधिभर्तुस्ततः शचीं नाम कलत्रमेषः ।
नमश्चकार स्मरशत्रुसूनुस्तमाशिषा सा समुपाचरच्च ।।४८।।

अथादितीन्द्रप्रमदाः समेतास्ता मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमते महेशपुत्राय तस्मै ददुराशिषः प्राक् ।४९।

समेत्य सर्वेऽपि मुदं दधाना महेन्द्रमुख्यास्त्रिदिवौकसोऽथ ।
आनन्दकल्लोलितमानसं तं समभ्यषिञ्चन्पृतनाधिपत्ये ।।५०।।

सकलविबुधलोकः स्रस्तनिःशेषशोकः
कृतरिपुविजयाशः प्राप्तयुद्धावकाशः ।
अजनि हरसुतेनानन्तवीर्येण तेना-
खिलविबुधचमूनां प्राप्य लक्ष्मीमनूनाम् ।। ५१ ।।
(मालिनी)

।। इति श्री कालिदासकृतौ कुमारसंभवे महाकाव्ये
कुमारसेनापत्याभिषेको नाम त्रयोदशः सर्गः ।।१३।।

## ॥ १४ ॥ चतुर्दशः सर्गः ॥

रणोत्सुकेनान्धकशत्रुसूनुना समं प्रयुक्तैस्त्रिदशैर्जिगीषुणा ।
महासुरं तारकसंज्ञकं द्विषं प्रसह्य हन्तुं समनह्यत द्रुतम् । १ ।

स दुर्निवारं मनसोऽतिवेगिनं
जयश्रियः संनयनं सुदुःसहम् ।
विजित्वरं नाम तदा महारथं
धनुर्धरः शक्तिधरोऽध्यरोहयत् ।। २ ।।

सुरालयश्रीविपदां निवारणं
सुरारिसंपत्परितापकारणम् ।
केनापि दध्रेऽस्य विरोधिदारणं
सुचारु चामीकरधर्मवारणम् ।। ३ ।।

शरच्चरच्चन्द्रमरीचिपाण्डुरैः स
वीज्यमानो वरचारुचामरैः ।
पुरःसरैः किंनरसिद्धचारणै
रणेच्छुरस्तूयत वाग्भिरुल्बणैः ।। ४ ।।

प्रयाणकालोचितचारुवेषभृद्वज्रं वहन्पर्वतपक्षदारणम् ।
ऐरावतं स्फाटिकशैलसोदरं ततोऽधिरुह्य द्युपतिस्तमन्वगात् ।५।

तमन्वगच्छद्गिरिशृङ्गसोदरं मदोद्धतं मेषमधिष्ठितः शिखी ।
विरोधिविद्वेषरुषाधिकं ज्वलन्महोमहीयस्तरमायुधं दधत् ।।६।।

अथेन्द्रनीलाचलचण्डविग्रहं विषाणविध्वस्तमहापयोधरम् ।
अधिष्ठितः कासरमुद्धरं मुदा वैवस्वतो दण्डधरस्तमन्वगात् ।७।

मदोद्धतं प्रेतमथाधिरूढवांस्तमन्धकद्वेषितनूजमन्वगात् ।
महासुरद्वेषविशेषभीषणः सुरोषणश्चण्डरणाय नैर्ऋतः ।।८।।

नवोद्यदम्भोधरदर्शने
युद्धाय रूढो मकरे महत्तरे ।

दुर्वारपाशो वरुणो रणोल्बण-
स्तमन्वियाय त्रिपुरान्तकात्मजम् ॥ ९ ॥
दिगम्बराधिक्रमणोल्बणं क्षणान्मृगं महीयांसमरुद्धविक्रमम् ।
अधिष्ठितः संगरकेलिलालसो मरुन्महेशात्मजमन्वगाद्द्रुतम् १०
विरोधिनां शोणितपारणैषिणीं
गदामनूनां नरवाहनो वहन् ।
महाहवाम्भोधिविगाहनोद्धतं
यियासुमन्वागमदीशनन्दनम् ॥ ११ ॥
महाहिनिर्बद्धजटाकलापिनो
ज्वलत्त्रिशूलप्रबलायुधा युधे ।
रुद्रास्तुषाराद्रिसखं महावृषं
ततोऽधिरूढास्तमयुः पिनाकिनः ॥१२॥
अन्येऽपि संनह्य महारणोत्सव-
श्रद्धालवः स्वर्गिगणास्तमन्वयुः ।
स्ववाहनानि प्रबलान्यधिष्ठिताः
प्रमोदविस्मेरमुखाम्बुजश्रियः ॥ १३ ॥
उद्दण्डहेमध्वजदण्डसंकुला-
श्चञ्चद्विचित्रातपवारणोज्ज्वलाः ।
चलद्घनस्यन्दनघोषभीषणाः
करीन्द्रघण्टारवचण्डचीत्कृताः ॥ १४ ॥
स्फुरद्विचित्रायुधकान्तिमण्डलै-
रुद्द्योतिताशावलयाम्बरान्तराः ।
दिवौकसां सोऽनुवहन्महाचमूः
पिनाकपाणेस्तनयस्ततो ययौ ॥ १५ ॥
कोलाहलेनोच्चलतां दिवौकसां
महाचमूनां गुरुभिर्ध्वजव्रजैः ।

घनैर्निरुच्छ्वासमभूदनन्तरं
दिङ्मण्डलं व्योमतलं महीतलम् ॥ १६ ॥
सुरारिलक्ष्मीपरिकम्पहेतवो
दिवचक्रवालप्रतिनादमेदुराः ।
नभोन्तकुक्षिभरयो घनाः
स्वना निहन्यमानैः पटहैर्वितेनिरे ॥ १७ ॥
प्रमथ्यमानाम्बुधिगर्जितर्जनैः
सुरारिनारीगणगर्भपातनैः ।
नभश्चमूधूलिकुलैरिवाकुलं
ररास गाढं पटहप्रतिस्वनैः ॥ १८ ॥
क्षुण्णं रथैर्वाजिभिराहतं खुरैः
करीन्द्रकर्णैः परितः प्रसारितम् ।
धूतं ध्वजैः काञ्चनशैलजं रजो
वातैर्हृतं व्योम समारुहत्क्रमात् ॥ १९ ॥
खातं खुरै रथ्यतुरंगपुंगवै-
रुपत्यकाहाटकमेदिनीरजः ।
गतं दिगन्तान्मुखरैः समीरणैः
सुविभ्रमं भूरि बभार भूयसा ॥ २० ॥
अधस्तथोर्ध्वं पुरतोऽथ पृष्ठतो-
ऽभितोऽपि चामीकररेणुरुच्चकैः ।
चमूषु सर्पन्मरुदाहतोऽहर-
न्नवीनसूर्यस्य च कान्तिवैभवम् ॥ २१ ॥
बलोद्धृतं काञ्चनभूमिजं रजो
बभौ दिगन्तेषु नभःस्थले स्थितम् ।
अकालसंध्याघनरागपिङ्गलं
घनं घनानामिव वृन्दमुद्यतम् ॥ २२ ॥

हेमावनीषु प्रतिबिम्बमात्मनो
मुहुर्विलोक्याभिमुखं महागजाः ।
रसातलोत्तीर्णगजभ्रमात्क्रुधा
दन्तप्रकाण्डप्रहृतानि तेनिरे ।। २३ ।।
सुजातसिन्दूरपरागपिञ्जरैः कलं चलद्भिः सुरसैन्यसिन्धुरैः ।
शुद्धासु चामीकरशैलभूमिषु नादृश्यत स्वं प्रतिबिम्बमग्रतः ।२४।
इति क्रमेणामरराजवाहिनी
महाहवाम्भोधिविलासलालसा ।
अवातरत्काञ्चनशैलतो द्रुतं
कोलाहलाक्रान्तविधूतकन्दरा ।। २५ ।।
महाचमूस्यन्दनचण्डचीत्कृतै-
विलोलघण्टेभपतेश्च बृंहितैः ।
सुरेन्द्रशैलेन्द्रमहागुहाशयाः
सिंहा महत्स्वप्नसुखं न तत्यजुः ।। २६ ।।
गम्भीरभेरिध्वनितैर्भयंकरै-
र्महागुहान्तप्रतिनादमेदुरैः ।
महारथानां गुरुनेमिनिःस्वनै
रनाकुलैस्तैर्मृगराजताजनि ।। २७ ।।
समुत्थितेन त्रिदिवौकसां महा-
चमूरवेणाद्रितटान्तदारिणा ।
प्रपेदिरे केसरिणोऽधिकं मदं
स्ववीर्यलक्ष्मीमृगराजतावशात् ।। २८ ।।
भिया सुरानीकविमर्दजन्मना
विदुद्रुवुर्दूरतरं द्रुतं मृगाः ।
गुहागृहान्ताद्बहिरेत्य हेलया
तस्थुर्विशङ्कं नितरां मृगाधिपाः ।। २९ ।।

विलोकिताः कौतुकिनामरावती-
जनेन जुष्टप्रमदेन दूरतः
सुराचलप्रान्तभुवः प्रपेदिरे
सुविस्तृतायाः प्रसरं सुसैनिकाः ॥ ३० ॥
पीतासितारक्तसितैः सुराचल-
प्रान्तस्थितैर्धातुरजोभिरम्बरम् ।
अयत्नगन्धर्वपुरोदयभ्रमं
बभार भूम्नोत्पतितैरितस्ततः ॥ ३१ ॥
महास्वनः सैन्यविमर्दसंभवः
कर्णान्तकूलंकषतामुपेयिवान् ।
पयोनिधेः क्षुब्धतरस्य वर्धनो
बभूव भूम्ना भुवनोदरंभरिः ॥ ३२
महागजानां गुरुबृंहितैस्ततैः
सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनै रथानां गुरुचण्डचीत्कृतै-
स्तिरोहितोऽभूत्पटहस्य निःस्वनः ॥ ३३ ॥
महासुराणामवरोधयोषितां
कचाक्षिपक्ष्मस्तनमण्डलेषु च ।
ध्वजेषु नागेषु रथेषु वाजिषु
क्षणेन तस्थौ सुरसैन्यजं रजः ॥ ३४ ॥
घनैर्विलोक्य स्थगितार्कमण्डलै-
श्चमूरजोभिर्निचितं नभःस्थलम् ।
अयायि हंसैरभि मानसं घन-
भ्रमेण सानन्दमनर्ति केकिभिः ॥ ३५ ॥
सान्द्रैः सुरानीकरजोभिरम्बरे
नवाम्बुदानीकनिभैरभिश्रिते ।

चकाशिरे स्वर्णमया महाध्वजा:
परिस्फुरन्तस्तडितां गणा इव ।। ३६ ।।
विलोक्य धूलीपटलैर्भृशं भृतं
द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्ध्वतोऽध: किमधस्त ऊर्ध्वतो
रजोऽभ्युपैतीति जनैरतर्क्यत ।। ३७ ।।
नोर्ध्वं न चाधो न पुरो न पृष्ठतो
न पार्श्वतोऽभूत्खलु चक्षुषोर्गति: ।
सूच्यग्रभेद्यै: पृतनारजश्चयै-
राच्छादिता प्राणिगणस्य सर्वत: ।। ३८ ।।
दिगन्तदन्त्यावलिदानहारिभि-
र्विमानरन्ध्रप्रतिनादमेदुरै: ।
अनेकवाद्यध्वनितैरनारतै-
र्जगर्ज गाढं गुरुभिर्नभस्तलम् ।। ३९ ।।
भुवं विगाह्य प्रययौ महाचमू:
क्वचिन्न मान्ती महतीं दिवं खलु ।
सुसंकुलायामपि तत्र निर्भरा-
ल्लिककांदिशीकत्वमवाप,नाकुला ।। ४० ।।
उद्दामदानद्विपवृन्दबृंहितै-
र्नितान्तमुत्तुङ्गतुरंगहेषितै: ।
चलद्धनस्यन्दननेमिनिस्वनै-
रभून्निरुच्छ्वासमिवाकुलं जगत् ।। ४१ ।।
महागजानां गुरुभिस्तु गर्जितै-
र्विलोलघण्टारणितै रणोल्बणै: ।
वीरप्रणादै: प्रमदप्रमेदुरै-
र्वाचालतामादधिरेतरां दिश: ।। ४२ ।।

दन्तीन्द्रदानद्रववारिवीचिभिः
सद्योऽपि नद्यो बहुधा पुपूरिरे ।
धारा रजोभिस्तुरगैः क्षतैर्भृता
याः पङ्कतामेत्य रथैः स्थलीकृताः ॥ ४३ ॥
निम्नाः प्रदेशाः स्थलतामुपागम-
न्निम्नत्वमुच्चैरपि सर्वतश्च ते ।
तुरंगमाणां व्रजतां खुरैः क्षता
रथैर्गजेन्द्रैः परितः समीकृताः ॥ ४४ ॥
नभोदिगन्तप्रतिघोषभीषणै-
र्महामहीभृत्तटदारणोल्बणैः ।
पयोधिनिर्धूननकेलिभिर्जग-
द्बभूव भेरीध्वनितैः समाकुलम् ॥ ४५ ॥
इतस्ततो वातविधूतचञ्चलै-
र्नीरन्ध्रिताशागमनैर्ध्वजांशुकैः ।
लक्षैः क्वणत्काञ्चनकिङ्किणीकुलै-
रमज्जि धूलीजलधौ नभोगते ॥ ४६ ॥
घण्टारवै रौद्रतरैर्निरन्तरं
विसृत्वरैर्गर्जरवैः सुभैरवैः ।
मत्तद्विपानां प्रथयांबभूविरे
न वाहिनीनां पटहस्य निःस्वनाः ॥ ४७ ॥
करालवाचालमुखाश्वमूस्वनै-
र्ध्वस्ताम्बरा वीक्ष्य दिशो रजस्वलाः ।
तिरोबभूवे गहनैर्दिनेश्वरो
रजोन्धकारैः परितः कुतोऽप्यसौ ॥ ४८ ॥
आक्रान्तपूर्वा रभसेन सैनिकै-
र्दिगङ्गना व्योम रजोभिर्दूषिता ।

भेरीरवाणां प्रतिशब्दितैर्घनै-
जगर्ज गाढं घनमत्सरादिव ॥ ४९ ॥

गुरुसमीरसमीरितभूधरा
इव गजा गगनं विजगाहिरे ।
गुरुतरा इव वारिधरां रथा
भुवमितीह विवर्त इवाभवत् ॥ ५० ॥

बलमदसुरलोकानल्पकल्पान्तकाले
निरवधय इवाम्भोराशयो घोरघोषाः ।
गुरुतरपरिमज्जद्भूभृतो देवसेना
ववृधुरपि सुपूर्णा व्योमभूम्यन्तराले ॥ ५१ ॥
( मालिनी )

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये
देवसेनाप्रयाणं नाम चतुर्दशः सर्गः ॥ १४ ॥

## ॥ १५ ॥ पञ्चदशः सर्गः ॥

सेनापतिं नन्दनमन्धकद्विषो
युधे पुरस्कृत्य बलस्य शात्रवः ।
सैन्यैरुपैतीति सुरद्विषां पुरो-
ऽभूत्किंवदन्ती हृदयप्रकम्पिनी ॥ १ ॥

चमूप्रभुं मन्मथमर्दनात्मजं
विजित्वरीभिर्विजयश्रियाश्रितम् ।
श्रुत्वा सुराणां पृतनाभिरागतं
चित्ते चिरं चुक्षुभिरे महासुराः ॥ २ ॥

समेत्य दैत्याधिपतेः पुरे स्थिताः
किरीटबद्धाञ्जलयः प्रणम्य ते ।
न्यवेदयन्मन्मथशत्रुसूनुना
युयुत्सुना जम्भजितं सहागतम् ॥ ३ ॥
दासीकृताशेषजगत्त्रयं न मां
जिगाय युद्धे कतिशः शचीपतिः ।
गिरीशपुत्रस्य बलेन सांप्रतं
ध्रुवं विजेतेति स काकुतोऽहसत् ॥ ४ ॥
ततः क्रुधा विस्फुरिताधराधरः
स तारको दर्पितदोर्बलोद्धतान् ।
युधे त्रिलोकीजयकेलिलालसः
सेनापतीन्संनहनार्थमादिशत् ॥ ५ ॥
महाचमूनामधिपाः समन्ततः
संनह्य सद्यः सुतरामुदायुधाः ।
तस्थुर्विनम्रक्षितिपालसंकुले
तदङ्गनद्वारवरप्रकोष्ठके ॥ ६ ॥
स द्वारपालेन पुरः प्रदर्शिता-
न्कृतानतीन्बाहुवरानधिष्ठितान् ।
महाहवाम्भोधिविधूननोद्धता-
न्ददर्श राजा पृतनाधिपान्बहून् ॥ ७ ॥
बली बलारातिबलातिशातनं
दिग्दन्तिनादद्रवनाशनस्वनम् ।
महीधराम्भोधिनवारितक्रमं
ययौ रथं घोरमथाधिरुह्य सः ॥ ८ ॥
युगक्षयक्षुब्धपयोधिनिःस्वना-
श्चलत्पताकाकुलवारितातपाः ।

धरारजोग्रस्तदिगन्तभास्कराः
पतिं प्रयान्तं पृतनास्तमन्वयुः ॥ ९ ॥
चमूरजः प्राप दिगन्तदन्तिनां
महासुरस्याभिमुखं प्रसर्पिणः ।
दन्तप्रकाण्डेषु सितेषु शुभ्रतां
कुम्भेषु दानाम्बुघनेषु पङ्कताम् ॥ १० ॥
महीभृतां कन्दरदारणोल्बणै-
स्तद्वाहिनीनां पटहस्वनैर्घनैः ।
उद्वेलिताश्चुक्षुभिरे महार्णवा
नभःस्रवन्ती सहसाभ्यवर्धत ॥ ११ ॥
सुरारिनाथस्य महाचमूस्वनै-
र्विगाह्यमाना तुमुलैः सुरापगा ।
अभ्युच्छ्रितैरूर्मिशतैश्च वारिजै-
रक्षालयन्नाकनिकेतनावलीम् ॥ १२ ॥
अथ प्रयाणाभिमुखस्य नाकिनां
द्विषः पुरस्तादशुभोपदेशिनी ।
अगाधदुःखाम्बुधिमध्यमज्जनं
बभूव चोत्पातपरम्परा तव ॥ १३ ॥
आगामिदैत्याशनकेलिकाङ्क्षिणी
कुपक्षिणां घोरतरा परम्परा ।
दधौ पदं व्योम्नि सुरारिवाहिनी-
रुपर्युपर्यत्यनिवारितातपा ॥ १४ ॥
मुहुर्विभग्नातपवारणध्वज-
श्चलद्धराधूलिकलाकुलेक्षणः
धूताश्वमातङ्गमहारथाकरा-
नवेक्षणोऽभूत्प्रसभं प्रभञ्जनः ॥ १५ ॥

सद्यो विभिन्नाञ्जनपुञ्जतेजसो
मुखैर्विषाग्नि विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा
भयंकराकारभृतो भृशं ययुः ॥ १६ ॥
मिलन्महाभीमभुजगभीषणं
प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽतिमत्सरा-
दिवान्तमासूचयितुं भयंकरः ॥ १७ ॥
त्विषामधीशस्य पुरोऽधिमण्डलं
शिवाः समेताः परुषं ववाशिरे ।
सुरारिराजस्य रणान्तशोणितं
प्रसह्य पातुं द्रुतमुत्सुका इव ॥ १८ ॥
दिवापि तारास्तरलास्तरस्विनीः
परापतन्तीः परितोऽथ वाहिनीः ।
विलोक्य लोको मनसा व्यचिन्तय-
त्प्राणव्ययान्तं व्यसनं सुरद्विषः ॥ १९ ॥
ज्वलद्भिरुच्चैरभितः प्रभाभरै-
रुद्भासिताशेषदिगन्तराम्बरम् ।
रवेण रौद्रेण हृदन्तदारणं
पपात वज्रं नभसो निरम्बुदात् ॥ २० ॥
ज्वलद्भिरङ्गारचयैर्नभस्तलं
ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्तो व्यसृजन्मुखै रजो
दधुर्दिशोरासभकण्ठधूसरम् ॥ २१ ॥
निर्घातघोषो गिरिशृङ्गशातनो
घनोऽम्बराशाकुहरोदरंभरिः ।

बभूव भूम्ना श्रुतिभित्तिभेदनः
प्रकोपिकालार्जितगर्जितर्जनः ॥ २२ ॥
स्खलन्महेभं प्रपतत्तुरङ्गमं
परस्पराश्लिष्टजनं समन्ततः ।
प्रक्षुभ्यदम्भोधिविभिन्नभूधरा-
द्बलं द्विषोऽभूदवनिप्रकम्पात् ॥ २३ ॥
ऊर्ध्वीकृतास्या रविदत्तदृष्टयः
समेत्य सर्वे सुरविद्विषः पुरः ।
श्वानः स्वरेण श्रवणान्तशातिना
मिथो रुदन्तः करुणेन निर्ययुः ॥ २४ ॥
अपीति पश्यन्परिणामदारुणां
महत्तमां गाढमरिष्टसंततिम् ।
दुर्दैवदष्टो न खलु न्यवर्तत
क्रुधा प्रयाणाध्यवसायतोऽसुरः ॥ २५ ॥
अरिष्टमाशङ्क्य विपाकदारुणं
निवार्यमाणोऽपि बुधैर्महासुरः ।
पुरः प्रतस्थे महतां वृथा भवे-
दसद्ग्रहान्धस्य हितोपदेशनम् ॥ २६ ॥
क्षितौ निरस्तं प्रतिकूलवायुना
तदीयचामीकरघर्मवारणम् ।
रराज मृत्योरिव पारणाविधौ
प्रकल्पितं हाटकभाजनं महत् ॥२७॥
विजानता भाविशिरोनिकृन्तनं
प्रज्ञेन शोकादिव तस्य मौलिना ।
मुहुर्गलद्भिस्तरलैरलंतरा-
मरोदि मुक्ताफलबाष्पबिन्दुभिः ॥ २८ ॥

निवार्यमाणैरभितोऽनुयायिभि-
गृहीतुकामैरिव तं मुहुर्मुहुः ।
अपाति गृध्रैरभि मौलिमाकुलै-
र्भविष्यदेतन्मरणोपदेशिभिः ॥ २९ ॥
सद्यो निकृत्ताञ्जनसोदरद्युति
फणामणिप्रज्वलदंशुमण्डलम् ।
निर्यद्विषोल्कानलगर्भफूत्कृतं
ध्वजे जनस्तस्य महाहिमैक्षत ॥ ३० ॥
रथाश्वकेशावलिकर्णचामरं
ददाह बाणासनबाणबाणधीन् ।
अकाण्डतश्चण्डतरो हुताशनस्त-
स्यातनुस्यन्दनधूर्यगोचरः ॥ ३१ ॥
इत्याद्यरिष्टैरशुभोपदेशिभि-
र्विहन्यमानोऽप्यसुरः पुनः पुनः ।
यदा मदान्धो न गतान्न्यवर्तता-
म्बरात्तदाभून्मरुतां सरस्वती ॥ ३२ ॥
मदान्ध मा गा भुजदण्डचण्डिमा-
वलेपतो मन्मथहन्तृसूनुना ।
सुरैः सनाथेन पुरंदरादिभिः
समं समन्तात्समरं विजित्वरैः ॥ ३३ ॥
गुहोऽसुरैः षड्दिनजातमात्रको
निदाघधामेव निशातमोभरैः ।
विषह्यते नाभिमुखो हि संगरे
कुतस्त्वया तस्य समं विरोधिता ॥ ३४ ॥
अभ्रंलिहैः शृङ्गशतैः समन्ततो
दिक्चक्रवालैः स्थगितस्य भूभृतः ।

क्रौञ्चस्य रन्ध्रं विशिखेन निर्ममे
येनाहवस्तस्य सह त्वया कुतः ॥ ३५ ॥
लब्ध्वा धनुर्वेदमनङ्गविद्विष-
स्त्रिःसप्तकृत्वः समरे महीभुजाम् ।
कृत्वाभिषेकं रुधिराम्बुभिर्घनैः
स्वक्रोधवह्निं शमयांबभूव यः ॥ ३६ ॥
न जामदग्न्यः क्षयकालरात्रिकृ-
त्स क्षत्रियाणां समराय वल्गति ।
येन त्रिलोकीसुभटेन तेन
कुतोऽवकाशः सह विग्रहग्रहे ॥ ३७ ॥
त्यजाशु गर्वं मदमूढ मा स्म
गाः स्मरारिसूनोर्वरशक्तिगोचरम् ।
तमेव नूनं शरणं व्रजाधुना
जगत्सुवीरं स चिराय जीव तत् ॥ ३८ ॥
श्रुत्वेति वाचं वियतो गरीयसीं
क्रोधादहंकारपरो महासुरः ।
प्रकम्पिताशेषजगत्त्रयोऽपि
सन्नकम्पतोच्चैर्दिवमभ्यधाच्च सः ॥ ३९ ॥
किं ब्रूथ रे व्योमचरा महासुराः
स्मरारिसूनुप्रतिपक्षवर्तिनः ।
मदीयबाणव्रणवेदना हि
साधुना कथं विस्मृतिगोचरीकृता ॥ ४० ॥
कटुस्वरैः प्रालपथाम्बरस्थिताः
शिशोर्बलात्षड्दिनजातकस्य किम् ।
श्वानः प्रमत्ता इव कार्तिके निशि
स्वैरं वनान्ते मृगधूर्तका इव ॥ ४१ ॥

सङ्गेन वो गर्भतपस्विनः शिशु-
वराक एषोऽन्तमवाप्स्यति ध्रुवम् ।
अतस्करस्तस्करसङ्गतो यथा
तद्वो निहन्मि प्रथमं ततोऽप्यमुम् ॥ ४२ ॥
इतीरयत्युग्रतरं महासुरे
महाकृपाणं कलयत्यलं क्रुधा ।
परस्परोत्पीडितजानवो भया-
न्नभश्चरा दूरतरं विदुद्रुवुः ॥ ४३ ॥
ततोऽवलेपाद्विकटं विहस्य स
व्यधत्त कोशादसिमुत्तमं बहिः ।
रथं द्रुतं प्रापय वासवान्तिकं
नन्वित्यवोचन्निजसारथिं रथी ॥ ४४ ॥
मनोतिवेगेन रथेन सारथि-
प्रणोदितेन प्रचलन्महासुरः ।
ततः प्रपेदे सुरसैन्यसागरं
भयंकराकारमपारमग्रतः ॥ ४५ ॥
पुरः सुराणां पृतनां प्रथीयसीं
विलोक्य वीरः पुलकं प्रमोदजम् ।
बभार भूम्नाथ स बाहुदण्डयोः
प्रचण्डयोः संगरकेलिकौतुकी ॥ ४६ ॥
ततो महेन्द्रस्य चराश्चमूचरा
रणान्तलीलारभसेन भूयसा ।
पुरः प्रचेलुर्मनसोऽतिवेगिनो
युयुत्सुभिः किं समरे विलम्ब्यते ॥४७॥
पुरःस्थितं देवरिपोश्चमूचरा
बलद्विषः सैन्यसमुद्रमभ्ययुः ।

भुजं समुत्क्षिप्य परेभ्य आत्मनो-
ऽभिधानमुच्चैरभितो न्यवेदयन् ॥४८॥
पुरोगतं दैत्यचमूमहार्णवं
दृष्ट्वा परं चुक्षुभिरे महासुराः ।
पुरारिसूनोर्नयनैककोणकं
ममुर्भटास्तस्य रणेऽवहेलया ॥४९॥
द्विपद्बलत्रासविभीषिताश्चमू-
र्दिवौकसामन्धकशत्रुनन्दनः ।
अपश्यदुद्दिश्य महारणोत्सवं
प्रसादपीयूषधरेण चक्षुषा ॥ ५० ॥
उत्साहिताः शक्तिधरस्य दर्शना-
न्मृधे महेन्द्रप्रमुखा मखाशनाः ।
अहं मृधे जेतुमरीनरीरम-
न्न कस्य वीर्याय वरस्य संगतिः ॥ ५१ ॥
परस्परं वज्रधरस्य सैनिका
द्विषोऽपि योद्धुं स्वकरोद्धृतायुधाः ।
वैतालिकश्राविततारविक्रमा-
भिधानमीयुर्विजयैषिणो रणे ॥ ५२ ॥
सङ्ग्रामं प्रलयाय संनिपततो वेलामतिक्रामतो
वृन्दारासुरसैन्यसागरयुगस्याशेषदिग्व्यापिनः ।
कालातिथ्यभुजो बभूव बहलः कोलाहलः भीषणः
शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिंभरः ॥५३॥
(शार्दूल०)

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये सुरा-
सुरसैन्यसंघट्टो नाम पञ्चदशः सर्गः ॥ १५ ॥

## ॥ १६ ॥ षोडशः सर्गः ॥

अथान्योन्यं विमुक्तास्त्रशस्त्रजालैर्भयंकरैः ।
युद्धमासीत्सुनासीर-सुरारिबलयोर्महत् ॥ १ ॥
पत्तिः पत्तिमभीयाय रणाय रथिनं रथी ।
तुरंगस्थं तुरंगस्थो दन्तिस्थं दन्तिनि स्थितः ॥ २ ॥
युद्धाय धावतां धीरं वीराणामितरेतरम् ।
वैतालिकाः कुलाधीशा नामान्यलमुदाहरन् ॥ ३ ॥
पठतां बन्दिवृन्दानां प्रवीरा विक्रमावलीम् ।
क्षणं विलम्ब्य चित्तानि ददुर्युद्धोत्सुकाः पुरः ॥ ४ ॥
सङ्ग्रामानन्दवर्धिष्णौ विग्रहे पुलकाञ्चिते ।
आसीत्कवचविच्छेदो वीराणां मिलतां मिथः ॥ ५ ॥
निर्दयं खड्गभिन्नेभ्यः कवचेभ्यः समुत्थितैः ।
आसन्व्योमदिशस्तूलैः पलितैरिव पाण्डुराः ॥ ६ ॥
खड्गा रुधिरसंलिप्ताश्चण्डांशुकरभासुराः ।
इतस्ततोऽपि वीराणां विद्युतां वैभवं दधुः ॥ ७ ॥
विसृजन्तो मुखैर्ज्वाला भीमा इव भुजंगमाः ।
विसृष्टाः सुभटै रुष्टैर्व्योम व्यानशिरे शराः ॥ ८ ॥
बाढं वपूंषि निर्भिद्य धन्विनां निघ्नतां मिथः ।
अशोणितमुखा भूमिं प्राविशन्दूरमाशुगाः ॥ ९ ॥
निर्भिद्य दन्तिनः पूर्वं पातयामासुराशुगाः ।
पेतुः प्रवरयोधानां प्रीतानामाहवोत्सवे ॥ १० ॥
ज्वलदग्निमुखैर्बाणैर्नीरन्ध्रैरितरेतरम् ।
उच्चैर्वैमानिका व्योम्नि कीर्णे दूरमपासरन् ॥ ११ ॥
विभिन्नं धन्विनां बाणैर्व्यथार्तमिव विह्वलम् ।
ररास विरसं व्योम श्येनप्रतिरवच्छलात् ॥ १२ ॥

चापैराकर्णमाकृष्टैर्विमुक्ता दूरमाशुगाः ।
अधावन्रुधिरास्वादलुब्धा इव रणैषिणाम् ॥ १३ ॥
गृहीताः पाणिभिर्वीरैर्वीकोशाः खड्गराजयः ।
कान्तिजालच्छलादाजौ व्यहसन्संमदादिव ॥ १४ ॥
खड्गा शोणितसंदिग्धा नृत्यन्तो वीरपाणिषु ।
रजोघने रणेऽनन्ते विद्युतां वैभवं दधुः ॥ १५ ॥
कुन्ताश्चकाशिरे चण्डमुल्लसन्तो रणार्थिनाम् ।
जिह्वाभोगा यमस्येव लेलिहाना रणाङ्गणे ॥ १६ ॥
प्रज्वलत्कान्तिचक्राणि चक्राणि वरचक्रिणाम् ।
चण्डांशुमण्डलश्रीणि रणव्योमनि बभ्रमुः ॥ १७ ॥
केचिद्वीरैः प्रणादैश्च वीराणामभ्युपेयुषाम् ।
निपेतुः क्षोभतो वाहादपरे मुमुहुर्मदात् ॥ १८ ॥
कश्चिदभ्यागते वीरे जिघांसौ मुदमादधौ ।
परावृत्य गते क्षुब्धे विषसादाहवप्रियः ॥ १९ ॥
बहुभिः सह युद्ध्वा वा परिभ्रम्य रणोल्बणाः ।
उद्दिश्य तानुपेयुः केऽपि ये पूर्ववृता रणे ॥ २० ॥
अभितोऽभ्यागतान्योद्धुं वीरान्रणमदोद्धतान् ।
प्रत्यनन्दन्भुजादण्डरोमोद्गमभृतो भटाः ॥ २१ ॥
शस्त्रभिन्नेभकुम्भेभ्यो मौक्तिकानि च्युतान्यधः ।
अध्याहवक्षेत्रमुप्तकीर्तिबीजाङ्कुरश्रियम् ॥ २२ ॥
वीराणां विषमैर्घोषैर्विद्रुता वारणा रणे ।
शास्यमाना अपि त्रासाद्भेजुर्धूताङ्कुशा दिशः ॥ २३ ॥
रणे बाणगणैर्भिन्ना भ्रमन्तो भिन्नयोधिनः ।
निममज्जुर्मिलद्रक्तनिम्नगासु महागजाः ॥ २४ ॥
अपारेऽसृजवसरित्पूरे रथेषूच्चैस्तरेष्वपि ।
रथिनोऽभिरिपुं क्रुद्धा हुंकृतैर्व्यसृजञ्शरान् ॥ २५ ॥

खड्गनिर्लूनमूर्धानो व्यापतन्तोऽपि वाजिनः ।
प्रथमं पातयामासुरसिना दारितानरीन् ॥ २६ ॥
वीराणां शस्त्रभिन्नानि शिरांसि निपतन्त्यपि ।
अधावन्दन्तदष्टोष्ठभीमान्यभिरिपुं क्रुधा ॥ २७ ॥
शिरांसि वरयोधानामर्धचन्द्रहृतान्यलम् ।
आददाना भृशं पादैः श्येना व्यानशिरे नभः ॥ २८ ॥
क्रोधादभ्यापतद्दन्तिदन्तारूढाः पदातयः ।
अश्वारोहा गजारोहप्राणान्प्रासैरपाहरन् ॥ २९ ॥
शस्त्रच्छिन्नगजारोहा विभ्रमन्त इतस्ततः ।
युगान्तवातचलिताः शैला इव गजा बभुः ॥ ३० ॥
मिलितेषु मिथो योद्धुं दन्तिषु प्रसभं भटाः ।
अगृह्णन्युध्यमानाश्च शस्त्रैः प्राणान्परस्परम् ॥ ३१ ॥
रुषा मिथो मिलद्दन्तिदन्तसंघर्षजोऽनलः ।
योधाञ्शस्त्रहृतप्राणानदहत्साहसारिभिः ॥ ३२ ॥
आक्षिप्ता अपि दन्तीन्द्रैः कोपनैः पत्तयः परम् ।
तदसूनहरन्खड्गघातैः स्वस्य पुरः प्रभोः ॥ ३३ ॥
उत्क्षिप्य करिभिर्दूरान्मुक्तानां योधिनां दिवि ।
प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्मही ॥ ३४ ॥
खड्गैर्धवलधारालैर्निहत्य करिणां करान् ।
तैर्भुवापि समं विद्धान्संतोषं न भटा ययुः ॥ ३५ ॥
आक्षिप्याभिदिवं नीताः पत्तयः करिभिः करैः ।
दिव्याङ्गनाभिरादातुं रक्ताभिद्रुतमीषिरे ॥ ३६ ॥
धन्विनस्तुरगारूढा गजारोहाञ्शरैः क्षतान् ।
प्रत्यैच्छन्मूर्च्छितान्भूयो योद्धुमाश्वसतश्चिरम् ॥३७॥
क्रुद्धस्य दन्तिनः पत्तिर्जिघृक्षोरसिना करम् ।
निर्भिद्य दन्तमुसलावारुरोह जिघृक्षया ॥ ३८ ॥

खड्गेन मूलतो हत्वा दन्तिनो रदनद्वयम् ।
प्रातिपक्ष्ये प्रविष्टोऽपि पदातिर्निरगाद्द्रुतम् ॥ ३९ ॥
करेण करिणा वीरः सुगृहीतोऽपि कोपिना ।
असिनासूञ्जहाराशु तस्यैव स्वयमक्षतः ॥ ४० ॥
तुरंगी तुरगारूढं प्रासेनाहृत्य वक्षसि ।
पततस्तस्य नाज्ञासीत्प्रासघातं स्वके हृदि ॥ ४१ ॥
द्विषा प्रासहृतप्राणो वाजिपृष्ठदृढासनः ।
हस्तोद्धृतमहाप्रासो भुवि जीवन्निवाभ्रमत् ॥ ४२ ॥
तुरंगसादिनं शस्त्रहृतप्राणं मतं भुवि ।
अबद्धोऽपि महावाजी न साश्रुनयनोऽत्यजत् ॥ ४३ ॥
भल्लेन शितधारेण भिन्नोऽपि रिपुणाश्वगः ।
नामूर्च्छत्कोपतो हन्तुमियेष प्रपतन्नपि ॥ ४४ ॥
मिथः प्रासाहतौ वाजिच्युतौ भूमिगतौ रुषा ।
शस्त्र्या युयुधतुः कौचित्केशाकेशि भुजाभुजि ॥ ४५ ॥
रथिनो रथिभिर्बाणैर्हृतप्राणा दृढासनाः ।
क्षतकार्मुकसंधानाः सप्राणा इव मेनिरे ॥ ४६ ॥
न रथी रथिनं भूयः प्राहरच्छस्त्रमूर्च्छितम् ।
प्रत्याश्वसन्तमन्विच्छन्नातिष्ठद्युधि लोभतः ॥ ४७ ॥
अन्योन्यं रथिनौ कौचिद्गतप्राणौ दिवं गतौ ।
एकामप्सरसं प्राप्य युयुधाते वरायुधौ ॥ ४८ ॥
मिथोऽर्धचन्द्रनिर्लूनमूर्धानौ रथिनौ रुषा ।
खेचरौ भुवि नृत्यन्तौ स्वकबन्धावपश्यताम् ॥ ४९ ॥

रणाङ्गणे शोणितपङ्कपिच्छिले
कथं कथंचिन्ननृतुर्धृतायुधाः ।
नदत्सु तूर्येषु परेतयोषितां
गणेषु गायत्सु कबन्धराजयः ॥ ५० ॥

इति सुररिपुर्वृत्ते युद्धे सुरासुरसैन्ययो
रुधिरसरितां मज्जद्दन्तिव्रजेषु तटेष्वलम् ।
अरुणनयनः क्रोधाद्भीमभ्रमद्भृकुटीमुखः
सपदि ककुभामीशानभ्यामगत्स युयुत्सया ॥५१॥
( हरिणी )

॥ इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये सुरा-
सुरसैन्यसङ्ग्रामवर्णनं नाम षोडशः सर्गः ॥१६॥

## ॥ १७ ॥ सप्तदशः सर्गः ॥

दृष्ट्वाभ्युपेतमथ दैत्यपतिं पुरस्ता-
त्सङ्ग्रामकेलिकुतुकेन घनप्रमोदम् ।
योद्धुं मदेन मिमिलुः ककुभामधीशा
बाणान्धकारितदिगम्बरगर्भमेत्य ॥ १ ॥
( वसन्ततिलका )

देवद्विषां परिवृढो विकटं विहस्य
बाणावलीभिरमरान्विकटान्ववर्ष ।
शैलानिव प्रवरवारिधरो गरिष्ठा-
नद्भिः पराभिरथ गाढमनारताभिः ॥ २ ॥

जम्भद्विषत्प्रभृतिदिक्पतिचापमुक्ता
बाणाः शिता दनुजनायकबाणसङ्घान् ।
अह्लाय तार्क्ष्यनिवहा इव नागपूगा-
न्सद्यो विचिच्छिदुरलं कणशो रणान्ते ॥ ३ ॥
तान्प्रज्वलत्फलमुखैर्विषमैः सुरारि-
नामाङ्कितैः पिहितगगनान्तरालैः ।

आच्छादितस्तृणचयानिव हव्यबाह-
श्चिच्छेद सोऽपि सुरसैन्यशराञ्शरौघैः ॥४॥
दैत्येश्वरो ज्वलितरोषविशेषभीमः
सद्यो मुमोच युधि यान्विशिखान्सहेलः ।
ते प्रापुरुद्भटभुजंगमभीमभावं
गाढं बबन्धुरपि तांस्त्रिदशेन्द्रमुख्यान् ॥ ५ ॥
ते नागपाशविशिखैरसुरेण बद्धाः
श्वासानिलाकुलमुखा विमुखा रणस्य ।
दिङ्नायका बलरिपुप्रमुखाः स्मरारि-
सूनोः समीपमगमन्विपदन्तहेतोः ॥ ६ ॥
दृष्टिप्रपातवशतोऽपि पुरारिसूनो-
स्ते नागपाशघनबन्धविपत्तिदुःखात् ।
इन्द्रादयो मुमुचिरे स्वयमस्य देवाः
सेवां व्यधुर्निकटमेत्य महाजिगीषोः ॥ ७ ॥
उद्दीप्तकोपदहनोऽथ सुरेन्द्रशत्रु-
रह्नाय सारथिमवोचत चण्डबाहुः ।
बद्धा मया सुरपतिप्रमुखाः प्रसह्य
बालस्य धूर्जटिसुतस्य निरीक्षणेन ॥ ८ ॥
मुक्ता बभूवुरधुना तदिमान्विहाय
कर्तास्म्यमुं समरभूमिपशूपहारम् ।
तत्स्यन्दनं सपदि वाहय शंभुसूनुं
द्रष्टास्मि दर्पितभुजाबलमाहवाय ॥ ९ ॥
तत्स्यन्दनः सपदि सारथिसंप्रणुन्नः
प्रक्षुब्धवारिधरघोरगभीरघोषः ।
चण्डश्चचाल दलिताखिलशत्रुसैन्य-
मांसास्थिशोणितविपङ्कविलुप्तचक्रः ॥ १० ॥

दृष्ट्वा रथं प्रलयवातचलद्गिरीन्द्र-
कल्पं दलद्बलनिरावविशेषरौद्रम् ।
अभ्यागतं सुररिपोः सुरराजसैन्यं
क्षोभं जगाम परमं भयवेपमानम् ॥ ११ ॥
प्रक्षुभ्यमाणमवलोक्य दिगीशसैन्यं
शंभोः सुतं कलहकेलिकुतूहलोत्कम् ।
उद्दामदोःकलितकार्मुकदण्डचण्डः
प्रोवाच वाचमुपगम्य स कार्तिकेयम् ॥ १२ ॥
रे शंभुतापसशिशो बत मुञ्च मुञ्च
दोर्दर्पमत्र विरम त्रिदिवेन्द्रकार्यात् ।
शस्त्रैः किमत्र भवतोऽनुचितैरतीव
बालत्वकोमलभुजातुलभारभूतैः ॥ १३ ॥
एवं त्वमेव तनयोऽसि गिरीशगौर्योः
किं यासि कालविषयं विषमैः शरैर्मे ।
सङ्ग्रामतोऽपसर जीव पितुर्जनन्या-
स्तूर्णं प्रविश्य वरमङ्कतलं विधेहि ॥ १४ ॥
सम्यक्स्वयं किल विमृश्य गिरीशपुत्र
जम्भद्विषोऽस्य जहिहि प्रतिपक्षमाशु ।
एष स्वयं पयसि मज्जति दुर्विगाह्ये
पाषाणनौरिव निमज्जयते पुरा त्वाम् ॥१५॥
इत्थं निशम्य वचनं युधि तारकस्य
कम्प्राधरो विकचकोकनदारुणास्यः ।
क्षोभात्त्रिलोचनसुतो धनुरीक्षमाणः
प्रोवाच वाचमुचितां परिमृश्य शक्तिम् ॥१६॥
दैत्याधिराज भवता यदवादि गर्वा-
त्तत्सर्वमप्युचितमेव तवैव किं तु ।

द्रष्टास्मि ते प्रवरबाहुबलं वरिष्ठं
शस्त्रं गृहाण कुरु कार्मुकमाततज्यम् ॥ १७ ॥
इत्युक्तवन्तमवदत्त्रिपुरारिपुत्रं
दैत्यः क्रुधौष्ठमधरं किल निर्विभिद्य ।
युद्धार्थमुद्भटभुजाबलदर्पितोऽसि
बाणान्सहस्व मम सादितशत्रुपृष्ठान् ॥ १८ ॥
दुःप्रेक्षणीयमरिभिर्धनुराततज्यं
सद्यो विधाय विषमान्विशिखान्व्यधत्त ।
स क्रोधभीमभुजगेन्द्रनिभं स्वचापं
चण्डं प्रपञ्चयति जैत्रशरैः कुमारे ॥ १९ ॥
कर्णान्तमेत्य दितिजेन विकृष्यमाणं
कोदण्डमेतदभितः सुषुवे शरौघान् ।
व्योमाङ्गणे लिपिकरान्किरणप्ररोहैः
सान्द्रैरशेषककुभां पलितंकरिष्णून् ॥ २० ॥
बाणैः सुरारिधनुषः प्रसृतैरनन्यै-
र्निर्घोषभीषितभटो लसदंशुजालैः ।
अन्धीकृताखिलसुरेश्वरसैन्य ईश-
सूनुः कुतोऽपि विषयं न जगाम दृष्टेः ॥ २१ ॥
देवेन मन्मथरिपोस्तनयेन गाढ-
माकर्णकृष्टमभितो धनुराततज्यम् ।
बाणानमूत निशितान्युधि यान्सुजैत्रा-
स्तैः सायका बिभिदिरे सहसा सुरारेः ॥ २२ ॥
रेजे सुरारिशरदुर्दिनके निरस्ते
सद्यस्तरां निखिलखेचरखेदहेतौ ।
देवः प्रभाप्रभुरिव स्मरशत्रुसूनुः
प्रद्योतनः सुघनदुर्धरधामधामा ॥ २३ ॥

तत्राथ दुःसहतरं समरे तरस्वी
धामाधिकं दधति धीरतरं कुमारे ।
मायामयं समरमाशु महासुरेन्द्रो
मायाप्रचारचतुरो रचयांचकार ॥ २४ ॥
अह्नाय कोपकलुषो विकटं विहस्य
व्यर्थां समर्थ्य वरशस्त्रयुधं कुमारे ।
जिष्णुर्जगद्विजयदुर्ललितः सहेलं
वायव्यमस्त्रमसुरो धनुषि न्यधत्त ॥ २५ ॥
संधानमात्रमपि यस्य युगान्तकाल-
भूतभ्रमं परुषभीषणघोरघोषः ।
उद्धूतधूलिपटलैः पिहिताम्बराशः
प्रच्छन्नचण्डकिरणो व्यसरत्समीरः ॥ २६ ॥
कुन्दोज्ज्वलानि सकलातपवारणानि
धूतानि तेन मरुता सुरसैनिकानाम् ।
उड्डीयमानकलहंसकुलोपमानि
मेघाभधूलिमलिने नभसि प्रसस्रुः ॥ २७ ॥
विध्वस्य तेन सुरसैन्यमहापताका
नीता नभस्थलमलं नवमल्लिकाभाः ।
स्वर्गापगाजलमहौघसहस्रलीलां
व्यातेनिरे दिवि सिताम्बरकैतवेन ॥ २८ ॥
धूतानि तेन सुरसैन्यमहागजानां
सद्यः शतानि विधुराणि दलत्कुथानि ।
पेतुः क्षितौ कुपितवासववज्रलून-
पक्षस्य भूधरकुलस्य तुलां वहन्ति ॥ २९ ॥
तास्ताः खरेण मरुता रथराजयोऽपि
दोधूयमाननिपतिष्णुतुरंगमाश्च ।

विस्रस्तसारथिकुलप्रवराः समन्ता-
दव्यावृत्य पेतुरवनौ सुरवाहिनीनाम् ॥ ३० ॥
हित्वायुधानि सुरसैन्यतुरंगवाहा
वातेन तेन विधुराः सुरसैन्यमध्ये ।
शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां
स्वीयेषु वाहनवरेषु पतत्सु सत्सु ॥ ३१ ॥
तेनाहतास्त्रिदशसैन्यपदातयोऽपि
स्रस्तायुधाः सुविधुराः परुषं रसन्तः ।
वात्याविवर्तदलवद्भ्रममेत्य दूरं
निःपेतुरम्बरतलाद्वसुधातलेऽस्मिन् ॥ ३२ ॥
इत्थं विलोक्य सुरसैन्यमथो अशेषं
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतु-
र्दिव्यं प्रभावमतनोदतनुः स देवः ॥ ३३ ॥
तेनोज्झितं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधि प्रवृत्तम् ।
दृष्ट्वासृजद्दहनदैवतमस्त्रमिद्ध-
मुद्दीप्तकोपदहनः सहसा सुरारिः ॥ ३४ ॥
वर्षातिकालजलदद्युतयो नभोन्ते
गाढान्धकारितदिशो घनधूमसंघाः ।
सद्यः प्रसस्रुरसितोत्पलदामभासो
दृग्गोचरत्वमखिलं न हि सन्नयन्तः ॥ ३५ ॥
दिक्चक्रवालगिलनैर्मलिनैस्तमोभि-
र्लिप्तं नभःस्थलमलं घनवृन्दसान्द्रैः ।
धूमैर्विलोक्य मुदिताः खलु राजहंसा
गन्तुं सरः सपदि मानसमीषुरुच्चैः ॥ ३६ ॥

जज्वाल वह्निरतुलः सुरसैनिकेषु
कल्पान्तकालदहनप्रतिमः समन्तात् ।
आशामुखानि विमलान्यखिलानि कीला-
जालैरलं कपिलयन्सकलं नभोऽपि ॥ ३७ ॥
उज्जागरस्य दहनस्य निरर्गलस्य
ज्वालावलीभिरतुलाभिरनारताभिः ।
कीर्णं पयोदनिवहैरिव धूमसंघै-
र्व्योमाभ्यलक्ष्यत कुलैस्तडितामिवोच्चैः ।३८।
गाढाद्भयाद्वियति विद्रुतखेचरेण
दीप्तेन तेन दहनेन सुदुःसहेन ।
दन्दह्यमानमखिलं सुरराजसैन्य-
मत्याकुलं शिवसुतस्य समीपमाप ॥ ३९ ॥
इत्यग्निना घनतरेण ततोऽभिभूतं
तद्देवसैन्यमखिलं विकलं विलोक्य ।
सस्मेरवक्त्रकमलोऽन्धकशत्रुसूनु-
र्बाणासनेन समधत्त स वारुणास्त्रम् ॥ ४० ॥
घोरान्धकारनिकरप्रतिमो युगान्त-
कालानलप्रबलधूमनिभो नभोन्ते ।
गर्जारवैर्विघटयन्नवनीधराणां
शृङ्गाणि मेघनिवहो घनमुज्जगाम ॥ ४१ ॥
विद्युल्लता वियति वारिदवृन्दमध्ये
गम्भीरभीषणरवैः कपिशीकृताशा ।
घोरा युगान्तचलितस्य भयंकराथ
कालस्य लोलरसनेव चमच्चकार ॥ ४२ ॥
कादम्बिनी विरुरुचे विषकण्ठिकाभि-
स्तालकालरजनीजलदावलीभिः ।

व्योम्न्युच्चकैरचिररुक्परिदीपितांशा
दंष्ट्रिच्छदा विषमघोषविभीषणा च ।। ४३ ।।
व्योम्नस्तलं पिदधतां ककुभां मुखानि
गर्जारवैरविरतैस्तुदतां मनांसि ।
अम्भोभृतामतितरामनणीयसीभि-
र्धारावलीभिरभितो ववृषे समूहैः ।। ४४ ।।
घोरान्धकारपटलैः पिहिताम्बराणां
गम्भीरगर्जनरवैर्व्यथितासुराणाम् ।
वृष्ट्या तया जलमुचां वरुणास्त्रजानां
विश्वोदरंभरिरपि प्रशशाम वह्निः ।। ४५ ।।
दैत्योऽपि रोषकलुषो निशितैः क्षुरप्रै-
राकर्णकृष्टधनुरुत्पतितैः स भीमैः ।
तद्भीतिविद्रुतसमस्तसुरेन्द्रसैन्यो
गाढं जघान मकरध्वजशत्रुसूनुम् ।। ४६ ।।
देवोऽपि दैत्यविशिखप्रकरं सचापं
बाणैश्चकर्त कणशो रणकेलिकारी ।
योगीव योगविधिशुष्कमना यमाद्यैः
सांसारिकं विषयसंघममोघवीर्यम् ।। ४७ ।।
भ्रूभङ्गभीषणमुखोऽसुरचक्रवर्ती
संदीप्तकोपदहनोऽथ रथं विहाय ।
क्रीडत्करालकरवालकरोऽसुरेन्द्र-
स्तं प्रत्यधावदभितस्त्रिपुरारिसूनुम् ।। ४८ ।।
अभ्यापतन्तमसुराधिपमीशपुत्रो दुर्वारबाहुविभवं सुरसैनिकैस्तम् ।
दृष्ट्वा युगान्तदहनप्रतिमां मुमोच शक्तिं प्रमोदविकसद्वदनारविन्दः ।।
उद्द्योतिताम्बरदिगन्तरमंशुजालैः
शक्तिः पपात हृदि तस्य महासुरस्य ।

हर्षाश्रुभिः सह समस्तदिगीश्वराणां
शोकोष्णबाष्पसलिलैः सह दानवानाम् ॥५०॥
शक्तया हृतासुमसुरेश्वरमापतन्तं
कल्पान्तवातहतभिन्नमिवाद्रिशृङ्गम् ।
दृष्ट्वा प्ररूढपुलकाञ्चितचारुदेहा
देवाः प्रमोदमगमंस्त्रिदशेन्द्रमुख्याः ॥५१॥
यत्रापतत्स दनुजाधिपतिः परासुः
संवर्तकालनिपतच्छिखरीन्द्रतुल्यः ।
तत्रादधात्फणिपतिर्धरणीं फणाभि-
स्तद्भूरिभारविधुराभिरधो व्रजन्तीम् ॥५२॥
स्वर्गापगासलिलसीकरिणीं समन्ता-
त्सौरभ्यलुब्धमधुपावलिसेव्यमाना ।
कल्पद्रुमप्रसववृष्टिरभून्नभस्तः
शंभोः सुतस्य शिरसि त्रिदशारिशत्रोः ॥५३॥

पुलकभरविभिन्नवारबाणा भुजविभवं बहु तारकस्य शत्रोः ।
सकलसुरगणा महेन्द्रमुख्याः प्रमदमुखच्छविसंपदोऽभ्यनन्दन् ।५४।
(पुष्पिताग्रा)

इति विषमशरारेः सूनुना जिष्णुनाजौ
त्रिभुवनवरशल्ये प्रोद्धृते दानवेन्द्रे ।
बलरिपुरथ नाकस्याधिपत्यं प्रपद्य
व्यजयत सुरचूडारत्नघृष्टाग्रपादः ॥ ५५ ॥
(मालिनी)

॥ इति श्रीकालीदासकृतौ कुमारसंभवे महाकाव्ये
तारकासुरवधो नाम सप्तदशः सर्गः ॥ १७ ॥

**॥ समाप्तमिदं कुमारसंभवकाव्यम् ॥ २ ॥**

॥ अर्हम् ॥

पूज्यमुनिगणपति श्री हर्षविजयेभ्यो नमः ।

**महाकवि श्री भारविप्रणीतं**

# किरातार्जुनीयम्

( वंशस्थवृत्तं )

## ॥ १ ॥ प्रथमः सर्गः ॥

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि
प्रियंप्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

क्रियासु युक्तैर्नृप ! चारचक्षुषो
व वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु
वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संश्रृणुते स किंप्रभुः ।

सदाऽनुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥
निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥
विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥
तथाऽपि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन्भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥
कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥
सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥
असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

निरत्ययं साम न दानवर्जितं
न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्त्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥
वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ॥ १३ ॥
विधाय रक्षान्परितः परेतरान-
शङ्किताकारमुपैति शङ्कितः ।
क्रियाऽपवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः ॥ १४ ॥
अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहिताय-
तीरुपेत्य संघर्षमिवार्थसम्पदः ॥ १५ ॥
अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१६॥
सुखेन लभ्या दधतः कृषीवलै-
रकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन्कुरवश्चकासति ॥ १७ ॥
उदारकीर्त्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥१९॥
महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निश्शेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥
न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥
स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥
प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥
कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद् व्यथते नतानन:
स दुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥
तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।

परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥ २५ ॥
इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥
निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥
भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथाऽपि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥ २८ ॥
अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयाऽऽत्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥
व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः ॥ ३० ॥
गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

भवन्तमेतर्हि मनस्विगर्हिते
विवर्त्तमानं नरदेव ! वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥
अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥
परिभ्रमँल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः ॥ ३४ ॥
विजित्य यः प्राज्यमयच्छदुत्तरा-
न्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाऽऽहरन्
करोति मन्युं न कथं धनञ्जयः ॥ ३५ ॥
वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥
इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥
पुराऽधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।

अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः ॥ ३८ ॥
पुरोपनीतं नृप ! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥
अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥
द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥
विहाय शान्तिं नृप ! धाम तत्पुनः
प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥
पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त ! हता मनस्विता ॥ ४३ ॥
अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सञ्जुहुधीह पावकम् ॥ ४४ ॥

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ॥ ४५ ॥

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ-
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतुभूयः ॥४६॥
(मालिनीवृत्तम्)

॥ इति महाकविश्रीभारविकृतौ महाकाव्ये
किरातार्जुनीये प्रथमः सर्गः ॥ १ ॥

## ॥ २ ॥ अथ द्वितीयः सर्गः ॥

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ १ ॥
यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २ ॥
विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥
परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥
इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥
चतसृष्वपि ते विवेकिनी नृप ! विद्यासु निरूढिमागता ।
कथमेत्य मतिविपर्ययं करिणी पङ्कमिवावसीदति ॥ ६ ॥

विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि त्वयि सम्भावितवृत्ति पौरुषम् ॥ ७ ॥
द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥ ८ ॥
अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥
अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥
क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥
प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥
अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्त्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ १३ ॥
विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥
तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥
अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ १६ ॥
द्विषतां विहितं त्वयाऽथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ ! तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥
मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥
अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम-मानिनः ।।२०।।
किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ।। २१ ।।
कुरु तन्मतिमेव विक्रमे नृप ! निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ।। २२ ।।
द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ।। २३ ।।
ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ।। २४ ।।
इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ।। २५ ।।
अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ।। २६ ।।
स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ।।२७।।
उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ।। २८ ।।
अवितृप्ततया तथाऽपि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ।। २९ ।।
सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।।३०।।
अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ।।३१।।
शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ।। ३२ ।।

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥
स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥
शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम् ।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥ ३५ ॥
अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताऽप्युदीयते ॥ ३६ ॥
बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः सकलाः हन्ति स शक्तिसम्पदः ॥३७॥
समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥३८
क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥
किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः ॥ ४० ॥
श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥
अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी ।
जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥
उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥४३॥
प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥
सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

अभियोग इमान्महीभुजो भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव ॥ ४६ ॥
उपजापसहान्विलङ्घयन् स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधः क्रियां किमुलोकाधिकधाम राजकम् ॥४७
असमापितकृत्यसम्पदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥
मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ ४६ ॥
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ ५० ॥
अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥५१॥
मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसम्पदः ॥ ५२ ॥
लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥
अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥
मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥
सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥
अथोच्चकैरासनतः पराध्यादुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥५७
अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात् प्रशम इव श्रुतमासनं नरेन्द्रः ॥५८

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्त्तेः ॥ ५९ ॥

॥ इति महाकविश्रीभारविकृतौ महाकाव्ये किरातार्जुनीये
द्वितीयः सर्गः ॥ २ ॥

## ॥ ३ ॥ अथ तृतीयः सर्गः ॥

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥१
प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥
अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥
धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥
अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥
अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः ।
आ संसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम् ॥६
श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्तिम् ।
संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥
श्च्योतन्मयूखेऽपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसितीव चेतः ॥८
निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥९

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥
चिचीषतां जन्मवतामलध्वं यशोऽवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥११
तथापि निघ्नं नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥१२
सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥१३
जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥१४
पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥१५॥
विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥१६
लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥१७

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥
यस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्या-
न्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥
सृजन्तमाजाविषुसंहतीर्वः
सहेत कोपज्वलितं गुरुं कः ।

परिस्फुरल्लोलशिखाऽग्रजिह्वं
जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥
निरीक्ष्य संरम्भनिरस्तधैर्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥
यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन ॥ २२ ॥
महत्त्वयोगाय महामहिम्ना-
माराधनीं तां नृप ! देवतानाम् ।
दातुं प्रदानोचित ! भूरिधाम्नी-
मुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥
इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वस-
न्निवान्ते विनयेन जिष्णुः ॥ २४ ॥
निर्याय विद्याऽथ दिनादिरम्या-
द्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥
योगं च तं योग्यतमाय तस्मै
तपःप्रभावाद्विततार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

आकारमाशंसितभूरिलाभं
दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं
तपःसमाधौ मुनिरित्युवाच ।। २७ ।।
अनेन योगेन विवृद्धतेजा
निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ।। २८ ।।
करिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं
तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ।। २९ ।।
इति ब्रुवाणेन महेन्द्रसूनुं
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षात्
प्रदेशमादेशमिवाधितष्ठौ ।। ३० ।।
कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव सम्प्रसादं
विश्वासयत्याशु सतां हि योगः ।। ३१ ।।
अथोष्णभासेव सुमेरुकुञ्जा-
न्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं तमः
शनैः पाण्डुसुतान्प्रपेदे - ।। ३२ ।।
असंशयालोचितकार्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।

तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥
धैर्येण विश्वास्यतया महर्षे-
स्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः,
स तेषु न स्थानमवाप शोकः ॥ ३४ ॥
तान्भूरिधाम्नश्चतुरोऽपि दूरं,
विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥
तुषारलेखाऽऽकुलितोत्पलाभे,
पर्यश्रुणी मङ्गलभङ्गभीरुः। ।
अगूढभावाऽपि विलोकने,
सा न लोचने मीलयितुं विषेहे ॥ ३६ ॥
अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ।३७।
धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥३८॥
मग्नां द्विषच्छद्मनि पङ्कभूते,
सम्भावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥
यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ।४०।
लोकं विधात्रा विहितस्य गोप्तुं,
क्षत्रस्य मुष्णन् वसु जैत्रमोजः ।

तेजस्विताया विजयैकवृत्ते,
निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥
व्रीडानतैराप्तजनोपनीतः,
संशय्य कृच्छ्रेण नृपः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां
यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥
वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ॥ ४३ ॥
प्रसह्य योऽस्मासु परैः प्रयुक्तः,
स्मर्तुं न शक्यः किमुताधिकर्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः,
स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥
प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥४५॥
सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥४६॥
दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम् ४७
स क्षत्रियस्त्राणसहः सतां य-
स्तत्कार्मुकं कर्मसु यस्य शक्तिः ।
वहन् द्वयीं यद्यफलेऽर्थजाते,
करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥
वीतौजसः सन्निधिमात्रशेषा,
भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः,
सरूपतां पार्थ ! गुणा भजन्ते ॥ ४९ ॥

आक्षिप्यमाणं रिपुभिः प्रमादा-
नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाऽधिरूढा,
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥
करोति योऽशेषजनातिरिक्तां,
*सम्भावनामर्थवतीं क्रियाभिः ।*
संसत्सु जाते पुरुषाधिकारे,
न पूरणी तं समुपैति संख्या ॥ ५१ ॥
प्रियेषु यैः पार्थ ! विनोपपत्ते-
र्विचिन्त्यमानैः क्लममेति चेतः ।
तव प्रयातस्य जयाय तेषां,
क्रियादधानां मघवा विघातम् ॥ ५२ ॥
मा गाश्चिरायैकचरः प्रमादं,
वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि,
स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥
तदाशु कुर्वन्वचनं महर्षे-
र्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वाऽस्मि कृतार्थमेष
स्तनोपपीडं परिरब्धुकामा ॥ ५४ ॥
उदीरितां तामिति याज्ञसेन्या
नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥
अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसाऽऽरोपितहेतिसंहतिः ।

बभार रम्योऽपि वपुः स भीषणं गतः
क्रियां मन्त्र इवाभिचारिकीम् ॥ ५६ ॥
अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृग्गोचरं शित-
निस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥
यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वहज्ज्वलितज्योतिरिवान्तरं दिवः ॥५८॥
अलकाऽधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥
अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

॥ इति महाकविश्रीभारविकृतौ महाकाव्ये किरातार्जुनीये तृतीयः सर्गः ॥ ३ ॥

## ॥ ४ ॥ चतुर्थः सर्गः ॥

ततः स कूजत्कलहंसमेखलां
सपाकसस्याहितपाण्डुतागुणाम् ।
उपाससादोपजनं जनप्रियः
प्रियामिवासादितयौवनां भुवम् ॥ १ ॥
विनम्रशालिप्रसवौघशालि-
नीरपेतपङ्काः ससरोरुहाम्भसः ।
ननन्द पश्यन्नुपसीम स स्थली-
रुपायनीभूतशरद्गुणश्रियः ॥ २ ॥

निरीक्ष्यमाणा इव विस्मयाकुलैः
पयोभिरुन्मीलितपद्मलोचनैः ।
हृतप्रियादृष्टिविलासविभ्रमा
मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ ३ ॥
तुतोष पश्यन्कलमस्य सोऽधिक
सवारिजे वारिणि रामणीयकम् ।
सुदुर्लभे नार्हति कोऽभिनन्दितुं
प्रकषलक्ष्मीमनुरूपसंगमे ॥ ४ ॥
नुनोद तस्य स्थलपद्मिनीगतं
वितर्कमाविष्कृतफेनसंततिः ।
अवाप्तकिञ्जल्कविभेदमुच्चकै-
र्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥
कृतोर्मिरेखं शिथिलत्वमायता
शनैः शनैः शान्तरयेण वारिणा ।
निरीक्ष्य रेमे स समुद्रयोषितां
तरङ्गितक्षौमविपाण्डुसैकतम् ॥ ६ ॥
मनोरमं प्रापितमन्तरं भ्रुवो-
रलंकृतं केसररेणुनाणुना ।
अलक्तताम्राधरपल्लवश्रिया
समानयन्तीमिव बन्धुजीवकम् ॥ ७ ॥
नवातपालोहितमाहितं मुहु-
र्महानिवेशौ परितः पयोधरौ ।
चकासयन्तीमरविन्दजं रजः
परिश्रमाम्भ पुलकेन सर्पता ॥ ८ ॥
कपोलसंश्लेषि विलोचनत्विषा
विभूषयन्तीमवतंसकोत्पलम् ।

सुतेन पाण्डोः कलमस्य गोपिकां
　　निरीक्ष्य मेने शरदः कृतार्थता ॥ ६ ॥
उपारताः पश्चिमरात्रिगोचराद-
　　पारयन्तः पतितुं जवेन गाम् ।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं
　　गवां गणाः प्रस्नुतपीवरौधसः ॥ १० ॥
परीतमुक्षावजये जयश्रिया
　　नदन्तमुच्चैः क्षतसिन्धुरोधसम् ।
ददर्श पुष्टिं दधतं स शारदीं
　　सविग्रहं दर्पमिवाधिपं गवाम् ॥ ११ ॥
विमुच्यमानैरपि तस्य मन्थरं
　　गवां हिमानीविशदैःकदम्बकैः ।
शरन्नदीनां पुलिनैः कुतूहलं
　　गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥
गतान्पशूनां सहजन्मबन्धुतां
　　गृहाश्रयं प्रेम वनेषु बिभ्रतः ।
ददर्श गोपानुपधेनु पाण्डवः
　　कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥
परिभ्रमन्मूर्धजषट्पदाकुलैः
　　स्मितोदयादर्शितदन्तकेसरैः ।
मुखैश्चलत्कुण्डलरश्मिरञ्जितै-
　　र्नवातपामृष्टसरोजचारुभिः ॥१४॥
निबद्धनिःश्वासविकम्पिताधरा
　　लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैरपवर्तितत्रिका
　　विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥

व्रजाजिरेष्वम्बुदनादशङ्किनीः
शिखण्डिनामुन्मदयत्सु योषितः ।
मुहुः प्रणुन्नेषु मथां विवर्तनै-
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥
स मन्थरावल्गितपीवरस्तनीः
परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम बल्लवी-
रभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥
पपात पूर्वां जहतो विजिह्मतां
वृषोपभुक्तान्तिकसस्यसम्पदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान्-
प्रसक्तसंपातपृथक्कृतान्पथः ॥ १८ ॥
जनैरुपग्राममनिन्द्यकर्मभि-
र्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः
सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥
ततः स संप्रेक्ष्य शरद्गुणश्रियं
शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमचोदितोऽपि गां
न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥
इयं शिवाया नियतेरिवायतिः
कृतार्थयन्ती जगतः फलैः क्रियाः ।
जयश्रियं पार्थ ! पृथूकरोतु ते
शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ २१ ॥
उपैति सस्यं परिणामरम्यता
नदीरनौद्धत्यमपङ्कतां महीम् ।

नवैर्गुणैः संप्रतिः संस्तवस्थिरं
तिरोहितं प्रेम घनागमश्रियः ॥ २२ ॥
पतन्ति नास्मिन्विशदाः पतत्रिणो
धृतेन्द्रचापा न पयोदपङ्क्तयः ।
तथापि पुष्णाति नभः श्रियं परां
न रम्यमाहार्यमपेक्षते गुणम् ॥ २३ ॥
विपाण्डुभिर्म्लानतया पयोधरै-
श्च्युताचिराभागुणहेमदामभिः ।
इयं कदम्बानिलभर्तुरत्यये
न दिग्वधूनां कृशता न राजते ॥ २४ ॥
विहाय वाञ्छामुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽविकृता न संस्तवः ॥ २५ ॥
अमी पृथुस्तम्बभृतः पिशङ्गतां
गता विपाकेन फलस्य शालयः ।
विकासि वप्राम्भसि गन्धसूचितं
नमन्ति निघ्रातुमिवासितोत्पलम् ॥ २६ ॥
मृणालिनीनामनुरञ्जितं त्विषा
विभिन्नमम्भोजपलाशशोभया ।
पयः स्फुरच्छालिशिखापिशङ्गितं
द्रुतं धनुष्खण्डमिवाहिविद्विषः ॥ २७ ॥
विपाण्डु संव्यानमिवानिलोद्धतं
निरुन्धतीः सप्तपलाशजं रजः ।
अनाविलोन्मीलितबाणचक्षुषः
सपुष्पहासा वनराजियोषितः ॥ २८ ॥

अदीपितं वैद्युतजातवेदसा
सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिसीकरैः
शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥
सितच्छदानामपदिश्य धावतां-
रुतैरमीषां ग्रथिताः पतत्रिणाम् ।
प्रकुर्वते वारिदरोधनिर्गताः
परस्परालापमिवामला दिशः ॥ ३० ॥
विहारभूमेरभिघोषमुत्सुकाः
शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयःक्षरन्त्यमू-
रुपायनानीव नयन्ति धेनवः ॥ ३१ ॥
जगत्प्रसूतिर्जगदेकपावनी
व्रजोपकण्ठं तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसा-
वुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥
कृतावधानं जितबर्हिणध्वनौ
सुरक्तगोपीजननीतनिःस्वने ।
इदं जिघत्सामपहाय भूयसीं
न सस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥
असावनास्थापरयावधीरितः
सरोरुहिण्या शिरसा नमन्नपि ।
उपैति शुष्यन्कलमः सहाम्भसा
मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३४ ॥
अमी समुद्धूतसरोजरेणुना
हृता हृतासारकणेन वायुना ।

उपागमे दुश्चरिता इवापदां
गतिं न निश्चेतुमलं शिलीमुखाः ॥ ३५ ॥
मुखैरसौ विद्रुमभङ्गलोहितैः
शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला
धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ ३६ ॥
इति कथयति तत्र नातिदूरा-
दथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासां
निचय इवाम्बुमुचां नगाधिराजः ॥ ३७ ॥
तमतनुवनराजिश्यामितोपत्यकान्तं
नगमुपरिहिमानीगौरमासाद्य जिष्णुः ।
व्यपगतमदरागस्यानुसस्मार लक्ष्मी-
मसितमजरवासो बिभ्रतः सीरपाणेः ॥३८॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
चतुर्थः सर्गः ॥ ४ ॥

## ॥ ५ ॥ पञ्चमः सर्गः ॥

( द्रुतविलम्बितवृत्तम् )

अथ जयाय नु मेरुमहीभृतो
रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुच्छ्रितं
समुदितं न विलङ्घयितुं नभः ॥ १ ॥
तपनमण्डलदीपितमेकतः
सततनैशतमोवृतमन्यतः ।

हसितभिन्नतमिस्रचयं पुरः
शिवमिवानुगतं गजचर्मणा ॥ २ ॥
क्षितिनभःसुरलोकनिवासिभिः
कृतनिकेतमदृष्टपरस्परैः ।
प्रथयितुं विभुतामभिनिर्मितं
प्रतिनिधिं जगतामिव शम्भुना ॥ ३ ॥
भुजगराजसितेन नभःश्रिता
कनकराजिविराजितसानुना ।
समुदितं निचयेन तडित्वतीं
लघयता शरदम्बुदसंहतिम् ॥ ४ ॥
मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः ।
दधतमुच्चशिलान्तरगोपुराः
पुर इवोदितपुष्पवना भुवः ॥ ५ ॥
अविरतोज्झितवारिविपाण्डुभि-
र्विरहितैरचिरद्युतितेजसा ।
उदितपक्षमिवारतनिःस्वनैः
पृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥
दधतमाकरिभिः करिभिः क्षतैः
समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताम्भसः
स्फुटसरोजवना जवना नदीः ॥ ७ ॥
नवविनिद्रजपाकुसुमत्विषां
द्युतिमतां निकरेण महाश्मनाम् ।
विहितसान्ध्यमयूखमिव क्वचि-
न्निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

पृथुकदम्बकदम्बकराजितं
ग्रथितमालतमालवनाकुलम् ।
लघुतुषारतुषारजलश्च्युतं
धृतसदानसदाननदन्तिनम् ॥ ९ ॥
रहितरत्नचयान्न शिलोच्चया-
नपलताभवना न दरीभुवः ।
विपुलिनाम्बुरुहा न सरिद्वधू-
रकुसुमान्दधतं न महीरुहः ॥ १० ॥
व्यथितसिन्धुमनीरशनैः शनै-
रमरलोकवधूजघनैर्घनैः ।
फणभृतामभितो विततं ततं
दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥
ससुरचापमनेकमणिप्रभै-
रपपयोविशदं हिमपाण्डुभिः ।
अविचलं शिखरैरुपबिभ्रतं
ध्वनितसूचितमम्बुमुचां चयम् ॥ १२ ॥
विकचवारिरुहं दधतं सरः
सकलहंसगणं शुचि मानसम् ।
शिवमगारमजया च कृतेर्ष्यया
सकलहं सगणं शुचिमानसम् ॥ १३ ॥
ग्रहविमानगणानभितो दिवं
ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं
त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥
विततशीकरराशिभिरुच्छ्रितै-
रुपलरोधविवर्तिभिरम्बुभिः ।

दधतमुन्नतसानुसमुद्धतां
धृतसितव्यजनामिव जाह्नवीम् ॥ १५ ॥
अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः ।
स जगदे वचनं प्रियमादरा-
मुखरताऽवसरे हि विराजते ॥ १६ ॥
अलमेष विलोकितः प्रजानां
सहसा संहतिमंहसां विहन्तुम् ।
घनवर्त्म सहस्रधेव कुर्वन्हिम-
गौरैरचलाधिपः शिरोभिः ॥ १७ ॥
इह दुरधिगमैः किञ्चिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिनं
पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥
रुचिरपल्लवपुष्पलतागृहै-
रुपलसज्जलजैर्जलराशिभिः ।
नयति सन्ततमुत्सुकतामयं
धृतिमतीरुपकान्तमपि स्त्रियः ॥ १९ ॥
सुलभैः सदा नयवतायवता
निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृतातिभृता
समतीत्य भाति जगती जगती ॥ ३३ ॥
अखिलमिदममुष्य गौरीगुरो-
स्त्रिभुवनमपि नैति मन्ये धभिन्नः ।
अधिवसति सदा यदेनं जनै-
रविदितविभवो भ[illegible]स्त्रसंख्याम् ॥३४॥

वीतजन्मजरसं परं शुचि
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥ २२ ॥

दिव्यस्त्रीणां सचरणलाक्षारागा
रागायाते निपतितपुष्पापीडाः ।
पीडाभाजः कुसुमचिताः साशंसं
शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥ २३ ॥

गुणसम्पदा समधिगम्य परं
महिमानमत्र महिते जगताम् ।
नयशालिनि श्रिय इवाधिपतौ
विरमन्ति न ज्वलितुमौषधयः ॥ २४ ॥

कुररीगणः कृतरवस्तरवः
कुसुमानताः सकमलं कमलम् ।
इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥ २५ ॥

सादृश्यं गतमपनिद्रचूतगन्धै-
रामोदं मदजलसेकजं दधानः ।
एतस्मिन्मदयति कोकिलानकाले
लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

सनाकवनितं नितम्बरुचिरं
चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरा-
परास्तवसुधा सुधाधिवसति ॥ २७ ॥

श्रीमल्लताभवनमोषधयः प्रदीपाः
शय्या नवानि हरिचन्दनपल्लवानि ।

अस्मिन्रतिश्रमनुदश्चसरोजवाताः
स्मर्तुं दिशन्ति न दिवःसुरसुन्दरीभ्यः ॥२८॥
ईशार्थमम्भसि चिराय तपश्चरन्त्या
यादोविलङ्घनविलोलविलोचनायाः ।
आलम्बताग्रकरमत्र भवो भवान्याः
श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥२९॥
येनापविद्धसलिलः स्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ।३०।
नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥३१॥
दधत इव विलासशालि नृत्यं
मृदु पतता पवनेन कम्पितानि ।
इह ललितविलासिनीजनभ्रू-
गतिकुटिलेषु पयःसु पङ्कजानि ॥ ३२ ॥
अस्मिन्नगृह्यत पिनाकभृता सलील-
माबद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥

क्रामद्भिर्घनपदवीमनेकसंख्यै-
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उस्राणां व्यभिचरतीव सप्तसप्तेः
पर्यस्यन्निह निचयः सहस्रसंख्याम् ॥३४॥

व्यधत्त यस्मिन्पुरमुच्चगोपुरं
पुरां विजेतुर्धृतये धनाधिपः ।
स एव कैलास उपान्तसर्पिणः
करोत्यकालास्तमयं विवस्वतः ॥ ३५ ॥
नानारत्नज्योतिषां सन्निपातै-
श्छन्नेष्वन्तःसानु वप्रान्तरेषु ।
बद्धांबद्धां भित्तिशङ्कामुष्मि-
न्नावानावान्मातरिश्वा निहन्ति ॥ ३६ ॥
रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि ।
अस्मिन्विचित्रकुसुमस्तबकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥ ३७ ॥
परिसरविषयेषु लीढमुक्ता
हरिततृणोद्गमशङ्कया मृगीभिः ।
इह नवशुककोमला मणीनां
रविकरसंवलिताः फलन्ति भासः ॥ ३८ ॥
उत्फुल्लस्थलनलिनीवनादमुष्मा-
दुद्भूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥
इह सनियमयोः सुरापगाया-
मुषसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्तनेषु ॥ ४० ॥
समूर्च्छतां रजतभित्तिमयूखजालै-
रालोलपादपलतान्तरनिर्गतानाम् ।

घर्मद्युतेरिह मुहुः पटलानि धाम्ना-
मादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥
शुक्लैर्मयूखनिचयैः परिवीतमूर्ति-
र्वप्राभिघातपरिमण्डलितोरुदेहः ।
शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा
कुर्वन्वधूजनमनःसु शशाङ्कशङ्काम् ॥ ४२ ॥
सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥४३॥
स्नपितनवलतातरुप्रवालै-
रमृतलवस्रुतिशालिभिर्मयूखैः ।
सततमसितयामिनीषु शम्भो-
रमलयतीह वनान्तमिन्दुलेखा ॥ ४४ ॥
क्षिपति योऽनुवनं विततां बृह-
द्बृहतिकामिव रौचनिकीं रुचम् ।
अयमनेकहिरण्मयकन्दरस्तव
पितुर्दयितो जगतीधरः ॥ ४५ ॥
सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः ।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति ॥ ४६ ॥
कषणकम्पनिरस्तमहाहिभिः
क्षणविमत्तमतङ्गजवर्जितैः ।
इह मदस्नपितैरनुमीयते
सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥

जलदजालघनैरसिताश्मना-
मुपहतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा
तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥

भव्यो भवन्नपि मुनेरिह शासनेन
क्षात्रे स्थितः पथि तपस्य हतप्रमादः ।
प्रायेण सत्यपि हितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ ४९ ॥

मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम् ।
रक्षन्तस्तपसि बलं च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥ ५० ॥

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
संधत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्कभाजा फलेन ।
अकृशमकृशलक्ष्मीश्चेतसाशंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
पञ्चमः सर्गः ॥ ५ ॥

## ॥ ६ ॥ षष्ठः सर्गः ॥

रुचिराकृतिः कनकसानुमथो
　　परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः
　　स तमारुरोह पुरुहूतसुतः ॥ १ ॥
तमनिन्द्यबन्दिन इवेन्द्रसुतं
　　विहितालिनिक्वणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा
　　जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥
अवधूतपङ्कजपरागकणा-
　　स्तनुजाह्नवीसलिलवीचिभिदः ।
परिरेभिरेऽभिमुखमेत्य सुखाः
　　सुहृदः सखायमिव तं मरुतः ॥ ३ ॥
उदितोपलस्खलनसंवलिताः
　　स्फुटहंससारसविरावयुजः ।
मुदमस्य माङ्गलिकतूर्यकृतां
　　ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

अवरुग्णतुङ्गसुरदारुतरौ
　　निचये पुरः सुरसरित्पयसाम् ।
स ददर्श वेतसवनाचरितां
　　प्रणतिं बलीयसि समृद्धिकरीम् ॥ ५ ॥

प्रबभूव नालमवलोकयितुं
　　परितः सरोजरजसारुणितम् ।
सरिदुत्तरीयमिव संहतिमत्स
　　तरङ्गरङ्गि कलहंसकुलम् ॥ ६ ॥

दधति क्षतीः परिणतद्विरदे
मुदितालियोषिति मदस्रुतिभिः ।
अधिकां स रोधसि बबन्ध धृतिं
महते रुजन्नपि गुणाय महान् ॥ ७ ॥
अनुहेमवप्रमरुणैः समतां
गतमूर्मिभिः सहचरं पृथुभिः ।
स रथाङ्गनामवनितां करुणै-
रनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥
सितवाजिने निजगदू रुचय-
श्चलवीचिरागरचनापटवः ।
मणिजालमम्भसिनिमग्नमपि-
स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥
उपलाहतोद्धततरङ्गधृतं
जविना विधूतविततं मरुता ।
स ददर्श केतकशिखाविशदं
सरितः प्रहासमिव फेनमपाम् ॥ १० ॥
बहु बर्हिचन्द्रकनिभं विदधे
धृतिमस्य दानपयसां पटलम् ।
अवगाढमीक्षितुमिवेभपतिं
विकसद्विलोचनशतं सरितः ॥ ११ ॥
प्रतिबोधजृम्भणविभिन्नमुखी
पुलिने सरोरुहदृशा ददृशे ।
पतदच्छमौक्तिकमणिप्रकरा
गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ १२ ॥
शुचिरप्सु विद्रुमलताविटप-
स्तनुसान्द्रफेनलवसंवलितः ।

स्मरदायिनः स्मरयति स्म
　　भृशं दयिताधरस्य दशनांशुभृतः ॥ १३ ॥
उपलभ्य चञ्चलतरङ्गधृतं
　　मदगन्धमुत्थितवतां पयसः ।
प्रतिदन्तिनामिव स सम्बुबुधे
　　करियादसामभिमुखान्करिणः ॥ १४ ॥
स जगाम विस्मयमुदीक्ष्य पुरः
　　सहसा समुत्पिपतिषोः फणिनः ।
प्रहितं दिवि प्रजविभिः श्वसितैः
　　शरदभ्रविभ्रममपां पटलम् ॥ १५ ॥
स ततार सैकतवतीरभितः
　　शफरीपरिस्फुरितचारुदृशः ।
ललिताः सखीरिव बृहज्जघनाः
　　सुरनिम्नगामुपयतीः सरितः ॥ १६ ॥
अधिरुह्य पुष्पभरनम्रशिखैः
　　परितः परिष्कृततलां तरुभिः ।
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः
　　शुचिमाससाद स वनान्तभुवम् ॥ १७ ॥
अनुसानु पुष्पितलताविततिः
　　फलितोरुभूरुहविविक्तवनः ।
धृतिमाततान तनयस्य हरे-
　　स्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥
प्रणिधाय तत्र विधिनाथ धियं
　　दधतः पुरातनमुनेर्मुनिताम् ।
श्रममादधावसुकरं न तपः
　　किमिवावसादकरमात्मवताम् ॥ १९ ॥

शमयन्धृतेन्द्रियशमैकसुखः
शुचिभिर्गुणैरघमयं स तमः
प्रतिवासरं सुकृतिभिर्ववृधे
विमलः कलाभिरिव शीतरुचिः ॥ २० ॥
अधरीचकार च विवेकगुणाद-
गुणेषु तस्य धियमस्तवतः ।
प्रतिघातिनीं विषयसङ्गरतिं
निरुपप्लवः शमसुखानुभवः ॥ २१ ॥
मनसा जपैः प्रणतिभिः प्रयतः
समुपेयिवानधिपतिं स दिवः ।
सहजेतरौ जयशमौ दधती
बिभराम्बभूव युगपन्महसी ॥ २२ ॥
शिरसा हरिन्मणिनिभः स वह-
न्कृतजन्मनोऽभिषवणेन जटाः ।
उपमां ययावरुणदीधितिभिः
परिमृष्टमूर्धनि तमालतरौ ॥ २३ ॥
धृतहेतिरप्यधृतजिह्ममति-
श्चरितैर्मुनीनधरयञ्शुचिभिः ।
रचयाञ्चकार विरजाः स मृगांक-
मिवेशले रमयितुं न गुणाः ॥ २४ ॥
अनुकूलपातिनमचण्डगतिं
किरता सुगन्धिमभितः पवनम् ।
अवधीरितार्तवगुणं सुखतां
नयता रुचां निचयमंशुमतः ॥ २५ ॥
नवपल्लवाञ्जलिभृतः प्रचये
बृहतस्तरून्गमयतावनतिम् ।

स्तृणता तृणैः प्रतिनिशं मृदुभिः
शयनीयामुपयतीं वसुधाम् ।। २६ ।।
पतितैरपेतजलदान्नभसः,
पृषतैरपां शमयता च रजः ।
स दयालुनेव परिगाढकृशः,
परिचर्ययानुजगृहे तपसा ।। २७ ।।
महते फलाय तदवेक्ष्य शिवं
विकसन्निमित्तकुसुमं स पुरः ।
न जगाम विस्मयवशं वशिनां
न निहन्ति धैर्यमनुभावगुणः ।। २८ ।।
तदभूरिवासरकृतं सुकृतै-
रुपलभ्य वैभवमनन्यभवम् ।
उपतस्थुरास्थितविषादधियः
शतयज्वनो वनचरा वसतिम् ।। २९ ।।
विदिताः प्रविश्य विहितानतयः
शिथिलीकृतेऽधिकृत्यविधौ ।
अनपेतकालमभिरामकथाः
कथयाम्बभूवुरिति, गोत्रभिदे ।। ३० ।।
शुचिवल्कवीततनुरन्यतम-
स्तिमिरच्छिदामिव गिरौ भवतः ।
महते जयाय मघवन्ननघः
पुरुषस्तपस्यति तपञ्जगतीम् ।। ३१ ।।
स बिभर्ति भीषणभुजङ्गभुजः
पृथुः विद्विषां भयविधायि धनुः ।
अमलेन तस्य धृतसच्चरिता-
श्चरितेन चातिशयिता मुनयः ।। ३२ ।।

मरुतः शिवा नवतृणा जगती
विमलं नभो रजसि वृष्टिरपाम् ।
गुणसम्पदानुगुणतां गमितः
कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥
इतरेतरानभिभवेन मृगा-
स्तमुपासते गुरुमिवान्तसदः ।
विनमन्ति चास्य तरवः प्रचये
परवान्स तेन भवतेव नगः ॥ ३४ ॥
उरु सत्त्वमाह विपरिश्रमता
परमं वपुः प्रथयतीव जयम् ।
शमिनोऽपि तस्य नवसङ्गमने
विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥
ऋषिवंशजः स यदि दैत्यकुले
यदि वान्वये महति भूमिभृताम् ।
चरतस्तपस्तव वनेषु सहा
न वयं निरूपयितुमस्य गतिम् ॥ ३६ ॥
विगणय्य कारणमनेकगुणं
निजयाऽथवा कथितमल्पतया ।
असदप्यदः सहितुमर्हसि नः
क्व वनेचराः क्व निपुणा यतयः ॥ ३७ ॥
अधिगम्य गुह्यकगणादिति त-
न्मनसः प्रियं प्रियसुतस्य तपः ।
निजुगोप हर्षमुदितं मघवा
नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥
प्रणिधाय चित्तमथ भक्ततया
विदितेऽप्यपूर्व इव तत्र हरिः ।

उपलब्धुमस्य नियमस्थिरतां
सुरसुन्दरीरिति वचोऽभिदधे ॥ ३९ ॥
सुकुमारमेकमणु मर्मभिदा-
मतिदूरगं युतममोघतया ।
अविपक्षमस्त्रमपरं कतम-
द्विजयाय यूयमिव चित्तभुवः ॥ ४० ॥
भववीतये हतबृहत्तमसा-
मवबोधवारि रजसः शमनम् ।
परिपीयमाणमिव वोऽसकलै-
रवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥
बहुधा गतां जगति भूतसृजा
कमनीयतां समभिहृत्य पुरा ।
उपपादिता विदधता भवतीः
सुरसद्मयानसुमुखी जनता ॥ ४२ ॥
तदुपेत्य विघ्नयत तस्य तपः
कृतिभिः कलासु सहिताः सचिवैः ।
हृतवीतरागमनसां ननु वः
सुखसङ्गिनं प्रति सुखावजितिः ॥ ४३ ॥
अविमृष्यमेतदभिलष्यति स
द्विषतां वधेन विषयाभिरतिम् ।
भववीतये न हि तथा स विधिः
क्व शरासनं क्व च विमुक्तिपथः ॥ ४४ ॥
पृथुधाम्नि तत्र परिबोधि च मा
भवतीभिरन्यमुनिवद्विकृतिः ।
स्वयशांसि विक्रमवतामवतां न
वधूष्वघानि विमृषन्ति धियः ॥ ४५ ॥

आशंसितापचितिचारु पुरः सुरा-
णामादेशमित्यभिमुखं समवाप्य भर्तुः ।
लेभे परां द्युतिममर्त्यवधूसमूहः
सम्भावना ह्यधिकृतस्य तनोति तेजः ।४६।
प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ।
अचलनलिनलक्ष्मीहारि नालं बभूव
स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रम् ।।४७।।

।। इति भारविकृतौ महाकाव्ये किरातार्जुनीये
षष्ठः सर्गः ।। ६ ।।

## ।। ७ ।। सप्तमः सर्गः ।।

श्रीमद्भिः सरथगजैः सुराङ्गनानां
गुप्तनामथ सचिवैस्त्रिलोकभर्तुः ।
संमूर्च्छन्नलघुविमानरन्ध्रभिन्नः,
प्रस्थानं समभिदधे मृदङ्गनादः ।। १ ।।
सोत्कण्ठैरमरगणैरनुप्रकी-
र्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां
नासेदे चरितगुणत्वमातपत्रैः ।। २ ।।
धूतानामभिमुखपातिभिः समीरै-
रायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदजनितां श्रियं वधूना-
मुष्णांशुद्युतिजनितः कपोलरागः ।। ३ ।।
तिष्ठद्भिः कथमपि देवतानुभावा-
दाकृष्टैः प्रजविभिरायतं तुरङ्गैः ।

नेमीनामसति विवर्तने रथौ-
घैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ४ ॥
कान्तानां कृतपुलकः स्तनाङ्गरागे
वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ।
सम्पेदे श्रमसलिलोद्गमो विभूषा
रम्याणां विकृतिरपि श्रियं तनोति ॥ ५ ॥
राजद्भिः पथि मरुतामभिन्नरूपै-
रुल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानाम् ।
तेजोभिः कनकनिकाषराजिगौरै-
रायामः क्रियत इव स्म सातिरेकः ॥ ३ ॥
रामाणामवजितमाल्यसौकुमार्ये
सम्प्राप्ते वपुषि सहत्वमातपस्य ।
गन्धर्वैरधिगतविस्मयैः प्रतीये
कल्याणी विधिषु विचित्रता विधातुः ॥ ७ ॥
सिन्दूरैः कृतरुचयः सहेमकक्ष्याः
स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः ।
सादृश्यं ययुररुणांशुरागभिन्नै-
र्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥
अत्यर्थं दुरुपसदादुपेत्य
दूरं पर्यन्तादहिममयूखमण्डलस्य ।
आशानामुपरचितामिवैकवेणीं
रम्योर्मिं त्रिदशनदीं ययुर्बलानि ॥ ९ ॥
आमत्तभ्रमरकुलाकुलानि धुन्व-
न्नुद्धूतग्रथितरजांसि पङ्कजानि ।
कान्तानां गगननदीतरङ्गशीतः
संतापं विरमयति स्म मातरिश्वा ॥ १० ॥

सम्भिन्नैरिभतुरगावगाहनेन
प्राप्योर्वीरनु पदवीं विमानपङ्क्तीः ।
तत्पूर्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्तनं पयोभिः ॥ ११ ॥
क्रान्तानां ग्रहचरितात्पथो रथानाम-
क्षाग्रक्षतसुरवेश्मवेदिकानाम् ।
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः
संपीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥
तप्तानामुपदधिरे विषाणभिन्नाः
प्रह्लादं सुरकरिणां घनाः क्षरन्तः ।
युक्तानां खलु महतां परोपकारे
कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥
संवाता मुहुरनिलेन नीयमाने
दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।
पर्यस्यत्पृथुमणिमेखलांशुजालं
सञ्जज्ञे युतकमिवान्तरीयमूर्वोः ॥ १४ ॥
प्रत्यार्द्रीकृततिलकास्तुषारपातैः
प्रह्लादं शमितपरिश्रमा दिशन्तः ।
कान्तानां बहुमतिमाययुः पयोदा
नाल्पीयान्बहु सुकृतं हिनस्ति दोषः ॥ १५ ॥
यातस्य ग्रथिततरङ्गसैकताभे
विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां
संधानं सुरधनुषः प्रभा मणीनाम् ॥ १६ ॥
संसिद्धावितिकरणीयसंनिबद्धै-
रालापैः पिपतिषतां विलङ्घ्य वीथीम् ।

आसेदे दशशतलोचनध्वजिन्या
जीमूतैरपिहितसानुरिन्द्रकील: ॥ १७ ॥
आकीर्णा मुखनलिनैर्विलासिनी-
नामुद्धूतस्फुटविशदातपत्रफेना ।
सा तूर्यध्वनितगभीरमापतन्ती
भूभर्तु: शिरसि नभोनदीव रेजे ॥ १८ ॥
सेतुत्वं दधति पयोमुचां विताने
संरम्भादभिपततो रथाङ्गजवेन ।
आनिन्युर्नियमितरश्मिभुग्नघोणा:
कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गा: ॥ १९ ॥
माहेन्द्रं नगमभित: करेणुवर्या:
पर्यन्तस्थितजलदा दिव: पतन्त: ।
सादृश्यं निलयननिष्प्रकम्पपक्षै-
राजग्मुर्जलनिधिशायिभिर्नगेन्द्रै: ॥ २० ॥
उत्सङ्गे समविषमे समं महाद्रे:
क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे
सामग्री खुरपदवी तुरङ्गमाणाम् ॥ २१ ॥
सध्वानं निपतितनिर्झरासु मन्द्रै:
सम्मूर्च्छन्प्रतिनिनदैरधित्यकासु ।
उद्ग्रीवैर्घनरवशङ्कया मयूरै:
सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥ २२ ॥
संभिन्नामविरलपातिभिर्मयूखै-
र्नीलानां भृशमुपमेखलं मणीनाम् ।
विच्छिन्नामिव वनिता नभोन्तराले-
वप्राम्भ:स्रुतिमवलोकयांबभूवु: ॥ २३ ॥

आसन्नद्विपपदवीमदानिलाय
क्रुध्यन्तो धियमवमत्य धूर्गतानाम् ।
सव्याजं निजकरिणीभिरात्तचित्ताः
प्रस्थानं सुरकरिणः कथञ्चिदीषुः ॥ २४ ॥

नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं
पर्यस्यन्नवसलिलारुणं वहन्ती ।
आतेने वनगहनानि वाहिनी सा
घर्मान्तक्षुभितजलेव जह्नुकन्या ॥ २५ ॥

सम्भोगक्षमगहनामथोपगङ्गं
बिभ्राणां ज्वलितमणीनि सैकतानि ।
अध्यूषुश्च्युतकुसुमाचितां सहाया
वृत्रारेरविरलशाद्वलां धरित्रीम् ॥ २६ ॥

भूभर्तुः समधिकमादधे तदोर्व्याः
श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संसक्तौ किमसुलभं महोदयाना-
मुच्छ्रायं नयति यदृच्छयापि योगः ॥ २७ ॥

सामोदाः कुसुमतरुश्रियो विविक्ताः
सम्पत्तिः किसलयशालिनीलतानाम् ।
साफल्यं ययुरमराङ्गनोपभुक्ताः
सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ता-
ल्लीनाहिश्वसितविलोलपल्लवानाम् ।
सेव्यानां हतविनयैरिवावृतानां
सम्पर्कं परिहरति स्म चन्दनानाम् ॥ २९ ॥

उत्सृष्टध्वजकुथकङ्कटा धरित्री-
मानीता विदितनयैः श्रमं विनेतुम् ।

आक्षिप्तद्रुमगहना युगान्तवातैः
पर्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥
प्रस्थानश्रमजनितां विहाय
निद्रामामुक्ते गजपतिना सदानपङ्के ।
*शय्यान्ते कुलमलिनं क्षणं विलीनं*
संरम्भच्युतमिव शृङ्खलं चकाशे ॥ ३१ ॥
आयस्तः सुरसरिदोघरुद्धवर्त्मा
सम्प्राप्तुं वनगजदानगन्धि रोधः ।
मूर्धानं निहितशिताङ्कुशं विधुन्वन्
यन्तारं न विगणयाञ्चकार नागः ॥३२॥
आरोढुः समवनतस्य पीतशेषे
साशङ्कं पयसि समीरिते करेण ।
संमार्जन्नरुणमदस्रुतौ कपोलौ
सस्यन्दे मद इव शीकरः करेणोः ॥ ३३ ॥
आघ्राय क्षणमतितृष्यताऽपि
रोषादुत्तीरं निहितविवृत्तलोचनेन ।
सम्पृक्तं वनकरिणां मदाम्बुसेकै-
र्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥
प्रश्च्योतन्मदसुरभीणि निम्नगायाः
क्रीडन्तो गजपतयः पयांसि कृत्वा ।
किञ्जल्कव्यवहितताम्रदानलेखै-
रुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥
आकीर्णं बलरजसा घनारुणेन
प्रक्षोभैः सपदि तरङ्गितं तटेषु ।
मातङ्गोन्मथितसरोजरेणुपिङ्गं
माञ्जिष्ठं वसनमिवाम्बु निर्बभासे ॥ ३६ ॥

श्रीमद्भिर्नियमितकन्धरापरान्तैः
संसक्तैरगुरुवनेषु साङ्गहारम् ।
सम्प्रापे निसृतमदाम्बुभिर्गजेन्द्रैः
प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥

निःशेषं प्रशमितरेणु वारणानां
स्रोतोभिर्मदजलमुज्झतामजस्रम् ।
आमोदं व्यवहितभूरिपुष्पगन्धो
भिन्नैलासुरभिमुवाह गन्धवाहः ॥ ३८ ॥

सादृश्यं दधति गभीरमेघघोषै-
रुन्निद्रक्षुभितमृगाधिपश्रुतानि ।
आतेनुश्चकितचकोरनीलकण्ठा-
न्कच्छान्तानमरमहेभबृंहितानि ॥ ३९ ॥

शाखावसक्तकमनीयपरिच्छ-
दानामध्वश्रमातुरवधूजनसेवितानाम् ।
जज्ञे निवेशनविभागपरिष्कृतानां
लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥ ४० ॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
सप्तमः सर्गः ॥ ७ ॥

## अष्टमः सर्गः

अथ स्वमायाकृतमन्दिरोज्ज्वलं
ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गना गोपतिचापगोपुरं
पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

यथायथं ताः सहिता नभश्चरैः
प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः
क्षणद्युतीनां दधुरेकरूपताम् ॥ २ ॥
निवृत्तवृत्तोरुपयोधरक्लमः
प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं
नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥
घनानि कामं कुसुमानि बिभ्रतः
करप्रचेयान्यपहाय शाखिनः ।
पुरोऽभिसस्रे सुरसुन्दरीजनै-
र्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥
तनूरलक्तारुणपाणिपल्लवाः
स्फुरन्नखांशूत्करमञ्जरीभृतः
विलासिनीबाहुलता वनालयो
विलेपनामोदहृताः सिषेविरे ॥ ५ ॥
निपीयमानस्तबका शिलीमुखै-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनै-
रमन्ददष्टोष्ठकरावधूननम् ॥ ६ ॥
करौ धुनाना नवपल्लवाकृती
वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया
कथं न्वितस्त्रस्यति षट्पदावली: ॥ ७ ॥
जहीहि कोपं दयितोऽनुगम्यतां
पुराऽनुशेते तव चञ्चलं मनः ।

इति प्रियं कञ्चिदुपैतुमिच्छतीं
पुरोऽनुनिन्ये निपुणः सखीजनः ॥ ८ ॥
समुन्नतैः काशदुकूलशालिभिः
परिक्वणत्सारसपङ्क्तिमेखलैः ।
प्रतीरदेशैः स्वकलत्रचारुभि-
विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥
विदूरपातेन भिदामुपेयुष-
श्च्युताः प्रवाहादभितः प्रसारिणः ।
प्रियाङ्कशीताः शुचिमौक्तिकत्विषो
वनप्रहासा इव वारिबिन्दवः ॥ १० ॥
सखीजनं प्रेम गुरूकृतादरं
निरीक्षमाणा इव नम्रमूर्तयः ।
स्थिरद्विरेफाञ्जनशारितोद-
रैर्विसारिभिः पुष्पविलोचनैर्लताः ॥ ११ ॥
उपेयुषीणां बृहतीरधित्यका
मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणै-
रुपाहितश्यामरुचश्च चन्दनाः ॥ १२ ॥
स्वगोचरे सत्यपि चित्तहारिणा
विलोभ्यमानाः प्रसवेन शाखिनाम् ।
नभश्चराणामुपकर्तुमिच्छतां
प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥
प्रयच्छतोच्चैः कुसुमानि मानिनी
विपक्षगोत्रं दयितेन लम्भिता ।
न किञ्चिदूचे चरणेन केवलं
लिलेख बाष्पाकुललोचना भुवम् ॥ १४ ॥

प्रियेऽपरा यच्छति वाचमुन्मुखी
निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा
विवेद पुष्पेषु न पाणिपल्लवम् ।। १५ ।।
सलीलमासक्तलतान्तभूषणं
समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडं नुनुदे नितम्बिना
घनेन कश्चिज्जघनेन कान्तया ।। १६ ।।
कलत्रभारेण विलोलनीविना
गलद्दुकूलस्तनशालिनोरसा ।
बलिव्यपायस्फुटरोमराजिना
निरायतत्वादुदरेण ताम्यता ।। १७ ।।
विलम्बमानाकुलकेशपाशया
कयाचिदाविष्कृतबाहुमूलया ।
तरुप्रसूनान्यपदिश्य सादरं
मनोधिनाथस्य मनः समाददे ।। १८ ।।
व्यपोहितुं लोचनतो मुखानिलैर-
पारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ।। १९ ।।
इमान्यमूनीत्यपवर्जिते शनै-
र्यथाभिरामं कुसुमाग्रपल्लवे ।
विहाय निःसारतयेव भूरुहा-
न्पदं वनश्रीर्वनितासु सन्दधे ।। २० ।।
प्रवालभङ्गारुणपाणिपल्लवः
परागपाण्डूकृतपीवरस्तनः ।

महीरुहः पुष्पसुगन्धिराददे
वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥

वरोरुभिर्वारणहस्तपीवरै-
श्चिराय खिन्नान्नवपल्लवश्रियः ।
समेऽपि यातुं चरणाननीश्वरा-
न्मदादिव प्रस्खलतः पदे पदे ॥ २२ ॥

विसारिकाञ्चीमणिरश्मिलब्धया
मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं
श्रमातिरिक्तैर्जघनानि गौरवैः ॥ २३ ॥

समुच्छ्वसत्पङ्कजकोशकोमलै-
रुपाहितश्रीण्युपनीवि नाभिभिः ।
दधन्ति मध्येषु वलीविभङ्गिषु
स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥

समानकान्तीनि तुषारभूषणैः
सरोरुहैरस्फुटपत्रपङ्क्तिभिः ।
चितानि घर्माम्बुकणैः समन्ततो
मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥

विनिर्यतीनां गुरुखेदमन्थरं
सुराङ्गनानामनुसानु वर्त्मनः ।
सविस्मयं रूपयतो नभश्चरान्
विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥

अथ स्फुरन्मीनविधूतपङ्कजा
विपङ्कतीरस्खलितोर्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी
समाजुहावेव वधूः सुरापगा ॥ २७ ॥

प्रशान्तघर्माभिभवः शनैर्विवान्
विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकर-
स्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥
गतैः सहावैः कलहंसविक्रमं
कलत्रभारैः पुलिनं नितम्बिभिः ।
मुखैः सरोजानि च दीर्घलोचनैः
सुरस्त्रियः साम्यगुणान्निरासिरे ॥ २६ ॥
विभिन्नपर्यन्तगमीनपङ्क्तयः
पुरो विगाढाः सखिभिर्मरुत्वतः ।
कथंचिदापः सुरसुन्दरीजनैः
सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ ३० ॥
विगाढमात्रे रमणीभिरम्भसि
प्रयत्नसंवाहितपीवरोरुभिः ।
विभिद्यमाना विससार सारसा-
नुदस्य तीरेषु तरङ्गसंहतिः ॥ ३१ ॥
शिलाघनैर्नाकसदामुरः स्थलै-
र्बृहन्निवेशैश्च वधूपयोधरैः ।
तटाभिनीतेन विभिन्नवीचिना
रुषेव भेजे कलुषत्वमम्भसा ॥ ३२ ॥
विधूतकेशाः परिलोलितस्रजः
सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसङ्गाद्विहितागसो मुहुः
प्रकम्पमीयुः सभया इवोर्मयः ॥ ३३ ॥
विपक्षचित्तोन्मथना नखव्रणा-
स्तिरोहिता विभ्रममण्डनेन ये ।

हृतस्य शेषानिव कुङ्कुमस्य
तान् विकत्थनीयान्दधुरन्यथा स्त्रियः ॥३४॥
सरोजपत्रे नु विलीनषट्पदे
विलोलदृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसंतते
र्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥ ३५ ॥
अगूढहासस्फुटदन्तकेसरं
मुखं स्विदेतद्विकसन्नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं
विदांबभूवुः सुचिरेण योषितः ॥ ३६ ॥
प्रियेण संग्रथ्य विपक्षसंनिधा-
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ३७ ॥
असंशयं न्यस्तमुपान्तरक्ततां
यदेव रोद्धुं रमणीभिरञ्जनम् ।
हृतेऽपि तस्मिन्सलिलेन शुक्लतां
निरास रागो नयनेषु न श्रियम् ॥ ३८ ॥
द्युतिं वहन्तो वनितावतंसका
हृताः प्रलोभादिव वेगिभिर्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां
च्युताधिकाराः सचिवा इवाययुः ॥ ३९ ॥
विपत्रलेखा निरलक्तकाधरा
निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् ।
निरीक्ष्य रामा बुबुधे नभश्चरै-
रलंकृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

तथा न पूर्वं कृतभूषणादरः
प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया
ददाह दृष्टीश्च विपक्षयोषिताम् ।। ४१ ।।
शुभाननाः साम्बुरुहेषु भीरवो
विलोलहाराश्चलफेनपङ्क्तिषु ।
नितान्तगौर्यो हृतकुङ्कुमेष्वलं
न लेभिरे ताः परभागमूर्मिषु ।। ४२ ।।
ह्रदाम्भसि व्यस्तवधूकराहते
रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुः स्तनैस्तालसमं समाददे
मनोरमं नृत्यमिव प्रवेपितम् ।। ४३ ।।
श्रिया हसद्भिः कमलानि सस्मितै-
रलंकृताम्बुः प्रतिमागतैर्मुखैः ।
कृतानुकूल्या सुरराजयोषितां
प्रसादसाफल्यमवाप जाह्नवी ।। ४४ ।।
परिस्फुरन्मीनविघट्टितोरवः
सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः
सखीजनस्यापि विलोकनीयताम् ।। ४५ ।।
भयादिवाश्लिष्य झषाहतेऽम्भसि
प्रियं मुदानन्दयति स्म मानिनी ।
अकृत्रिमप्रेमरसाहितैर्मनो
हरन्ति रामाः कृतकैरपीहितैः ।। ४६ ।।
तिरोहितान्तानि नितान्तमाकुलै-
रपां विगाहादलकैः प्रसारिभिः ।

ययुर्वधूनां वदनानि तुल्यतां
द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ ४७ ॥
करौ धुनाना नवपल्लवाकृती
पयस्यगाधे किल जातसंभ्रमा ।
सखीषु निर्वाच्यमधार्ष्ट्यदूषितं
प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ४८ ॥
प्रियैः सलीलं करवारिवारितः
प्रवृद्धनिःश्वासविकम्पितस्तनः ।
सविभ्रमाधूतकराग्रपल्लवो
यथार्थतामाप विलासिनीजनः ॥ ४९ ॥
उदस्य धैर्यं दयितेन सादरं
प्रसादितायाः करवारिवारितम् ।
मुखं निमीलन्नयनं नतभ्रुवः
श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥
विहस्य पाणौ विधृते धृताम्भसि
प्रियेण वध्वा मदनार्द्रचेतसः ।
सखीव काञ्ची पयसा घनीकृता
बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥
निरञ्जने साचिविलोकितं दृशा-
वयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे
बलिक्रिया चातिलकं तदास्पदम् ॥ ५२ ॥
निमीलदाकेकरलोलचक्षुषां
प्रियोपकण्ठं कृतगात्रवेपथुः ।
निमज्जतीनां श्वसितोद्धतस्तनः
श्रमो नु तासां मदनो नु पप्रथे ॥ ५३ ॥

प्रियेण सिक्ता चरमं विपक्षत-
श्चुकोप काचिन्न तुतोष सान्त्वनैः ।
जनस्य रूढप्रणयस्य चेतसः
किमप्यमर्षोऽनुनये भृशायते ।। ५४ ।।

इत्थं विहृत्य वनिताभिरुदस्यमानं
पीनस्तनोरुजघनस्थलशालिनीभिः ।
उत्सर्पिलोर्मिचयलङ्घिततीरदेश-
मौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ।। ५५ ।।

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः ।
संरेजिरे सुरसरिज्जलधौत-
हारास्तारावितानतरला इव यामवत्यः ।।५६।।

संक्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकारांशुचित्रम् ।
बद्धोर्मिनाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ।।५७।।

।। इति भारविकृतौ महाकाव्ये किरातार्जु-
नीयेऽष्टमः सर्गः ।। ८ ।।

## ।। ९ ।। नवमः सर्गः ।।

( स्वागतावृत्तम् )

वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललम्बे ।। १ ।।

मध्यमोपलनिभे लसदंशावे-
कतश्च्युतिमुपेयुषि भानौ ।

द्यौरुवाह परिवृत्तिविलोलां
　　हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥
अंशुपाणिभिरतीव पिपासुः
　　पद्मजं मधु भृशं रसयित्वा ।
क्षीबतामिव गतः क्षितिमेष्य-
　　ल्लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥
गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ।
आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ ४ ॥
मुक्तमूललघुरुज्झितपूर्वः
　　पश्चिमे नभसि संभृतसान्द्रः ।
सामिमज्जति रवौ न विरेजे
　　खिन्नजिह्म इव रश्मिसमूहः ॥ ५ ॥
कान्तदूत्य इव कुङ्कुमताम्राः
　　सायमण्डलमभित्वरयन्त्यः ।
सादरं ददृशिरे वनिताभिः
　　सौधजालपतिता रविभासः ॥ ६ ॥
अग्रसानुषु नितान्तपिशङ्गै-
　　र्भूरुहान्मृदुकरैरवलम्ब्य ।
अस्तशैलगहनं नु विवस्वा-
　　नाविवेश जलधिं नु महीं नु ॥ ७ ॥
आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः ।
आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ ८ ॥
आस्थितः स्थगितवारिदपङ्क्त्या
　　संध्यया गगनपश्चिमभागः ।
सोर्मिविद्रुमवितानविभासा
　　रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥

प्राञ्जलावपि जने नतमूर्ध्नि
प्रेम तत्प्रवणचेतसि हित्वा ।
संध्ययाऽनुविदधे विरमन्त्या
चापलेन सुजनेतरमैत्री ॥ १० ॥

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
संनिपत्य शनकैरथ निम्नादन्धकारमुदवाप समानि ॥ ११ ॥

एकतामिव गतस्य विवेकः
कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनाना-
मात्मनीय पतितेन विशेषाः ॥ १२ ॥

इच्छतां सह वधूभिरभेदं
यामिनीविरहिणां विहगानाम् ।
आपुरेव मिथुनानि वियोगं
लङ्घ्यते न खलु कालनियोगः ॥ १३ ॥

यच्छति प्रतिमुखं दयितायै
वाचमन्तिकगतेऽपि शकुन्तौ ।
नीयते स्म नतिमुज्झितहर्षं
पङ्कजं मुखमिवाम्बुरुहिण्या ॥ १४ ॥

रञ्जिता नु विविधास्तरुशैला
नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री
संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

रात्रिरागमलिनानि विकासं
पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभः श्री-
र्वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥

व्यानशे शशधरेण विमुक्तः
केतकीकुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्ति-
र्वासवस्य दिशमंशुसमूहः ॥ १७ ॥
उज्झती शुचमिवा शुतमिस्रा-
मन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे
रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥
नीलनीरजनिभे हिमगौरं
शैलरुद्धवपुषः सितरश्मेः ।
खे रराज निपतत्करजालं
वारिधेः पयसि गाङ्गमिवाम्भः ॥ १९ ॥
द्यां निरुन्धदतिनीलघनाभं
ध्वान्तमुद्यतकरेण पुरस्तात् ।
क्षिप्यमाणमसितेतरभासा
शंभुनेव करिचर्म चकासे ॥ २० ॥
अन्तिकान्तिकगतेन्दुविसृष्टे
जिह्मतां जहति दीधितिजाले ।
निःसृतस्तिमिरभारनिरोधा-
दुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥
लेखया विमलविद्रुमभासा
संततं तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकटङ्कपिशङ्गया
मण्डलं भुव इवादिवराहः ॥ २२ ॥
दीपयन्नथ नभः किरणौघैः
कुङ्कुमारुणपयोधरगौरः ।

हेमकुम्भ इव पूर्वपयोधे-
रुन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥
उद्गतेन्दुमविभिन्नतमिस्रां
पश्यति स्म रजनीमवितृप्तः ।
व्यंशुकस्फुटमुखीमतिजिह्मां
व्रीडया नववधूमिव लोकः ॥ २४ ॥
न प्रसादमुचितं गमिता द्यौ-
र्नोद्धृतं तिमिरमद्रिवनेभ्यः ।
दिङ्मुखेषु न च धाम विकीर्णं
भूषितैव रजनी हिमभासा ॥ २५ ॥
मानिनीजनविलोचनपाता-
नुष्णबाष्पकलुषान् प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं
भीतभीत इव शीतमयूखः ॥ २६ ॥
श्लिष्यतः प्रियवधूरुपकण्ठं
तारकास्ततकरस्य हिमांशोः ।
उद्वमन्नभिरराज समन्ता-
दङ्गराग इव लोहितरागः ॥ २७ ॥
प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥२८॥
शारतां गमितया शशिपादै-
श्छायया विटपिनां प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभि-
स्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥
आतपे धृतिमता सह वध्वा
यामिनीविरहिणा विहगेन ।

सेहिरे न किरणा हिमरश्मे
दु:खिते मनसि सर्वमसह्यम् ।। ३० ।।
गन्धमुद्धतरजः कणवाही
विक्षिपन्विकसतां कुमुदानाम् ।
आदुधाव परिलीनविहङ्गा
यामिनीमरुदपां वनराजीः ।। ३१ ।।
संविधातुमभिषेकमुदासे
मन्मथस्य लसदंशुजलौघः ।
यामिनीवनितया ततचिह्नः
सोत्पलो रजतकुम्भ इवेन्दुः ।। ३२ ।।
ओजसापि खलु नूनमनूनं
नासहायमुपयाति जयश्रीः ।
यद्विभुः शशिमयूखसखः स-
न्नाददे विजयि चापमनङ्गः ।। ३३ ।।
सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यम् ।
सन्निकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे ।। ३४ ।।
न स्रजो रुरुचिरे रमणीभ्य-
श्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते
रम्यतां प्रियसमागम एव ।। ३५ ।।
प्रस्थिताभिरधिनाथनिवासं
ध्वंसितप्रियसखीवचनाभिः ।
मानिनीभिरपहस्तितधैर्यः
सादयन्नपि मदोऽवललम्बे ।। ३६ ।।
कान्तवेश्म बहु सन्दिशतीभि-
र्यातमेव रतये रमणीभिः ।

मन्मथेन परिलुप्तमतीनां
प्रायशः स्खलितमप्युपकारि ॥ ३७ ॥
आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम् ।
निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ।३८।
उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥ ३९ ॥
किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः ।
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥४०॥
योषितः पुलकरोधि दधत्या घर्मवारि नवसङ्गमजन्म ।
कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥ ४१ ॥
शीधुपानविधुरासु निगृह्णन्मान-माशु शिथिलीकृतलज्जः ।
सङ्गतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥
द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥४३॥
साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ।
सुभ्रुवो जनयति स्म विभूषां सङ्गतावुपरराम च लज्जा ।४४।
सव्यलीकमवधीरितखिन्नं
प्रस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि
प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥
शङ्किताय कृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ।
मानिनीमभिमुखाहितचित्तां शंसति स्म घनरोमविभेदः ।४६।
लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपेदे ॥४७॥
ह्रीतया गलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि ।
मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥

आहता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः ।
सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥
पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः ।
योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ॥ ५० ॥
पातुमाहितरतीन्यभिलेषुस्तर्षयन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ५१
कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसंधौ संदधे धनुषि नेषुमनङ्गः ॥ ५२ ॥
कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ।
इत्यनेक उपदेश इव स्म स्वाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥
भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा ।
ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ ५४ ॥
स्वादितः स्वयमथैधितमानं लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥
भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानाम् ।
आददे मृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥
ओष्ठपल्लवविदंशरुचीनां हृदयतामुपययौ रमणानाम् ।
फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥
प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ।
तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ ५८ ॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।
जज्ञिरे बहुमता प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥
लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने । ६० ।
तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ।
योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥

क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदसंभृतशोभः ।
आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥६२॥
रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु ।
सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥६३॥
बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये ।
वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ।६४।
वाससां शिथिलतामुपनाभि ह्रीनिरासमपदे कुपितानि ।
योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ।६५।
भर्तृपूपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानाम् ।
व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥६६॥
रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे ।
व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥६७॥
योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयिताङ्कम् ।
कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥६८॥

आहिते नु मधुना मधुरत्वे
चेष्टितस्य गमिते नु विकासम् ।
आबभौ नव इवोद्धतरागः
कामिनीष्ववसरः कुसुमेषोः ॥ ॥ ६९ ॥

मा गमन्मदविमूढधियो नः
प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरा भृशमीषुः,
प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥

चित्तनिर्वृतिविधायि विविक्तं
मन्मथो मधुमदः शशिभासः ।
संगमश्च दयितैः स्म नयन्ति
प्रेम कामपि भुवं प्रमदानाम् ॥ ७१ ॥

धाष्टर्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ।
मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥
शीधुपानविधुरेषु वधूनां विघ्नतामुपगतेषु वपुःषु ।
ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥ ७३ ॥

अन्योन्यरक्तमनसामथ बिभ्रतीनां-
चेतोभुवो हरिसखाप्सरसां निदेशम् ।
वैबोधिकध्वनिविभावितपश्चिमार्धा
सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥

निद्राविनोदितनितान्तरतिक्लमाना-
मायासिमङ्गलनिनादविबोधितानाम् ।
रामासु भाविविरहाकुलितासु यूनां
तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥

कान्ताजनं सुरतखेदनिमीलिताक्षं
संवाहितुं समुपयानिव मन्दमन्दम् ।
हर्म्येषु माल्यमदिरापरिभोगगन्धा-
नाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥

आमोदवासितचलाधरपल्लवेषु
निद्राकषायितविपाटललोचनेषु ।
व्यामृष्टपत्रतिलकेषु विलासिनीनां
शोभां बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥

गतवति नखलेखालक्ष्यतामङ्गरागे
समददयितपीताताम्रबिम्बाधराणाम् ।
विरहविधुरमिष्टासत्सखीवाङ्गनानां
हृदयमवललम्बे रात्रिसंभोगलक्ष्मीः ॥ ७८ ॥

॥ इति भारविकृतौ महाकाव्ये किराता-
र्जुनीये नवमः सर्गः ॥ ९ ॥

## ॥ १० ॥ दशमः सर्गः

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाःसुरपतिसूनुविलोभनाय जग्मुः ।१।
द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासाम् ।
अवनिषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ।।२।।
निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनाम् ।
अविरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ।।३।।
ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः ।
प्रतिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ।।४।।

अवचयपरिभोगवन्ति हिंस्रैः
सहचरितान्यमृगाणि काननानि ।
अभिदधुरभितो मुनिं वधूभ्यः
समुदितसाध्वसविक्लवं च चेतः ।। ५ ।।

नृपतिमुनिपरिग्रहेण सा भूः
सुरसचिवाप्सरसां जहार तेजः ।
उपहितपरमप्रभावधाम्नां
न हि जयिनां तपसामलङ्घ्यमस्ति ।। ६ ।।

सचकितमिव विस्मयाकुलाभिः
शुचिसिकतास्वतिमानुषाणि ताभिः ।
क्षितिषु ददृशिरे पदानि जिष्णो-
रुपहितकेतुरथाङ्गलाञ्छनानि ।। ७ ।।

अतिशयितवनान्तरद्युतीनां
फलकुसुमावचयेऽपि तद्विधानाम् ।

ऋतुरिव तरुवीरुधां समृद्धया
युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥
मृदितकिसलयः सुराङ्गनानां
ससलिलवल्कलभारभुग्नशाखः ।
बहुमतिमधिकां ययावशोकः
परिजनतापि गुणाय सद्गुणानाम् ॥ ९ ॥
यमनियमकृशीकृतस्थिराङ्ग परिददृशो विधृतायुधः स ताभिः ।
अनुपमशमदीप्ततागरीयान् कृतपदपंक्तिरथर्वणेव वेदः ॥१०॥
शशधर इव लोचनाभिरामै-
र्गगनविसारिभिरंशुभिः परीतः ।
शिखरनिचयमेकसानुसद्मा
सकलमिवापि दधन्महीधरस्य ॥ ११ ॥
सुरसरिति परं तपोऽधिगच्छन्
विधृतपिशङ्गबृहज्जटाकलापः ।
हविरिव विततः शिखासमूहैः
समभिलषन्नुपवेदि जातवेदाः ॥ १२ ॥
सदृशमतनुमाकृतेः प्रयत्नं तदनु-
गुणामपरैः क्रियामलङ्घ्याम् ।
दधदलघु तपः क्रियानुरूपं
विजयवतीं च तपःसमां समृद्धिम् ॥ १३ ॥
चिरनियमकृशोऽपि शैलसारः
शमनिरतोऽपि दुरासदः प्रकृत्या ।
ससचिव इव निर्जनेऽपि तिष्ठ-
न्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥ १४ ॥
तनुमवजितलोकसारधाम्नीं
त्रिभुवनगुप्तिसहां विलोकयन्त्यः ।

अवययुरमरस्त्रियोऽस्य यत्नं
विजयफले विफलं तपोधिकारे ॥ १५ ॥
मुनिदनुतनयान् विलोभ्य सद्यः
प्रतनुबलान्यधितिष्ठतस्तपांसि ।
अलघुनि बहु मेनिरे च ताः स्वं
कुलिशभृता विहितं पदे नियोगम् ॥ १६ ॥
अथ कृतकविलोभनं विधित्सौ
युवतिजने हरिसूनुदर्शनेन ।
प्रसभमवततार चित्तजन्मा
हरति मनो मधुरा हि यौवनश्रीः ॥ १७ ॥
सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः ।
युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ।१८।
सजलजलधरं नभो विरेजे
विवृतिमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने
जलगुरुभिः स्तनितैर्दिगन्तरेषु ॥ १९ ॥
परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ।२०।
प्रतिदिशमभिगच्छताभिमृष्टः
ककुभविकाससुगन्धिनानिलेन ।
नव इव विबभौ सचित्तजन्मा
गतधृतिराकुलितश्च जीवलोकः ॥ २१ ॥
व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ।
परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यम् ।२२।
अभिभवति मनः कदम्बवायौ
मदमधुरे च शिखण्डिनां निनादे ।

जन इव न धृतेश्चचाल जिष्णु-
नंहि महतां सुकरः समाधिभङ्गः ॥ २३ ॥

धृतबिसवलयावलिर्वहन्ती कुमुदवनैकदुकूलमात्तबाणा ।
शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥२४॥

समदशिखिरुतानि हंसनादैः
कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य
जग्मुर्गुणमहतां महते गुणाय योगः ॥ २५ ॥

सरजसमपहाय केतकीनां
प्रसवमुपान्तिकनीपरेणुकीर्णम् ।
प्रियमधुरसनानि षट्पदाली
मलिनयति स्म विनीलबन्धनानि ॥ २६ ॥

मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाड्वलस्थलीषु ।
अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ।२७।

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।
गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ।२८।

निचयिनी लवलीलताविकासे
जनयति लोध्रसमीरणे च हर्षम् ।
विकृतिमुपययौ न पाण्डुसूनु-
श्चलति नयान्न जिगीषतां हि चेतः ॥ २९ ॥

कतिपयसहकारपुष्परम्य
स्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ।
सुरभिमुखहिमागमान्तशंसी
समुपययौ शिशिरः स्मरैकबन्धुः ॥ ३० ॥

कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिम् ।
क्वणदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः ३१

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम् ।
ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु ।३२।

मुहुरनुपतता विधूयमानं
विरचितसंहति दक्षिणानिलेन ।
अलिकुलमलकाकृतिं प्रपेदे
नलिनमुखान्तविसर्पि पङ्कजिन्याः ।। ३३ ।।

श्वसनचलितपल्लवाधरोष्ठे
नवनिहितेर्ष्यमिवावधूनयन्ती ।
मधुसुरभिणि षट्पदेन पुष्पे
मुख इव शाललतावधूश्चुचुम्बे ।। ३४ ।।

प्रभवति न तदा परो विजेतुं
भवति जितेन्द्रियता यदात्मरक्षा ।
अविजितभुवनस्तथा हि लेभे
सिततुरगे विजयं न पुष्पमासः ।। ३५ ।।

कथमिव तव संमतिर्भवित्री
सममृतुभिर्मुनिनावधीरितस्य ।
इति विरचितमल्लिकाविकासः
स्मयत इव स्म मधुं निदाघकालः ।। ३६ ।।

बलवदपि बलं मिथोविरोधि
प्रभवति नैव विपक्षनिर्जयाय ।
भुवनपरिभवी न यत्तदानीं
तमृतुगणः क्षणमुन्मनीचकार ।। ३७ ।।

श्रुतिसुखमुपवीणितं सहायै-
रविरललाञ्छनहारिणश्च कालाः ।
अविहितहरिसूनुविक्रियाणि
त्रिदशवधूषु मनोभवं वितेनुः ।। ३८ ।।

न दलति निचये तथोत्पलानां
न च विषमच्छदगुच्छयूथिकासु ।
अभिरतिमुपलेभिरे यथासां
हरितनयावयवेषु लोचनानि ॥ ३९ ॥
मुनिमभिमुखतां निनीषवो याः
समुपययुः कमनीयतागुणेन ।
मदनमुपदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम् ॥ ४० ॥
प्रकृतमनुससार नाभिनेयं
प्रविकसदङ्गुल पाणिपल्लवं वा ।
प्रथममुपहितं विलासि चक्षुः
सिततुरगे न चचाल नर्तकीनाम् ॥ ४१ ॥
अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रम् ।
चरणमभिपपात षट्पदाली धृतनवलोहितपङ्कजाभिशङ्का ४२
अविरलमलसेषु नर्तकीनां
द्रुतपरिषिक्तमलक्तकं पदेषु ।
सवपुषमिव चित्तरागमूहु-
र्नमितशिखानि कदम्बकेसराणि ॥४३॥
नृपसुतमभितः समन्मथायाः
परिजनगात्रतिरोहिताङ्गयष्टेः ।
स्फुटमभिलषितं बभूव वध्वा
वदति हि संवृतिरेव कामितानि ॥ ४४ ॥
अभिमुनि सहसा हृते परस्या
घनमरुता जघनांशुकैकदेशे ।
चकितमवसनोरु सत्रपायाः
प्रतियुवतीरपि विस्मयं निनाय ॥ ४५ ॥

धृतबिसवलये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखम् ।
नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ।४६।
सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता ।
हृदयमहृदया न नाम पूर्वं भवदुपकण्ठमुपागतं विवेद ॥४७॥

चिरमपि कलितान्यपारयन्त्या
परिगदितुं परिशुष्यता मुखेन ।
गतघृण गमितानि मत्सखीनां
नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥

अचकमत सपल्लवां धरित्रीं
मृदुसुरभिं विरहय्य पुष्पशय्याम् ।
भृशमरतिमवाप्य तत्र चास्या-
स्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ४९ ॥

तदनघ तनुरस्तु सा सकामा
व्रजति पुरा हि परासुतां त्वदर्थे ।
पुनरपि सुलभं तपोऽनुरागी
युवतिजनः खलुः नाप्यतेऽनुरूपः ॥ ५० ॥

जहिहि कठिनतां प्रयच्छ वाचं
ननु करुणामृदु मानसं मुनीनाम् ।
उपगतमवधीरयन्त्यभव्याः
स निपुणमेत्य कयाचिदेवमूचे ॥ ५१ ॥

*सललितचलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः ।*
सुरपतितनये परा निरासे मनसिजजैत्रशरं विलोचनार्धम् ।५२।

कुसुमितमवलम्ब्य चूतमुच्चै-
स्तनुरिभकुम्भपृथुस्तना नताङ्गी ।
तदभिमुखमनङ्गचापयष्टि-
विसृतगुणेव समुन्ननाम काचित् ॥ ५३ ॥

सरभसमवलम्ब्य नीलमन्या
विगलितनीवि विलोलमन्तरीयम् ।
अभिपतितुमनाः ससाध्यसेव
च्युतरशनागुणसंदितावतस्थे ॥ ५४ ॥
यदि मनसि शमः किमङ्ग चापं
शठ विषयास्तव वल्लभा न मुक्तिः ।
भवतु दिशति नान्यकामिनीभ्य-
स्तव हृदये हृदयेश्वरावकाशम् ॥ ५५ ॥
इति विषमितचक्षुषाभिधाय
स्फुरदधरोष्ठमसूयया कयाचित् ।
अगणितगुरुमानलज्जयाऽसौ
स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥
सविनयमपराभिसृत्य साचि
स्मितसुभगैकलसत्कपोललक्ष्मीः ।
श्रवणनियमितेन तं निदध्यौ
सकलमिवासकलेन लोचनेन ॥ ५७ ॥
करुणमभिहितं त्रपा निरस्ता
तदभिमुखं च विमुक्तमश्रु ताभिः ।
प्रकुपितमभिसारणेऽनुनेतुं
प्रियमियती ह्यबलाजनस्य भूमिः ॥ ५८ ॥
असकलनयनेक्षितानि लज्जा
गतमलसं परिपाण्डुता विषादः ।
इति विविधमियाय तासु भूषां
प्रभवति मण्डयितुं वधूरनङ्गः ॥ ५९ ॥
अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातम् ।
स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ६०

भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः ।
अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं च ।६१।

रुचिकरमपि नार्थवद् बभूव
स्तिमितसमाधिशुचौ पृथातनूजे ।
ज्वलयति महतां मनांस्यमर्षे
न हि लभतेऽवसरं सुखाभिलाषः ।। ६२ ।।

स्वयं संराध्यैवं शतमखमखण्डेन तपसा
परोच्छित्त्या लभ्यामभिलषति लक्ष्मीं हरिसुते ।
मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः
सगन्धर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ।।६३।।

।। इति भारविकृतौ महाकाव्ये किराता-
र्जुनीये दशमः सर्गः ।। १० ।।

## ।। ११ ।। एकादशः सर्गः ।।

अथामर्षान्निसर्गाच्च जितेन्द्रियतया तया ।
आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ।। १ ।।

मुनिरूपोऽनुरूपेण सूनुना ददृशे पुरः ।
द्राघीयसा वयोतीतः परिक्लान्तः किलाध्वना ।। २ ।।

जटानां कीर्णया केशैः संहत्या परितः सितैः ।
पृक्तयेन्दुकरैरह्नः पर्यन्त इव संध्यया ।। ३ ।।

विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः ।
प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ।। ४ ।।

आसक्तभरनीकाशैरङ्गैः परिकृशैरपि ।
आद्यूनः सद्गृहिण्येव प्रायो यष्ट्यावलम्बितः ।। ५ ।।

गूढोऽपि वपुषा राजन् धाम्ना लोकाभिभाविना ।
अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः ॥ ६ ॥
जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः ।
चकाराक्रान्तलक्ष्मीकः ससाध्वसमिवाश्रमम् ॥ ७ ॥
अभितस्तं पृथासूनुः स्नेहेन परितस्तरे ।
अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥
आतिथेयीमथासाद्य सुतादपचितिं हरिः ।
विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥ ९ ॥
त्वया साधु समारम्भि नवे वयसि यत्तपः ।
ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः ॥ १० ॥
श्रेयसीं तव संप्राप्ता गुणसपदमाकृतिः ।
सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥ ११ ॥
शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः ।
आपातरम्या विषयाः पर्यन्तपरितापिनः ॥ १२ ॥
अन्तकः पर्यवस्थाता जन्मिनः संततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १३ ॥
चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता ।
विरुद्धः केवलं वेषः संदेहयति मे मनः ॥ १४ ॥
युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥ १५ ॥
प्रपित्सोः किं च ते मुक्ति निःस्पृहस्य कलेवरे ।
महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥ १६ ॥
भयकरः प्राणभृतां मृत्योर्भुज इवापरः ।
असिस्तव तपःस्थस्य न समर्थयते शमम् ॥ १७ ॥
जयमत्रभवान्नूनमरातिष्वभिलाषुकः ।
क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥ १८ ॥

यः करोति वधोदर्का निःश्रेयसकरीः क्रियाः ।
ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥ १९ ॥
मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ।
तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥ २० ॥
अभिद्रोहेण भूतानामर्जयन् गत्वरीः श्रियः ।
उदन्वानिव सिन्धूनामापदामेति पात्रताम् ॥ २१ ॥
या गम्याः सत्सहायानां यासु खेदो भयं यतः ।
तासां किं यन्न दुःखाय विपदामिव संपदाम् ॥ २२ ॥
दुरासदानरीनुग्रान् धृतेर्विश्वासजन्मनः ।
भोगान्भोगानिवाहेयानध्यास्यापन्न दुर्लभा ॥ २३ ॥
नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते ।
आसक्तास्तास्वमी मूढा वामशीला हि जन्तवः ॥ २४ ॥
कोऽपवादः स्तुतिपदे यदशीलेषु चञ्चलाः ।
साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव संपदः ॥ २५ ॥
कृतवानन्यदेहेषु कर्ता च विधुरं मनः ।
अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥
शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ।
विप्रलम्भोऽपि लाभाय सति प्रियसमागमे ॥ २७ ॥
तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः ।
तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा ॥ २८ ॥
युक्तः प्रमाद्यसि हितादपेतः परितप्यसे ।
यदि नेष्टात्मनः पीडा मा सञ्जि भवता जने ॥ २९ ॥
जन्मिनोऽस्य स्थितिं विद्वांल्लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीन्न्याय्यं न्यायाधारा हि साधवः ॥ ३० ॥
विजहीहि रणोत्साहं मा तपः साधु नीनशः ।
उच्छेदं जन्मनः कर्तुमेधि शान्तस्तपोधन ॥ ३१ ॥

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥
परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥ ३३ ॥
श्वस्त्वया सुखसंवित्तिः स्मरणीयाऽधुनातनी ।
इति स्वप्नोपमान् मत्वा कामान् मा गास्तदङ्गताम् ॥ ३४ ॥
श्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः ।
सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः ॥ ३५ ॥
विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया ।
प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥ ३६ ॥
व्याहृत्य मरुतां पत्याविति वाचमवस्थिते ।
वचः प्रश्रयगम्भीरमथोवाच कपिध्वजः ॥ ३७ ॥
प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम् ।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥ ३८ ॥
न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे ।
अप्रकम्प्यतयाऽन्येषामाम्नायवचनोपमम् ॥ ३९ ॥
अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम् ।
औदार्यादर्थसंपत्तेः शान्तं चित्तमृषेरिव ॥ ४० ॥
इदमीदृग्गुणोपेतं लब्धावसरसाधनम् ।
व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥ ४१ ॥
न ज्ञातं तात यत्नस्य पौर्वापर्यममुष्य ते ।
शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि ॥ ४२ ॥
अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि ।
व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ४३ ॥
श्रेयसोऽप्यस्य ते तात वचसो नास्मि भाजनम् ।
नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ४४ ॥

क्षत्रियस्तनयः पाण्डोरहं पार्थो धनंजयः ।
स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ४५ ॥
कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशम् ।
भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ४६ ॥
दुरक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः ।
नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४७ ॥
तेनानुजसहायेन द्रौपद्या च मया विना ।
भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८ ॥
हृतोत्तरीयां प्रसभं सभायामागतह्रियः ।
मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥ ४९ ॥
उपाधत्त सपत्नेषु कृष्णाया गुरुसंनिधौ ।
भावमानयने सत्याः सत्यङ्कारमिवान्तकः ॥ ५० ॥
तामैक्षन्त क्षणं सभ्या दुःशासनपुरःसराम् ।
अभिसायार्कमावृत्तां छायामिव महातरोः ॥ ५१ ॥
अयथार्थक्रियारम्भैः पतिभिः किं तवेक्षितैः ।
अरुध्येतामितीवास्या नयने बाष्पवारिणा ॥ ५२ ॥
सोढवान्नो दशामन्त्यां ज्यायानेव गुणप्रियः ।
सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता ॥ ५३ ॥
स्थित्यतिक्रान्तिभीरूणि स्वच्छान्याकुलितान्यपि ।
तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥ ५४ ॥
धार्तराष्ट्रैः सह प्रीतिर्वैरमस्मास्वसूयत ।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥ ५५ ॥
अपवादादभीतस्य समस्य गुणदोषयोः ।
असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव ॥ ५६ ॥
ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।
यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥ ५७ ॥

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥ ५८ ॥
शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ५९ ॥
अलङ्घ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृताम् ।
प्रियतां ज्यायसीं मागान्महतां केन तुङ्गता ॥ ६० ॥
तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः ।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥
स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते ।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥ ६२ ॥
दुरासदवनज्यायान् गम्यस्तुङ्गोऽपि भूधरः ।
न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता ॥ ६३ ॥
गुरून्कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुंधरा ।
येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥ ६४ ॥
उदाहरणमाशीःषु प्रथमे ते मनस्विनाम् ।
शुष्केऽशनिरिवामर्षो यैररातिषु पात्यते ॥ ६५ ॥
न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम् ।
नानित्यताशनेस्त्रस्यन् विविक्तं ब्रह्मणः पदम् ॥ ६६ ॥
प्रमार्ष्टुमयशःपङ्कमिच्छेयं छद्मना कृतम् ।
वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥ ६७ ॥
अपहस्येऽथवा सद्भिः प्रमादो वास्तु मे धियः ।
अस्थानविहितायासः कामं जिह्रेतु वा भवान् ॥ ६८ ॥
वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥ ६९ ॥
अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा ।
यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥

अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।
पुरुषोक्तिः कथं तस्मिन् ब्रूहि त्वं हि तपोधन ॥ ७१ ॥
कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।
योऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥ ७२ ॥
ग्रसमानमिवौजांसि सदसा गौरवेरितम् ।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ॥ ७३ ॥
यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ।
ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलेः ॥ ७४ ॥
स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।
कृच्छ्रेषु व्यर्थया यत्र भूयते भर्तुराज्ञया ॥ ७५ ॥
कथं वादीयतामर्वाङ्मुनिता धर्मरोधिनी ।
आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥ ७६ ॥
आसक्ता धूरियं रूढा जननी दूरगा च मे ।
तिरस्करोति स्वातन्त्र्यं ज्यायांश्चारवान्नृपः ॥ ७७ ॥
स्वधर्ममनुरुन्धन्ते नातिक्रममरातिभिः ।
पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥ ७८ ॥
विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि ।
आराध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥ ७९ ॥
इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः ।
अघोपघातं मघवा विभूत्यै भवोद्भवाराधनमादिदेश ॥८०॥

प्रीते पिनाकिनि मया सह लोकपालै-
र्लोकत्रयेऽपि विहिताप्रतिवार्यवीर्यः ।
लक्ष्मीं समुत्सुकयितासि भृशं परेषा-
मुच्चार्य वाचमिति तेन तिरोबभूवे ॥ ८१ ॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
एकादशः सर्गः ॥ ११ ॥

## ॥ १२ ॥ द्वादशः सर्गः ॥

( उद्गतावृत्तम् )

अथ वासवस्य वचनेन
रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितु
विधिवत्तपांसि विदधे धनंजयः ॥ १ ॥

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः ।
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः ।२।

वपुरिन्द्रियोपतपनेषु सततमसुखेषु पाण्डवः ।
व्याप नगपतिरिवस्थिरतां महतां हि धैर्यमविभाव्यवैभवम् ।३।

न पपात संनिहितपक्ति-
सुरभिषु फलेषु मानसम् ।
तस्य शुचिनि शिशिरे च पयस्य-
मृतायते हि सुतपः सुकर्मणाम् ॥ ४ ॥

न विसिस्मिये न विषसाद मुहुरलसतां न चाददे ।
सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ।५।

तपसा कृशं वपुरुवाह
स विजितजगत्त्रयोदयम् ।
त्रासजननमपि तत्त्वविदां कमि-
किमिवास्ति यन्न सुकरं मनस्विभिः ॥ ६ ॥

ज्वलतोऽनलादनुनिशीथमधिकरुचिरम्भसां निधेः ।
धैर्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः ॥ ७ ॥

जपतः सदा जपमुपांशु वदनमभितो विसारिभिः ।
तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमण्डलम् ।८।

कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ।
शैलपतिरिव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते ॥ ९ ॥

प्रविवेश गामिव कृशस्य
नियमसवनाय गच्छतः ।
तस्य पदविनमितो हिमवान्
गुरुतां नयन्ति हि गुणा न संहतिः ॥ १० ॥
परिकीर्णमुद्यतभुजस्य
भुवनविवरे दुरासदम् ।
ज्योतिरुपरि शिरसो विततं
जगृहे निजान्मुनिदिवौकसां पथः ॥ ११ ॥
रजनीषु राजतनयस्य
बहुलसमयेऽपि धामभिः ।
भिन्नतिमिरनिकरं न जहे शशि-
रश्मिसंगमयुजा नभः श्रिया ॥ १२ ॥
महता मयूखनिचयेन, शमितरुचि जिष्णुजन्मना ।
ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः १३
तमुदीरितारुणजटांशु-
मधिगुणशरासनं जनाः ।
रुद्रमनुदितललाटदृशं ददृशु-
र्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥
मरुतां पतिः स्विदहिमांशुरुत पृथुशिखः शिखी तपः ।
तप्तमसुकरमुपक्रमते न जनोऽयमित्यवयये स तापसैः ॥१५॥
न ददाह भूरुहवनानि
हरितनयधाम दूरगम् ।
न स्म नयति परिशोषमपः
सुसहं बभूव न च सिद्धतापसैः ॥ १६ ॥
विनयं गुणा इव विवेक-
मपनयभिदं नया इव ।

न्यायमवधय इवाशरणाः
शरणं ययुः शिवमथो महर्षयः ॥ १७ ॥
परिवीतमंशुभीरुदस्तदिनकरमयूखमण्डलैः ।
शंभुमुपहतदृशः सहसा न च ते निचायितुमभिप्रसेहिरे ॥१८॥
अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः ।
तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनम् ॥१९॥
ककुदे वृषस्य कृतबाहुमकृशपरिणाहशालिनी ।
स्पर्शसुखमनुभवन्तमुमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥ २० ॥
स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्तिना ।
साद्रिजलधिजलवाहपथं सदिगश्नुवानामिव विश्वमोजसा ॥२१
अनुजानुमध्यमवसक्त-
वितवपुषा महाहिना ।
लोकमखिलमिव भूमिभृता
रवितेजसामवधिनाधिवेष्टितम् ॥ २२ ॥
परिणाहिना तुहिनरा-
शिविशदमुपवीतसूत्रताम् ।
नीतमुरगमनुरञ्जयता शितिना
गलेन बिलसन्मरीचिना ॥ २३ ॥
प्लुतमालतीसितकपाल-
कुमुदमवरुद्धमूर्धजम् ।
शेषमिव सुरसरित्पयसां
शिरसा विसारि शशिधाम बिभ्रतम् ॥ २४ ॥
मुनयस्ततोऽभिमुखमेत्य
नयनविनिमेषनोदिताः ।
पाण्डुतनयतपसा जनितं
जगतामशर्म भृशमाचचक्षिरे ॥ २५ ॥

तरसैव कोऽपि भुवनैक-
पुरुष पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि रवेर-
भिभूय वृत्र इव भीमविग्रहः ॥ २६ ॥
स धनुर्महेषुधि बिभर्ति
कवचमसिमुत्तमं जटाः ।
वल्कमजिनमिति चित्रमिदं
मुनिताविरोधि न च नास्य राजते ॥ २७ ॥
चलनेऽवनिश्चलति तस्य
करणनियमे सदिङ्मुखम् ।
स्तम्भमनुभवति शान्तमरुद्-
ग्रहतारकागणयुतं नभस्तलम् ॥ २८ ॥
स तदोजसा विजितसार-
ममरदितिजोपसंहितम् ।
विश्वमिदमपिदधाति पुरा
किमिवास्ति यन्न तपसामदुष्करम् ॥ २९ ॥
विजिगीषते यदि जगन्ति
युगपदथ संजिहीर्षति ।
प्राप्तुमभवमभिवाञ्छति वा
वयमस्य नो विषहितुं क्षमा रुचः ॥ ३० ॥
किमुपेक्षसे कथय नाथ
न तव विदितं न किंचन ।
त्रातुमलमभयदार्हसि नस्त्वयि
मा स्म शासति भवत्पराभवः ॥ ३१ ॥
इति गां विधाय विरतेषु
मुनिषु वचनं समाददे ।

भिन्नजलधिजलनादगुरु
ध्वनयन्दिशां विवरमन्धकान्तकः ॥ ३२ ॥
बदरीतपोवननिवास-
निरतमवगात मान्यथा ।
धातुरुदयनिधने जगतां
नरमंशमादिपुरुषस्य गां गतम् ॥ ३३ ॥
द्विषतः परासिसिषुरेष
सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्यबला-
न्मदुपासनं विहितवान्महत्तपः ॥ ३४ ॥
अयमच्युतश्च वचनेन
सरसिरुहजन्मनः प्रजाः ।
पातुमसुरनिधनेन विभू
भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३५ ॥
सुरकृत्यमेतदवगम्य
निपुणमिति मूकदानवः ।
हन्तुमभिपतति पाण्डुसुतं
त्वरया तदत्र सह गम्यतां मया ॥ ३६ ॥
विवरेऽपि नैनमनिगूढ-
मभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया
विजयं व्यवस्यति वराहमायया ॥ ३७ ॥
निहते विडम्बितकिरात-
नृपतिवपुषा रिपौ मया ।
मुक्तनिशितविशिखः प्रसभं
मृगयाविवादमयमाचरिष्यति ॥ ३८ ॥

तपसा निपीडितकृशस्य
विरहितसहायसंपदः ।
सत्त्वविहितमतुलं भुजयो-
र्बलमस्य पश्यत मृधेऽधिकुप्यतः ॥ ३९ ॥
इति तानुदारमनुनीय
विषमहरिचन्दनालिना ।
धर्मजनितपुलकेन लसद्-
गजमौक्तिकावलिगुणेन वक्षसा ॥ ४० ॥
वदनेन पुष्पितलतान्त-
नियमितविलम्बिमौलिना ।
बिभ्रदरुणनयनेन रुचं
शिखिपिच्छलाञ्छितकपोलभित्तिना ॥ ४१ ॥
बृहदुद्वहञ्जलदनादि
धनुरुपहितैकमार्गणम् ।
मेघनिचय इव संववृते
रुचिरः किरातपृतनापतिः शिवः ॥ ४२ ॥
अनुकूलमस्य च विचिन्त्य
गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृतै-
र्महति वनेचरचमूर्विनिर्ममे ॥ ४३ ॥
विरचय्य काननविभाग-
मनुगिरमथेश्वराज्ञया ।
भीमनिनदपिहितोरुभुवः
परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४४ ॥
क्षुभिताभिनिःसृतविभिन्न-
शकुनिमृगयूथनिःस्वनैः ।

पूर्णपृथुवनगुहाविवरः
सहसा भयादिव ररास भूधरः ॥ ४५ ॥
न विरोधिनी रुषमियाय
पथि मृगविहङ्गसंहतिः ।
घ्नन्ति सहजमपि-भूरिभियः
सममागताः सपदि वैरमापदः ॥ ४६ ॥
चमरीगणैर्गणबलस्य
बलवति भयेऽप्युपस्थिते ।
वंशविततिषु विषक्तपृथु-
प्रियबालवालधिभिराददे धृतिः ॥ ४७ ॥
हरसैनिकाः प्रतिभयेऽपि
गजमदसुगन्धिकेसरैः ।
स्वस्थमभिददृशिरे सहसा
प्रतिबोधजृम्भितमुखैर्मृगाधिपैः ॥ ४८ ॥
बिभरांबभूवुरपवृत्त-
जठरशफरीकुलाकुलाः ।
पङ्कविषमिततटाः सरितः
करिरुग्णचन्दनरसारुणं पयः ॥ ४९ ॥
महिषक्षतागुरुतमाल-
नलदसुरभिः सदागतिः ।
व्यस्तशुकनिभशिलाकुसुमः
प्रणुदन्ववौ वनसदां परिश्रमम् ॥ ५० ॥
मथिताम्भसो रयविकीर्ण-
मृदितकदलीगवेधुकाः ।
क्लान्तजलरुहलताः सरसी-
र्विदधे निदाघ इव सत्त्वसम्प्लवः ॥ ५१ ॥

इति चालयन्नचलसानु-
वनगहनजानुमापतिः ।
प्राप मुदितहरिणीदशन-
क्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥ ५२ ॥
स तमाससाद घननील-
मभिमुखमुपस्थितं मुनेः ।
पोत्रनिकषणविभिन्नभुवं
दनुजं दधानमथ सौकरं वपुः ॥ ५३ ॥
कच्छान्ते सुरसरितो निधाय
सेनामन्वीतः स कतिपयैः किरातवर्यैः ।
प्रच्छन्नस्तरुगहनैः सगुल्मजालै-
र्लक्ष्मीवाननुपदमस्य संप्रतस्थे ॥ ५४ ॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
द्वादशः सर्गः ॥ १२ ॥

## ॥ १३ ॥ त्रयोदशः सर्गः ॥

वपुषां परमेण भूधराणा-
मथ संभाव्यपराक्रमं बिभेदे ।
मृगमाशु विलोकयांचकार
स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥ १ ॥
स्फुटबद्धसटोन्नतिः स दूरा-
दभिधावन्नवधीरितान्यकृत्यः ।
जयमिच्छति तस्य जातशङ्के
मनसीमं मुहुराददे वितर्कम् ॥ २ ॥
घनपोत्रविदीर्णशालमूलो
निबिडस्कन्धनिकाषरुग्णवप्रः ।

अयमेकचरोऽभिवर्तते मां
समरायेव समाजुहूषमाणः ॥ ३ ॥
इह वीतभयास्तपोऽनुभावा-
ज्जहति व्यालमृगाः परेषु वृत्तिम् ।
मयि तां सुतरामयं विधत्ते
विकृतिः किं नु भवेदियं नु माया ॥ ४ ॥
अथवैष कृतज्ञयेव पूर्वं
भृशमासेवितया रुषा न मुक्तः ।
अवधूय विरोधिनीः किमारा-
न्मृगजातीरभियाति मां जवेन ॥ ५ ॥
न मृगः खलु कोऽप्ययं जिघांसुः
स्खलति ह्यत्र तथा भृशं मनो मे ।
विमलं कलुषीभवच्च चेतः
कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥
मुनिरस्मि निरागसः कुतो मे
भयमित्येष न भूयतेऽभिमानः ।
परवृद्धिषु बद्धमत्सराणां
किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥ ७ ॥
दनुजः स्विदयं क्षपाचरो वा
वनजे नेति बलं बतास्ति सत्त्वे ।
अभिभूय तथा हि मेघनीलः
सकलं कम्पयतीव शैलराजम् ॥ ८ ॥
अयमेव मृगव्यसत्रकामः
प्रहरिष्यन्मयि मायया शमस्थे ।
पृथुभिर्ध्वजिनीरवैरकार्षी-
च्चकितोद्भ्रान्तमृगानि काननानि ॥ ९ ॥

बहुश: कृतसत्कृतेर्विधातु
प्रियमिच्छन्नथवा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगाद्
गणमाशिश्रियदाकुलं तिरश्चाम् ॥ १० ॥
अवलीढसनाभिरश्वसेन:
प्रसभं खांडवजातवेदसा वा ।
प्रतिकर्तुमुपागत: समन्यु:
कृतमन्युर्यदि वा वृकोदरेण ॥ ११ ॥
बलशालितया यथा तथा वा
धियमुच्छेदवरामयं दधान: ।
नियमेन मया निबर्हणीय:
परमं लाभमरातिभङ्गमाहु: ॥ १२ ॥
कुरु तात तपांस्यामार्गदायी
विजयायेत्यलमन्वशान्मुनिर्माम् ।
बलिनश्च वधादृतेऽस्य शक्यं
व्रतसंरक्षणमन्यथा न कर्तुम् ॥ १३ ॥
इति तेन विचिन्त्य चापनाम
प्रथमं पौरुषचिह्नमाललम्बे ।
उपलब्धगुण: परस्य भेदे
सचिव: शुद्ध इवाददे च बाण: ॥ १४ ॥
अनुभाववता गुरु स्थिरत्वा-
दविसंवादि धनुर्धनंजयेन ।
स्वबलव्यसनेऽपि पीड्यमानं
गुणवन्मित्रमिवानतिं प्रपेदे ॥ १५ ॥
प्रविकर्षनिनादभिन्नरन्ध्र:
पदविष्टम्भनिपीडितस्तदानीम् ।

अधिरोहति गाण्डिवं महेषौ
सकलः संशयमारुरोह शैलः ॥ १६ ॥
ददृशेऽथ सविस्मयं शिवेन
स्थिरपूर्णायतचापमण्डलस्थः ।
रचितस्तिसृणां पुरां विधातुं
वधमात्मेव भयानकः परेषाम् ॥ १७ ॥
विचकर्ष च संहितेषुरुच्चै-
श्चरणास्कन्दननामिताचलेन्द्रः ।
धनुरायतभोगवासुकिज्या-
वदनग्रन्थिविमुक्तवह्नि शंभुः ॥ १८ ॥
स भवस्य भवक्षयैकहेतोः
सितसप्तेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं
प्रकृतिप्रत्यययोरिवानुबन्धः ॥ १९ ॥
अथ दीपितवारिवाहवर्त्मा
रववित्रासितवारणादवार्यः ।
निपपात जवादिषुः पिनाका-
न्महतोऽभ्रादिव वैद्युतः कृशानुः ॥ २० ॥
व्रजतोऽस्य बृहत्पतत्रजन्मा
कृतताक्ष्योपनिपातवेगशङ्कः ।
प्रतिनादमहान्महोरगाणां
हृदयश्रोत्रभिदुत्पपात नादः ॥ २१ ॥
नयनादिव शूलिनः प्रवृत्तै-
र्मनसोऽप्याशुतरं यतः पिशङ्गैः ।
विदधे विलसत्तडिल्लताभैः
किरणैर्व्योमनि मार्गणस्य मार्गः ॥ २२ ॥

अपयन्धनुषः शिवान्तिकस्थै-
　　विवरेसद्भिरभिख्यया जिहानः ।
युगपद्ददृशे विशन्वराहं
　　तदुपोढैश्च नभश्चरैः पृषत्कः ॥ २३ ॥
स तमालनिभे रिपौ सुराणां
　　घननीहार इवाविषक्तवेगः ।
भयविप्लुतमीक्षितो नभः स्थै-
　　र्जगतीं ग्राह इवापगां जगाहे ॥ २४ ॥
सपदि प्रियरूपपर्वरेखः
　　सितलोहाग्रनखः खमाससाद ।
कुपितान्तकतर्जनाङ्गुलि-
　　श्रीर्व्यथयन् प्राणभृतः कपिध्वजेषुः ॥ २५ ॥
परमास्त्रपरिग्रहोरु तेजः
　　स्फुरदुल्काकृति विक्षिपन्वनेषु ।
स जवेन पतन् परःशतानां
　　पततां व्रात इवारवं वितेने ॥ २६ ॥
अविभावितनिष्क्रमप्रयाणः
　　शमितायाम इवातिरंहसा सः ।
स पूर्वतरं नु चित्तवृत्तेर-
　　पतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥
स वृषध्वजसायकावभिन्नं
　　जयहेतुः प्रतिकायमेषणीयम् ।
लघु साधयितुं शरः प्रसेहे
　　विधिनेवार्थमुदीरितं प्रयत्नः ॥ २८ ॥
अविवेकवृथाश्रमाविवार्थं
　　क्षयलोभाविव संश्रितानुरागम् ।

विजिगीषुमिवानयप्रमादा-
ववसादंविशिखौ विनिन्यतुस्तम् ॥ २९ ॥
अथ दीर्घतमं तमः प्रवेक्ष्यन्
सहसा रुग्णरयः स संभ्रमेण ।
निपतन्तमिवोष्णरश्मि-
मुर्व्यां वलयीभूततरुं धरां च मेने ॥ ३० ॥
स गतः क्षितिमुष्णशोणितार्द्रैः
खुरदंष्ट्राग्रनिपातदारिताश्मा ।
असुभिः क्षणमीक्षितेन्द्रसूनु-
र्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥
स्फुटपौरुषमापपात पार्थ-
स्तमथ प्राज्यशरः शरं जिघृक्षुः ।
न तथा कृतवेदिनां करिष्यन्
प्रियतामेति यथा कृतावदानः ॥ ३२ ॥
उपकार इवासति प्रयुक्तः
स्थितिमप्राप्य मृगे गतः प्रणाशम् ।
कृतशक्तिरधोमुखो गुरुत्वा-
ज्जनितव्रीड इवात्मपौरुषेण ॥ ३३ ॥
स समुद्धरता विचिन्त्य तेन
स्वरुचं कीर्तिमिवोत्तमां दधानः ।
अनुयुक्त इव स्ववार्तमुच्चैः
परिरेभे नु भृशं विलोचनाभ्याम् ॥ ३४ ॥
तत्र कार्मुकभृतं महाभुजः
पश्यति स्म सहसा वनेचरम् ।
संनिकाशयितुमग्रतः स्थितं
शासनं कुसुमचापविद्विषः ॥ ३५ ॥

स प्रयुज्य तनये महीपते-
रात्मजातिसदृशीं किलानतिम् ।
सान्त्वपूर्वमभिनीतिहेतुकं
वक्तुमित्थमुपचक्रमे वचः ॥ ३६ ॥
शान्तता विनययोगि मानसं
भूरि धाम विमलं तपः श्रुतम् ।
प्राह ते नु सदृशी दिवौकसा-
मन्ववायमवदातमाकृतिः ॥ ३७ ॥
दीपितस्त्वमनुभावसंपदा
गौरवेण लघयन्महीभृतः ।
राजसे मुनिरपीह कारय-
न्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥
तापसोऽपि विभुतामुपेयिवा-
नास्पदं त्वमसि सर्वसंपदाम् ।
दृश्यते हि भवतो विना जनै-
रन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥
विस्मयः क इव वा जयश्रिया
नैव मुक्तिरपि ते दवीयसी ।
ईप्सितस्य न भवेदुपाश्रयः
कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥
ह्रेपयन्नहिमतेजसं त्विषा
स त्वमित्थमुपपन्नपौरुषः ।
हर्तुमर्हसि वराहभेदिनं
नैनमस्मदधिपस्य सायकम् ॥ ४१ ॥
स्मर्यते तनुभृतां सनातनं
न्याय्यमाचरितमुत्तमैर्नृभिः ।

ध्वंसते यदि भवादृशस्ततः
क: प्रयातु वद वर्त्मना ॥ ४२ ॥
आकुमारमुपदेष्टुमिच्छव:
संनिवृत्तिमपथान्महापद: ।
योगशक्तिजितजन्ममृत्यव:
शीलयन्ति यतय: सुशीलताम् ॥ ४३ ॥
तिष्ठतां तपसि पुण्यमासजन्
संपदोऽनुगुणयन् सुखैषिणाम् ।
योगिनां परिणमन् विमुक्तये
केन नास्तु विनय: सतां प्रिय: ॥ ४४ ॥
नूनमत्रभवत: शराकृतिं
सर्वथायमनुयाति सायक: ।
सोऽयमित्यनुपपन्नसंशय:
कारितस्त्वमपथे पदं यथा ॥ ४५ ॥
अन्यदीयविशिखे न केवलं
नि:स्पृहस्य भवितव्यमाहृते ।
निघ्नत: परनिबर्हितं मृगं
व्रीडितव्यमपि ते सचेतस: ॥ ४६ ॥
सन्ततं निशमयन्त उत्सुका
यै: प्रयान्ति मुदमस्य सूरय: ।
कीर्तितानि हसितेऽपि तानि
यं व्रीडयन्ति चरितानि मानिनम् ॥ ४७ ॥
अन्यदोषमिव स स्वकं गुणं
ख्यापयेत् कथमधृष्टताजड: ।
उच्यते स खलु कार्यवत्तया
धिग्विभिन्नबुधसेतुमर्थिताम् ॥ ४८ ॥

दुर्वचं तदथ मा स्म भून्मृ-
गस्त्वय्यसौ तदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः
प्रत्यपत्स्यत शितेन पत्रिणा ॥ ४९ ॥
को न्विमं हरितुरङ्गमायुध-
स्थेयसीं दधतमङ्गसंहतिम् ।
वेगवत्तरमृते चमूपते-
र्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥
मित्रमिष्टमुपकारि संशये
मेदिनीपतिरयं तथा च ते ।
तं विरोध्य भवता निरासि
मा सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥
लभ्यमेकसुकृतेन दुर्लभा
रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां
मित्रलाभमनु लाभसंपदः ॥ ५२ ॥
चञ्चलं वसु नितान्तमुन्नता
मेदिनीमपि हरन्त्यरातयः ।
भूधरस्थिरमुपेयमागतं
माऽवमंस्त सुहृदं महीपतिम् ॥ ५३ ॥
जेतुमेव भवता तपस्यते
नायुधानि दधते मुमुक्षवः ।
प्राप्स्यते च सकलं महीभृता
संगतेन तपसः फलं त्वया ॥ ५४ ॥
वाजिभूमिरिभराजकाननं
सन्ति रत्ननिचयाश्च भूरिशः ।

काञ्चनेन किमिवास्य पत्त्रिणा
केवलं न सहते विलङ्घनम् ॥ ५५ ॥
सावलेपमुपलिप्सिते परै-
रभ्युपैति विकृतिं रजस्यपि ।
अर्थितस्तु न महान्समीहते
जीवितं किमु धनं धनायितुम् ॥ ५६ ॥
तत्तदीयविशिखातिसर्जना-
दस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव
प्रेम युक्तमितरेतराश्रयम् ॥ ५७ ॥
नाभियोक्तुमनृतं त्वमिष्यसे
कस्तपस्विविशिखेषु चादरः ।
सन्ति भूभृति शरा हि नः
परे ये पराक्रमवसूनि वज्रिणः ॥ ५८ ॥
मार्गणैरथ तव प्रयोजनं
नाथसे किमु पतिं न भूभृतः ।
त्वद्विधं सुहृदमेत्य सोऽर्थिनं
किं न यच्छति विजित्य मेदिनीम् ॥ ५९ ॥
तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितं वृथा ।
सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनाम् ॥ ६० ॥
शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदं निरस्यतः प्रार्थनाऽधिकबले विपत्फला ॥६१॥
अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः ।
जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधम् ॥ ६२ ॥
अभ्यघानि मुनिचापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः ।
अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥६३॥

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् ॥ ६४ ॥
यष्टुमिच्छसि पितॄन्न सांप्रतं
संवृतोऽर्चिचयिषुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः
किं मृगेऽङ्ग विशिखं न्यवीविशः ॥ ६५ ॥
सज्जनोऽसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते ।
वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥६६॥
अस्त्रवेदविदयं महीपतिः पर्वतीय इति माऽवजीगणः ।
गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लम्भितः ।६७।
तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः ।
बाणमत्रभवते निजं दिशन्नाप्नुहि त्वमपि सर्वसंपदः ॥ ६८ ॥
आत्मनीनमुपतिष्ठते गुणाः
संभवन्ति विरमन्ति चापदः ।
इत्यनेकफलभाजी मा स्म
भूदर्थिता कथमिवार्यसंगमे ॥ ६९ ॥
दृश्यतामयमनोकहान्तरे
तिग्महेतिपृतनाभिरन्वितः ।
साहिवीचिरिव सिन्धुरुद्धतो
भूपतिः समयसेतुवारितः ॥ ७० ॥
सज्यं धनुर्वहति योऽहिपतिस्थवीयः
स्थेयाञ्जयन्हरितुरंगकेतुलक्ष्मीम् ।
अस्यानुकूलयमतिं मतिमन्ननेन
सख्या सुखं समभियास्यसि चिन्तितानि ।७१।

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
त्रयोदशः सर्गः ॥ १४ ॥

## ॥ १४ ॥ चतुर्दशः सर्गः ॥

ततः किरातस्य वचोभिरुद्धतैः
पराहता शैल इवार्णवाम्बुभिः ।
जहौ न धैर्यं कुपितोऽपि पाण्डवः
सुदुर्ग्रहान्तःकरणा हि साधवः ॥ १ ॥
सलेशमुल्लिङ्गितशात्रवेङ्गितः
कृती गिरां विस्तरतत्त्वसंग्रहे ।
अयं प्रमाणीकृतकालसाधनः
प्रशान्तसंरम्भ इवाददे वचः ॥ २ ॥
विविक्तवर्णाभरणा सुखश्रुतिः
प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां
प्रसन्नगम्भीरपदा सरस्वती ॥ ३ ॥
भवन्ति ते सभ्यतमा विपश्चितां
मनोगतं वाचि निवेशयन्ति ये ।
नयन्ति तेष्वप्युपपन्ननैपुणा
गभीरमर्थं कतिचित्प्रकाशताम् ॥ ४ ॥
स्तुवन्ति गुर्वीमभिधेयसंपदं
विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ
सुदुर्लभाः सर्वमनोरमा गिरः ॥ ५ ॥
समस्य संपादयता गुणैरिमां
त्वया समारोपितभार भारतीम् ।
प्रगल्भमात्मा धुरि धुर्यं वाग्मिनां
वनेचरेणापि सताधिरोपितः ॥ ६ ॥

प्रयुज्य सामाचरितं विलोभनं
भयं विभेदाय धियः प्रदर्शितम् ।
तथाभियुक्तं च शिलीमुखार्थिना
यथेतरन्न्याय्यमिवावभासते ॥ ७ ॥
विरोधि सिद्धेरिति कर्तुमुद्यतः
स वारितः किं भवता न भूपतिः ।
हिते नियोज्यः खलु भूति-
मिच्छता सहार्थनाशेन नृपोऽनुजीविना ॥ ८ ॥
ध्रुवं प्रणाशः प्रहितस्य पत्रिणः
शिलोच्चये तस्य विमार्गणं नयः ।
न युक्तमत्रार्यजनातिलङ्घनं
दिशत्यपायं हि सतामतिक्रमः ॥ ९ ॥
अतीतसंख्या विहिता ममाग्निना
शिलीमुखाः खाण्डवमत्तुमिच्छता ।
अनादृतस्यामरसायकेष्वपि
स्थिता कथं शैलजनाशुगे धृतिः ॥ १० ॥
यदि प्रमाणीकृतमार्यचेष्टितं
किमित्यदोषेण तिरस्कृता वयम् ।
अयातपूर्वा परिवादगोचरं
सतां हि वाणी गुणमेव भाषते ॥ ११ ॥
गुणापवादेन तदन्यरोपणाद्
भृशाधिरूढस्य समञ्जसं जनम् ।
द्विधेव कृत्वा हृदयं निगूहतः
स्फुरन्नसाधोर्विवृणोति वागसिः ॥ १२ ॥
वनाश्रयाः कस्य मृगाः परिग्रहाः
शृणाति यस्तान्प्रसभेन तस्य ते ।

प्रहीयतामत्र नृपेण मानिता न
मानिता चास्ति भवन्ति च श्रियः ॥ १३ ॥
न वर्त्म कस्मैचिदपि प्रदीयता-
मिति व्रतं मे विहितं महर्षिणा ।
जिघांसुरस्मान्निहतो मया मृगो
व्रताभिरक्षा हि सतामलंक्रिया ॥ १४ ॥
मृगान्विनिघ्नन्मृगयुः स्वहेतुना
कृतोपकारः कथमिच्छतां तपः ।
कृपेति चेदस्तु मृगः क्षतः क्षणा-
दनेन पूर्वं न मयेति का गतिः ॥ १५ ॥
अनायुधे सत्त्वजिघांसिते मुनौ
कृपेति वृत्तिर्महतामकृत्रिमा ।
शरासनं बिभ्रति सज्यसायकं
कृतानुकम्पः स कथं प्रतीयते ॥ १६ ॥
अथो शरस्तेन मदर्थमुज्झितः
फलं च तस्य प्रतिकायसाधनम् ।
अविक्षते तत्र मयात्मसात्कृते
कृतार्थता नन्वधिका चमूपतेः ॥ १७ ॥
यदात्थ कामं भवता स याच्यता-
मिति क्षमं नैतदनल्पचेतसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः
परावनत्या मलिनीकृताः श्रियः ॥ १८ ॥
अभूतमासज्य विरुद्धमीहितं
बलादलभ्यं तव लिप्सते नृपः ।
विजानतोऽपि ह्यनयस्य रौद्रतां
भवत्यपाये परिमोहिनी मतिः ॥ १९ ॥

असिः शरा वर्म धनुश्च नोच्चकै-
विविच्य किं प्रार्थितमीश्वरेण ते ।
अथास्ति शक्तिः कृतमेव याच्ञया
न दूषितः शक्तिमतां स्वयंग्रहः ॥ २० ॥
सखा स युक्तः कथितः कथं त्वया
यदृच्छयाऽसूयति यस्तपस्यते ।
गुणार्जनोच्छ्रायविरुद्धबुद्धयः
प्रकृत्यमित्रा हि सतामसाधवः ॥ २१ ॥
वयं क्व वर्णाश्रमरक्षणोचिताः
क्व जातिहीना मृगजीवितच्छिदः ।
सहापकृष्टैर्महतां न संगतं
भवन्ति गोमायुसखा न दन्तिनः ॥ २२ ॥
परोऽवजानाति यदज्ञताजड-
स्तदुन्नतानां न विहन्ति धीरताम् ।
समानवीर्यान्वयपौरुषेषु यः
करोत्यतिक्रान्तिमसौ तिरस्क्रिया ॥ २३ ॥
यदा विगृह्णाति हतं तदा यशः
करोति मैत्रीमथ दूषिता गुणाः ।
स्थितिं समीक्ष्योभयथा परीक्षकः
करोत्यवज्ञोपहतं पृथग्जनम् ॥ २४ ॥
मया मृगान्हन्तुरनेन हेतुना
विरुद्धमाक्षेपवचस्तितिक्षितम् ।
शरार्थमेष्यत्यथ लप्स्यते गतिं
शिरोमणिं दृष्टिविषाज्जिघृक्षतः ॥ २५ ॥
इतीरिताकूतमनीलवाजिनं
जयाय दूतः प्रतितर्ज्य तेजसा ।

ययौ समीपं ध्वजिनीमुपेयुषः
प्रसन्नरूपस्य विरूपचक्षुषः ॥ २६ ॥
ततोऽपवादेन पताकिनीपते
श्चचाल निर्ह्रादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्वती
निनादमम्भोनिधिवीचिसंहतिः ॥ २७ ॥
रणाय जैत्रः प्रदिशन्निव त्वरां
तरङ्गितालम्बितकेतुसंततिः ।
पुरो बलानां सघनाम्बुशीकरः
शनैः प्रतस्थे सुरभिः समीरणः ॥ २८ ॥
जयारवक्ष्वेडितनादमूर्च्छितः
शरासनज्यातलवारणध्वनिः ।
असंभवन्भूधरराजकुक्षिषु
प्रकम्पयन्गामवतस्तरे दिशः ॥ २९ ॥
निशातरौद्रेषु विकासतां गतैः
प्रदीपयद्भिः ककुभामिवान्तरम् ।
वनेसदां हेतिषु भिन्नविग्रहै-
र्विपुस्फुरे रश्मिमतो मरीचिभिः ॥ ३० ॥
उदूढवक्षःस्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमायतं बभौ
विभुर्गुणानामुपरीव मध्यगः ॥ ३१ ॥
सुगेषु दुर्गेषु च तुल्यविक्रमै-
र्जवादहंपूर्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ
वनं निरुच्छ्वासमिवाकुलाकुलम् ॥ ३२ ॥

तिरोहितश्वभ्रनिकुञ्जरोधसः
　　समश्नुवानाः सहसा तिरिक्तताम् ।
किरातसैन्यैरपिधाय रेचिता
　　भुवः क्षणं निम्नतयेव भेजिरे ॥ ३३ ॥
पृथूरुपर्यस्तबृहल्लताततिर्ज-
　　वानिलाघूर्णितशालचन्दना ।
गणाधिपानां परितः प्रसा-
　　रिणी वनान्यवाञ्चीव चकार संहतिः ॥३४॥
ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षामभिवैकवारणम् ।
परिज्वलन्तं निधनाय भूभृतां दहन्तमाशा इव जातवेदसम् ३५
अनादरोपात्तधृतैकसायकं जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥ ३६ ॥
निषण्णमापत्प्रतिकारकारणे
　　शरासने धैर्य इवानपायिनी ।
अलङ्घनीयं प्रकृतावपि स्थितं
　　निवातनिष्कम्पमिवापगापतिम् ॥ ३७ ॥
उपेयुषीं बिभ्रतमन्तकद्युतिं
　　वधाददूरे पतितस्य दंष्ट्रिणः ।
पुरः समावेशितसत्पशुं द्विजैः
　　पतिं पशूनामिव हूतमध्वरे ॥ ३८ ॥
निजेन नीतं विजितान्यगौरवं
　　गभीरतां धैर्यगुणेन भूयसा ।
वनोदयेनेव घनोरुवीरुधा
　　समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥
महर्षभस्कन्धमनूनकन्धरं
　　बृहच्छिलावप्रघनेन वक्षसा ।

समुज्जिहीर्षुं जगतीं महाभरां
महावराहं महतोऽर्णवादिव ॥ ४० ॥
हरिन्मणिश्याममुदग्रविग्रहं
प्रकाशमानं परिभूय देहिनः ।
मनुष्यभावे पुरुषं पुरातनं
स्थितं जलादर्श इवांशुमालिनम् ॥ ४१ ॥
गुरुक्रियारम्भफलैरलंकृतं
गतिं प्रतापस्य जगत्प्रमाथिनः ।
गणाः समासेदुरनीलवाजिनं
तपात्यये तोयघना घना इव ॥ ४२ ।
यथास्वमाशंसितविक्रमाः पुरा
मुनिप्रभावक्षततेजसः परे ।
ययुः क्षणादप्रतिपत्तिमूढतां
महानुभावः प्रतिहन्ति पौरुषम् ॥ ४३ ॥
ततः प्रजह्रे सममेव तत्र तैर-
पेक्षितान्योन्यबलोपपत्तिभिः ।
महोदयानामपि सङ्घवृत्तितां
सहायसाध्याः प्रदिशन्ति सिद्धयः ॥ ४४ ॥
किरातसैन्यादुरुचापनोदिताः
समं समुत्पेतुरुपात्तरंहसः ।
महावनादुन्मनसः खगा इव
प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥ ४५ ॥
गभीररन्ध्रेषु भृशं महीभृतः
प्रतिस्वनैरुन्नमितेन सानुषु ।
धनुर्निनादेन जवादुपेयुषा
विभिद्यमाना इव दध्वनुर्दिशः ॥ ४६ ॥

विधूनयन्ती गहनानि भूरुहां
तिरोहितोपान्तनभोदिगन्तरा ।
महीयसी वृष्टिरिवानिलेरिता
रवं वितेने गणमार्गणावलिः ॥ ४७ ॥
अयीमृतूनामनिलाशिनः सतः
प्रयाति पोषं वपुषि प्रहृष्यतः ।
रणाय जिष्णोर्विदुषेव सत्वरं
घनत्वमीये शिथिलेन वर्मणा ॥ ४८ ॥
पतत्सु शस्त्रेषु वितत्य रोदसी
समन्ततस्तस्य धनुर्दुधूषतः ।
सरोषमुल्केव पपात भीषणा
बलेषु दृष्टिर्विनिपातशंसिनी ॥ ४९ ॥
दिशः समूहन्निव विक्षिपन्निव
प्रभां रवेराकुलयन्निवानिलम् ।
मुनिश्चचाल क्षयकालदारुणः
क्षितिं सशैलां चलयन्निवेषुभिः ॥ ५० ॥
विमुक्तमाशंसितशत्रुनिर्जयै-
रनेकमकावसरं वनेचरैः ।
स निर्जघानायुधमन्तरा शरैः
क्रियाफलं काल इवातिपातितः ॥ ५१ ॥
गतैः परेषामविभावनीयतां
निवारयद्भिर्विपदं विदूरगैः ।
भृशं बभूवोपचितो बृहत्फलैः
शरैरुपायैरिव पाण्डुनन्दनः ॥ ५२ ॥
दिवः पृथिव्याः ककुभां नु मण्डला-
त्पतन्ति बिम्बादुत तिग्मतेजसः ।

सकृद्विकृष्टादथ कार्मुकान्मुनेः
　　शराः शरीरादिति तेऽभिमेनिरे ॥ ५३ ॥
गणाधिपानामविधाय निर्गतैः
　　परासुतां मर्मविदारणैरपि ।
जवादतीये हिमवानधोमुखैः
　　कृतापराधैरिव तस्य पत्रिभिः ॥ ५४ ॥
द्विषां क्षतीर्याः प्रथमे शिलीमुखा
　　विभिद्य देहावरणानि चक्रिरे ।
न तासु पेते विशिखैः पुनर्मुने-
　　ररुन्तुदत्वं महतां ह्यगोचरः ॥ ५५ ॥
समुज्झिता यावदराति निर्यती
　　सहैव चापान्मुनिबाणसंहतिः ।
प्रभा हिमांशोरिव पङ्कजावलिं
　　निनाय संकोचमुमापतेश्चमूम् ॥ ५६ ॥
अजिह्ममोजिष्ठममोघमक्लमं
　　क्रियासु बह्वीषु पृथङ्नियोजितम् ।
प्रसेहिरे सादयितुं न सादिताः
　　शरौघमुत्साहमिवास्य विद्विषः ॥ ५७ ॥
शिवध्वजिन्यः प्रतियोधमग्रतः
　　स्फुरन्तमुग्रेषुमयूखमालिनम् ।
तमेकदेशस्थमनेकदेशगा
　　निदध्युरर्कं युगपत्प्रजा इव ॥ ५८ ॥
मुनेः शरौघेण तदुग्ररंहसा
　　बलं प्रकोपादिव विष्वगायता ।
विधूनितं भ्रान्तिमियाय सङ्गिनी
　　महानिलेनेव निदाघजं रजः ॥ ५९ ॥

तपोबलेनैवं विधाय भूयसी-
स्तनूरदृश्याः स्विदिषून्निरस्यति ।
अमुष्य मायाविहतं निहन्ति नः
प्रतीपमागत्य किमु स्वमायुधम् ॥ ६० ॥

हृता गुणैरस्य भयेन वा मुने-
स्तिरोहिताः स्वित्प्रहरन्ति देवताः ।
कथं न्वमी संततमस्य सायका
भवन्त्यनेके जलधेरिवोर्मयः ॥ ६१ ॥

जयेन कच्चिद्विरमेदयं रणा-
द्भवेदपि स्वस्ति चराचराय वा ।
तताप कीर्णा नृपसूनुमार्गणै-
रिति प्रतर्काकुलिता पताकिनी ॥ ६२ ॥

अमर्षिणा कृत्यमिव क्षमाश्रयं
मदोद्धतेनेव हितं प्रियं वचः ।
बलीयसा तद्विधिनेव पौरुषं बलं
निरस्तं न रराज जिष्णुना ॥ ६३ ॥

प्रतिदिशं प्लवगाधिपलक्ष्मणा
विशिखसंहतितापितमूर्तिभिः ।
रविकरग्लपितैरिव वारिभिः
शिवबलैः परिमण्डलता दधे ॥ ६४ ॥

प्रविततशरजालच्छन्नविश्वान्तराले
विधुवति धनुराविर्मण्डलं पाण्डुसूनौ ।
कथमपि जयलक्ष्मीर्भीतभीता विहातुं
विषमनयनसेनापक्षपातं विषेहे ॥

॥ इति भारविकृतौ महाकाव्ये
किरातार्जुनीये चतुर्दशः सर्गः ॥ १४ ॥

## ॥ १५ ॥ पञ्चदशः सर्गः ॥

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥ १ ॥
अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।
मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः ॥ २ ॥
खण्डिताशंसया तेषां पराङ्मुखतया तया ।
आविवेश कृपा केतौ कृतोच्चैर्वानरं नरम् ॥ ३ ॥
आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।
व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥ ४ ॥
स सासिः सासुसूः सासी येयायेयाययाययः ।
ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन् ॥ ५ ॥

(एकाक्षरपदः)

त्रासजिह्मं यतश्चैतान् मन्दमेवान्वियाय सः ।
नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः ॥ ६ ॥
अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना ।
सेनान्या ते जगदिरे किञ्चिदायस्तचेतसा ॥ ७ ॥

(निरोष्ठ्यम्)

मा विहासिष्ट समरं समरन्तव्यसंयतः ।
क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥ ८ ॥

(पादान्तादियमकम्)

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः ।
अमी वो मोघमुद्गूर्णा हसन्तीव महासयः ॥ ९ ॥
वनेऽवने वनसदां मार्गं मार्गमुपेयुषाम् ।
बाणैर्बाणैः समासक्तं शङ्केऽशं केन शाम्यति ॥ १० ॥

(पादादियमकम्)

पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्तिभिः ।
गुर्वीं कामापदं हन्तुं कृतमावृत्तिसाहसम् ॥ ११ ॥

नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः ।
ना सुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥ १२ ॥

( गोमूत्रिकाबन्धः )

मन्दमस्यन्निषुलतां घृणया मुनिरेष वः ।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ १३ ॥

न नोननुन्नो नुन्नोनो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ १४ ॥

( एकाक्षरः । )

वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् ।
प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारश्च्युतोपलः ॥ १५ ॥

स्यन्दना नो चतुरगाः सुरेभा वाविपत्तयः ।
स्यन्दना नो च तुरगाः सुरेभा वा विपत्तयः ॥ १६ ॥

( समुद्गकः । )

भवद्भिरधुनारातिपरिहापितपौरुषैः ।
ह्रदैरिवार्कनिष्पीतैः प्राप्तः पङ्को दुरुत्तरः ॥ १७ ॥

वेत्रशाककुजे शैलेऽलेशैजेऽकुकशात्रवे ।
यात किं विदिशो जेतुं तुंजेशो दिवि किंतया ॥ १८ ॥

( प्रतिलोमानुलोमपादः )

अयं वः क्लैब्यमापन्नान् दृष्टपृष्ठानरातिना ।
इच्छतीशश्च्युताचारान् दारानिव निगोपितुम् ॥ १९ ॥

ननु हो मथना राघो घोरा नाथमहो नु न ।
तयदातवदा भीमा माभीदा बत दायत ॥ २० ॥

( प्रतिलोमानुलोमार्धशः )

कि त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ।
ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मानिता ॥ २१ ॥
निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ।
सारतो न विरोधी नः स्वाभासो भरवानुत ॥ २२ ॥
तनुवारभसो भास्वानधीरोऽविनतोरसा ।
चारुणा रमते जन्ये कोऽभीतो रसिताशिनि ॥ २३ ॥

( प्रतिलोमानुलोमेन श्लोकद्वयम् )

विभिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि ।
हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥ २४ ॥
देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।
काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥ २५ ॥

( सर्वतोभद्रः । )

प्रनृत्तशववित्रस्ततुरगाक्षिप्तसारथौ ।
मारुतापूर्णतूणीरविक्रुष्टहतसादिनि ॥ २६ ॥
ससत्त्वरतिदे नित्यं सदरामर्षनाशिनि ।
त्वराधिककसन्नादे रमकत्वमकर्षति ॥ २७ ॥

( अर्धभ्रमकः )

आसुरे लोकवित्रासविधायिनि महाहवे ।
युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषम् ॥ २८ ॥
इति शासति सेनान्यां गच्छतस्ताननेकधा ।
निषिध्य हसता किंचित्तस्थे तत्रान्धकारिणा ॥ २९ ॥

( नीरोष्ठ्यम् )

मुनीषुदहनातप्तांल्लज्जया निर्विवृत्सतः ।
शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥ ३० ॥
दूनास्तेऽरिबलादूना निरेभा बहु मेनिरे ।
भीताः शितशराभीताः शंकरं तत्र शंकरम् ॥ ३१ ॥

( पादाद्यन्तयमकम् )

महेषुजलधौ शत्रोर्वर्तमाना दुरुत्तरे ।
प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ ३२ ॥
स बभार रणापेतां चमूं पश्चादवस्थिताम् ।
पुरःसूर्यादपावृत्तां छायामिव महातरुः ॥ ३३ ॥
मुञ्चतीशे शराञ्जिष्णौ पिनाकस्वनपूरितः ।
दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥ ३४ ॥
तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः ।
विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥ ३५ ॥
( द्विचतुर्थयमकम् )

परिमोहयमाणेन शिक्षालाघवलीलया ।
जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ ३६ ॥
अवद्यन्पत्त्रिणः शंभोः सायकैरवसायकैः ।
पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ ३७ ॥
( आद्यन्तयमकम् )

चारचुञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः ।
चचार रुचिरश्चारु चारैराचारचञ्चुरः ॥ ३८ ॥
( द्व्यक्षरः )

स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः ।
धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ ३९ ॥
पार्थबाणाः पशुपतेरावव्रुर्विशिखावलीम् ।
पयोमुच इवारन्ध्राः सावित्रीमंशुसंहतिम् ॥ ४० ॥
शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना ।
रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥ ४१ ॥

तेन व्यातेनिरे भीमा भीमार्जनफलाननाः ।
न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥ ४२ ॥
( शृङ्खलायमकम् )

द्युवियद्गामिनी तारसंरावविहतश्रुतिः ।
हैमीषुमाला शुशुभे विद्युतामिव संहतिः ॥ ४३ ॥

( गूढचतुर्थपादः )

विलङ्घ्य पत्रिणां पङ्क्तिं भिन्नः शिवशिलीमुखैः ।
ज्यायो वीर्यमुपाश्रित्य न चकम्पे कपिध्वजः ॥ ४४ ॥
जगतीशरणे युक्तो हरिकान्तः सुधासितः ।
दानवर्षी कृताशंसो नागराज इवाबभौ ॥ ४५ ॥

( अर्थत्रयवाची )

विफलीकृतयत्नस्य क्षतबाणस्य शंभुना ।
गाण्डीवधन्वनः खेभ्यो निश्चक्राम हुताशनः ॥ ४६ ॥
स पिशङ्गजटावलिः किरन्नुरु तेजः परमेण मन्युना ।
ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥ ४७ ॥
शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने ।
प्रथयन्ननिवार्यवीर्यतां प्रजिघायेषुमघातुकं शिवः ॥ ४८ ॥

शंभोर्धनुर्मण्डलतः प्रवृत्तं तं
मण्डलादंशुमिवांशुभर्तुः ।
निवारयिष्यन्विदधे सिताश्वः
शिलीमुखच्छायवृतां धरित्रीम् ॥ ४९ ॥
घनं विदार्यार्जुनबाणपूगं
ससारबाणोऽयुगलोचनस्य ।
घनं विदार्यार्जुनबाणपूगं
ससार बाणोऽयुगलोचनस्य ॥ ५० ॥
रुजन्महेषून्बहुधाशुपातिनो मुहुः
शरौघैरपवारयन्दिशः ।
चलाचलोऽनेक इव क्रियावशा-
न्महर्षिसंघैर्बुबुधे धनंजयः ॥ ५१ ॥

विकाशमीयुर्जगतीशमार्गणा
विकाशमीयुर्जगतीशमार्गणाः ।
विकाशमीयुर्जगतीशमार्गणा
विकाशमीयुर्जगतीशमार्गणाः ॥ ५२ ॥
( महायमकम् । )

संपश्यतामिति शिवेन वितायमानं
लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यम् ।
अङ्गान्यभिन्नमपि तत्त्वविदां मुनीनां
रोमाञ्चञ्चिततरं बिभरांबभूवुः ॥ ५३ ॥

॥ इति भारविकृतौ महाकाव्ये किरातार्जुनीये
पञ्चदशः सर्गः ॥ १५ ॥

## ॥ १६ ॥ षोडशः सर्गः ॥

ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः ।
स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि ॥१॥
मदस्रुतिश्यामितगण्डलेखाः क्रामन्ति विक्रान्तनराधिरूढाः ।
सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपन्त ॥२॥
विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा ।
महारथौघेन न संनिरुद्धा पयोदमन्द्रध्वनिना धरित्री ॥ ३ ॥
समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति ।
विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥४॥

हताहतेत्युद्धतभीष्मघोषैः
समुज्झिता योद्धृभिरभ्यमित्रम् ।
न हेतयः प्राप्ततडित्त्विषः
खे विवस्वदंशुज्वलिताः पतन्ति ॥ ५ ॥

अभ्यायतः संततधूमधूम्रं
व्यापि प्रभाजालमिवान्तकस्य ।
रजः प्रतूर्णाश्वरथाङ्गनुन्नं
तनोति न व्योमनि मातरिश्वा ॥ ६ ॥
भरेणुना रासभधूसरेण
तिरोहिते वर्त्मनि लोचनानाम् ।
नास्त्यत्र तेजस्विभिरुत्सुकाना-
मह्नि प्रदोषः सुरसुन्दरीणाम् ॥ ७ ॥
रथाङ्गसंक्रीडितमश्वहेषा
बृहन्ति मत्तद्विपबृंहितानि ।
संघर्षयोगादिव मूर्च्छितानि
ह्रादं निगृह्णन्ति न दुन्दुभीनाम् ॥ ८ ॥
अस्मिन् यशः पौरुषलोलुपाना-
मरातिभिः प्रत्युरसं क्षतानाम् ।
मूर्च्छान्तरायं मुहुरुच्छिनत्ति
नासारशीतं करिशीकराम्भः ॥ ९ ॥
असृङ्नदीनामुपचीयमानै-
र्विदारयद्भिः पदवीं ध्वजिन्याः ।
उच्छ्रायमायान्ति न शोणितौघैः
पङ्कैरिवाश्यानघनैस्तटानि ॥ १० ॥
परिक्षते वक्षसि दन्तिदन्तैः
प्रियाङ्कशीता नभसः पतन्ती ।
नेह प्रमोहं प्रियसाहसानां
मन्दारमाला विरलीकरोति ॥ ११ ॥
निषादिसंनाहमणिप्रभौघे
परीयमाणे करिशीकरेण ।

अर्कत्विषोन्मीलितमभ्युदेति
न खण्डमाखण्डलकार्मुकस्य ॥ १२ ॥
महीभृता पक्षवतेव भिन्ना
विगाह्य मध्यं परवारणेन ।
नावर्तमाना निनदन्ति भीम-
मपां निधेरप इव ध्वजिन्यः ॥ १३ ॥
महारथानां प्रतिदन्त्यनीक-
मधिस्यदस्यन्दनमुत्थितानाम् ।
आमूललूनैरतिमन्युनेव
मातङ्गहस्तैर्व्रियते न पन्थाः ॥ १४ ॥
धृतोत्पलापीड इव प्रियायाः
शिरोरुहाणां शिथिलः कलापः ।
न बर्हभारः पतितस्य शङ्को-
र्निषादिवक्षःस्थलमातनोति ॥ १५ ॥
उज्झत्सु संहार इवास्तसंख्य-
मह्नाय तेजस्विषु जीवितानि ।
लोकत्रयास्वादनलोलजिह्वं
न व्याददात्याननमत्र मृत्युः ॥ १६ ॥
इयं च दुर्वारमहारथाना-
माक्षिप्य वीर्यं महतां बलानाम् ।
शक्तिर्ममावस्यति हीनयुद्धे
सौरीव ताराधिपधाम्नि दीप्तिः ॥ १७ ॥
माया स्विदेषा मतिविभ्रमो वा
ध्वस्तं नु मे वीर्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथा पुरा मे
पराक्रमन्ते न शराः किराते ॥ १८ ॥

पुंसः पदं मध्यममुत्तमस्य
द्विधेव कुर्वन्धनुषः प्रणादैः ।
नूनं तथा नैष यथाऽस्य वेषः
प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥
धनुः प्रबन्धध्वनितं रुषेव
सकृद्विकृष्टा विततेव मौर्वी ।
संधानमुत्कर्षमिव व्युदस्य
मुष्टेरसंभेद इवापवर्गे ॥ २० ॥
अंसाववष्टब्धनतौ समाधिः
शिरोधराया रहितप्रयासः ।
धृता विकारांस्त्यजता मुखेन
प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ २१ ॥
प्रहीयते कार्यवशागतेषु
स्थानेषु विष्टब्धतया न देहः ।
स्थितप्रयातेषु ससौष्ठवश्च
लक्ष्येषु पातः सदृशः शराणाम् ॥ २२ ॥
परस्य भूयान्विवरेऽभियोगः
प्रसह्य संरक्षणमात्मरन्ध्रे ।
भीष्मेऽप्यसंभाव्यमिदं गुरौ वा
न संभवत्येव वनेचरेषु ॥ २३ ॥
अप्राकृतस्याहवदुर्मदस्य
निवार्यमस्यास्त्रबलेन वीर्यम् ।
अल्पीयसोऽप्यामयतुल्यवृत्ते-
र्महापकाराय रिपोर्विवृद्धिः ॥ २४ ॥
स संप्रधार्यैव महार्यसारः
सारं विनेष्यन् सगणस्य शत्रोः ।

प्रस्वापनास्त्र द्रुतमाजहार
ध्वान्तं घनानद्ध इवार्धरात्रः ॥ २५ ॥
प्रसक्तदावानलधूमधूम्रा
निरुन्धतो धाम सहस्ररश्मेः ।
महावनानीव महातमिस्रा
छाया ततानेशबलानि कालो ॥ २६ ॥
आसादिता तत्प्रथमं प्रसह्य
प्रगल्भतायाः पदवीं हरन्ति ।
सभेव भीमा विदधे गणानां
निद्रा निरासं प्रतिभागुणस्य ॥ २७ ॥
गुरुस्थिराण्युत्तमवंशजत्वा-
द्विज्ञातसाराण्यनुशीलनेन ।
केचित्समाश्रित्य गुणान्वितानि
सुहृत्कुलानीव धनूंषि तस्थुः ॥ २८ ॥
कृतान्तदुर्वृत्त इवापरेषां पुरः
प्रतिद्वन्द्विनि पाण्डवास्त्रे ।
अतर्कितं पाणितलान्निपेतुः
क्रियाफलानीव तदायुधानि ॥ २९ ॥
अंसस्थलैः केचिदभिन्नधैर्याः
स्कन्धेषु संश्लेषवतां तरूणाम् ।
मदेन मीलन्नयनाः सलीलं
नागा इव स्रस्तकरा निषेदुः ॥ ३० ॥
तिरोहितेन्दोरथ शंभुमूर्ध्नः
प्रणम्यमानं तपसां निवासैः ।
सुमेरुशृङ्गादिव बिम्बमार्कं
पिशङ्गमुच्चैरुदियाय तेजः ॥ ३१ ॥

छायां विनिर्धूय तमोमयीं ता
तत्त्वस्य संवित्तिरिवापविद्याम् ।
ययौ विकासं द्युतिरिन्दुमौले-
रालोकमभ्यादिशती गणेभ्यः ॥ ३२ ॥
त्विषां ततिः पाटलिताम्बुबाहा
सा सर्वतः पूर्वसरीव संध्या ।
निनाय तेषां द्रुतमुल्लसन्ती
विनिद्रतां लोचनपङ्कजानि ॥ ३३ ॥
पृथग्विधान्यस्त्रविरामबुद्धाः
शस्त्राणि भूयः प्रतिपेदिरे ते ।
मुक्ता वितानेन बलाहकानां
ज्योतींषि रम्या इव दिग्विभागाः ॥ ३४ ॥
द्यौरुन्ननामेव दिशः प्रसेदुः
स्फुटं विसस्रे सवितुर्मयूखैः ।
क्षयं गतायामिव यामवत्यां
पुनः समीयाय दिनं दिनश्रीः ॥ ३५ ॥
महास्त्रदुर्गे शिथिलप्रयत्नं
दिग्वारणेनेव परेण रुग्णे ।
भुजङ्गपाशान्भुजवीर्यशाली
प्रबन्धनाय प्रजिघाय जिष्णुः ॥ ३६ ॥
जिह्वाशतान्युल्लसयन्त्यजस्रं
लसत्तडिल्लोलविषानलानि ।
त्रासान्निरस्ता भुजगेन्द्रसेना
नभश्चरैस्तत्पदवीं विवव्रे ॥ ३७ ॥
दिङ्नागहस्ताकृतिमुद्वहद्भि-
र्भोगैः प्रशस्तासितरत्ननीलैः ।

रराज सर्पावलिरुल्लसन्ती
तरङ्गमालेव नभोर्णवस्य ॥ ३८ ॥
निःश्वासधूमैः स्थगितांशुजालं
फणावतामुत्फणमण्डलानाम् ।
गच्छन्निवास्तं वपुरभ्युवाह
विलोचनानां सुखमुष्णरश्मिः ॥ ३९ ॥
प्रतप्तचामीकरभासुरेण
दिशः प्रकाशेन पिशङ्गयन्त्यः ।
निश्चक्रमुः प्राणहरेक्षणानां
ज्वाला महोल्का इव लोचनेभ्यः ॥ ४० ॥
आक्षिप्तसंपातमपेतशोभ-
मुद्वह्नि धूमाकुलदिग्विभागम् ।
वृतं नभो भोगिकुलैरवस्थां
परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥
तमाशु चक्षुःश्रवसां समूहं
मन्त्रेण तार्क्ष्योदयकारणेन ।
नेता नयेनेव परोपजापं
निवारयामास पतिः पशूनाम् ॥ ४२ ॥
प्रतीघ्नतीभिः कृतमीलितानि
द्युलोकभाजामपि लोचनानि ।
गरुत्मतां संहतिभिर्विहायः
क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥
ततः सुपर्णव्रजपक्षजन्मा
नानागतिर्मण्डलयञ्जवेन ।
जरत्तृणानीव वियन्निनाय
वनस्पतीनां गहनानि वायुः ॥ ४४ ॥

मनःशिलाभङ्गनिभेन पश्चा-
न्निरुध्यमानं निकरेण भासाम् ।
व्यूढैरुरोभिश्च विनुद्यमानं
नभः ससर्पेव पुरः खगानाम् ॥ ४५ ॥
दरीमुखैरासवरागताम्रं
विकासि रुक्मच्छदधाम पीत्वा ।
जवानिलाघूर्णितसानुजालो
हिमाचलः क्षीब इवाचकम्पे ॥ ४६ ॥
प्रवृत्तनक्तं दिवसंधिदीप्तै-
र्नभस्तलं गां च पिशङ्गयद्भिः ।
अन्तर्हितार्कैः परितः पतद्भि-
श्छायाः समाचिक्षिपिरे वनानाम् ॥ ४७ ॥
स भोगिसङ्घः शममुग्रधाम्नां
सैन्येन निन्ये विनतासुतानाम् ।
महाध्वरे विध्यपचारदोषः
कर्मान्तरेणेव महोदयेन ॥ ४८ ॥
साफल्यमस्त्रे रिपुपौरुषस्य
कृत्वा गते भाग्य इवापवर्गम् ।
अनिन्धनस्य प्रसभं समन्युः
समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥ ४९ ॥
ऊर्ध्वं तिरश्चीनमधश्चकीर्णै-
र्ज्वालासटैर्लङ्घितमेघपङ्क्तिः ।
आयस्तसिंहाकृतिरुत्पपात
प्राण्यन्तमिच्छन्निव जातवेदा ॥ ५० ॥
भित्त्वेव भाभिः सवितुर्मयूखा-
ञ्जज्वाल विष्वग्विसृतस्फुलिङ्गः ।

विशीर्यमाणाश्मनिनादघोरं
ध्वनिं वितन्वन्नकृशः कृशानुः ॥ ५१ ॥
चयानिवाद्रीनिव तुङ्गशृङ्गान्
क्वचित्पुराणीव हिरण्मयानि ।
महावनानीव च किंशुकानां
ततान वह्निः पवनानुवृत्त्या ॥ ५२ ॥
मुहुश्चलत्पल्लवलोहिनीभि-
रुच्चैः शिखाभिः शिखिनोऽवलीढाः ।
तलेषु मुक्ताविशदा बभूवुः
सान्द्राञ्जनश्यामरुचः पयोदाः ॥ ५३ ॥
लिलिक्षतीव क्षयकालरौद्रे
लोकं विलोलार्चिषि रोहिताश्वे ।
पिनाकिना हूतमहाम्बुवाह-
मस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ ५४ ॥
ततो धरित्रीधरतुल्यरोधस-
स्तडिल्लतालिङ्गितनीलमूर्तयः ।
अधोमुखाकाशसरिन्निपाति-
नीरपः प्रसक्तं मुमुचुः पयोमुचः॥ ५५ ॥
पराहतध्वस्तशिखे शिखावतो
वपुष्यधिक्षिप्तसमिद्धतेजसि ।
कृतास्पदास्तप्त इवायसि
ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥ ५६ ॥
महानले भिन्नसिताभ्रपातिभिः
समेत्य सद्यः क्वथनेन फेनताम् ।
व्रजद्भिरार्द्रेन्धनवत्परिक्षयं
जलैर्वितेने दिवि धूमसंततिः ॥ ५७ ॥

स्वकेतुभिः पाण्डुरनीलपाटलैः
समागताः शक्रधनुःप्रभाभिदः ।
असंस्थितामादधिरे विभावसो-
र्विचित्रचीनांशुकचारुतां त्विषः ॥ ५८ ॥
जलौघसंमूर्च्छनमूर्च्छितस्वनः
प्रसक्तविद्युल्लसितैधितद्युतिः ।
प्रशान्तिमेष्यन्धृतधूममण्डलो
बभूव भूयानिव तत्र पावकः ॥ ५९ ॥
प्रवृद्धसिन्धूर्मिचयस्थवीयसां
चयैर्विभिन्नाः पयसां प्रपेदिरे ।
उपात्तसंध्यारुचिभिः सरूपतां
पयोदविच्छेदलवैः कृशानवः ॥ ६० ॥
उपैत्यनन्तद्युतिरप्यसंशयं .
विभिन्नमूलोऽनुदयाय संक्षयम् ।
तथा हि तोयौघविभिन्नसंहतिः
स हव्यवाहः प्रययौ पराभवम् ॥ ६१ ॥
अथ विहितविधेयैराशु मुक्ता वितानै-
रसितनगनितम्बश्यामभासांघनानाम् ।
विकसदमलधाम्नां प्राप नीलोत्पलानां
श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥ ६२ ॥
इति विविधमुदासे सव्यसाची यदस्त्रं
बहुसमरनयज्ञः सादयिष्यन्नरातिम् ।
विधिरिव विपरीतः पौरुषं न्यायवृत्तेः
सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥ ६३ ॥
वीतप्रभावतनुरप्यतनुप्रभावः
प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम् ।

अस्त्रेषु भूतपतिनापहृतेषु जिष्णु-
वर्षिष्यतादिनकृतेव जलेषु लोकः ।। ६४ ।।

।। इति भारविकृतौ महाकाव्ये किरातार्जुनीये
षोडशः सर्गः ।। १६ ।।

## ।। १७ ।। सप्तदशः सर्गः ।।

अथापदामुद्धरणक्षमेषु
मित्रेष्विवास्त्रेषु तिरोहितेषु ।
धृतिं गुरुश्रीगुरुणाभिपुष्यन्
स्वपौरुषेणेव शरासनेन ।। १ ।।
भूरिप्रभावेण रणाभियोगा-
त्प्रीतो विजिह्मश्च तदीयवृद्धया ।
स्पष्टोऽप्यविस्पष्टवपुः प्रकाशः
सर्पन्महाधूम इवाद्रिवह्निः ।। २ ।।
तेजः समाश्रित्य परैरहार्यं
निजं महान्मित्रमिवोरुधैर्यम् ।
आसादयन्नस्खलितस्वभावं
भीमे भुजालम्बमिवारिदुर्गे ।। ३ ।।
वंशोचितत्वादभिमानवत्या
संप्राप्तया संप्रियतामसुभ्यः ।
समक्षमादित्सितया परेण
वध्वेव कीर्त्या परितप्यमानः ।। ४ ।।
पतिं नगानामिव बद्धमूल-
मुन्मूलयिष्यंस्तरसा विपक्षम् ।

लघुप्रयत्नं निगृहीतवीर्य-
स्त्रिमार्गगावेग इवेश्वरेण ॥ ५ ॥
संस्कारवत्त्वाद्रमयत्सु चेतः
प्रयोगशिक्षागुणभूषणेषु ।
जयं यथार्थेषु शरेषु पार्थः
शब्देषु भावार्थमिवाशशंसे ॥ ६ ॥
भूयः समाधानविवृद्धतेजा
नैवं पुरा युद्धमिति व्यथावान् ।
स निर्ववामास्त्रममर्षनुन्नं
विषं महानाग इवेक्षणाभ्याम् ॥ ७ ॥
तस्याहवायासविलोलमौलेः
संरम्भताम्रायतलोचनस्य ।
निर्वापयिष्यन्निव रोषतप्तं
प्रस्नापयामास मुखं निदाघः ॥ ८ ॥
क्रोधान्धकारान्तरितो रणाय
भ्रूभेदरेखाः स बभार तिस्रः ।
घनोपरुद्धः प्रभवाय वृष्टे-
रूर्ध्वांशुराजीरिव तिग्मरश्मिः ॥ ९ ॥
स प्रध्वनय्याम्बुदनादि चापं
हस्तेन दिङ्नाग इवाद्रिशृङ्गम् ।
बलानि शंभोरिषुभिस्तताप
चेतांसि चिन्ताभिरिवाशरीरः ॥ १० ॥
सद्वादितेवाभिनिविष्टबुद्धौ
गुणाभ्यसूयेव विपक्षपाते ।
अगोचरे वागिव चोपरेमे
शक्तिः शराणां शितिकण्ठकाये ॥ ११ ॥

उमापतिं पाण्डुसुतप्रणुन्नाः
शिलीमुखा न व्यथयांबभूवुः ।
अभ्युत्थितस्याद्रिपतेर्नितम्ब-
मर्कस्य पादा इव हैमनस्य ॥ १२ ॥
संप्रीयमाणोऽनुबभूव तीव्रं
पराक्रमं तस्य पतिर्गणानाम् ।
विषाणभेदं हिमवानसह्यं
वप्रानतस्येव सुरद्विपस्य ॥ १३ ॥
तस्मै हि भारोद्धरणे समर्थं
प्रदास्यता बाहुमिव प्रतापम् ।
चिरं विषेहेऽभिभवस्तदानीं
स कारणानामपि कारणेन ॥ १४ ॥
प्रत्याहृतौजाः कृतसत्त्ववेगः
पराक्रमं ज्यायसि यस्तनोति ।
तेजांसि भानोरिव निष्पतन्ति
यशांसि वीर्यज्वलितानि तस्य ॥ १५ ॥
दृष्टावदानाद्व्यथतेऽरिलोकः
प्रध्वंसमेति व्यथिताच्च तेजः ।
तेजोविहीनं विजहाति दर्पः
शान्तार्चिषं दीपमिव प्रकाशः ॥ १६ ॥
ततः प्रयात्यस्तमदावलेपः
स जय्यतायाः पदवीं जिगीषोः ।
गन्धेन जेतुः प्रमुखागतस्य
प्रतिद्विपस्येव मतङ्गजौघः ॥ १७ ॥
एवं प्रतिद्वन्द्विषु तस्य कीर्तिं
मौलीन्दुलेखाविशदां विधास्यन् ।

इयेष पर्यायजयावसादां
रणक्रियां शंभुरनुक्रमेण ॥ १८ ॥
मुनेर्विचित्रैरिषुभिः स भूया
न्निन्ये वशं भूतपतेर्बलौघः ।
सहात्मलाभेन समुत्पतद्भि-
र्जातिस्वभावैरिव जीवलोकः ॥ १९ ॥
वितन्वतस्तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं निशेमुः ।
प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ २० ॥
स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ।
शशीव दोषावृतलोचनानां विभिद्यमानः पृथगाबभासे ॥ २१ ॥
क्षोभेण तेनाऽथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य ।
तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्तुः ॥२२॥
प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे विकारः ।
आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥२३॥
विस्फार्यमाणस्य ततो भुजाभ्यां
भूतानि भर्त्रा धनुरन्तकस्य ।
भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं
क्रुद्धस्य जिह्वामिव तक्षकस्य ॥ २४ ॥
सव्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपमाशशङ्के ।
पर्यायसंपादितकर्णतालं यन्ता गजं व्यालमिवापराद्धः ॥२५॥
निजघ्निरे तस्य हरेषुजालैः
पतन्ति वृन्दानि शिलीमुखानाम् ।
ऊर्जस्विभिः सिन्धुमुखागतानि
यादांसि यादोभिरिवाम्बुराशेः ॥ २६ ॥
विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः ।
नेताऽरिलोकेषु करोति यद्यत्तत्तच्चकारास्य शरेषु शंभुः ॥२७॥

सोढावगीतप्रथमायुधस्य
क्रोधोज्झितैर्वेगितया पतद्भिः ।
छिन्नैरपि त्रासितवाहिनीकैः
पेते कृतार्थैरिव तस्य बाणैः ॥ २८ ॥
अलंकृतानामृजुतागुणेन
गुरूपदिष्टां गतिमास्थितानाम् ।
सतामिवापर्वणि मार्गणानां भङ्गः
स जिष्णोर्धृतिमुन्ममाथ ॥ २९ ॥
बाणच्छिदस्ते विशिखाः स्मरारे-
रवाङ्मुखीभूतफलाः पतन्तः ।
अखण्डितं पाण्डवसायकेभ्यः
कृतस्य सद्यः प्रतिकारमापुः ॥ ३० ॥
चित्रीयमाणानतिलाघवेन
प्रमाथिनस्तान्भवमार्गणानाम् ।
समाकुलाया निचखान दूरं
बाणान्ध्वजिन्या हृदयेष्वरातिः ॥ ३१ ॥
तस्यातियत्नादतिरिच्यमाने
पराक्रमेऽन्योन्यविशेषणेन ।
हन्ता पुरां भूरि पृषत्कवर्षं
निरास नैदाघ इवाम्बु मेघः ॥ ३२ ॥
अनामृशन्तः क्वचिदेव मर्म
प्रियैषिणाऽनुप्रहिताः शिवेन ।
सुहृत्प्रयुक्ता इव नर्मवादाः
शरा मुनेः प्रीतिकरा बभूवुः ॥ ३३ ॥
अस्त्रैः समानामतिरेकिणीं वा
पश्यन्निषूणामपि तस्य शक्तिम् ।

विषादवक्तव्यबलः प्रमाथी
स्वमालम्बे बलमिन्दुमौलिः ॥ ३४ ॥
ततस्तपोवीर्यसमुद्धतस्य
पारं यियासोः समरार्णवस्य ।
महेषुजालान्यखिलानि जिष्णोरर्कः
पयांसीव समाचचाम ॥ ३५ ॥
रिक्ते सविस्रम्भमथार्जुनस्य निषङ्गवक्त्रे निपपात पाणिः ।
अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥ ३६ ॥
च्युते स तस्मिन्निषुधौ शरार्थाद्ध्वस्तार्थसारे सहसेव बन्धौ ।
तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥ ३७ ॥
आघट्टयामास गतागताभ्यां
सावेगमग्नाङ्गुलिरस्य तूणौ ।
विधेयमार्गे मतिरुत्सुकस्य
नयप्रयोगाविव गां जिगीषोः ॥ ३८ ॥
बभार शून्याकृतिरर्जुनस्तौ
महेषुधी वीतमहेषुजालौ ।
युगान्तसंशुष्कजलौ विजिह्मः
पूर्वापरौ लोक इवाम्बुराशी ॥ ३९ ॥
तेनानिमित्तेन तथा न पार्थ-
स्तयोर्यथा रिक्ततयाऽनुतेपे ।
स्वमापदं प्रोज्झ्य विपत्तिमग्नं
शोचन्ति सन्तो ह्युपकारिपक्षम् ॥ ४० ॥
प्रतिक्रियायै विधुरः स तस्मा-
त्कृच्छ्रेण विश्लेषमियाय हस्तः ।
पराङ्मुखत्वेऽपि कृतोपकारा-
त्तूणीमुखान्मित्रकुलादिवार्यः ॥ ४१ ॥

पश्चात्क्रिया तूणयुगस्य भर्तु-
र्जज्ञे तदानीमुपकारिणीव ।
संभावनायामधरीकृतायां
पत्युः पुरः साहसमासितव्यम् ॥ ४२ ॥

तं शंभुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद ।
हृतोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षम् ॥४३॥

जहार चास्मादचिरेण वर्म
ज्वलन्मणिद्योतितहैमलेखम् ।
चण्डः पतङ्गान्मरुदेकनीलं
तडित्वतः खण्डमिवाम्बुदस्य ॥ ४४ ॥

विकोशनिर्धौततनोर्महासेः फणावतश्च त्वचि विच्युतायाम् ।
प्रतिद्विपाबद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥४५॥

विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरन्ध्रात् ।
निरस्त धूमस्य च रात्रिवह्नेर्विना तनुत्रेण रुचिं स भेजे ॥४६॥

अचित्ततायामपि नाम युक्तामनूर्ध्वतां प्राप्त तदीयकृच्छ्रे ।
महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगम् ॥४७॥

स्थितं विशुद्धे नभसीव सत्त्वे
धाम्ना तपोवीर्यमयेन युक्तम् ।
शस्त्राभिघातैस्तमजस्रमीश-
स्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥ ४८ ॥

संरम्भवेगोज्झितवेदनेषु गात्रेषु बाधिर्यमुपागतेषु ।
मुनेर्बभूवागणितेषुराशेर्लौहस्तिरस्कार इवात्ममन्युः ॥ ४९ ॥

ततोऽनुपूर्वायतवृत्तबाहुः
श्रीमान्क्षरल्लोहितदिग्धदेहः ।
आस्कन्द्य वेगेन विमुक्तनादः
क्षितिं विधुन्वन्निव पार्ष्णिघातैः ॥ ५० ॥

साम्यं गतेनाशनिना मघोनः
शशाङ्कखण्डाकृतिपाण्डुरेण ।
शंभुं बिभित्सुर्धनुषा जघान
स्तम्बं विषाणेन महानिवेभः ।। ५१ ।।
रयेण सा संनिदधे पतन्ती भवोद्भवेनात्मनि चापयष्टिः ।
समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ।।५२।।
विकार्मुकः कर्मसु शोचनीयः परिच्युतौदार्य इवोपचारः ।
त्रिचिक्षिपे शूलभृता सलीलं स पत्रिभिर्दूरमदूरपातैः ।। ५३ ।।
उपोढकल्याणफलोऽभिरक्षन्
वीरव्रतं पुण्यरणाश्रमस्थः ।
जपोपवासैरिव संयतात्मा
तेपे मुनिस्तैरिषुभिः शिवस्य ।। ५४ ।।
ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः ।
तेजः श्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललम्बे ।।५५।।
शरानवद्यन्ननवद्यकर्मा
चचार चित्रं प्रविचारमार्गैः ।
हस्तेन निस्त्रिंशभृता स दीप्तः
सार्कांशुना वारिधिरूर्मिणेव ।। ५६ ।।
यथा निजे वर्त्मनि भाति भाभि-
श्छायामयश्चाप्सु सहस्ररश्मिः ।
तथा नभस्याशु रणस्थलीषु
स्पष्टद्विमूर्तिर्ददृशे स भूतैः ।। ५७ ।।
शिवप्रणुन्नेन शिलीमुखेन
त्सरुप्रदेशादपवर्जिताङ्गः ।
ज्वलन्नसिस्तस्य पपात पाणे-
र्घनस्य वप्रादिव वैद्युतोऽग्निः ।। ५८ ।।

आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिः स मृधेऽवधूतः ।
रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः ॥५९॥

स खण्डनं प्राप्य परादमर्षवान्
भुजद्वितीयोऽपि विजेतुमिच्छया ।
ससज वृष्टिं परिरुग्णपादपां
द्रवेतरेषां पयसामिवाश्मनाम् ॥ ६० ॥

नीरन्ध्रं परिगमिते क्षयं पृषत्कै-
र्भूतानामधिपतिना शिलाविताने ।
उच्छ्रायस्थगितनभोदिगन्तरालं
चिक्षेप क्षितिरुहजालमिन्द्रसूनुः ॥ ६१ ॥

निःशेषं शकलितवल्कलाङ्गसारैः
कुर्वद्भिर्भुवमभितः कषायचित्राम् ।
ईशानः सकुसुमपल्लवैर्नगै-
स्तैरातेने बलिमिव रङ्गदेवताभ्यः ॥ ६२ ॥

उन्मज्जन्मकर इवामरापगाया
वेगेन प्रतिमुखमेत्य बाणनद्याः ।
गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः ॥ ६३ ॥

अभिलषतः उपायं विक्रमं कीर्तिलक्ष्म्यो-
रसुगममरिसैन्यैरङ्कमभ्यागतस्य ।
जनक इव शिशुत्वे सुप्रियस्यैकसूनो-
रविनयमपिसेहे पाण्डवस्य स्मरारिः ॥ ६४ ॥

॥ इति भारविकृतौ महाकाव्ये किराता-
र्जुनीये सप्तदशः सर्गः ॥ १७ ॥

## ॥ १८ ॥ अष्टादशः सर्गः ॥

( द्रुतविलंबितवृत्तम् )

तत उदग्र इव द्विरदे मुनौ
रणमुपेयुषि भीमभुजायुधे ।
धनुरपास्य सबाणधि शंकरः
प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥
हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः ।
स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥२॥
शिवभुजाहतिभिन्नपृथुक्षतीः सुखमिवानुबभूव कपिध्वजः ।
क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥३॥
व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः ।
अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥४॥
उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः ।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥५॥
निपतितेऽधिशिरोधरमायते सममरत्नियुगेऽयुगचक्षुषः ।
त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥६॥
अभिभवोदितमन्युविदीपितः
समभिसृत्य भृशं जवमोजसा ।
भुजयुगेन विभज्य समाददे,
शशिकलाभरणस्य भुजद्वयम् ॥ ७ ॥
प्रववृतेऽथ महाहवमल्लयोरचलसंचलाहरणो रणः ।
करणशृङ्खलसंकलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥
अयमसौ भगवानुत पाण्डवः
स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन नु जिष्णुना
स्विदिति वेगवशान्मुमुहे गणैः ॥ ९ ॥

प्रचलिते चलितं स्थितमास्थिते
विनमिते नतमुन्नतमुन्नतौ ।
वृषकपिध्वजयोरसहिष्णुना
मुहुरभावभयादिव भूभृता ॥ १० ॥
करणशृङ्खलनिःसृतयोस्तयोः
कृतभुजध्वनि वल्गु विवल्गतोः ।
चरणपातनिपातितरोधसः
प्रससृपुः सरितः परितः स्थलीः ॥ ११ ॥
वियति वेगपरिप्लुतमन्तरा
समभिसृत्य रयेण कपिध्वजः ।
चरणयोश्चरणानमितक्षिति-
र्निजगृहे तिसृणां जयिनं पुराम् ॥ १२ ॥
विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् ।
क्षेप्तुकाममवनौ तमक्लमं निष्पिपेष परिरभ्य वक्षसा ॥१३॥
तपसा तथा न मुदमस्य ययौ
भगवान्यथा विपुलसत्त्वतया ।
गुणसंहतेः समतिरिक्तमहो
निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥
अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥
सहशरधि निजं तथा कार्मुकं
वपुरतनु तथैव संवर्मितम् ।
निहितमपि तथैव पश्यन्नसि
वृषभगतिरुपाययौ विस्मयम् ॥ १६ ॥
सिषुचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः ।
विमलरुचिभृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ।१७।

आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य ।
रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ।१८।
हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः ।
चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ।१९।
मुदितमधुलिहो वितानीकृताः स्रज उपरि वितत्य संतानिकीः ।
जलद इव निषेदिवांसं वृषे मरुदुपसुखयांबभूवेश्वरम् ॥ २० ॥
कृतधृति परिवन्दितेनोच्चकै-
र्गणपतिभिरभिन्नरोमोद्गमैः ।
तपसि कृतफले फलज्यायसी
स्तुतिरिति जगदे हरेः सूनुना ॥ २१ ॥
शरणं भवन्तमतिकारुणिकं भव
भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये
ससुरासुरस्य जगतः शरणम् ॥ २२ ॥
विपदेति तावदवसादकारी न च कामसंपदभिकामयते ।
न नमन्ति चैकपुरुषं पुरुषास्तव यावदीश न नतिः क्रियते ।२३।
संसेवन्ते दानशीला विमुक्त्यै
संपश्यन्तो जन्मदुःखं पुमांसः ।
यन्निःसङ्गस्त्वं फलस्यानतेभ्य-
स्तत्कारुण्यं केवलं न स्वकार्यम् ॥ २४ ॥
प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय ।
तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतस्तत् ।२५।
व्रजति शुचि पदं त्वयि
प्रीतिमान्प्रतिहतमतिरेति घोरां गतिम् ।
इयमनघ निमित्तशक्तिः परा
तव वरद न चित्तभेदः क्वचित् ॥ २६ ॥

दक्षिणां प्रणतदक्षिणमूर्ति तत्त्वतः शिवकरीमविदित्वा ।
रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ।२७।

दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥ २८ ॥

युक्ताः स्वशक्त्या मुनयः प्रजानां
हितोपदेशैरुपकारवन्तः ।
समुच्छिनत्सि त्वमचिन्त्यधामा
कर्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥

संनिबद्धमपहर्तुमहार्यं
भूरि दुर्गतिभयं भुवनानाम् ।
अद्भुताकृतिमिमामतिमाय-
स्त्वं बिभर्षि करुणामय मायाम् ॥ ३० ॥

न रागि चेतः परमा विलासिता
वधूः शरीरेऽस्ति न चास्ति मन्मथः ।
नमस्क्रिया चोषसि धातुरित्यहो-
निसर्गदुर्बोधमिदं तवेहितम् ॥ ३१ ॥

तवोत्तरीयं करिचर्म साङ्गजं
ज्वलन्मणिः सारसनं महानहिः ।
स्रगास्यपङ्क्तिः शवभस्म चन्दनं
कला हिमांशोश्च समं चकासति ॥ ३२ ॥

अविग्रहस्याप्यतुलेन हेतुना
समेतभिन्नद्वयमूर्ति तिष्ठतः ।
तवैव नान्यस्य जगत्सु दृश्यते
विरुद्धवेषाभरणस्य कान्तता ॥ ३३ ॥

आत्मलाभपरिणामनिरोधैर्भूतसंघ इव न त्वमुपेतः ।
तेन सर्वभुवनातिग लोके नोपमानमसि नाप्युपमेयः ॥ ३४ ॥

त्वमन्तकः स्थावरजङ्गमानां
त्वया जगत्प्राणिति देव विश्वम् ।
त्वं योगिनां हेतुफले रुणत्सि
त्वं कारणं कारणकारणानाम् ॥ ३५ ॥

रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा
यल्लोकेष्वविकलमाप्तमाधिपत्यम् ।
पाविन्याः शरणगतार्तिहारिणे
तन्माहात्म्यं भव भवते नमस्क्रियायाः ॥३६॥

तरसा भुवनानि यो बिभर्ति
ध्वनति ब्रह्म यतः परं पवित्रम् ।
परितो दुरितानि यः पुनीते
शिव तस्मै पवनात्मने नमस्ते ॥ ३७ ॥

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम् ।
दहते भवबीजसंततिं शिखिनेऽनेकशिखाय ते नमः ॥ ३८ ॥

आबाधामरणभयार्चिषा चिराय
प्लुष्टेभ्यो भव महता भवानलेन ।
निर्वाणं समुपगमेन यच्छते ते
बीजानां प्रभव नमोऽस्तु जीवनाय ॥ ३९ ॥

यः सर्वेषामावरीता वरीयान्
सर्वैर्भावैर्नावृतोऽनादिनिष्ठः ।
मार्गातीतायेन्द्रियाणां नमस्ते-
ऽविज्ञेयाय व्योमरूपाय तस्मै ॥ ४० ॥

अणीयसे विश्वविधारिणे नमो
नमोऽन्तिकस्थाय नमो दवीयसे ।

अतीत्य वाचां मनसां च गोचरं
स्थिताय ते तत्पतये नमो नमः ॥ ४१ ॥

असंविदानस्य ममेश संविदां
तितिक्षितुं दुश्चरितं त्वमर्हसि ।
विरोध्य मोहात्पुनरभ्युपेयुषां
गतिर्भवानेव दुरात्मनामपि ॥ ४२ ॥

आस्तिक्यशुद्धमवतः प्रियधर्म धर्म
धर्मात्मजस्य विहितागसि शत्रुवर्गे ।
संप्राप्नुयां विजयमीश यया समृद्धया
तां भूतनाथ विभुतां वितराहवेषु ॥ ४३ ॥

इति निगदितवन्तं सूनुमुच्चैर्मघोनः
प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं
धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥

स पिङ्गाक्षः श्रीमान् भुवनमहनीयेन महसा
तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतः सुरगणैः
सुतं पाण्डोर्वीरं जलदमिव भास्वानभिययौ ॥ ४५ ॥

अथ शशधरमौलेरभ्यनुज्ञामवाप्य
त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।
अवितथफलमाशीर्वादमारोपयन्तो
विजयि विविधमस्त्रं लोकपाला वितेरुः ॥ ४६ ॥

असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा
धुरं गुर्वीं वोढुं स्थितमनवसादाय जगतः ।
स्वधाम्ना लोकानां तमुपरि कृतस्थानममरा-
स्तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः ॥ ४७ ॥

व्रज जय रिपुलोकं पादपद्मानतः
सन् गदित इति शिवेन श्लाघितो देवसंघैः ।
निजगृहमथ गत्वा सादरं पाण्डुपुत्रो
धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम ॥ ४८ ॥

॥ इति भारविकृतौ महाकाव्ये किराता-
र्जुनीयेऽष्टादशः सर्गः ॥ १८ ॥

---

## ॥ किरातार्जुनीयं महाकाव्यं सम्पूर्णम् ॥ ३ ॥

---

॥ अर्हम् ॥

पू. पं. श्री पुण्यविजयगणिभ्यो नमः

महाकवि माघकृतं

# ॥ शिशुपालवधम् ॥

## ॥ पूर्वार्द्धम् ॥

## ॥ १ ॥ प्रथमः सर्गः ॥

( वंशस्थवृत्तम् )

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिं ॥१॥

गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥ २ ॥

चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥ ३ ॥

नवानधोऽधो बृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥ ४ ॥

दधानमम्भोरुहकेसरद्युती-
जटाः शरच्चन्द्रमरीचिरोचिषम् ।
विपाकपिङ्गास्तुहिनस्थलीरुहो
धराधरेन्द्रं व्रततीततीरिव ॥ ५ ॥

पिशङ्गमौञ्जयुजीमर्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम् ॥ ६ ॥

विहङ्गराजाङ्गरुहैरिवायतै-
र्हिरण्मयोर्वीरुहवल्लितन्तुभिः ।
कृतोपवीतं हिमशुभ्रमुच्चकै-
र्घनं घनान्ते तडितां गणैरिव ॥ ७ ॥

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारुचमूरुचर्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥ ८ ॥

अजस्रमास्फालितवल्लकीगुण-
क्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया ।
पुरः प्रवालैरिव पूरितार्धया
विभान्तमच्छस्फटिकाक्षमालया ॥ ९ ॥

रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।
स्फुटीभवद्ग्रामविशेषमूर्च्छ-
नामवेक्षमाणं महतीं मुहुर्मुहुः ॥ १० ॥

निवर्त्य सोऽनुव्रजतः कृतानती-
नतीन्द्रियज्ञाननिधिर्नभःसदः ।

समासदत्सादितदैत्यसंपदः
पदं महेन्द्रालयचारु चक्रिणः ।। ११ ।।

पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत ।
गिरेस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः ।। १२ ।।

अथ प्रयत्नोन्नमितानमत्फणैर्धृते
कथञ्चित्फणिनां गणैरधः ।
न्यधायिषातामभिदेवकीसुतं
सुतेन धातुश्चरणौ भुवस्तले ।। १३ ।।

तमर्घ्यमर्घ्यादिकमादिपूरुषः
सपर्यया साधु स पर्यपूपुजत् ।
गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः ।। १४ ।।

न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्वताविव ।
स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ।। १५ ।।

महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकै-
रचूचुरच्चन्द्रमसोऽभिरामताम् ।। १६ ।।

विधाय तस्यापचितिं प्रसेदुषः
प्रकाममप्रीयत यज्वनां प्रियः ।
ग्रहीतुमार्यान्परिचर्यया मुहु-
र्महानुभावा हि नितान्तमर्थिनः ।। १७ ।।

अशेषतीर्थोपहृताः कमण्डलो-
निधाय पाणावृषिणाऽभ्युदीरिताः ।
अघौघविध्वंसविधौ पटीयसी-
र्नतेन मूर्ध्ना हरिरग्रहीदपः ॥ १८ ॥
स काञ्चने यत्र मुनेरनुज्ञया
नवाम्बुदश्यामवपुर्न्यविक्षत ।
जिगाय जम्बूजनितश्रियः श्रियं
सुमेरुशृङ्गस्य तदा तदासनम् ॥ १९ ॥
स तप्तकार्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः ।
विदिद्युते वाडवजातवेदसः
शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥ २० ॥
रथाङ्गपाणेः पटलेन रोचि-
षामृषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरा-
स्तरोस्तुषारमूर्तेरिव नक्तमंशवः ॥ २१ ॥
प्रफुल्लतापिच्छनिभैरभीषुभिः
शुभैश्च सप्तच्छदपांशुपाण्डुभिः ।
परस्परेण च्छुरितामलच्छवी
तदेकवर्णाविव तौ बभूवतुः ॥ २२ ॥
युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत् ।
तनौ ममुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसंभवा मुदः ॥ २३ ॥
निदाघधामानमिवाधिदीधितिं
मुदा विकासं मुनिमभ्युपेयुषी ।

विलोचने बिभ्रदधिश्रितश्रिणी
सपुण्डरीकाक्ष इति स्फुटोऽभवत् ॥ २४ ॥
सितं सितिम्ना सुतरां मुनेर्वपु-
र्विसारिभिः सौधमिवाथ लम्भयन् ।
द्विजावलिव्याजनिशाकरांशुभिः
शुचिस्मितां वाचमवोचदच्युतः ॥ २५ ॥
हरत्यघं संप्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥ २६ ॥
जगत्यपर्याप्तसहस्रभानुना
न यन्नियन्तुं समभावि भानुना ।
प्रसह्य तेजोभिरसंख्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तमः ॥ २७ ॥
कृतः प्रजाक्षेमकृता प्रजासृजा
सुपात्रनिक्षेपनिराकुलात्मना ।
सदोपयोगेऽपि गुरुस्त्वमक्षयो
निधिः श्रुतीनां धनसंपदामिव ॥ २८ ॥
विलोकनेनैव तवामुना मुने
कृतः कृतार्थोऽस्मि निबर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोऽथवा श्रेयसि केन तृप्यते ॥ २९ ॥
गतस्पृहोऽप्यागमनप्रयोजनं
वदेति वक्तुं व्यवसीयते यया ।
तनोति नस्तामुदितात्मगौरवो
गुरुस्तवैवागम एष धृष्टताम् ॥ ३० ॥

इति ब्रुवन्तं तमुवाच स व्रती
न वाच्यमित्थं पुरुषोत्तम ! त्वया ।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्यं गुरुयोगिनामपि ॥ ३१ ॥
उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन-
स्त्वमग्रभूमिर्निरपायसंश्रया ॥ ३२ ॥
उदासितारं निगृहीतमानसै-
र्गृहीतमध्यात्मदृशा कथञ्चन ।
बहिर्विकारं प्रकृतेः पृथग्विदुः
पुरातनं त्वां पुरुषं पुराविदः ॥ ३३ ॥
निवेशयामासिथ हेलयोद्-
धृतां फणाभृतां छादनमेकमोकसः ।
जगत्त्रयैकस्थपतिस्त्वमुच्चकै-
रहीश्वरस्तम्भशिरःसु भूतलम् ॥ ३४ ॥
अनन्यगुर्वास्तव केन केवलः
पुराणमूर्तेर्महिमावगम्यते ।
मनुष्यजन्मापि सुरासुरान्गुणै-
र्भवान्भवच्छेदकरैः करोत्यधः ॥ ३५ ॥
लघूकरिष्यन्नतिभारभङ्गु-
राममूं किल त्वं त्रिदिवादवातरः ।
उदूढलोकत्रितयेन सांप्रतं
गुरुर्धरित्री क्रियतेतरां त्वया ॥ ३६ ॥
निजौजसोज्जासयितुं जगद्-
द्रुहामुपाजिहीथा न महीतलं यदि ।

समाहितैरप्यनिरूपितस्ततः पदं
दृशः स्याः कथमीश ! मादृशाम् ।। ३७ ।।
उपप्लुतं पातुमदो मदोद्धतै-
स्त्वमेव विश्वम्भर ! विश्वमीशिषे ।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ।। ३८ ।।
करोति कंसादिमहीभृतां वधा-
ज्जनो मृगाणामिव यत्तव स्तवम् ।
हरे ! हिरण्याक्षपुरःसरासुर-
द्विपद्विष प्रत्युत सा तिरस्क्रिया ।। ३९ ।।
प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ।। ४० ।।
तदिन्द्रसंदिष्टमुपेन्द्र ! यद्वचः
क्षणं मया विश्वजनीनमुच्यते ।
समस्तकार्येषु गतेन धुर्यता-
महिद्वि षस्तद्भवता निशम्यताम् ।। ४१ ।।
अभूदभूमिः प्रतिपक्षजन्मनां
भियां तनूजस्तपनद्युतिर्दितेः ।
यमिन्द्रशब्दार्थनिसूदनं हरे-
र्हिरण्यपूर्वं कशिपु प्रचक्षते ।। ४२ ।।
समत्सरेणासुर इत्युपेयुषा
चिराय नाम्नः प्रथमाभिधेयताम् ।
भयस्य पूर्वावतरस्तरस्विना
मनस्सु येन द्युसदां न्यधीयत ।। ४३ ।।

दिशामधीशांश्चतुरो यतः
सुरानपास्य तं रागहृताः सिषेविरे ।
अवापुरारभ्य ततश्चला इति
प्रवादमुच्चैरयशस्करं श्रियः ॥ ४४ ॥
पुराणि दुर्गाणि निशातमायुध
बलानि शूराणि घनाश्च कञ्चुकाः ।
स्वरूपशोभैकफलानि नाकिनां
गणैर्यमाशङ्क्य तदादि चक्रिरे ॥ ४५ ॥
स संचरिष्णुर्भुवनान्तरेषु यां
यदृच्छयाऽशिश्रियदाश्रयः श्रियः ।
अकारि तस्यै मुकुटोपलस्खल-
त्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ॥ ४६ ॥
सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह ! सैंहीमतनुं तनुं त्वया ।
स मुग्धकान्तास्तनसङ्गभङ्गुरै
रैरुरोविदारं प्रतिचस्करे नखैः ॥ ४७ ॥
विनोदमिच्छन्नथ दर्पजन्मनो,
रणेन कण्ड्वास्त्रिदशैः समं पुनः ।
स रावणो नाम निकामभीषणं
बभूव रक्षः क्षतरक्षणं दिवः ॥ ४८ ॥
प्रभुर्बुभूषुर्भुवनत्रयस्य यः
शिरोऽतिरागाद्दशमं चिकर्तिषुः ।
अतर्कयद्विघ्नमिवेष्टसाहसः
प्रसादमिच्छासशं पिनाकिनः ॥ ४९ ॥
समुत्क्षिपन्यः पृथिवीभृतां वरं
वरप्रदानस्य चकार शूलिनः ।

त्रसत्तुषाराद्रिसुताससंभ्रम-
स्वयंग्रहाश्लेषसुखेन निष्क्रयम् ।। ५० ।।
पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा बली य
इत्थमस्वास्थ्यमहर्दिवं दिवः ।। ५१ ।।
सलीलयातानि न भर्तुरभ्रमोर्न
चित्रमुच्चैःश्रवसः पदक्रमम् ।
अनुद्रुतः संयति येन केवलं
बलस्य शत्रुः प्रशशंस शीघ्रताम् ।। ५२ ।।
अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि कौशिकः ।। ५३ ।।
बृहच्छिलानिष्ठुरकण्ठघट्टना-
द्विकीर्णलोलाग्निकणं सुरद्विषः ।
जगत्प्रभोरप्रसहिष्णु वैष्णवं
न चक्रमस्याक्रमताधिकन्धरम् ।। ५४ ।।
विभिन्नशङ्खः कलुषीभवन्मुहु-
र्मदेन दन्तीव मनुष्यधर्मणः ।
निरस्तगाम्भीर्यमपास्तपुष्पकं
प्रकम्पयामास न मानसं न सः ।। ५५ ।।
रणेषु तस्य प्रहिताः प्रचेतसा
सरोषहुंकारपराङ्मुखीकृताः ।
प्रहर्तुरेवोरगराजरज्जवो
जवेन कण्ठं सभयाः प्रपेदिरे ।। ५६ ।।

परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमण्डलः ।
हृतेऽपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः ।५७।
स्पृशन्सशङ्कः समये शुचावपि स्थितः कराग्रैरसमग्रपातिभिः ।
अघर्मघर्मोदकबिन्दुमौक्तिकैरलञ्चकारास्य वधूरहस्करः ।५८।

कलासमग्रेण गृहानमुञ्चता
मनस्विनीरुत्कयितुं पटीयसा ।
विलासिनस्तस्य वितन्वता रतिं
न नर्मसाचिव्यमकारि नेन्दुना ।। ५९ ।।

विदग्धलीलोचितदन्तपत्रिका-
विधित्सया नूनमनेन मानिना ।
न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुनः प्ररोहति ।। ६० ।।

निशान्तनारीपरिधानधूननः
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ।। ६१ ।।

तिरस्कृतस्तस्य जनाभिभाविना
मुहुर्महिम्ना महसां महीयसाम् ।
बभार बाष्पैर्द्विगुणीकृतं तनु-
स्तनूनपाद्धूमवितानमाधिजैः ।। ६२ ।।

परस्य मर्माविधमुज्झतां निजं
द्विजिह्वतादोषमजिह्मगामिभिः ।
तमिद्धमाराधयितुं सकर्णकैः
कुलैर्न भेजे फणिनां भुजङ्गता ।। ६३ ।।

तदीयमातङ्गघटाविघट्टितैः
कटस्थलप्रोषितदानवारिभिः ।

गृहीतदिक्कैरपुनर्निवर्तिभि-
श्चिराय याथार्थ्यमलम्भि दिग्गजैः ॥ ६४ ॥
अभीक्ष्णमुष्णैरपि तस्य सोष्मणः
सुरेन्द्रबन्दीश्वसितानिलैर्यथा ।
सचन्दनाम्भःकणकोमलैस्तथा
वपुर्जलार्द्रापवनैर्न निर्ववौ ॥ ६५ ॥
तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तिं दधतः सदर्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥ ६६ ॥
अमानवं जातमजं कुले मनोः
प्रभाविनं भाविनमन्तमात्मनः ।
मुमोच जानन्नपि जानकीं न
यः सदाभिमानैकधना हि मानिनः ॥ ६७ ॥
स्मरत्यदो दाशरथिर्भवन्भवा-
नमुं वनान्ताद्वनितापहारिणम् ।
पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥ ६८ ॥
अथोपपत्तिं छलनापरोऽपराम-
वाप्य शैलूष इवैष भूमिकाम् ।
तिरोहितात्मा शिशुपालसंज्ञया
प्रतीयते संप्रति सोऽप्यसः परैः ॥ ६९ ॥

स बाल आसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकै-
रसशयं संपति तेजसा रविः ॥ ७० ॥

स्वयं विधाता सुरदैत्यरक्षसा-
मनु ग्रहावगृह्योर्यदृच्छया ।
दशाननादीनभिराद्धदेवता-
वितीर्णवीर्यातिशयान् हसत्यसौ ॥ ७१ ॥

बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सतीव योषित्प्रकृतिः सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥ ७२ ॥

तदेनमुल्लङ्घितशासनं विधे-
र्विधेहि कीनाशनिकेतनातिथिम् ।
शुभेतराचारविपक्त्रिमापदो
निपातनीया हि सतामसाधवः ॥ ७३ ॥

हृदयमरिवधोदयादु दूढ-
द्रढिम दधातु पुनः पुरन्दरस्य ।
घनपुलकपुलोमजाकुचाग्र-
द्रुतपरिरम्भनिपीडनक्षमत्वम् ॥ ७४ ॥

ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ-
स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति ।
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति
व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम् ।७५।

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये कृष्ण-
नारदं सम्भाषणं नाम प्रथमः सर्गः ॥ १ ॥

## ॥ २ ॥ द्वितीयः सर्गः ॥

( अनुष्टुबवृत्तम् )

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम् ।
अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः ॥ १ ॥

सार्धमुद्धवसीरिभ्यामथासावासदत्सदः ।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम् ॥ २ ॥

जाज्वल्यमाना जगतः शान्तये समुपेयुषी ।
व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी ॥ ३ ॥

रत्नस्तम्भेषु संक्रान्तप्रतिमास्ते चकाशिरे ।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥ ४ ॥

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी ।
तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा ॥ ५ ॥

गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः ।
हरिर्विप्रतिषेधं तमाचचक्षे विचक्षणः ॥ ६ ॥

द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः ।
स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती ॥ ७ ॥

भवद्गिरामवसरप्रदानाय वचांसि नः ।
पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ॥ ८ ॥

करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम् ।
विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः ॥ ९ ॥

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ १० ॥

न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ।
यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम् ॥ ११ ॥

मम तावन्मतमिदं श्रूयतामङ्ग वामपि ।
ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ॥ १२ ॥
यावदर्थपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥ १३ ॥
ततः सपत्नापनयस्मरणानुशयस्फुरा ।
ओष्ठेन रामो रामोष्ठबिम्बचुम्बनचुञ्चुना ॥ १४ ॥
विवक्षितामर्थविदस्तत्क्षण प्रतिसंहृताम् ।
प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम् ॥ १५ ॥
घूर्णयन् मदिरास्वादमदपाटलितद्युती ।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥ १६ ॥
आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम् ।
म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः ॥ १७ ॥
दधत्सन्ध्यारुणव्योमस्फुरत्तारानुकारिणीः ।
द्विषद्द्वेषोपरक्ताङ्गसङ्गिनीः स्वेदविप्रुषः ॥ १८ ॥
प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ।
कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम् ॥ १९ ॥
ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया ।
मुखामोदं मदिरया कृतानुव्याधमुद्वमन् ॥ २० ॥
जगाद वदनच्छद्मपद्मपर्यन्तपातिनः ।
नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥ २१ ॥ ( कुलकम् )
यद्वासुदेवेनादीनमनादीनवमीरितम् ।
वचसस्तस्य सपदि क्रिया केवलमुत्तरम् ॥ २२ ॥
नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते ।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥ २३ ॥
संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।
सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥ २४ ॥

विरोधिवचसो मूकान् वागीशानपि कुर्वते ।
जडानप्यनुलोमर्थान् प्रवाचः कृतिनां गिरः ॥ २५ ॥
षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् ॥ २६ ॥
अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥ २७ ॥
सर्वकार्यशरीरेषु मुक्त्वाऽङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥ २८ ॥
मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ २९ ॥
आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥ ३० ॥
तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥ ३१ ॥
सपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ ३२ ॥
समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः ।
प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः ॥ ३३ ॥
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ ३४ ॥
ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ ३५ ॥
सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः ।
स्याताममित्रौ मित्रे च सहजप्राकृतावपि ॥ ३६ ॥
उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ३७ ॥

त्वया विप्रकृतश्चैद्यो रुक्मिणी हरता हरे ।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥ ३८ ॥
त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् ।
प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव ॥ ३९ ॥
आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ।
कथापि खलु पापानामलमश्रेयसे यतः ॥ ४० ॥
विराद्ध एवं भवता विराद्धा बहुधा च नः ।
निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः ॥ ४१ ॥
विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ ४२ ॥
मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥ ४३ ॥
अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ ४४ ॥
माजीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ ४५ ॥
पदाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥ ४६ ॥
असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ ४७ ॥
तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता ।
अलङ्घनीयताहेतुरुभयं तन्मनस्विनि ॥ ४८ ॥
तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥ ४९ ॥
स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि ।
निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ ५० ॥

तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥ ५१ ॥
*अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषाम् ।*
कथङ्कारमनालम्बा कीर्तिर्द्यामधिरोहति ॥ ५२ ॥
अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ ५३ ॥
चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ॥ ५४ ॥
सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ ५५ ॥
गुणानामायथातथ्यादर्थं विप्लावयन्ति ये ।
अमात्यव्यञ्जना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ॥ ५६ ॥
स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे ।
यानमाहुस्तदासीनं त्वामुत्थापयति द्वयम् ॥ ५७ ॥
लिलङ्घयिषतो लोकानलङ्घ्यानलघीयसः ।
यादवाम्भोनिधीन् रुन्धे वेलेव भवतः क्षमा ॥ ५८ ॥
विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ॥ ५९ ॥
हते हिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि ।
चिरस्य मित्रव्यसनी सुदमो दमघोषजः ॥ ६० ॥
नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रियै ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥ ६१ ॥
अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ ६२ ॥
इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः ।
आस्माकदन्तिसांनिध्याद्वामनीभूतभूरुहः ॥ ६३ ॥

निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥ ६४ ॥
यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ॥ ६५ ॥
प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषाम् ।
शास्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ॥ ६६ ॥
इति संरम्भिणो वाणीर्बलस्यालेख्यदेवताः ।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥ ६७ ॥
निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद् दृशा ॥ ६८ ॥
भारतीमाहितभरामथानुद्धतमुद्धवः ।
तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम् ॥ ६९ ॥
सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना ।
निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥ ७० ॥
तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम् ।
तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः ॥ ७१ ॥
वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥ ७२ ॥
बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ॥ ७३ ॥
म्रदीयसीमपि घनामनल्पगुणकल्पिताम् ।
प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥ ७४ ॥
विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः ।
हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥ ७५ ॥
प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि ।
तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः ॥ ७६ ॥

सोपधानां धियं धीराः स्थेयसी खट्वयन्ति ये ।
तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥ ७७ ॥
स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति च ।
बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत् ॥ ७८ ॥
आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥ ७९ ॥
उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥ ८० ॥
उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥ ८१ ॥
बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥ ८२ ॥
तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः ।
नैकमोजः प्रसादो वा रसभावविदः कवेः ॥ ८३ ॥
कृतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा ॥ ८४ ॥
मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते ।
प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥ ८५ ॥
नालम्बते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ ८६ ॥
स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ।
रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ ८७ ॥
तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥ ८८ ॥
करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम् ।
प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ॥ ८९ ॥

अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः ।
विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥ ९० ॥
अप्यनारभमाणस्य विभोरुत्पादिताः परैः ।
व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः ॥ ९१ ॥
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः ।
एकार्थतन्तुप्रोतायां नायको नायकायते ॥ ९२ ॥
षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षी रसायनम् ।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥ ९३ ॥
स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् ।
अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ ९४ ॥
तदीशितारं चेदीनां भवांस्तमवमंस्त मा ।
निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥ ९५ ॥
मा वेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥ ९६ ॥
सम्पादितफलस्तेन सपक्षः परभेदनः ।
कार्मुकेणेव गुणिना बाणः संधानमेष्यति ॥ ९७ ॥
ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥ ९८ ॥
उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।
आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः ॥ ९९ ॥
बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥ १०० ॥
तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।
अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ॥ १०१ ॥
मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् ।
हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥ १०२ ॥

संभाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां धर्मराजो विवक्षते ॥ १०३ ॥
महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥ १०४ ॥
चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु ।
छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः ॥ १०५ ॥
मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामिति ।
पुरोडाशभुजामिष्टमिष्टं कर्तुमलन्तराम् ॥ १०६ ॥
अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥ १०७ ॥
सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया ।
प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम् ॥ १०८ ॥
तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत् ।
नोपतापि मनः सोष्म वागेका वाग्मिनः सतः ॥ १०९ ॥
स्वयंकृतप्रसादस्य तस्याह्नो भानुमानिव ।
समयावधिमप्राप्य नान्तायालं भवानपि ॥ ११० ॥
कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम् ।
विदांकुर्वन्तु महतस्तलं विद्विषदम्भसः ॥ १११ ॥
अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥ ११२ ॥
अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः ।
भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ ११३ ॥
उपेयिवांसि कर्तारः पुरीमाजातशात्रवीम् ।
राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ ११४ ॥
सविशेषं सुते पाण्डोर्भवति तन्वति ।
वैरायितारस्तरलाः स्वयं मत्सरिणः परे ॥ ११५ ॥

य इहात्मविदो विपक्षमध्ये
सहसम्वृद्धियुजोऽपि भूभुजः स्युः ।
बलिपुष्टकुलादिवान्युपुष्टैः
पृथगस्मादचिरेण भाविता तैः ॥ ११६ ॥

सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः ।
तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गणः ।११७।

इति विशकलितार्थामौद्धवीं वाचमेना-
मनुगतनयमार्गामर्गलां दुर्नयस्य ।
जनितमुदमुस्थादुच्चकैरुच्छ्रितोरः-
स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान् सः ।११८।

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
श्र्यङ्के मन्त्रवर्णनं नाम द्वितीयः सर्गः ॥२॥

## ॥ ३ ॥ तृतीयः सर्गः ॥

( उपजातिवृत्तम् )

कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः ।
अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे ॥ १ ॥
जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभरांबभूवे ॥ २ ॥
मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः ।
भजेऽभितःपातुकसिद्धसिन्धोरभूतपूर्वां रुचमम्बुराशेः ॥ ३ ॥
चित्राभिरस्योपरि मौलिभाजां भाभिर्मणीनामनणीयसीभिः ।
अनेकधातुच्छुरिताश्मराशेर्गोवर्धनस्याकृतिरन्वकारि ॥ ४ ॥
तस्योल्लसत्काञ्चनकुण्डलाग्रप्रत्युप्तगारुत्मतरत्नभासा ।
अवाप बाल्योचितनीलकण्ठपिच्छावचूडाकलनामिवोरः ॥५॥

तमङ्गदे मन्दरकूटकोटिव्याघट्टनोत्तेजनया मणीनाम् ।
बंहीयसा दीप्तिवितानकेन चकासयामासतुरुल्लसन्ती ॥ ६ ॥
निसर्गरक्तैर्वलयावनद्धताम्राश्मरश्मिरश्मिच्छुरितैर्नखाग्रैः ।
व्यद्योतताद्यापि सुरारिवक्षोविक्षोभजासृक्स्नपितैरिवासौ ॥७॥
उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ ८ ॥
तेनाम्भसां सारमयः पयोधेर्दध्रे मणिर्दीधितिदीपिताशः ।
अन्तर्वसन्बिम्बगतस्तदङ्गे साक्षादिवालक्ष्यत यत्र लोकः ॥९॥

मुक्तामयं सारसनावलम्बि-
भाति स्म दामाप्रपदीनमस्य ।
अङ्गुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चै-
स्त्रिस्रोतसः सन्ततधारमम्भः ॥ १० ॥

स इन्द्रनीलस्थलनीलमूर्ती रराज कर्चूरपिशङ्गवासाः ।
विसृत्वरैरम्बुरुहां रजोभिर्यमस्वसुश्चित्र इवोदभारः ॥११॥
प्रसाधितस्यास्य मधुद्विषोऽभूदन्यैव लक्ष्मीरिति युक्तमेतत् ।
वपुष्यशेषेऽखिललोककान्ता सानन्यकान्ता ह्युरसीतरा तु ॥१२॥
कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य ।
आनन्दिताशेषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः ॥१३॥
प्राणच्छिदां दैत्यपतेर्नखानामुपेयुषां भूषणतां क्षतेन ।
प्रकाशकार्कश्यगुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम् ॥१४॥
आकर्षतेवोर्ध्वमति कृशीयानत्युन्नतत्वात्कुचमण्डलेन ।
ननाम मध्योऽतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम् ।

यां यां प्रियः प्रैक्षत कातराक्षी
सा सा ह्रिया नम्रमुखी बभूव ।
निःशङ्कमन्याः सममाहितेर्ष्या-
स्तत्रान्तरे जघ्नुरमुं कटाक्षैः ॥ १६ ॥

तस्यातसीसूनसमानभासो भ्राम्यन्मयूखावलिमण्डलेन ।
चक्रेण रेजे यमुनाजलौघः स्फुरन्महावर्त इवैकबाहुः ।। १७ ।।

विरोधिनां विग्रहभेददक्षा
मूर्तेव शक्तिः क्वचिदस्खलन्ती ।
नित्यं हरे सन्निहिता निकामं
कौमोदकी मोदयति स्म चेतः ।। १८ ।।

न केवलं यः स्वतया मुरारेरनन्यसाधारणतां दधानः ।
अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नन्दकोऽभूत् ।१९।
न नीतमन्येन नतिं कदाचित्कर्णान्तिकप्राप्तगुणं क्रियासु ।
विधेयमस्याभवदन्तिकस्थं शार्ङ्गं धनुर्मित्रमिव द्रढीयः ।२०।
प्रवृद्धमन्द्राम्बुदधीरनादः कृष्णार्णवाभ्यर्णचरैकहंसः ।
मन्दानिलापूरकृतं दधानो निध्वानमश्रूयत पाञ्चजन्यः ।२१।
रराज सम्पादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिषिद्धमार्गम् ।
महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः ।२२।
ध्वजाग्रधामा ददृशेऽथ शौरेः संक्रान्तमूर्तिर्मणिमेदिनीषु ।
फणावतस्त्रासयितुं रसायास्तलं विवक्षन्निव पन्नगारिः ।।२३।।
यियासतस्तस्य महीध्ररन्ध्रभिदापटीयान् पटहप्रणादः ।
जलान्तराणीव महार्णवौघः शब्दान्तराण्यन्तरयाञ्चकार ।२४।
यतः स भर्ता जगतां जगाम धर्त्रा धरित्र्याः फणिना ततोऽधः ।
महाभराभुग्नशिर सहस्रासाहायकव्यग्रभुजं प्रसस्रे ।।२५।।
अथोच्चकैस्तोरणसङ्गभङ्गभयावनम्रीकृतकेतनानि ।
क्रियाफलानीव सुनीतिभाजं सैन्यानि सोमान्वयमन्वयुस्तम् २६
श्यामारुणैर्वारणदानतोयैरालोडिताः काञ्चनभूपरागाः ।
आनेमिमग्नैः शितिकण्ठपिच्छक्षोदद्युतश्चुक्षुदिरे रथौघैः ।२७।

न लङ्घयामास महाजनानां
शिरांसि नैवोद्धतिमाजगाम ।

अचेष्टतांष्टापदभूमिरेणुः
　　पदाहतो यत्सदृशं गरिम्णः ॥ २८ ॥
निरुध्यमाना यदुभिः कथञ्चि-
　　न्मुहुर्यदुच्चिक्षिपुरग्रपादान् ।
ध्रुवं गुरून् मार्गरुधः करीन्द्रा-
　　नुल्लङ्घ्य गन्तुं तुरगास्तदीषुः ॥ २९ ॥
अवेक्षितानायतवल्गमग्रे　तुरङ्गिभिर्यत्ननिरुद्धवाहैः ।
प्रक्रीडितान् रेणुभिरेत्य तूर्णं निन्युर्जनन्यः पृथुकान् पथिभ्यः ३०
दिदृक्षमाणाः प्रतिरथ्यमीयुर्मुरारिमारादनघं जनौघाः ।
अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति ॥३१॥
उपेयुषो वर्त्म निरन्तराभि-
　　रसौ निरुच्छ्वासमनीकिनीभिः ।
रथस्य तस्यां पुरि दत्तचक्षु-
　　र्विद्वान् विदामास शनैर्न यातम् ॥ ३२ ॥
मध्येसमुद्रं ककुभः पिशङ्गी-
　　र्या कुर्वती काञ्चनवप्रभासा ।
तुरङ्गकान्तामुखहव्यवाह-
　　ज्वालेव भित्त्वा जलमुल्ललास ॥ ३३ ॥
कृतस्पदा भूमिभृतां सहस्रै-
　　रुदन्वदम्भः परिवीतमूर्तिः ।
अनिर्भिदा या विदधे विधात्रा
　　पृथ्वी पृथिव्याः प्रतियातनेव ॥ ३४ ॥
त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्य सीमा ।
अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेर्जलेषु ॥ ३५ ॥
रथाङ्गभर्त्रेऽभिनवं वराय यस्याः पितेव प्रतिपादितायाः ।
प्रेम्णोपकण्ठं मुहुरङ्कभाजो रत्नावलीरम्बुधिराबबन्ध ॥३६॥

यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छङ्खकुलाकुलेव ।
वप्रेण पर्यन्तचरोडुचक्रं सुमेरुवप्रोऽन्वहमन्वकारि ॥ ३७ ॥
वणिक्पथे पूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशिः ।
लोलैरलोलद्युतिभाञ्जि मुष्णन् रत्नानि रत्नाकरतामवाप ॥ ३८ ॥
अम्भश्च्युतः कोमलरत्नराशीनपांनिधिः फेनपिनद्धभासः ।
यत्रातपे दातुमिवाधितल्पं विस्तारयामास तरङ्गहस्तैः ॥ ३९ ॥

यच्छालमुत्तुङ्गतया विजेतुं
दूरादुदस्थायत सागरस्य ।
महोर्मिभिर्व्याहतवाञ्छितार्थै-
र्व्रीडामिवाभ्यासगतैर्विलिल्ये ॥ ४० ॥

कुतूहलेनेव जवादुपेत्य प्राकारभित्त्या सहसा निषिद्धः ।
रसन्नरोदीद् भृशमम्बुवर्षव्याजेन यस्या बहिरम्बुवाहः ॥ ४१ ॥

यदङ्गनारूपसरूपतायाः
कञ्चिद् गुणं भेदकमिच्छतीभिः ।
आराधितोऽद्धा मनुरप्सरोभि-
श्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः ॥ ४२ ॥

स्फुरत्तुषारांशुमरीचिजालै-
र्विनिह्नुताः स्फाटिकसौधपङ्क्तीः ।
आरुह्य नार्यः क्षणदासु यत्र
नभोगता देव्य इव व्यराजन् ॥ ४३ ॥

कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्र ।
उच्चैरधःपातिपयोमुचोऽपि समूहमुहुः पयसां प्रणाल्यः ॥ ४४ ॥

रतौ ह्रिया यत्र निशाम्य दीपा-
ञ्जालागताभ्योऽधिगृहं गृहिण्यः ।
बिभ्युर्बिडालेक्षणभीषणाभ्यो
वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥ ४५ ॥

यस्यामतिश्लक्ष्णतया गृहेषु
विधातुमालेख्यमशक्नुवन्तः ।
चक्रुर्युवानः प्रतिबिम्बिताङ्गाः
सजीवचित्रा इव रत्नभित्तीः ॥ ४६ ॥
सावर्ण्यभाजां प्रतिमागतानां
लक्ष्यैः स्मरापाण्डुतयाङ्गनानाम् ।
यस्यां कपोलैः कलधौतधाम-
स्तम्भेषु भेजे मणिदर्पणश्रीः ॥ ४७ ॥
शुकाङ्गनीलोपलनिर्मितानां
लिप्तेषु भासा गृहदेहलीनाम् ।
यस्यामलिन्देष न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि ॥ ४८ ॥
गोपानसोषु क्षणमास्थितानाम्-
मालम्बिभिश्चन्द्रकिणां कलापैः ।
हरिन्मणिश्यामतृणाभिरामै-
र्गृहाणि नीध्रैरिव यत्र रेजुः ॥ ४९ ॥
वृहत्तुलैरप्यतुलैर्वितान-
मालापिनद्धैरपि चावितानैः ।
रेजे विचित्रैरपि या सचित्रै-
र्गृहैर्विशालैरपि भूरिशालैः ॥ ५० ॥
चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः
कपोतपालीषु निकेतनानाम् ।
मार्जारमप्यायतनिश्चलाङ्गं
यस्यां जनः कृत्रिममेव मेने ॥ ५१ ॥
क्षितिप्रतिष्ठोऽपि मुखारविन्दै-
र्वधूजनश्चन्द्रमधश्चकार ।

अतीतनक्षत्रपथानि यत्र
प्रसादशृङ्गाणि वृथाध्यरुक्षत् ॥ ५२ ॥
रम्या इति प्राप्तवती: पताका रागं विविक्ता इति वर्धयन्तीः ।
यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः ॥ ५३ ॥
सुगन्धितामप्रतियत्नपूर्वां
बिभ्रन्ति यत्र प्रमदाय पुंसाम् ।
मधूनि वक्त्राणि च कामिनीना-
मामोदकर्मव्यतिहारमीयुः ॥ ५४ ॥
रत्नान्तरे यत्र गृहान्तरेषु
वितर्दिनिर्यूहविटङ्कनीडः ।
रुतानि शृण्वन् वयसां गणोऽन्ते-
वासित्वमाप स्फुटमङ्गनानाम् ॥ ५५ ॥
छन्नेष्वपि स्पष्टतरेषु यत्र
स्वच्छानि नारीकुचमण्डलेषु ।
आकाशसाम्यं दधुरम्बराणि
न नामतः केवलमर्थतोऽपि ॥ ५६ ॥
यस्यामजिह्मा महतीमपङ्काः सीमानमत्यायतयोऽत्यजन्तः ।
जनैरजातस्खलनैर्न जातु द्वयेऽप्यमुच्यन्त विलीनमार्गाः ॥५७॥
परस्परस्पर्धिपरार्ध्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः ।
श्रीनिर्मितप्राप्तघुणक्षतैकवर्णोपमावाच्यमलं ममार्ज ॥ ५८ ॥
क्षुण्णं यदन्तःकरणेन वृक्षाः
फलन्ति कल्पोपपदास्तदेव ।
अध्यूषुषो यामभवञ्जनस्य याः
सम्पदस्ता मनसोऽप्यगम्याः ॥ ५९ ॥
कलादधानः सकलाः स्वभाभिरु-
द्भासयन्सौधसिताभिराशाः ।

यां रेवतीजानिरियेष हातुं
न रौहिणेयो न च रोहिणीशः ॥ ६० ॥
बाणाहवव्याहतशम्भुशक्तेरासत्तिमासाद्य जनार्दनस्य ।
शरीरिणा जैत्रशरेण यत्र निःशङ्कमूषे मकरध्वजेन ॥ ६१ ॥
निषेव्यमाणेन शिवैर्मरुद्भिर-
ध्यास्यमाना हरिणा चिराय ।
उद्रश्मिरत्नाङ्कुरधाम्नि सिन्धा-
वाह्वास्त मेरावमरावतीं या ॥ ६२ ॥
*स्निग्धाञ्जनश्यामरुचिः* सुवृत्तो
वध्वा इवाध्वंसितवर्णकान्तेः ।
*विशेषको वा विशिशेष यस्याः*
श्रियं त्रिलोकीतिलकः स एव ॥ ६३ ॥
तामीक्षमाणः स पुरं पुरस्तात्प्रापत्प्रतोलीमतुलप्रतापः ।
वज्रप्रभोद्भासिसुरायुधश्रीर्या देवसेनेव परैरलङ्घ्या ॥ ६४ ॥
प्रजा इवाङ्गादरविन्दनाभेः
शम्भोर्जटाजूटतटादिवापः ।
मुखादिवाथ श्रुतया विधातुः
पुरान्निरीयुर्मुरजिद्ध्वजिन्यः ॥ ६५ ॥
श्लिष्यद्भिरन्योन्यमुखाग्रसङ्ग-
स्खलत्खलीनं हरिभिर्विलोलैः ।
परस्परोत्पीडितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः ॥ ६६ ॥
निरन्तरालेऽपि विमुच्यमाने दूरं पथि प्राणभृतां गणेन ।
तेजोमहद्भिस्तमसेव दीपैर्द्विपैरसम्बाधमयाम्बभूवे ॥ ६७ ॥
शनैरनीयन्त रथात्पतन्तो रथाः क्षितिं हस्तिनखादखेदैः ।
सयत्नसूतायतरश्मिभुग्नग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः ॥ ६८ ॥

बलोर्मिभिस्तत्क्षणहीयमान-
रथ्याभुजाया वलयैरिवास्याः ।
प्रायेण निष्क्रामति चक्रपाणौ
नेष्टं पुरो द्वारवतीत्वमासीत् ।। ६९ ।।
पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ।।७०।।
लक्ष्मीभृतोऽम्भोधितटाधिवासान्
द्रुमानसौ नीरदनीलभासः ।
लतावधूसम्प्रयुजोऽधिवेलं बहू-
कृतान् स्वानिव पश्यति स्म ।। ७१ ।।
आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ।। ७२ ।।
पीत्वा जलानां निधिनाऽतिगाध्याद्
वृद्धिं गतेऽप्यात्मनि नैव मान्तीः ।
क्षिप्ता इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार ।। ७३ ।।
साटोपमुर्वीमनिशं नदन्तो
यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधेः
सोऽम्भांसि मेघान् पिबतो ददर्श ।। ७४ ।।
उद्धृत्य मेघैस्तत एव तोय-
मर्थं मुनीन्द्रैरिव सम्प्रणीताः ।
आलोकयामास हरिः पतन्ती-
र्नदीः स्मृतीर्वेदमिवाम्बुराशिम् ।। ७५ ।।
विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः ।

तरीषु तत्रत्यमफल्गुभाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत् ॥ ७६ ॥
उत्पित्सवोऽन्तर्नदभर्तुरुच्चै-
र्गरीयसा निःश्वसितानिलेन ।
पयांसि भक्त्या गरुडध्वजस्य
ध्वजानिवोच्चिक्षिपिरे फणीन्द्राः ॥ ७७ ॥
तमागतं वीक्ष्य युगान्तबन्धुमुत्सङ्गशय्याशयमम्बुराशिः ।
प्रत्युज्जगामेव गुरुप्रमोदप्रसारितोत्तुङ्गतरङ्गबाहुः ॥ ७८ ॥
उत्सङ्गिताम्भःकणको नभस्वा-
नुदन्वतः स्वेदलवान् ममार्ज ।
तस्यानुवेलं व्रजतोऽधिवेल-
मेलालता स्फालनलब्धगन्धः ॥ ७९ ॥
उत्तालतालीवनसम्प्रवृत्त-
समीरसीमन्तितकेतकीकाः ।
आसेदिरे लावणसैन्धवीनां
चमूचरैः कच्छभुवां प्रदेशाः ॥ ८० ॥
लवङ्गमालाकलितावतंसास्ते नारिकेलान्तरपः पिबन्तः ।
आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमीयुः ।८१।।
तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-
श्चिरविगतश्रियो जलनिधेश्च तदाभवदन्तरं महत् ।८२।

(पञ्चकावलीवृत्तं धृतश्रीवृत्तमिति केचित्)

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
श्र्यङ्के पुरीप्रस्थानो नाम तृतीयः सर्गः ॥ ३ ॥

## ॥ ४ ॥ चतुर्थः सर्गः ॥

निःश्वासधूमं सह रत्नभाभि-
भित्त्वोत्थितं भूमिमिवोरगाणाम् ।
नीलोपलस्यूतविचित्रधातु-
मसौ गिरिं रैवतकं ददर्श ॥ १ ॥
गुर्वीरजस्रं दृषदः समन्तादुपर्युपर्यम्बुमुचां वितानैः ।
विन्ध्यायमानं दिवसस्य भर्तुर्मार्गं पुना रोद्धुमिवोन्नमद्भिः ।२।
क्रान्तं रुचा काञ्चनवप्रभाजा
नवप्रभाजालभृतां मणीनाम् ।
श्रितं शिलाश्यामलताभिरामं
लताभिरामन्त्रितषट्पदाभिः ॥ ३ ॥
सहस्रसंख्यैर्गगनं शिरोभिः
पादैर्भुवं व्याप्य वितिष्ठमानम् ।
विलोचनस्थानगतोष्णरश्मि-
निशाकरं साधु हिरण्यगर्भम् ॥ ४ ॥
क्वचिज्जलापायविपाण्डुराणि
धौतोत्तरीयप्रतिमच्छवीनि ।
अभ्राणि बिभ्राणमुमाङ्गसङ्ग-
विभक्तभस्मानमिव स्मरारिम् ॥ ५ ॥
छायां निजस्त्रीचटुलालसानां मदेन किंचिच्चटुलालसानाम् ।
कुर्वाणमुत्पिञ्जलजातपत्रैर्विहङ्गमानां जलजातपत्रैः ॥ ६ ॥
स्कन्धाधिरूढोज्ज्वलनीलकण्ठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः ।
प्रनर्तितानेकलताभुजाग्रान् रुद्राननेकानिव धारयन्तम् ॥ ७ ॥
विलम्बिनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः ।
नवोलपालंकृतसैकताभाः शुचीरपः शैवलिनीर्दधानम् ॥ ८ ॥

राजीवराजीवशलोलभृङ्गं
मुष्णन्तमुष्णं ततिभिस्तरूणाम् ।
कान्तालकान्ता ललनाः सुराणां
रक्षोभिरक्षोभितमुद्वहन्तम् ॥ ९ ॥
(१-९ कुलकम्)

मुदे मुरारेरमरैः सुमेरो-
रानीय यस्योपचितस्य शृङ्गैः ।
भवन्ति नोद्दामगिरां कवीना-
मुच्छ्रायसौन्दर्यगुणा मृषोद्याः ॥ १० ॥

यतः परार्ध्यानि भृतान्यनूनैः
प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि ।
आढ्यादिव प्रापणिकादजस्रं
जग्राह रत्नान्यमितानि लोकः ॥ ११ ॥

अखिद्यतासन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने ।
भृङ्गावलिर्यस्य तटे निपीतरसा नमत्तामरसा न मत्ता ॥१२॥

यत्राधिरूढेन महीरुहोच्चै-
रुन्निद्रपुष्पाक्षिसहस्रभाजा ।
सुराधिपाधिष्ठितहस्तिमल्ल-
लीलां दधौ राजतगण्डशैलः ॥ १३ ॥

विभिन्नवर्णा गरुडाग्रजेन
सूर्यस्यरथ्याः परितः स्मरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वा-
मानिन्यिरे वंशकरीरनीलैः ॥ १४ ॥

यत्रोज्झिताभिर्मुहुरम्बुवाहैः
समुन्नमद्भिर्न समुन्नमद्भिः ।

वनं बबाधे विषपावकोत्था
विपन्नगानामविपन्नगानाम् ।। १५ ।।

फलद्भिरुष्णांशुकराभिमर्शा-
त्कार्शानवं धाम पतङ्गकान्तैः ।
शशंस यः पात्रगुणाद् गुणानां
संक्रान्तिमाक्रान्तगुणातिरेकाम् ।। १६ ।।

दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।। १७ ।।

उच्चारणज्ञोऽथ गिरां दधानमुच्चारणत्पक्षिगणास्तटीस्तम् ।
उत्कन्धरं द्रष्टुमवेक्ष्य शौरिमुत्कन्धरं दारुक इत्युवाच ।। १८ ।।

आच्छादितायतदिगम्बरमुच्चकैर्गा-
माक्रम्य संस्थितमुदग्रविशालशृङ्गम् ।
मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ।। १९ ।।
(वसंत०)

उदयति विततोर्ध्वरश्मिरज्जावहि-
मरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वय-
परिवारितवारणेन्द्रलीलाम् ।। २० ।।

वहति यः परितः कनकस्थलीः
*सहरिता लसमाननवांशुकः ।*
अचल एष भवानिव राजते
स हरितालसमाननवांशुकः ।। २१ ।।

पाश्चात्यभागमिह सानुषु सन्निषण्णाः
पश्यन्ति शान्तमलसान्द्रतरांशुजालम् ।

सम्पूर्णलब्धललनालपनोपमान-
मुत्सङ्गसङ्गिहरिणस्य मृगाङ्कमूर्तेः ॥ २२ ॥

कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो
मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः ।
कुर्वन्ति द्यामुत्पतन्तः स्मरार्त-
स्वर्लोकस्त्रीगात्र निर्वाणमत्र ॥ २३ ॥

स्थगयन्त्यमूः शमितचातकार्तस्वरा
जलदास्तडित्तुलितकान्तकार्तस्वराः ।
जगतीरिह स्फुरितचारुचामीकराः
सवितुः क्वचित् कपिशयन्ति चामी कराः ॥२४॥
( पथ्या )

उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बै-
रुत्तम्भितोडुभिरतीवतरां शिरोभिः ।
श्रद्धेयनिर्झरजलव्यपदेशमस्य
विष्वक्तटेषु पततिस्फुटमन्तरीक्षम् ॥२५॥

एकत्र स्फटिकतटांशुभिन्ननीरा
नीलाश्मद्युतिभिदुराम्भसोऽपरत्र ।
कालिन्दीजलजनितश्रियः श्रयन्ते,
वैदग्धीमिह सरितः सुरापगायाः ॥ २६ ॥
( *प्रहर्षिणी* )

इतस्ततोऽस्मिन् विलसन्ति मेरोः
समानवप्रे मणिसानुरागाः ।
स्त्रियश्च पत्यौ सुरसुन्दरीभिः
समा नवप्रेमणि सानुरागाः ॥ २७ ॥

उच्चैर्महारजतराजिविराजितासौ
दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा ।

अभ्येति भस्मपरिपाण्डुरितस्मरारे-
रुद्वह्निलोचनललामललाटलीलाम् ।। २८ ।।

अयमतिजरठाः प्रकामगुर्वी-
रलघुविलम्बिपयोधरोपरुद्धाः ।
सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्ति ।। २९ ।।
(पुष्पताग्रा)

धूमाकारं दधति पुरः सौवर्णे
वर्णेनाग्नेः सादृशि तटे पश्यामि ।
श्यामीभूताः कुसुमसमूहेऽलीनां
लीना मालीमिह तरवो बिभ्राणाः ।।३०।।
(जलधरमाला)

व्योमस्पृशः प्रथयता कलधौतभित्ति-
रुन्निद्रपुष्पचण चम्पकपिङ्गभासः ।
सौमेरवीमधिगतेन नितम्बशोभा-
मेतेन भारतमिलावृतवद्विभाति ।। ३१ ।।

रुचिरचित्रतनूरुहशालिभिर्विचलितैः परितः प्रियकव्रजैः ।
विविधरत्नमयैरभिभात्यसाववयवैरिव जङ्गमतां गतैः ।।३२।

कुशेशयैरत्र जलाशयोषिता मुदा रमन्ते कलभा विकस्वरैः ।
प्रगीयते सिद्धगणैश्च योषितामुदारमन्ते कलभाविकस्वरैः ।३३।

आसादितस्य तमसा नियतेर्नियोगा-
दाकाङ्क्षतः पुनरपक्रमणेन कालम् ।
पत्युस्त्विषामिह महौषधयः कलत्र-
स्थानं परैरनभिभूतममूर्वहन्ति ।।३४।।

वनस्पतिस्कन्धनिषण्णबालप्रबालहस्ताः प्रमदा इवात्र ।
पुष्पेक्षणैर्लम्भितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः ।। ३५ ।।

विहगाः कदम्बसुरभाविह गाः कलयन्त्यनुक्षणमनेकलयम् ।
भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः ॥३६॥
(प्रमिताक्षरा)

विद्वद्भिरागमपरैर्विवृतं कथञ्चि-
च्छ्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः ।
श्रेयान् द्विजातिरिव हन्तुमघानि
दक्षं गूढार्थमेष निधिमन्त्रगणं बिभर्ति ।३७॥
बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्र-
श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः ।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्री-
मुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥ ३८ ॥
यदेतदस्यानुतटं विभाति वनं ततानेकतमालतालम् ।
न पुष्पिताग्रं स्थगितार्करश्मावनन्तताने कतमा लतालम् ।३९।
दन्तोज्ज्वलासु विमलोपलमेखलान्ताः
सद्रत्नचित्रकटकासु बृहन्नितम्बाः ।
अस्मिन् भजन्ति घनकोमलगण्डशैला
नार्योऽनुरूपमधिवासमधित्यकासु ॥ ४० ॥
अनतिचिरोज्झितस्य जलदेन चिर-
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम् ।
विरलविकीर्णवज्रशकला सकला-
मिह विदधाति धौतकलधौतमही ॥ ४१ ॥
(कुररीरुता)

वर्जयन्त्या जनैः सङ्गमेकान्तत-
स्तर्कयन्त्या सुखं सङ्गमे कान्ततः ।
योषयेव स्मरासन्नतापाङ्गया
सेव्यतेऽनेकया सन्नतापाङ्गया ॥४२॥ (स्रग्विणी)

सङ्कीर्णकीचकवनस्खलितैकवाल-
विच्छेदकातरधियश्चलितुं चमर्यः ।
अस्मिन् मृदुश्वसनगर्भतदीयरन्ध्र-
निर्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ॥ ४३ ॥

मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रै-
र्वापीष्वन्तर्लीनमहानीलदलासु ।
शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ-
श्छायामच्छामृच्छति नीलीसलिलस्य ॥४४॥
(मत्तमयूरं)

या न ययौ प्रियमन्यवधूभ्यः सारतरागमना यतमानम् ।
तेन सहेह बिभर्ति रहः स्त्री सा रतरागमनायतमानम् ॥४५॥
(दोधिकम)

भिन्नेषु रत्नकिरणैः किरणेष्विहे-
न्दोरुच्चावचैरुपगतेषु सहस्रसंख्याम् ।
दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्याः ॥ ४६ ॥

अपशङ्कमङ्कपरिवर्तनोचिता-
श्चलिताः पुरः पतिमुपैतुमात्मजाः ।
अनुरोदितीव करुणेन पत्रिणां
विरुतेन वत्सलतयैष निम्नगाः ॥ ४७ ॥

मधुकरविटपानमितास्तरुपङ्क्तीर्बिभ्रतोऽस्य विटपानमिताः ।
परिपाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशंगलता ॥४८॥
(आर्यागीतिः)

प्राग्भागतः पतदिहेदमुपत्यकासु
शृङ्गारितायतमहेभकराभमम्भः ।

संलक्ष्यते विबुधरत्नकरानुविद्ध-
मूर्ध्वंप्रसारितसुराधिपचापचारु ॥ ४९ ॥
दधति च विकसद्विचित्रकल्प-
द्रुमकुसुमैरभिगुम्फितानिवैताः ।
क्षणमलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानमुष्य ॥ ५० ॥
(पुष्पिताग्रा)

सवधूकाः सुखिनोऽस्मिन्ननवरतममन्दरागतामरसदृशः ।
नासेवन्ते रसवन्न नवरतममन्दरागतामरसदृशः ॥५१॥
(आर्यागीतिः)

आच्छाद्य पुष्पपटमेष महान्तमन्त-
रावर्तिभिर्गृहकपोतशिरोधराभैः ।
स्वाङ्गानि धूमरुचिमागुरवीं दधानै-
र्धूपायतीव पटलैर्नवनीरदानाम् ॥ ५२ ॥
अन्योन्यव्यतिकरचारुभिर्विचित्रै-
रत्रस्यन्नवमणिजन्मभिर्मयूखैः ।
विस्मेरान्गगनसदःकरोत्यमुष्मि-
न्नाकाशे रचितमभित्तिचित्रकर्म ॥ ५३ ॥
(प्रहर्षिणी)

समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम् ।
बिभर्ति जनयन्नयं मुदमपाय-
मपायधवला बलाहकततीः ॥ ५४ ॥
(जलोद्धत गतिः)

मैत्र्यादिचित्तपरिकर्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।

ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो न रोद्धुम् ।५५।
मरकतमयमेदिनीषु भानो-
स्तरुविटपान्तरपातिनो मयूखाः ।
अवनतशितिकण्ठकण्ठलक्ष्मी-
मिह दधति स्फुरिताणुरेणुजालाः ।। ५६ ।।
(पुष्पिताग्रा)

या बिभर्ति कलवल्लकीगुण
स्वानमानमतिकालिमाऽलया ।
नाम कान्तमुपगीतया तया
स्वानमा नमति काऽलिमालया ।। ५७ ।।
( रथोद्धता )

सायं शशाङ्ककिरणाहतचन्द्रकान्त-
निस्यन्दिनीरनिकरेण कृताभिषेकाः ।
अर्कोपलोल्लसितवह्निभिरह्नि तप्ता-
स्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः ।। ५८ ।।
एतस्मिन्नधिकपयःश्रियं वहन्त्यः
संक्षोभं पवनभुवा जवेन नीताः ।
वाल्मीकेररहितरामलक्ष्मणानां
साधर्म्यं दधति गिरां महासरस्यः ।। ५९ ।।

इह मुहुर्मुदितैः कलभैः रवः
प्रतिदिशं क्रियते कलभैरवः ।
स्फुरति चानुवनं चमरीचयः
कनकरत्नभुवां च मरीचयः ।। ६० ।।
त्वक्साररन्ध्रपरिपूरणलब्धगीति-
रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्ग ।

कस्तूरिकामृगविमर्दसुगन्धिरेति
रागीव सक्तिमधिकां विषयेषु वायुः ॥६१॥

प्रीत्यै यूनां व्यवहिततपनाः प्रौढध्वान्तं दिनमिह जलदाः ।
दोषामन्यं विदधति सुरतक्रीडायासश्रमशमपटवः ॥ ६२ ॥
(भ्रमरविलसितम्)

भग्नो निवासोऽयमिहास्य पुष्पैः
सदानतो येन विषाणिनाऽगः ।
तीव्राणि तेनोज्झति कोपितोऽसौ
सदानतोयेन विषाणि नागः ॥ ६३ ॥

प्रालेयशीतमचलेश्वरमीश्वरोऽपि
सान्द्रेभचर्मवसनावरणोऽधिशेते ।
सर्वर्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि ॥६४॥

नवनगवनलेखाश्याममध्याभिराभिः
स्फटिककटकभूभिर्नाटयत्येष शैलः ।
अहिपरिकरभाजो भास्मनैरङ्गरागै-
रधिगतधवलिम्नः शूलपाणेरभिख्याम् ॥६५॥
(मालिनी)

दधद्भिरभितस्तटौ विकचवारिजाम्बूनदैः-
र्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः ।
निषेव्य मधु माधवाः सरसमत्र कादम्बरं
हरन्ति रतये रहः प्रियतमाङ्गकादम्बरम् ।६६।
(पृथ्वी)

दर्पणनिर्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः ।

ब्रीडमसम्मुखोऽपि रमणैरपहृतवसनाः
काञ्चनकन्दरासु तरुणीरिह नयति रविः ।।६७।।
( वंशपत्रपतितम् )

अनुकृतशिखरौघश्रीभिरभ्यागतेऽसौ
त्वयि सरभसमभ्युत्तिष्ठतीवाग्निरुच्चैः ।
द्रुतमरुदुपनुन्नैन्नमद्भिः सहेलं
हलधरपरिधानश्यामलैरम्बुवाहैः ।। ६८ ।।
(मालिनी)

।। इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्रयङ्के
रैवतकवर्णनं नाम चतुर्थः सर्गः ।। ४ ।।

卐

## ॥ ५ ॥ पञ्चम सर्गः ॥

( वसंततिलकावृत्तम् )

इत्थं गिरः प्रियतमा इव सोऽव्यलीकाः
शुश्राव सूततनयस्य तदाव्यलीकाः ।
रन्तुं निरन्तरमियेष ततोऽवसाने
तासां गिरौ च वनराजिपटं वसाने ।।१।।

तं स द्विपेन्द्रतुलितातुलतुङ्गशृङ्ग-
मभ्युल्लसत्कदलिकावनराजिमुच्चैः ।
विस्ताररुद्धवसुधोऽन्वचलं चचाल
लक्ष्मीं दधत्प्रतिगिरेरलघुर्बलौघ ।। २ ।।

भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः
सापत्रपा इव महाजनदर्शनेन ।
संविव्युरम्बरविकाशि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकडारमाशाः ॥ ३ ॥
आवर्तिनःशुभफलप्रदशुक्तियुक्ताः
संपन्नदेवमणयो भृतरन्ध्रभागाः ।
अश्वाः प्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्मिभिरापतन्तः ॥ ४ ॥
आरक्षमग्नमवमत्य सृणिं शिताग्र-
मेकः पलायत जवेन कृतार्तनादः ।
अन्यः पुनर्मुहुरुदप्लवतास्तभार-
मन्योन्यतः पथि बताबिभितामिभोष्ट्रौ ॥५॥
आयस्तमैक्षत जनश्चटुलाग्रपादं
गच्छन्तमुच्चलितचामरचारुमश्वम् ।
नागं पुनर्मृदुसलीलनिमीलिताक्षं
सर्वः प्रियः खलु भवत्यनुरूपचेष्टः ॥ ६ ॥
त्रस्तः समस्तजनहासकरः करेणो-
स्तावत्खरः प्रखरमुल्ललयाञ्चकार ।
यावच्चलासनविलोलनितम्बबिम्ब-
विस्रस्तवस्त्रमवरोधवधूः पपात ॥ ७ ॥
शैलोपशल्यनिपतद्रथनेमिधारा-
निष्पिष्टनिष्ठुरशिलातलचूर्णगर्भाः ।
भूरेणवो नभसि नद्धपयोदचक्रा-
श्चक्रीवदङ्गरुहधूम्ररुचो विसस्रुः ॥ ८ ॥
उद्यत्कृशानुशकलेषु खुराभिघाताद्
भूमीसमायतशिलाफलकाचितेषु ।

पर्यन्तवर्त्मसु विचक्रमिरे महाश्वाः
शैलस्य दर्दुरपुटानिव वादयन्तः ॥ ९ ॥
तेजोनिरोधसमतावहितेन यन्त्रा
सम्यक्कशात्रयविचारवता नियुक्तः ।
आरट्टजश्चटुलनिष्ठुरपातमुच्चै-
श्चित्रं चकार पदमर्धपुलायितेन ॥ १० ॥
नीहारजालमलिनः पुनरुक्तसान्द्राः
कुर्वन्वधूजनविलोचनपक्ष्ममालाः ।
क्षुण्णः क्षणं यदुबलैर्दिवमाततांसुः
पांशुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः ॥ ११ ॥
उच्छिद्य विद्विष इव प्रसभं मृगेन्द्रा-
निन्द्रानुजानुचरभूपतयोऽध्यवात्सुः ।
वन्येभमस्तकनिखातनखाग्रमुक्त-
मुक्ताफलप्रकरभाञ्जि गुहागृहाणि ॥ १२ ॥
बिभ्राणया बहलतावकपङ्कपिङ्ग-
पिच्छावचूडमनुमाधवधामजग्मुः ।
चञ्च्वग्रदष्टचटुलाहिपताकयान्ये
स्वावासभागमुरगाशनकेतुयष्ट्या ॥ १३ ॥
छायामपास्य महतीमपि वर्तमाना-
मागामिनीं जगृहिरे जनतास्तरूणाम् ।
सर्वं हि नोपगतमप्यपचीयमानं
वर्धिष्णुमाश्रयमनागतमभ्युपैति ॥ १४ ॥
अग्रे गतेन वसतिं परिगृह्य
रम्यामापात्यसैनिकनिराकरणाकुलेन ।
यान्तोऽन्यतः प्लुतकृतस्वरमाशु
दूरादुद्बाहुना जुहुविरे जुहुरात्मवर्ग्याः ॥१५॥

सिक्ता इवामृतरसेन मुहुर्जनानां
क्लान्तिच्छिदो वनवनस्पतयस्तदानीम् ।
शाखावसक्तवसनाभरणाभिरामाः
कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥ १६ ॥
यानाज्जनः परिजनैरवतार्यमाणा
राज्ञीनरापनयनाकुलसौविदल्लाः ।
स्रस्तावगुण्ठनपटाः क्षणलक्ष्यमाण-
वक्त्रश्रियः सभयकौतुकमीक्षते स्म ॥ १७ ॥
कण्ठावसक्तमृदुबाहुलतास्तुरंगाद्-
राजावरोधनवधूरवतारयन्तः ।
आलिंगनान्यधिकृताः स्फुटमापुरेव
गण्डस्थलीः शुचितया च चुचुम्बुरासाम् ॥१८॥
दृष्ट्वेव निर्जितकलापभरामधस्ता-
द्व्याकीर्णमाल्यकबरां कबरीं तरुण्याः ।
प्रादुद्रुवत्सपदि चन्द्रकवान् द्रुमाग्रा-
त्सङ्घर्षिणा सह गुणाभ्यधिकैर्दुरासम् ॥१९॥
रोचिष्णुकाञ्चनमयांशुपिशङ्गिताशा
वंशध्वजैर्जलदसंहतिमुल्लिखन्त्यः ।
भूभर्तुरायतविरन्तरसन्निविष्टाः
पादा इवाभिबभुरावलयो रथानाम् ॥ २० ॥
छायाविधायिभिरनुज्झितभूतिशोभै-
रुच्छ्रायिभिर्बहलपाटलधातुरागैः ।
दूष्यैरिव क्षितिभृतां द्विरदैरुदार-
तारावलीविरचनैर्व्यरचन्निवासाः ॥ २१ ॥
उत्क्षिप्तकाण्डपटकान्तरलीयमान-
मन्दानिलप्रशमितश्रमघर्मतोयैः ।

दूर्वाप्रतानसहजास्तरणेषु भेजे
निद्रासुखं वसनसद्मसु राजदारैः ॥२२॥
प्रस्वेदवारिसविशेषविषक्तमङ्गे
कूर्पासकं क्षतनखक्षतमुत्क्षिपन्ती ।
आविर्भवद्घनपयोधरबाहुमूला
शातोदरी युवदृशां क्षणमुत्सवोऽभूत् ॥ २३ ॥
यावत्स एव समयः सममेव ताव-
दव्याकुलाः पटमयान्यभितो वितत्य ।
पर्यापतत्क्रयिकलोकमगण्यपूर्णा-
पणा विपणिनो विपणीर्विभेजुः ॥ २४ ॥
अल्पप्रयोजनकृतोरुतरप्रयासै-
रुद्गूर्णलोष्टलगुडैः परितोऽनुविद्धम् ।
उद्घातमुद्द्रुतमनोकहजालमध्या-
दन्यः शशं गुणमनल्पमवन्नवाप ॥ २५ ॥
त्रासाकुलः परिपतन् परितो निकेतान्
पुंभिर्न कैश्चिदपि धन्विभिरन्वबन्धि ।
तस्थौ तथापि न मृगः क्वचिदङ्गनाना-
माकर्णपूर्णनयनेषु हतेक्षणश्रीः ॥ २६ ॥
आस्तीर्णतल्परचितावसथः क्षणेन
वेश्याजनः कृतनवप्रतिकर्मकाम्यः ।
खिन्नानखिन्नमतिरापततो मनुष्यान्
प्रत्यग्रहीच्चिरनिविष्ट इवोपचारैः ॥ २७ ॥
सस्नुः पयः पपुरनेनिजुरम्बराणि
जक्षुर्बिसं धृतविकासिबिसप्रसूनाः ।
सैन्याः श्रियामनुपभोगनिरर्थकत्व-
दोषप्रवादममृजन्नगनिम्नगानाम् ॥ २८ ॥

*नाभिह्रदैः परिगृहीतरयाणि निम्नैः*
स्त्रीणां बृहज्जघनसेतुनिवारितानि ।
जग्नुर्जलानि जलमण्डुकवाद्यवल्गु-
वल्गद्घनस्तनतटस्खलितानि मन्दम् ॥ २९ ॥
आलोलपुष्करमुखोल्लसितैरभीक्ष्ण-
मुक्षाम्बभूवुरभितो वपुरम्बुवर्षैः ।
खेदायत श्वसितवेगनिरस्तमुग्ध-
मूर्धन्यरत्ननिकरैरिव हास्तिकानि ॥३०॥
ये पक्षिणः प्रथममम्बुनिधिं गतास्ते
येऽपीन्द्रपाणितुलितायुधलूनपक्षाः ।
ते जग्मुरद्रिपतयः सरसीर्विगाढु-
माक्षिप्तकेतुकुथसैन्यगजच्छलेन ॥ ३१ ॥
आत्मानमेव जलधेः प्रतिबिम्बिताङ्ग-
मूर्मौ महत्यभिमुखापतितं निरीक्ष्य ।
क्रोधादधावदपभीरभिहन्तुमन्य-
नागाभियुक्त इव युक्तमहो महेभः ॥ ३२ ॥
नादातुमन्यकरिमुक्तमदाम्बुतिक्त
धूताङ्कुशेन न विहातुमपीच्छताम्भः ।
रुद्धे गजेन सरितः सरुषावतारे
रिक्तोदपात्रकरमास्त चिरं जनौघः ॥ ३३ ॥
पन्थानमाशु विजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कि चेताः ।
स्तम्बेरमः परिणिनंसुरसावुपैति
षिड्गैरगद्यत ससंभ्रममेव काचित् ॥ ३४ ॥
कीर्णं शनैरनुकपोलमनेकपानां
हस्तैर्विगाढमदतापरुजः शमाय ।

आकर्णमुल्लसितमम्बु विकासिकाश-
नीकाशमाप समतां सितचामरस्य ॥ ३५ ॥
गण्डूषमुज्झितवता पयसः सरोषं
नागेन लब्धपरवारणमारुतेन ।
अम्भोधिरोधसि पृथुप्रतिमानभाग-
रुद्धोरुदन्तमुसलप्रसरं निपेते ॥ ३६ ॥
दानं ददत्यपि जलैः सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ।
यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ॥ ३७ ॥
अन्तर्जलौघमवगाढवतः कपोलौ
हित्वा क्षणं विततपक्षतिरन्तरीक्षे ।
द्रव्याश्रयेष्वपि गुणेषु रराज नीलो
वर्णः पृथग्गत इवालिगणो गजस्य ॥ ३८ ॥
संसर्पिभिः पयसि गैरिकरेणुरागै-
रम्भोजगर्भरजसाङ्गनिषङ्गिणा च ।
क्रीडोपभोगमनुभूय सरिन्महेभाव-
न्योन्यवस्त्रपरिवर्तमिव व्यधत्ताम् ॥ ३९ ॥
यां चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ।
तां प्रत्यवापुरविलम्बितमुत्तरन्तो
धौताङ्गलग्ननवनीलपयोजपत्रैः ॥ ४० ॥
प्रत्यन्यदन्ति निशिताङ्कुशदूर-
भिन्ननिर्याणनिर्यदसृजं चलितं निषादी ।
रोद्धुम् महेभमपरिव्रढिमानमागा-
दाक्रान्तितो न वशमेति महान् परस्य ॥४१॥

सेव्योऽपि सानुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानकृताधिवासः ।
नाभाजि केवलमभाजि गजेन शाखी
नान्यस्य गन्धमपि मानभृतः सहन्ते ।। ४२ ।।
अद्रीन्द्रकुञ्जचरकुञ्जरगण्डकाष-
संक्रान्तदानपयसो वनपादपस्य ।
सेनागजेन मथितस्य निजप्रसूनै-
र्मम्ले यथागतमगामि कुलैरलीनाम् ।। ४३ ।।
नोच्चैर्यदा तरुतलेषु ममुस्तदानी-
माधोरणैरभिहिताः पृथुमूलशाखाः ।
बन्धाय चिच्छिदुरिभास्तरसात्मनैव
नैवात्मनीनमथवा क्रियते मदान्धैः ।। ४४ ।।
उष्णोष्णशीकरसृजः प्रबलोष्मणोऽन्त-
रुत्फुल्लनीलनलिनोदरतुल्यभासः ।
एकान् विशालशिरसो हरिचन्दनेषु
नागान् बबन्धुरपरान्मनुजा निरासुः ।। ४५ ।।
कण्डूयतः कटभुवं करिणा मदेन
स्कन्धं सुगन्धिमनुलीनवता नगस्य ।
स्थूलेन्द्रनीलशकलावलिकोमलेन
कण्ठेगुणत्वमलिनां, वलेयेन भेजे ।। ४६ ।।
निर्धूतवीतमपि बालकमुल्ललन्तं
यन्ता क्रमेण परिसान्त्वनतर्जनाभिः ।
शिक्षावशेन शतकैर्वशमानिनाय
शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति ।।४७
स्तम्भं महान्तमुचितं सहसा मुमोच
दानं ददावतितरां सरसाग्रहस्तः ।

बद्धापराणि परितो निगडान्यलावी-
स्स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः ॥४८॥
जज्ञे जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ।
गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवगृह्य साध्यः ॥४९॥
क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डं
नापेक्षते स्म निकटोपगतां करेणुम् ।
सस्मार वारणपतिः परिमीलिताक्ष-
मिच्छाविहारवनवासमहोत्सवानाम् ॥ ५० ॥
दुःखेन भाजयितुमाशयिता शशाक
तुङ्गाग्रकायमनम्नन्तमनादरेण ।
उत्क्षिप्तहस्ततलदत्तविधानपिण्ड-
स्नेहस्रुतिस्नपितबाहुरिभाधिराजम् ॥ ५१ ॥
शुक्लांशुकोपरचितानि निरन्तराभि-
र्वेस्मानिरश्मिविततानि नराधिपानाम् ।
चन्द्राकृतानि गजमण्डलिकाभिरुच्चै-
र्नीलाभ्रपङ्क्तिपरिवेषमिवाधिजग्मुः ॥ ५२ ॥
गत्यूनमार्गगतयोऽपि गतोरुमार्गाः
स्वैरं समाचक्रुषिरे भुवि वेल्लनाय ।
दर्पोदयल्लसितफेनजलानुसार-
संलक्ष्यपल्ययनवर्ध्रपदास्तुरङ्गाः ॥ ५३ ॥
आजिघ्रति प्रणतमूर्धनि बाह्लिजेऽश्वे
तस्याङ्गसङ्गमसुखानुभवोत्सुकायाः ।
नासाविरोकपवनोल्लसितं तनीयो
रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥५४॥

हेम्नः स्थलीषु परितः परिवृत्य वाजी
धुन्वन् वपुः प्रविततायत केशपङ्क्तिः ।
ज्वालाकणारुणरुचा निकरेण रेणोः
शेषेण तेजस इवोल्लसता रराज ॥ ५५ ॥

दन्तालिकाधरणनिश्चलपाणियुग्म-
मर्धोदितो हरिरिवोदयशैलमूर्ध्नः ।
स्तोकेन नाक्रमत वल्लभपालमुच्चैः
श्रीवृक्षकी पुरुषकोन्नमिताग्रकायः ॥ ५६ ॥

रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्ति-
र्देवैरिवानिमिषदृष्टिभिरीक्ष्यमाणः ।
श्रीसन्निधानरमणीयतरोऽश्व उच्चै-
रुच्चैःश्रवा जलनिधेरिव जातमात्रः ॥ ५७ ॥

अश्रावि भूमिपतिभिः क्षणवीतनिद्रै-
रश्नन्पुरो हरितकं मुदमादधानः ।
ग्रीवाग्रलोलकलकिङ्किणिकानिनाद-
मिश्रं दधद्दशनचर्वणशब्दमश्वः ॥ ५८ ॥

उत्खाय दर्पचलितेन सहैव रज्ज्वा
कीलं प्रयत्नपरमानवदुर्ग्रहेण ।
आकुल्यकारि कटकस्तुरगेण तूर्ण-
मश्वेति विद्रुतमनुद्रवताश्वमन्यम् ॥ ५९ ॥

अव्याकुलं प्रकृतमुत्तरधेयकर्म-
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।
सिद्धं मुखे नवसु वीथिषु कश्चिदश्वं
वल्गाविभागकुशलो गमयाम्बभूव ॥ ६० ॥

मुक्तास्तृणाहि परितः कटकं चरन्त-
स्त्रुटचद्वितानतनिकाव्यतिषङ्गभाजः ।

सस्नुः सरोषपरिचारकवार्यमाणा
　　दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥ ६१ ॥
उत्तीर्णभारलघुनाप्यलघूलपौघ-
　　सौहित्यनिःसहतरेण तरोरधस्तात् ।
रोमन्थमन्थरचलद्गुरुसास्नमासां
　　चक्रे निमीलदलसेक्षणमौक्षकेण ॥ ६२ ॥
मृत्पिण्डशेखरितकोटिभिरर्धचन्द्रं
　　शृङ्गैः शिखाग्रगतलक्ष्ममलं हसद्भिः ।
उच्छृङ्खितान्यवृषभाः सरितां नदन्तो
　　रोधांसि धीरमवचस्करिरे महोक्षाः ॥ ६३ ॥
मेदस्विनः सरभसोपगतानभीकान्
　　भङ्क्त्वा परानन्डुहो मुहुराहवेन ।
ऊर्जस्वलेन सुरभीरनु निःसपत्नं
　　जग्मे जयोद्धुरविशालविषाणमुक्ष्णा ॥ ६४ ॥
बिभ्राणमायतिमतीमवृथा शिरोधिं
　　प्रत्यग्रतामतिरसामधिकं दधन्ति ।
लोध्रोष्ठमौष्ट्रकमुदग्रमुखं तरुणा-
　　मभ्रंलिहानि लिलिहे नवपल्लवानि ॥ ६५ ॥
सार्धं कथञ्चिदुचितैः पिचुमर्दपत्रै-
　　रास्यान्तरालगतमाम्रदलं म्रदीयः ।
दासेरकः सपदि संवलितं निषादै-
　　र्विप्रं पुरा पतगराडिव निर्जगार ॥ ६६ ॥
स्पष्टं बहिः स्थितवतेऽपि निवेदयन्त-
　　श्चेष्टाविशेषमनुजीविजनाय राज्ञाम् ।
वैतालिकाः स्फुटपदप्रकटार्थमुच्चै-
　　र्भोगावलीः कलगिरोऽवसरेषु पेठुः ॥ ६७ ॥

उन्नम्रताम्रपटमण्डपमण्डितंत-
दानीलनागकुलसंकुलमाबभासे ।
संध्यांशुभिन्नघनकर्बुरितान्तरीक्षं
लक्ष्मीविडम्बि शिबिरं शिवकीर्तनस्य ॥६८॥
धरस्योद्धर्तासि त्वमिति ननु सर्वत्र जगति
प्रतीतस्तत्किं मामतिभरमधः प्रापिपयिषुः ।
उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ
बलक्रान्तः क्रोडद्द्विरदमथितोर्वीरुहरवैः ।।६९
( शिखरिणी )

।। इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के ( सेना-निवेशो नाम ) पञ्चमः सर्गः ॥ ५ ॥

## ॥ ६ ॥ षष्ठः सर्गः ॥

( द्रुतविलंबितवृत्तम् )

अथ रिरंसुममुं युगपद्गिरौ
कृतयथास्वतरुप्रसवश्रिया ।
ऋतुगणेन निषेवितुमादधे
भुवि पदं विपदन्तकृतं सताम् ॥ १ ।
नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्स
सुरभिं सुरभिं सुमनोभरैः ॥ २ ॥
विलुलितालकसंहतिरामृश-
न्मृगदृशां श्रमवारि ललाटजम् ।
तनुतरङ्गततिं सरसां दल-
त्कुवलयं वलयन्मरुदाववौ ॥ ३ ॥

तुलयति स्म विलोचनतारकाः
कुरबकस्तबकव्यतिषङ्गिणि ।
गुणवदाश्रयलब्धगुणोदये
मलिनिमालिनि माधवयोषिताम् ॥ ४ ॥
स्फुटमिवोज्ज्वलकाञ्चनकान्तिभि-
र्युतमशोकमशोभत चम्पकैः ।
विरहिणां हृदयस्य भिदाभृतः
कपिशितं पिशितं मदनाग्निना ॥ ५ ॥
स्मरहुताशनमुर्मुरचूर्णतां
दधुरिवाम्रवणस्य रजःकणाः ।
निपतिताः परितः पथिकव्रजानु-
परिते परितेपुरतो भृशम् ॥ ६ ॥
रतिपतिप्रहितेव कृतक्रुधः
प्रियतमेषु वधूरनुनायिकाः ।
बकुलपुष्परसासवपेशल-
ध्वनिरगान्निरगान्मधुपावलिः ॥ ७ ॥
प्रियसखीसदृशं प्रतिबोधिताः
किमपि काम्यगिरा परपुष्टया ।
प्रियतमाय वपुर्गुरुमत्सर-
च्छिदुरयाऽदुरयाचितमङ्गनाः ॥ ८ ॥
मधुकरैरपवादकरैरिव
स्मृतिभुवः पथिका हरिणा इव ।
कलतया वचसः परिवादिनी-
स्वरजिता रजिता वशमाययुः ॥ ९ ॥
समभिसृत्य रसादवलम्बितः
प्रमदया कुसुमावचिचीर्षया ।

अविनमन्न रराज वृथोच्चकै-
रनृतया नृतया वनपादपः ॥ १० ॥
इदमपास्य विरागि परागिणी-
रलिकदम्बकसम्बुरुहां ततीः ।
स्तनभरेण जितस्तबकानमं-
न्नवलते वलतेऽभिमुखं तव ॥ ११ ॥
सुरभिणि श्वसिते दधतस्तृषं
नवसुधामधुरे च तवाधरे ।
अलमलेरिव गन्धरसावमू
मम न सौमनसौ मनसो मुदे ॥ १२ ॥
इति गदन्तमनन्तरमङ्गना
भुजयुगोन्नमनोच्चतरस्तनी ।
प्रणयिनं रभसादुदरश्रिया
वलिभयालिभयादिव सस्वजे ॥ १३ ॥
वदनसौरभलोभपरिभ्रमद्-
भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखला-
कलकलोऽलकलोलदृशान्यया ॥ १४ ॥
अजगणन् गणशः प्रियमग्रतः
प्रणतमप्यभिमानितया न याः ।
सति मधावभवन्मदनव्यथा
विधुरिता धुरिताः कुकुरस्त्रियः ॥ १५ ॥
कुसुमकार्मुककार्मुकसंहित-
द्रुतशिलीमुखखण्डितविग्रहाः ।
मरणमप्यपराः प्रतिपेदिरे
किमु मुहुर्मुहुर्गतभर्तृकाः ॥ १६ ॥

रुरुदिषा वदनाम्बुरुहश्रियः
सुतनु सत्यमलङ्करणाय ते ।
तदपि सम्प्रति सन्निहिते मघा-
वधिगमं धिगमङ्गलमश्रुणः ॥ १७ ॥
त्यजति कष्टमसावचिरादसून्
विरहवेदनयेत्यघशङ्किभिः ।
प्रियतया गदितास्त्वयि बान्ध-
वैरवितथा वितथाः सखि मा गिरः ॥ १८ ॥
न खलु दूरगतोऽप्यतिवर्तते
महमसाविति बन्धुतयोदितैः ।
प्रणयिनो निशमय्य वधूर्बहिः
स्वरमृतैरमृतैरिव निर्ववौ ॥१९॥ (विशेषकम्)
मधुरया मधुबोधितमाधवी-
मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे ॥ २० ॥
अरुणिताखिलशैलवना मुहु-
र्विदधती पथिकान् परितापिनः ।
विकचकिंशुकसंहतिरुच्चकै-
रुदवहद्दवहव्यवहश्रियम् ॥ २१ ॥
रवितुरङ्गतनूरुहतुल्यतां
दधति यत्र शिरीषरजोरुचः ।
उपययौ विदधन्नवमल्लिकाः
शुचिरसौ चिरसौरभसम्पदः ॥ २२ ॥
दलितकोमलपाटलकुड्मले
निजवधूश्वसितानुविधायिनि

मरुति वाति विलासिभिरुन्मद-
भ्रमदलौ मदलौल्यमुपाददे ॥ २३ ॥
निदधिरे दयितोरसि तत्क्षण-
स्नपनवारितुषारभृतः स्तनाः ।
सरसचन्दनरेणुरनुक्षणं
विचकरे च करेण वरोरुभिः ॥ २४ ॥
स्फुरदधीरतडिन्नयना मुहुः
प्रियमिवागलितोरुपयोधरा ।
जलधरावलिरप्रतिपालित-
स्वसमया समयाज्जगतीधरम् ॥ २५ ॥
गजकदम्बकमेचकमुच्चकै-
र्नभसि वीक्ष्य नवाम्बुदमम्बरे ।
अभिससार न वल्लभमङ्गना
न चकमे च कमेकरसं रहः ॥ २६ ॥
अनुययौ विविधोपलकुण्डल-
द्युतिवितानकसंवलितांशुकम् ।
धृतधनुर्वलयस्य पयोमुचः
शबलिमा बलिमानमुषो वपुः ॥ २७ ॥
द्रुतसमीरचलैः क्षणलक्षित-
व्यवहिता विटपैरिव मञ्जरी ।
नवतमालनिभस्य नभस्तरो-
रचिररोचिररोचत वारिदैः ॥ २८ ॥
पटलमम्बुमुचां पथिकाङ्गना
सपदि जीवितसंशयमेष्यती ।
सनयनाम्बुसखीजनसम्भ्रमा-
द्विधुरबन्धुरबन्धुरमैक्षत ॥ २९ ॥

प्रवसतः सुतरामुदकम्पय-
द्विदलकन्दलकम्पनलालितः ।
नमयति स्म वनानि मनस्विनी-
जनमनोनमनो घनमारुतः ॥ ३० ॥
जलदपङ्क्तिरनर्तयदुन्मदं
कलकलापि कलापिकदम्बकम् ।
कृतसमार्जनमर्दलमण्डल-
ध्वनिजया निजया स्वनसम्पदा ॥ ३१ ॥
नवकदम्बरजोरुणिताम्बरै-
रधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः ।
मनसि रागवतामनुरागिता
नवनवा वनवायुभिरादधे ॥ ३२ ॥
शमिततापमपोढमहीरजः
प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम् ।
प्रविरलैरचलाङ्गनमङ्गना-
जनसुगं न सुगन्धि न चक्रिरे ॥ ३३ ॥
द्विरददन्तवलक्षमलक्ष्यत
स्फुरितभृंगमृगच्छवि केतकम् ।
घनघनौघविघट्टनया दिवः
कृशशिखं शशिखण्डमिव च्युतम् ॥ ३४ ॥
दलितमौक्तिकचूर्णविपाण्डवः
स्फुरितनिर्झरशीकरचारवः ।
कुटजपुष्पपरागकणाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम् ॥ ३५ ॥
नवपयः कणकोमलमालती-
कुसुमसंततिसंततसङ्गिभिः ।

प्रचलितोडुनिलैः परिपाण्डिमाः
शुभरजोऽलिभिराददे ॥ ३६ ॥
निजरजः पटवासमिवाकिरद्
घृतपटोपमवारिमुचां दिशाम् ।
प्रियवियुक्तवधूजनचेतसाम-
नवनी नवनीपवनावलिः ॥ ३७ ॥
प्रणयकोपभृतोऽपि पराङ्मुखाः सपदि वारिधरारवभीरवः ।
प्रणयिनः परिरब्धुमथाङ्गना ववलिरे वलिरेचितमध्यमाः ।३८।
विगतरागगुणोऽपि जनो न कश्चलति वाति पयोदनभस्वति ।
अभिहितेऽलिभिरेवमिवोच्चकैरननृते ननृते नवपल्लवैः ॥३९॥
अरमयन् भवनादचिरद्युतेः किल भयादपयातुमनिच्छवः ।
यदुनरेन्द्रगणं तरुणीगणास्तमथ मन्मथमन्थरभाषिणः ॥४०॥
ददतमन्तरिताहिमदीधितिं खगकुलाय कुलायनिलायिताम् ।
जलदकालमबोधकृतं दिशामपरथाप रथावयवायुधः ॥ ४१ ॥
स विकचोत्पलचक्षुषमैक्षत क्षितिभृतोऽङ्कगतां दयितामिव ।
शरदमच्छगलद्वसनोपमाक्षमघनामघनाशनकीर्तनः ॥४२॥
जगति नैशमशीतकरः करैर्वियति वारिदवृन्दमयं तमः ।
जलजराजिषु नैद्रमदिद्रवन्न महतामहृताः क्व च नारयः ।४३।
समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम् ।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयूरमणीयताम् ॥४४॥
तनुरुहाणि पुरो विजितध्वनेर्धवलपक्षविहङ्गमकूजितैः ।
जगलुरक्षमयेव शिखण्डिनः परिभवोऽरिभवो हि सुदुःसहः ।४५।
अनुवनं वनराजिवधूमुखे बहलरागजवाधरचारुणि ।
विकचबाणदलावलयोऽधिकं रुरुचिरे रुचिरेक्षणविभ्रमाः ।४६।
कनकभङ्गपिशङ्गदलैर्दधे सरजसारुणकेशरचारुभिः ।
प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता ॥४७॥

मुखसरोजरुचं मदपाटलामनुचकार चकोरदृशां यतः ।
धृतनवातपमुत्सुकतामतो न कमलं कमलम्भयदम्भसि ॥४८॥
विगतसस्यजिघत्समघट्टयत्कलमगोपवधूर्न मृगव्रजम् ।
श्रुततदीरितकोमलगीतकध्वनिमिषेऽनिमिषेक्षणमग्रतः ॥४९॥
कृतमदं निगदन्त इवाकुलीकृतजगत्त्रयमूर्जमतङ्गजम् ।
बभुरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः ॥५०॥
विगतवारिधरावरणाः क्वचिद्ददृशुरुल्लसितासिलतासिताः ।
क्वचिदिवेन्द्रगजाजिनकञ्चुकाः शरदि नीरदिनीर्यदवो दिशः ।

विलुलितामनिलः शरदङ्गना
नवसरोरुहकेशरसम्भवाम् ।
विकिरितुं परिहासविधित्सया
हरिवधूरिव धूलिमुदक्षिपत् ॥ ५२ ॥

हरितपत्रमयीव मरुद्गुणैः स्रगवनद्धमनारमपल्लवा ।
मधुरिपोरभिताम्रमुखी मुदं दिवि तता विततान शुकावलिः ॥

स्मितसरोरुहनेत्रसरोजला-
मतिसिताङ्गविहङ्गहसद्दिवम् ।
अकलयन् मुदितामिव सर्वतः
स शरदं शरदन्तुरदिङ्मुखाम् ॥ ५४ ॥

गजपतिद्वयसीरपि हैमन-
स्तुहिनयन् सरितः पृषतां पतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥ ५५ ॥

इदमयुक्तमहो महदेव यद्
वरतनोः स्मरयत्यनिलोऽन्यदा ।
स्मृतसयौवनसोष्मपयोधरान्
सतुहिनस्तु हिनस्तु वियोगिनः ॥ ५६ ॥

प्रियतमेन यया सरुषा स्थितं
न सह सा सहसा परिरभ्य तम् ।
श्लथयितुं क्षणमक्षमताङ्गना
न सहसा सहसा कृतवेपथुः ॥ ५७ ॥

भृशमदूयत याऽधरपल्लव-
क्षतिरनावरणा हिममारुतैः ।
दशनरश्मिपटेन च सीत्कृतै-
र्निवसितेव सितेन सुनिर्ववौ ॥ ५८ ॥

व्रणभृता सुतनोः कलसीत्कृतस्फुरितदन्तमरीचिमयं दधे ।
स्फुटमिवावरणं हिममारुतैर्मृदुतया दुतयाधरलेखया ॥ ५९ ॥

धृततुषारकणस्य नभस्वत-
स्तरुलताङ्गुलितर्जनविभ्रमाः ।
पृथु निरन्तरमिष्टभुजान्तरं
वनितयाऽनितया न विषेहिरे ॥ ६० ॥

हिमऋतावपि ताः स्म भृशस्विदो
युवतयः सुतरामुपकारिणि ।
प्रकटयत्यनुरागमकृत्रिमं स्म-
रमयं रमयन्ति विलासिनः ॥ ६१ ॥

कुसुमयन् फलिनीरलिनीरवै-
र्मदविकासिभिराहितहुङ्कृतिः ।
उपवनं निरभर्त्सयत प्रिया-
वियुवतीर्युवतीः शिशिरानिलः ॥ ६२ ॥

उपचितेषु परेष्वसमर्थतां
व्रजति कालवशाद् बलवानपि ।
तपसि मन्दगभस्तिरभीषुमा-
न्नहि महाहिमहानिकरोऽभवत् ॥ ६३ ॥

अभिषिषेणयिषुं भुवनानि यः
स्मरमिवाख्यत लोध्ररजश्चयः ।
क्षुभितसैन्यपरागविपाण्डुर-
द्युतिरयं तिरयन्नुदभूद् दिशः ॥ ६४ ॥
शिशिरमासमपास्य गुणोऽस्य नः
क इव शीतहरस्य कुचोष्मणः ।
इति धियास्तरुषः परिरेभिरे
घनमतो नमतोऽनुमतान् प्रियाः ॥ ६५ ॥
अधिलवङ्गममी रजसाधिकं
मलिनिताः सुमनोदलतालिनः ।
स्फुटमिति प्रसवेन पुरोऽहस-
त्सपदि कुन्दलता दलतालिनः ॥ ६६ ॥
अतिसुरभिरभाजि पुष्पश्रियामतनुतरतयेव सन्तानकः ।
तरुणपरभृतः स्वनं रागिणामतनुत रतये वसन्तानकः ॥६७॥
नोज्झितुं युवतिमाननिरासे दक्षमिष्टमधुवासरसारम् ।
चूतमालिरलिनामतिरागादक्षमिष्ट मधुवासरसारम् ॥६८॥
जगद्वशीकर्तुमिमाः स्मरस्य प्रभावनी केतनवैजयन्तीः ।
इत्यस्य तेने कदलीर्मधुश्रीः प्रभावनी केतनवैजयन्तीः ॥६९॥
स्मररागमयी वपुस्तमिस्रा
परितस्तार रवेरसत्यवश्यम् ।
प्रियमाप दिवापि कोकिले स्त्री
परितस्ताररवे रसत्यवश्यम् ॥ ७० ॥
वपुरम्बुविहारमिह शुचिना रुचिरं कमनीयतरा गमिता ।
रमणेन रमण्यचिरांशुलतारुचिरङ्कमनीयत रागमिता ॥७१॥
मुदमब्दभुवामपां मयूराः
सहसायन्त नदी पपाट लाभे ।

अलिना रमतालिनो शिलीन्ध्रे-
सह सायन्तनधीपपाटलाभे ॥ ७२ ॥
कुटजानि वीक्ष्य शिखिभिः शिख-
रीन्द्रं समयावनी घनमदभ्रमराणि ।
गगनं च गीतनिनदस्य गिरोच्चैः
समया वनौघनमदभ्रमराणि ॥ ७३ ॥
अभीष्टमासाद्य चिराय काले समुद्धृताशं कमनी चकाशे ।
योषिन्मनोजन्मसुखोदयेषु समुद्धृताशङ्कमनीचकाशे ॥ ७४ ॥
स्तनयोः समयेन याङ्गनानामभिनद्धारसमा न सा रसेन ।
परिरम्भरुचिं ततिर्जलानामभिनद्धा रसमानसारसेन ॥७५॥
जातप्रीतिर्या मधुरेणानुवनान्तं
कामे कान्ते सारसिकाकाकुरुतेन ।
तत्सम्पर्कं प्राप्य पुरा मोहनलीलां
कामेकान्ते सा रसिका का कुरुते न ॥ ७६ ॥
(मत्तमयूरम्)
कान्ताजनेन रहसि प्रसभं गृहीतः
केशे रते स्मरसहासवतोषितेन ।
प्रेम्णा मनस्सु रजनीष्वपि हैमनीषु
के शेरते स्म रसहासवतोषितेन ॥७७॥(वसंत.)
गतवतामिव विस्मयमुच्चकैरसकलामलपल्लवलीलया ।
मधुकृतामसकृद्गिरमावली रसकलामलपल्लवलीलया ॥७८॥
( द्रुत० )
कुर्वन्तमित्यतिभरेण नगानवाचः
पुष्पैर्विराममलिनां चगान नवाचः ।
श्रीमान् समस्तमनुसानु गिरौ विहर्तुं
बिभ्रत्यचोदि स मयूरगिरा विहर्तुम् ॥७९॥(वसंत.)
॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
ऋतुवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥

## ॥ ७ ॥ सप्तमः सर्गः ॥

( पुष्पिताग्रा वृत्तम् )

अनुगिरमृतुभिर्वितायमानामथ
स विलोकयितुं वनान्तलक्ष्मीम् ।
निरगमदभिराद्धुमादृतानां
भवति महत्सु न निष्फलः प्रयासः ॥ १ ॥

दधति सुमनसो वनानि बह्वी-
र्युवतियुता यदवः प्रयातुमीषुः ।
मनसिशयमहाऽस्त्रमन्यथामी
न कुसुमपञ्चकमप्यलं विसोढुम् ॥ २ ॥

अवसरमधिगम्य तं हरन्त्यो
हृदयमयत्नकृतोज्ज्वलस्वरूपाः ।
अवनिषु पदमङ्गनास्तदानीं
न्यदधत विभ्रमसम्पदोऽङ्गनासु ॥ ३ ॥

नखरुचिरचितेन्द्रचापलेखं
ललितगतेषु गतागतं दधाना ।
मुखरितवलयं पृथौ नितम्बे
भुजलतिका मुहुरस्खलत्तरुण्याः ॥ ४ ॥

अतिशयपरिणाहवान् वितेने
बहुतरमर्पितरत्नकिङ्किणीकः ।
अलघुनि जघनस्थलेऽपरस्या
ध्वनिमधिकं कलमेखलाकलापः ॥ ५ ॥

गुरुनिबिडनितम्बबिम्बभारा-
क्रमणनिपीडितमङ्गनाजनस्य ।

चरणयुगमसुस्रुवत्पदेषु
स्वरसमसक्तमलक्तकच्छलेन ॥ ६ ॥

तव सपदि समीपमानये ताम-
हमिति तस्य मयाग्रतोऽभ्यधायि ।
अतिरभसकृतालघुप्रतिज्ञा-
मनृतगिरं गुणगौरि मा कृथा माम् ॥ ७ ॥

न च सुतनु न वेद्मि यन्महीया-
नसुनिरसस्तव निश्चयः परेण ।
वितथयति न जातु मद्वचोऽसा-
विति च तथापि सखीषु मेऽभिमानः ॥ ८ ॥

सततमतभिभाषणं मया ते
परिपणितं भवतीमनानयन्त्या ।
त्वयि तदिति विरोधनिश्चि-
तायां भवति भवत्वसुहृज्जनः सकामः ॥ ९ ॥

गतधृतिरवलम्बितुं बता-
सूननलमनालपनादहं भवत्याः ।
प्रणयिनि यदि न प्रसादबुद्धि-
र्भव मम मानिनि जीविते दयालुः ॥ १० ॥

प्रयमिति वनित नितान्तमागः-
स्मरणसरोषकषायितायताक्षी ।
चरणगतसखीवचोऽनुरोधात्
किल कथमप्यनुकूलयाञ्चकार ॥ ११ ॥

द्रुतपदमिति मा वयस्य यासी-
र्ननु सुतनुं परिपालयानुयान्तीम् ।
नहि न विदितखेदमेतदीय-
स्तनजघनोद्वहने तवापि चेतः ॥ १२ ॥

इति वदति सखीजनेऽनुरागा-
द्दयिततमामपरश्चिरं प्रतीक्ष्य ।
तदनुगमवशादनायतानि
न्यधित मिमान इवावनिं पदानि ॥ १३ ॥
यदि मयि लघिमानमागतायां
तव धृतिरस्ति गतास्मि सम्प्रतीयम् ।
द्रुततरपदपातमापपात
प्रियमिति कोपपदेन कापि सख्या ॥ १४ ॥
अविरलपुलकः सह व्रजन्त्याः
प्रतिपदमेकतरः स्तनस्तरुण्याः ।
घटितविघटितः प्रियस्य वक्ष-
स्तटभुवि कन्दुकविभ्रमं बभार ॥ १५ ॥
अशिथिलमपरावसज्य कण्ठे दृढपरिरब्धबृहद्बहिःस्तेन ।
हृषिततनुरुहाभुजेन भर्तुर्मृदुममृदु व्यतिविद्धमेकबाहुम् ॥१६॥
मुहुरसुसममाघ्नती नितान्तं प्रण-
दितकाञ्चि नितम्बमण्डलेन ।
विषमितपृथुहारयष्टि तिर्य-
क्कुचमितरं तदुरःस्थले निपीड्य ॥ १७ ॥
गुरुतरकलनूपुरानुनादं सललितनर्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम ॥१८॥
लघुललितपदं तदंसपीठ-
द्वयमिहितोभयपाणिपल्लवान्या ।
सकठिनकुचचूचुकप्रणोदं
प्रियमबला सविलासमन्वियाय ॥ १९ ॥
जघनमलघुपीवरोरु कृच्छ्रादुरुनिबिरीसनितम्बभारखेदि ।
दयिततमशिरोधरवलम्बिस्वभुजलताविभवेन काचिदूहे ।२०।

अनुवपुरपरेण बाहुमूलप्रहितभुजाकलितस्तेन निन्ये ।
निहितदशनवाससा कपोले विषमवितीर्णपदं बलादिवान्या २१

अनुवनमसितभ्रुवः सखीभिः
सह पदवीमपरः पुरोगतायाः ।
उरसि सरसरागपादलेखा
प्रतिमतयानुययावसंशयानः ।। २२ ।।
मदनरसमहौघपूर्णनाभी-
ह्रदपरिवाहितरोमराजयस्ताः ।
सरित इव सविभ्रमप्रयात-
प्रणदितहंसकभूषणा विरेजुः ।। २३ ।।
श्रुतिपथमधुराणि सारसाना-
मनुनदि शुश्रुविरे रुतानि ताभिः ।
विदधति जनतामनःशरव्य-
व्यधपटुमन्मथचापनादशङ्काम् ।। २४ ।।
मधुमथनवधूरिवाह्वयन्ति भ्रम-
रकुलानि जगुर्यदुत्सुकानि ।
तदभिनयमिवावलिर्वनाना-
मतनुत नूतनपल्लवाङ्गुलीभिः ।। २५ ।।
असकलकलिकाकुलीकृता-
लिस्खलनविकीर्णविकासिकेशराणाम् ।
मरुदवनिरुहां रजो वधूभ्यः
समुपहरन् विचकार कोरकाणि ।। २६ ।।
उपवनपवनानुपातदक्षै-
रलिभिरलाभि यदङ्गनाजनस्य ।
परिमलविषयस्तदुन्नताना-
मनुगमने खलु सम्पदोऽग्रतःस्था: ।। २७ ।।

रथचरणधराङ्गनाकराब्ज-
व्यतिकरसम्पदुपात्तसौमनस्याः ।
जगति सुमनसस्तदादि नूनं
दधति परिस्फुटमर्थतोऽभिधानम् ॥ २८ ॥
अभिमुखपतितैर्गु णप्रकर्षा-
दवजितमुद्धतिमुज्ज्वलां दधानैः ।
तरुकिसलयजालमग्रहस्तैः
प्रसभमनीयत भङ्गमङ्गनानाम् ॥ २९ ॥
मुदितमधुभुजो भुजेन शाखा-
श्चलितविश्रृङ्खलशङ्खकं धुवत्याः ।
तरुरतिशयितापराङ्गनायाः
शिरसि मुदेव मुमोच पुष्पवर्षम् ॥ ३० ॥
अनवरतरसेन रागभाजा कर-
जपरिक्षतिलब्धसंस्तवेन ।
सपदि तरुणपल्लवेन वध्वा
विगतदयं खलु खण्डितेन मम्ले ॥ ३१ ॥
प्रियमभि कुसुमोद्यतस्य बाहो-
र्नवनखमण्डनचारु मूलमन्या ।
मुहुरितरकराहितेन पीनस्त-
नतटरोधि तिरोदधेंऽशुकेन ॥ ३२ ॥
विततवलिविभाव्यपाण्डुलेखा-
कृतपरभागविलीन रोमराजिः ।
कृशमपि कृशतां पुनर्नयन्ती
विपुलतरोन्मुखलोचनावलग्नम् ॥ ३३ ॥
प्रसकलकुचबन्धुरोद्धुरोरःप्रसभविभिन्नतनूत्तरीयबन्धा ।
अवनमदुदरोच्छ्वसद्दुकूलस्फुटतरलक्ष्यगभीरनाभिमूला ।३४।

व्यवहितमविजानती किलान्त-
र्वणभुवि वल्लभमाभिमुख्यभाजम् ।
अधिविटपि सलीलमग्रपुष्प-
ग्रहणपदेन चिरं विलम्ब्य काचित् ॥ ३५ ॥

अथ किल कथिते सखीभिरत्र
क्षणमपरेव ससम्भ्रमा भवन्ती ।
शिथिलितकुसुमाकुलाग्रपाणिः
प्रतिपदसंयमितांशुकावृताङ्गी ॥ ३६ ॥

कृतभयपरितोषसन्निपातं
सचकितसस्मितवक्त्रवारिजश्रीः ।
मनसिजगुरुतत्क्षणोपदिष्टं
किमपि रसेन रसान्तरं भजन्ती ॥ ३७ ॥

अवनतवदनेन्दुरिच्छतीव
व्यवधिमधीरतया यदस्थितास्मै ।
अहरत सुतरामतोऽस्य चेतः
स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ३८ ॥

किसलयशकलेष्ववाचनीयाः पुल-
किनि केवलमङ्गके निधेयाः ।
नखपदलिपयोऽपि दीपितार्थाः
प्रणिदधिरे दयितैरनङ्गलेखाः ॥ ३९ ॥

कृतकृतकरुषा सखीमपास्य
त्वमकुशलेति कयाचिदात्मनैव ।
अभिमतमभि साभिलाषमाविष्कृत-
भुजमूलमबन्धि मूर्ध्नि माला ॥ ४० ॥

अभिमुखमुपयाति मा स्म किञ्चि-
त्वमभिदधाः पटले मधुव्रतानाम् ।

मधुसुरभिमुखाब्जगन्धलब्धे-
रधिकमधित्वदनेन मा निपाति ॥ ४१ ॥
सरजसमकरन्दनिर्भरासु
प्रसवविभूतिषु भूरुहां विरक्तः ।
ध्रुवममृतपनामवाञ्छयासा-
वधरममुं मधुपस्तवाजिहीते ॥ ४२ ॥
इति वदति सखीजने निमीलद्-
द्विगुणितसान्द्रतराक्षिपक्ष्ममाला ।
अपतदलिभयेन भर्तुरङ्कं
भवति हि विक्लवता गुणोऽङ्गनानाम् ॥४३॥
मुखकमलकमुन्नमय्य यूना
यदभिनवोढवधूर्बलादचुम्बि ।
तदपि न किल बालपल्लवाग्र-
ग्रहपरया विविदे विदग्धसख्या ॥ ४४ ॥
व्रततिविततिभिस्तिरोहितायां प्रतियुवतौ वदनं प्रियः प्रियायाः।
यदधयदधरावलोपनृत्यत्करवलयस्वनितेन तद्विवव्रे ॥ ४५ ॥
विलसितमनुकुर्वती पुरस्ता-
द्धरणिरुहाधिरुहो वधूर्लतायाः ।
रमणमृजुतया पुरः सखीना-
मकलितचापलदोषमालिलिङ्ग ॥ ४६ ॥
सललितमवलम्ब्य पाणिनांसे
सहचरमुच्छ्रितगुच्छवाञ्छयाऽन्या ।
सकलकलभकुम्भविभ्रमाभ्या-
मुरसि रसादवतस्तरे स्तनाभ्याम् ॥ ४७ ॥
मृदुचरणतलाग्रदुःस्थितत्वा-
दसहतरा कुचकुम्भयोर्भरस्य ।

उपरि निरवलम्बनं प्रियस्य
न्यपतदथोच्चतरो च्चिचीषयाऽन्या ॥ ४८ ॥
उपरिजतरुजानि याचमानां
कुशलतया परिरम्भलोलुपोऽन्यः ।
प्रथितपृथुपयोधरां गृहाण
स्वयमिति मुग्धवधूमुदास दोर्भ्याम् ॥ ४९ ॥
इदमिदमिति भूरुहां प्रसूनै-
र्मुहुरतिलोभयता पुरः पुरोऽन्या ।
अनुरहसमनायि नायकेन त्वर-
यति रन्तुमहो जनं मनोभूः ॥ ५० ॥
विजनमिति बलादमुं गृहीत्वा
क्षणमथ वीक्ष्य विपक्षमन्तिकेऽन्या ।
अभिपतितुमना लघुत्वभीते-
रभवदमुञ्चति वल्लभेऽतिगुर्वी ॥ ५१ ॥
अधिरजनि जगाम धाम तस्याः
प्रियतमयेति रुषा स्रजावनद्धः ।
पदमपि चलितुं युवा न सेहे
किमिव न शक्तिहरं ससाध्वसानाम् ॥ ५२ ॥
न खलु वयममुष्य दानयोग्याः
पिबति च पाति च यासकौ हरस्त्वाम् ।
व्रज विटपममुं ददस्व तस्यै
भवतु यतः सदृशोश्चिराय योगः ॥ ५३ ॥
तव कितव किमाहितैर्वृथा नः
क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यली-
कैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥ ५४ ॥

मुहुरुपहसितामिवालिनादै-
वितरसि नः कलिकां किमर्थमेनाम् ।
वसतिमुपगतेन धाम्नि तस्याः
शठ कलिरेष महांस्त्वयाद्य दत्तः ॥ ५५ ॥
इति गदितवती रुषा जघान
स्फुरितमनोरममक्ष्मकेशरेण ।
श्रवणनियमितेन कान्तमन्या
सममसिताम्बुरुहेण चक्षुषा च ॥ ५६ ॥
विनयति सुदृशो दृशः परागं
प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णो-
र्द्वयमपि रोषरजोभिरापुपूरे ॥ ५७ ॥
स्फुटमिदमभिचारमन्त्र एव
प्रतियुवतेरभिधानमङ्गनानाम् ।
वरतनुरमुनोपहूय पत्या
मृदुकुसुमेन यदाहताप्यमूर्च्छंत् ॥ ५८ ॥
समदनमवतंसितेऽधिकर्णं
प्रणयवता कुसुमे सुमध्यमायाः ।
व्रजदपि लघुतां बभूव भारः
सपदि हिरण्मयमण्डनं सपत्न्याः ॥ ५९ ॥
अवजितमधुना तवाहमक्ष्णो
रुचिरतयेत्यवनम्य लज्जयेव ।
श्रवणकुवलयं विलासवत्या
भ्रमररुतैरुपकर्णमाचचक्षे ॥ ६० ॥
अवचितकुसुमा विहाय वल्ली-
र्युवतिषु कोमलमाल्यमालिनीषु ।

पदमुपदधिरे कुलान्यलीनां
न परिचयो मलिनात्मनां प्रधानम् ॥ ६१ ॥
श्लथशिरसिजपाशपातभारा-
दिव नितरां नतिमद्भिरंसभागैः ।
मुकुलितनयनैर्मुखारविन्दै-
र्घनमहतीमिव पक्ष्मणां भरेण ॥ ६२ ॥
अधिकमरुणिमानमुद्वहद्भि-
र्विकसदशीतमरीचिरश्मिजालैः ।
परिचितपरिचुम्बनाभियोगा-
दपगतकुङ्कुमरेणुभिः कपोलैः ॥ ६३ ॥
अवसितललितक्रियेण बाह्वो-
र्ललिततरेण तनीयसा युगेन ।
सरसकिसलयानुरञ्जितैर्वा
करकमलैः पुनरुक्तरक्तभाभिः ॥ ६४ ॥
स्मरसरसमुरःस्थलेन पत्यु-
र्विनिमयसंक्रमिताङ्गरागरागैः ।
भृशमतिशयखेदसम्पदेव
स्तनयुगलैरितरेतरं निषण्णैः ॥ ६५ ॥
अतनुकुचभरागतेन भूयः श्रमजनितानतिना शरीरकेण ।
अनुचितगतिसादनिःसहत्वं कलभकरोरुभिर्दधानैः ॥ ६६ ॥
अपगतनवयावकैश्चिराय
क्षितिगमनेन पुनर्वितीर्णरागैः ।
कथमपि चरणोत्पलैश्चलद्भि-
र्भृशविनिवेशवशात्परस्परस्य ॥ ६७ ॥
मुहुरिति वनविभ्रमाभिषङ्गा-
दतमि तदा नितरां नितम्बिनीभिः ।

मृदुतरतनवोऽलसा प्रकृत्या
चिरमपि ताः किमुत प्रयासभाजः ॥ ६८ ॥

प्रथममलघुमौक्तिकाभमासी-
च्छ्रमजलमुज्ज्वलगण्डमण्डलेषु ।
कठिनकुचतटाग्रपाति पश्चा-
दथ शतशर्करतां जगाम तासाम् ॥ ६९ ॥

विपुलकमपि यौवनोद्धतानां
घनपुलकोदयकोमलं चकाशे ।
परमलितमपि प्रियैः प्रकामं
कुचयुगमुज्ज्वमेव का कामिनीनाम् ॥ ७० ॥

अविरतकुसुमावचायखेदा-
न्निहितभुजालतयैकयोपकंण्ठम् ।
विपुलतरनिन्तरावलग्नस्त-
नपिहितप्रियवक्षसा ललम्बे ॥ ७१ ॥

अभिमतमभितः कृताङ्गभङ्गा
कुचयुगमुन्नतिवित्तमुन्नमय्य ।
तनुरभिलषतं क्लमच्छलेन
व्यवृणुत वेल्लितबाहुवल्लरीका ॥ ७२ ॥

हिमलवसदृशः श्रमोदबिन्दूनपनयता किल नूतनोढवध्वाः ।
कुचकलशकिशोरकौ कथञ्चित्तरलयता तरुणेन पस्पृशाते ।७३।

गत्वोद्रेकं जघनपुलिने रुद्धमध्यप्रदेशः
क्रामन्नूरुद्रुमभुजलताः पूर्णनाभीह्रदान्तः ।
उल्लङ्घ्योच्चैःकुचतटभुवं प्लावयन् रोमकूपान्
स्वेदापूरो युवतिसरितां व्याप गण्डस्थलानि ।७४।

(मदाक्रान्ता)

प्रियकरपरिमार्गादङ्गनानां यदाभूत्
पुनरधिकतरैव स्वेदतोयोदयश्रीः ।
अथ वपुरभिषेक्तुं तास्तदाम्भोभिरीषु-
र्वनविहरणखेदम्लानमम्लानशोभाः ।। ७५ ।।

।। इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
वनविहारो नाम सप्तमः सर्गः ।। ७ ।।

## ।। ८ ।। अष्टमः सर्गः ।।

( प्रहर्षिणीवृत्तम् )

आयासादलघुतरस्तनैः स्वनद्भिः
श्रान्तानामविकचलोचनारविन्दैः ।
अभ्यम्भः कथमपि योषितां
समूहैस्तैरुर्वीनिहितचलपदं प्रचेले ।। १ ।।

यान्तीनां सममसितभ्रुवां नत-
त्वादंसानां महति नितान्तमन्तरेऽपि ।
संसक्तैर्विपुलतया मिथो नितम्बैः
सम्बाधं बृहदपि तद्बभूव वर्त्म ।। २ ।।

नीरन्ध्रद्रुमशिशिरां भुवं व्रजन्तीः
साशङ्कं मुहुरिव कौतुकात्करैस्ताः ।
पस्पर्श क्षणमनिलाकुलीकृतानां
शाखानामतुहिनरश्मिरन्तरालैः ।। ३ ।।

एकस्यास्तपनकरैः करालितायाः
बिभ्राणः सपदि सितोष्णवारणत्वम् ।
सेवायै वदनसरोजनिर्जितश्री-
रागत्य प्रियमिव चन्द्रमाश्चकार ।। ४ ।।

स्वं रागादुपरि वितन्वतोत्तरीयं
कान्तेन प्रतिपदवारितातपायाः ।
सच्छत्रादपरविलासिनीसमूहा-
च्छायासीदधिकतरा तदापरस्याः ॥ ५ ॥

संस्पर्शप्रभवसुखोपचीयमाने
सर्वाङ्गे करतललग्नवल्लभायाः ।
कौशेयं व्रजदपि गाढतामजस्रं
सस्रंसे विगलितनीवि नीरजाक्ष्याः ॥ ६ ॥

गच्छन्तीरलसमवेक्ष्य विस्मयिन्य-
स्तास्तन्वीर्न विदधिरे गतानि हंस्यः ।
बुद्ध्वा वा जितमपरेण काममा-
विष्कुर्वीत स्वगुणमपत्रपः क एव ॥ ७ ॥

श्रीमद्भिर्जितपुलिनानि माधवी-
नामारोहैर्निबिडबृहन्नितम्बबिम्बैः ।
पाषाणस्खलनविलोलमाशु नूनं
वैलक्ष्याद्ययुरवरोधनानि सिन्धोः ॥ ८ ॥

मुक्ताभिः सलिलरयास्तशुक्ति-
पेशीमुक्ताभिः कृतरुचि सैकतं नदीनाम् ।
स्त्रीलोकः परिकलयाञ्चकार तुल्यं
पल्यङ्कं विगलितहारचारुभिः स्वैः ॥ ९ ॥

आघ्राय श्रमजमनिन्द्यगन्धबन्धुं
निश्वासश्वसनमसक्तमङ्गनानाम् ।
आरण्याः सुमनस ईषिरे न भृङ्गै-
रौचित्यं गणयति को विशेषकामः ॥ १० ॥

आयान्त्यां निजयुवतौ वना-
त्सशङ्कं बर्हाणामपरशिखण्डिनीं भरेण ।

आलोक्य व्यवदधतं पुरो मयूरं
कामिन्यः श्रदधुरनार्जवं नरेषु ॥ ११ ॥
आलापैस्तुलितरवाणि माधवीनां
माधुर्यादमलपतत्रिणां कुलानि ।
अन्तर्धामुपययुरुत्पलावलीषु
प्रादुःष्यात्क इव जितः पुरः परेण ॥ १२ ॥
मुग्धायाः स्मरललितेषु चक्रवाक्या
निःशङ्कं दयिततमेन चुम्बितायाः ।
प्राणेशानभि विदधुर्विधूतहस्ताः
सीत्कारं समुचितमुत्तरं तरुण्यः ॥ १३ ॥
उत्क्षिप्तस्फुटितसरोरुहार्घ्यमुच्चैः
सस्नेहं विहगरुतैरिवालपन्ती ।
नारीणामथ सरसी सफेनहासा
प्रीत्येव व्यतनुत पाद्यमूर्मिहस्तैः ॥ १४ ॥
नित्याया निजवसतेर्निरासिरे
यद्रागेण श्रियमरविन्दतः कराग्रैः ।
व्यक्तत्वं नियतमनेन निन्युरस्याः
सापत्न्यं क्षितिसुतविद्विषो महिष्यः ॥ १५ ॥
आस्कन्दन् कथमपि योषितो न
यावद्भीमत्यः प्रियकरधार्यमाणहस्ताः ।
औत्सुक्यात्त्वरितममूस्तदम्बु ताव-
त्संक्रान्तप्रतिमतया दधाविवान्तः ॥ १६ ॥
ताः पूर्वं सचकितमागमय्य गाधं
कृत्वाथो मृदु पदमन्तराविशन्त्यः ।
कामिन्यो मन इव कामिनः
सरागैरङ्गैस्तज्जलमनुरञ्जयांबभूवुः ॥१७॥

संक्षोभं पयसि मुहुर्मुहेभकुम्भ-
श्रीभाजा कुचयुगलेन नीयमाने।
विश्लेषं युगमगमद्रथाङ्गनाम्नो-
रुद्वृत्तः क इव सुखावहः परेषाम् ॥ १८ ॥
आसीना तटभुवि सस्मितेन भर्त्रा
रम्भोरूरवतरितुं सरस्यनिच्छुः।
धुन्वाना करयुगमीक्षितुं विला-
साञ्शीतालुः सलिलगतेन सिच्यते स्म ॥१९॥
नेच्छन्ती सममुना सरोऽवगाढुं
रोधस्तः प्रतिजलमीरिता सखीभिः।
आश्लिश्यद्भयचकितेक्षणं नवोढा
वोढारं विपदि न दूषितातिभूमिः ॥ २० ॥
तिष्ठन्तं पयसि पुमांसमंसमात्रे
तद्घ्नं तदवयती किलात्मनोऽपि।
अभ्येतुं सुतनुरभीरियेष मौग्ध्या-
दाश्लेषि द्रुतममुना निमज्जतीति ॥ २१ ॥
आनाभेः सरसि नतभ्रुवावगाढे
चापल्यादथ पयसस्तरङ्गहस्तैः।
उच्छ्रायिस्तनयुगमध्यरोहि लब्ध-
स्पर्शानां भवति कुतोऽथवा व्यवस्था ॥ २२ ॥
कान्तानां कुवलयमप्यपास्त-
मक्ष्णोः शोभाभिर्न मुखरुचाहमेकमेव।
संहर्षादलिविरुतैरितीव गाय-
ल्लोलोर्मौ पयसि महोत्पलं ननर्त ॥ २३ ॥
त्रस्यन्ती चलशफरीविघट्टि-
तोरुर्वामोरूरतिशयमाप विभ्रमस्य।

क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे रमण्यः ।। २४ ।।
आकृष्टप्रतनुवपुर्लतैस्तरङ्गै-
स्तस्याम्भस्तदथ सरोमहार्णवस्य ।
अक्षोभि प्रसृतविलोलबाहुपक्षै-
र्योषाणामुरुभिरुरोजगण्डशैलैः ।। २५ ।।
गाम्भीर्यं दधदपि रन्तुमङ्गनाभिः
संक्षोभं जघनविघट्टनेन नीतः ।
अम्भोधिर्विकसितवारिजाननोऽसौ
मर्यादां सपदि विलङ्घयाम्बभूव ।। २६ ।।
आदातुं दयितमिवावगाढमा-
रादूर्मीणां ततिभिरभिप्रसार्यमाणः ।
कस्याश्चिद्विततचलच्छिखाङ्गुलीको
लक्ष्मीवान् सरसि रराज केशहस्तः ।। २७ ।।
उन्निद्रप्रियकमनोरमं रमण्याः
संरेजे सरसि वपुः प्रकाशमेव ।
युक्तानां विमलतया तिरस्क्रियायै
नाक्रामन्नपि हि भवत्यलं जलौघः ।। २८ ।।
किं तावत्सरसि सरोजमेतदारा-
दाहोस्विन्मुखमवभासते युवत्याः ।
संशय्य क्षणमिति निश्चिकाय
कश्चिद्विब्बोकैर्बकसहवासिनां परोक्षैः ।। २९ ।।
शृङ्गाणि द्रुतकनकोज्ज्वलानि गन्धाः
कौसुम्भं पृथुकुचकुम्भसङ्गिवासः ।
मार्द्वीकं प्रियतमसन्निधानमासन्ना-
रीणामिति जलकेलिसाधनानि ।। ३० ।।

उत्तुङ्गादनिलचलांशुकास्तटान्ता-
च्चेतोभिः सह भयदर्शिनां प्रियाणाम् ।
श्रोणीभिर्गुरुभिरतूर्णमुत्पतन्त्य-
स्तोयेषु द्रुततरमङ्गना निपेतुः ॥ ३१ ॥
मुग्धत्वादविदितकैतवप्रयोगा
गच्छन्त्यः सपदि पराजयं तरुण्यः ।
ताः कान्तैः सह करपुष्करेरिताम्बु-
व्यात्युक्षीमभिसरणग्लहामदीव्यन् ॥ ३२ ॥
योग्यस्य त्रिनयनलोचनानलार्चि-
र्निर्दग्धस्मरपृतनाधिराज्यलक्ष्म्याः ।
कान्तायाः करकलशोद्यतैः पयोभि-
र्वक्त्रेन्दोरकृत महाभिषेकमेकः ॥ ३३ ॥
सिञ्चन्त्याः कथमपि बाहुमुन्नमय्य
प्रेयांसं मनसिजदुःखदुर्बलायाः ।
सौवर्णं वलयमवागलत्कराग्रा-
ल्लावण्यश्रिय इव शेषमङ्गनायाः ॥ ३४ ॥
स्निह्यन्ती दृशमपरा निधाय पूर्णं
मूर्तेन प्रणयरसेन वारिणेव ।
कन्दर्पप्रवणमनाः सखीसिसिक्षा-
लक्ष्येण प्रतियुवमञ्जलिं चकार ॥ ३५ ॥
आनन्दं दधति मुखे करोदकेन
श्यामाया दयिततमेन सिच्यमाने ।
ईर्ष्यन्त्या वदनमसिक्तमप्यनल्प-
स्वेदाम्बुस्नपितमजायतेतरस्याः ॥ ३६ ॥
उद्वीक्ष्य प्रियकरकुड्मलापविद्धै-
र्वक्षोजद्वयमभिषिक्तमन्यनार्याः ।

अम्भोभिर्मुहुरसिचद्वधूरमर्षा-
दात्मीयं पृथुतरनेत्रयुग्ममुक्तैः ।। ३७ ।।
कुर्वद्भिर्मुखरुचिमुज्ज्वलामजस्रं
यैस्तोयैरसिचत वल्लभां विलासी ।
तैरेव प्रतियुवतेरकारि दूरात्-
कालुष्यं शशधरदीधितिच्छटाच्छैः ।। ३८ ।।
रागान्धीकृतनयनेन नामधेय-
व्यत्यासादभिमुखमीरितः प्रियेण ।
मानिन्या वपुषि पतन्विसर्गमन्दो
भिन्दानो हृदयमसाहि नोदवज्रः ।। ३९ ।।
प्रेम्णोरः प्रणयिनि सिञ्चति प्रियायाः
संतापं नवजलविप्रुषो गृहीत्वा ।
उद्धूताः कठिनकुचस्थलाभिघाता-
दासन्नां भृशमपराङ्गनामधाक्षुः ।। ४० ।।
संक्रान्तं प्रियतमवक्षसोऽङ्गरागं
साध्वस्याः सरसि हरिष्यतेऽधुनाम्भः ।
तुष्ट्वैवं सपदि हृतेऽपि तत्र तेपे
कस्याश्चित्स्फुटनखलक्ष्मणः सपत्न्या ।। ४१ ।।
हूतायाः प्रतिसखिकामिनान्यनाम्ना
ह्रीमत्याः सरसि गलन्मुखेन्दुकान्तेः ।
अन्तर्धिं द्रुतमिव कर्तुमश्रुवर्षैर्भूमानं
गमयितुमीषिरे पयांसि ।। ४२ ।।
सिक्तायाः क्षणमभिषिच्य पूर्व-
मन्यामन्यस्याः प्रणयवता बताबलायाः ।
कालिम्ना समधित मन्युरेव वक्त्रं
प्रापाक्ष्णोर्गलदपशब्दमञ्जनाम्भः ।। ४३ ।।

उद्वोढुं कनकविभूषणान्यशक्तः
सध्रीचा वलयितपद्मनालसूत्रः ।
आरूढ प्रतिवनिताकटाक्षभारः
साधीयो गुरुरभवद्भुजस्तरुण्याः ॥ ४४ ॥
आबद्धप्रचुरपरार्ध्यकिंकिणीको
रामाणामनवरतोदगाहभाजाम् ।
नारावं व्यतनुत मेखलाकलापः
कस्मिन्वा सजलगुणे गिरां पटुत्वम् ॥ ४५ ॥
पर्यच्छे सरसि हृतेंऽशुके पयोभिर्लोलाक्षे
सुरतगुरावपत्रपिष्णोः ।
सुश्रोण्या दलवसनेन वीचिहस्त-
न्यस्तेन द्रुतमकृताब्जिनी सखीत्वम् ॥ ४६ ॥
नारीभिर्गुरुजघनस्थलाहताना-
मास्यश्रीविजितविकासिवारिजानाम् ।
लोलत्वादपहरतां तदङ्गरागं
सञ्जज्ञे स कलुष आशयो जलानाम् ॥ ४७ ॥
सौगन्ध्यं दधदपि काममङ्गनानां
दूरत्वाद्गतमहमानमोपमानम् ।
नेदीयो जितमिति लज्जयेव तासा-
मालोले पयसि महोत्पलं ममज्ज ॥ ४८ ॥
प्रभ्रष्टैः सरभसमम्भसोऽवगाह-
क्रीडाभिर्विदलितयूथिकापिशङ्गैः ।
आकल्पैः सरसि हिरण्मयैर्वधूना-
मौर्वाग्निद्युतिशकलैरिव व्यराजि ॥ ४९ ॥
आस्माकी युवतिदृशामसौ तनोति
च्छायैव श्रियमानपायिनी किमेभिः ।

मत्वैवं स्वगुणपिधानसाम्यसूयैः
पानीयैरिति विदधाविरेऽञ्जनानि ॥ ५० ॥
निर्धौते सति हरिचन्दने जलौघै-
रापाण्डोर्गतपरभागयाङ्गनायाः ।
अह्नाय स्तनकलशद्वयादुपेये
विच्छेदः सहृदययेव हारयष्ट्या ॥ ५१ ॥
अन्यूनं गुणममृतस्य धारयन्ती
सम्फुल्लस्फुरितसरोरुहावतंसा ।
प्रेयोभिः सह सरसी निषेव्यमाणा
रक्तत्वं व्यधित वधूदृशां सुरा च ॥५२॥
स्नान्तीनां बृहदमलोदबिन्दुचित्रौ
रेजाते रुचिरदृशामुरोजकुम्भौ ।
हाराणां मणिभिरुपाश्रितौ
समन्तादुत्सूत्रैर्गुणवदुपघ्नकाम्ययेव ॥ ५३ ॥
आरूढः पतित इति स्वसम्भवोऽपि
स्वच्छानां परिहरणीयतामुपैति ।
कर्णेभ्यश्च्युतमसितोत्पलं वधूनां
वीचीभिस्तटमनु यन्निरासुरापः ॥ ५४ ॥
दन्तानामधरमयावकं पदानि
प्रत्यग्रास्तनुमविलेपनां नखाङ्काः ।
आनिन्युः श्रियमधितोयमङ्गनानां
शोभायै विपदि सदाश्रिता भवन्ति ॥ ५५ ॥
कस्याश्चिन्मुखमनु धौतपत्रलेखं
व्यातेने सलिलभरावलम्बिनीभिः ।
किञ्जल्कव्यतिकरपिञ्जरान्त-
राभिश्चित्रश्रीरलमलकाग्रवल्लरीभिः ॥५६॥

वक्षोभ्यो घनमनुलेपनं यदूना-
मुक्तं स्नानहरत वारि मूर्धजेभ्यः ।
नेत्राणां मदरुचिरक्षतैव तस्थौ
चक्षुष्यः खलु महतां परैरलङ्घ्यः ॥ ५७ ॥
यो बाह्यः स खलु जलैर्निरासि
रागो यश्चित्ते स तु तदवस्थ एव तेषाम् ।
धीराणां व्रजति हि सर्व एव नान्तः
पातित्वादभिभवनीयतां परस्य ॥ ५८ ॥
फेनानामुरसिरुहेषु हारलीला
चैलश्रीर्जघनतलेषु शैवलानाम् ।
गण्डेषु स्फुटरचनाब्जपत्त्रवल्ली
पर्याप्तं पयसि विभूषणं वधूनाम् ॥ ५९ ॥
भ्रश्यद्भिर्जलमभि भूषणैर्वधूना-
मङ्गेभ्यो गुरुभिरमज्जि लज्जयेव ।
निर्माल्यैरथ ननृतेऽवधीरिताना-
मप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम् ॥६०॥
आमृष्टास्तिलकरुचः स्रजो निरस्ता
नीरक्तं वसनमपाकृतोऽङ्गरागः ।
कामः स्त्रीरनुशयवानिव स्वपक्ष-
व्याघातादिति सुतरां चकार चारूः ॥ ६१ ॥
शीतार्तिं बलवदुपेयुषेव नीरै-
रासेकाच्छिशिरसमीरकम्पितेन ।
रामाणामभिनवयौवनोष्म-
भाजोराश्लेषि स्तनतटयोर्नवांशुकेन ॥ ६२ ॥
श्च्योतद्भिःसमधिकमात्तभङ्ग-
सङ्गाल्लावण्यं तनुमदिवाम्बु वाससोऽन्तः ।

उत्तेरे तरलतरङ्गरङ्गलीला-
निष्णातैरथ सरसः प्रियासमूहैः ॥ ६३ ॥
दिव्यानामपि कृतविस्मयां पुरस्ता-
दम्भस्तः स्फुरदरविन्दचारुहस्ताम् ।
उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्ती-
मस्मार्षीज्जलनिधिमन्थनस्य शौरिः ॥ ६४ ॥
श्लक्ष्णं यत्परिहितमेतयोः किलान्त-
र्धानार्थं तदुदकसेकसक्तमूरूः ।
नारीणां विमलतरौ समुल्लसन्त्या
भासाऽन्तर्दधतुरुरू दुकूलमेव ॥ ६५ ॥
वासांसि न्यवसत यानि योषितस्ताः
शुभ्राभ्रद्युतिभिरहासि तैर्मुदेव ।
अत्याक्षुः स्नपनगलज्जलानि यानि
स्थूलाश्रुस्रुतिभिररोदि तैः शुचेव ॥ ६६ ॥
आर्द्रत्वादतिशयिनीमुपेयिवद्भिः
संसक्तिं भृशमपि भूरिशोऽवधूतैः ।
अङ्गेभ्यः कथमपि वामलोचनानां
विश्लेषो बत नवरक्तकैः प्रपेदे ॥ ६७ ॥
प्रत्यंसं विलुलितमूर्धजा चिराय
स्नानार्द्रं वपुरुदवापयत् किलैका ।
नाजानादभिमतमन्तिकेऽभिवीक्ष्य
स्वेदाम्बुद्रवमभवत्तरां पुनस्तत् ॥ ६८ ॥
सीमन्तं निजमनुबध्नती कराभ्या-
मालक्ष्यस्तनतटबाहुमूलभागा ।
भर्त्रान्या मुहुरभिलष्यया निदध्ये
नैवाहो विरमति कौतुकं प्रियेभ्यः ॥ ६९ ॥

स्वच्छाम्भःस्नपनविधौतमङ्ग-
मोष्ठस्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीयाना-
कल्पो यदि कुसुमेषुणा न शून्यः ॥ ७० ॥

इति धौतपुरन्ध्रिमत्सरान्सरसि मज्जनेन
श्रियमाप्तवताऽतिशायिनीमपमलाङ्गभासः ।
अवलोक्य तदैव यादवानपवारिराशेः
शिशिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीषे ॥७१॥
( अतिशायिनी )

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के जलविहारवर्णनं नामाष्टमोः सर्गः ॥ ८ ॥

## ॥ ९ ॥ नवमः सर्गः ॥

( प्रमितक्षरावृत्तम् )

अभितापसंपदमथोष्णरुचिर्निजतेजसामसहमान इव ।
पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिमभ्यपतत् ॥१॥

गतया पुरः प्रतिगवाक्षमुखं दधती रतेन भृशमुत्सुकताम् ।
मुहुरन्तरालभुवमस्तगिरेः सवितुश्च योषिदमिमीत दृशा ॥२॥

विरलातपच्छविरनुष्णवपुः
परितो विपाण्डु दधदभ्रशिरः ।
अभवद् गदतः परिणतिं शिथिलः
परिमन्दसूर्यनयनो दिवसः ॥ ३ ॥

अपराह्णशीतलतरेण शनै-
रनिलेन लोलितलतांगुलये ।

निलयाय शाखिन इवाह्वयते
दधुराकुलाः खगकुलानि गिरः ॥ ४ ॥
उपसंध्यमास्त तनु सानुमतः
शिखरेषु तत्क्षणमशीतरुचः ।
करजालमस्तसमयेऽपि सता-
मुचितं खलूच्चतरमेव पदम् ॥ ५ ॥
प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न
पतिष्यतः करसहस्रमपि ॥ ६ ॥
नवकुङ्कुमारुणपयोधरया
स्वकरावसक्तरुचिराम्बरया ।
अतिसक्तिमेत्य वरुणस्य दिशा
भृशमन्वरज्यदतुषारकरः ॥ ७ ॥
गतवत्यराजत जपाकुसुम-
स्तबकद्युतौ दिनकरेऽवनतिम् ।
बहलानुरागकुरुविन्ददल-
प्रतिबद्धमध्यमिव दिग्वलयम् ॥ ८ ॥
द्रुतशातकुम्भनिभमंशुमतो
वपुरर्धमग्नवपुषः पयसि ।
रुरुचे विरिञ्चिनखभिन्नबृह-
ज्जगदण्डकैकतरखण्डमिव ॥ ९ ॥
अनुरागवन्तमपि लोचनयो-
र्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं
वियदालयादपरदिग्गणिका ॥ १० ॥

अभितिग्मरश्मि चिरमाविरमा-
दवधादखिन्नमनिमेषतया ।
विगलन्मधुव्रतकुलाश्रुजलं
न्यमिमीलदब्जनयनं नलिनी ॥ ११ ॥
अविभाव्यतारकमदृष्टहिम-
द्युतिबिम्बमस्तमितभानु नभः ।
अवसन्नतापमतमिस्रमभाद-
पदोषतैव विगुणस्य गुणः ॥ १२ ॥
रुचिधाम्नि भर्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ।
ज्वलनं त्विषः कथमिवेतरथा
सुलभोऽन्यजन्मनि स एव पतिः ॥ १३ ॥
विहिताञ्जलिर्जनतया दधती
विकसत्कुसुमारुणताम् ।
चिरमुज्झितापि तनुरौज्झदसौ
न पितृप्रसूः प्रकृतिमात्मभुवः ॥ १४ ॥
अथ सान्द्रसान्ध्यकिरणारुणितं
हरिहेतिहूति मिथुनं पततोः ।
पृथगुत्पपात विरहार्तिदलद्-
धृदयस्रुतासृगनुलिप्तमिव ॥ १५ ॥
निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजन्म तथा ।
दिवसात्ययेत दपि मुक्तमहो
चपलाजनं प्रति न चोद्यमदः ॥ १६ ॥
दिवसोऽनुमित्रमगमद्विलयं
किमिहास्यते बत मयाबलया ।

रुचिभर्तुरस्य विरहागमादिति
सन्ध्ययापि सपदि व्यगमि ॥ १७ ॥
पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।
अथ नागयूथमलिनानि जगत्-
परितस्तमांसि परितस्तरिरे ॥ १८ ॥
व्यसरन्नु भूधरगुहान्तरतः
पटलं बहिर्बहलपङ्करुचि।
दिवसावसानपटुनस्तमसो बहि-
रेत्य चाधिकमभक्तः गुहाः ॥ १९ ॥
किमलम्बताम्बरविलग्ननमधः
किमवर्धतोर्ध्वमवनीतलतः।
विससार तिर्यगथ दिग्भ्य इति
प्रचुरीभवन्न निरधारि तमः ॥ २० ॥
स्थगिताम्बरक्षितितले परि-
तस्तिमिरे जनस्य दृशमन्धयति।
दधिरे रसाञ्जनमपूर्वमतः
प्रियवेश्मवर्त्म सुदृशो ददृशुः ॥ २१ ॥
अवधार्य कार्यगुरुतामभवन्न
भयाय सान्द्रतमसन्तमसम्।
सुतनोः स्तनौ च दयितोपगमे
तनुरोमराजिपथवेपथवे ॥ २२ ॥
ददृशेऽपि भास्कररुचाह्नि न यः
स तमीं तमोभिरभिगम्य तताम्।
द्युतिमग्रहीद्ग्रहगणो लघवः
प्रकटीभवन्ति मलिनाश्रयतः ॥ २३ ॥

अनुलेपनानि कुसुमान्यबला:
कृतमन्यव: पतिषु दीपशिखा: ।
समयेन तेन चिरसुप्तमनो-
भवबोधनं सममबोधिषत ॥ २४ ॥
वसुधान्तनि:सृतमिवाहिपते:
पटलं फणामणिसहस्ररुचाम् ।
स्फुरदंशुजालमथ शीतरुचं:
ककुभं समस्कुरुत माघवनीम् ॥ २५ ॥
विशदप्रभापरिगतं विबभा-
वुदयाचलव्यवहितेन्दुवपु: ।
मुखमप्रकाशदशनं शनकै:
सविलासहासमिव शक्रदिश: ॥ २६ ॥
कलया तुषारकिरणस्य पुर:
परिमन्दभिन्नतिमिरौघजटम् ।
क्षणमभ्यपद्यत जनैर्न मृषा
गगनं गणाधिपतिमूर्तिरिति ॥ २७ ॥
नवचन्द्रिकाकुसुमकीर्णतम:-
कबरीभृतो मलयाद्रेमिव ।
ददृशे ललाटतटहारि हरेर्ह-
रितो मुखे तुहिनरश्मिदलम् ॥ २८ ॥
प्रथमं कलाभवदथार्धमथो
हिमदीधितिर्महदभूदुदित: ।
दधति ध्रुवं क्रमश एव न तु
द्युतिशालिनोऽपि सहसोपचयम् ॥ २९ ॥
उदमज्जि कैटभजित: शयनादपनिद्रपाण्डुरसरोजरुजा ।
प्रथमप्रबुद्धनदराजसुतावदनेन्दुनेव तुहिनद्युतिना ॥ ३० ॥

अथ लक्ष्मणानुगतकान्तवपुर्जलधि
विलङ्घ्य शशिदाशरथिः।
परिवारितः परित ऋक्षगणै-
स्तिमिरौघराक्षसकुलं बिभिदे ॥ ३१ ॥

उपजीवति स्म सततं दधतः
परिमुग्धतां वणिगिवोडुपतेः।
घनवीथिवीथिमवतीर्णवतो
निधिरम्भसामुपचयाय कलाः ॥ ३२ ॥

रजनीमवाप्य रुचमाप शशी
सपदि व्यभूषयदसावपि ताम्।
अविलम्बितक्रममहो महता-
मितरेतरोपकृतिमच्चरितम् ॥ ३३ ॥

दिवसं भृशोष्णरुचितापहता
रुदतीमिवानवरतालिरुतैः।
मुहुरामृशन् मृगधरोऽग्रकरै-
रुदशिश्वसत् कुमुदिनीवनिताम् ॥ ३४ ॥

प्रतिकामिनीति ददृशुश्चकिताः
स्मरजन्मघर्मपयसोपचिताम्।
सुदृशोऽभिभर्तृ शशिरश्मिगल-
ज्जलबिन्दुमिन्दुमणिदारुवधूम् ॥ ३५ ॥

अमृतद्रवैर्विदधदब्जदृशामप-
मार्गमोषधिपतिः स्म करैः।
परितो विसर्पि परितापि भृशं
वपुषोऽवतारयति मानविषम् ॥ ३६ ॥

अमलात्मसु प्रतिफलन्नभितस्
तरुणीकपोलकेषु मुहुः।

विससार सान्द्रतरमिन्दुरुचा-
मधिकावभासितदिशां निकरः ॥ ३७ ॥
उपगूढवेलमलघूर्मिभुजैः
सरितामचुक्षुभदधीशमपि ।
रजनीकरः किमिव चित्रमदो
यदुरागिणां गणमनङ्गलघुम् ॥ ३८ ॥
भवनोदरेषु परिमन्दतया
शयितोऽलसः स्फटिकयष्टिरुचः ।
अवलम्ब्य जालकमुखोपगता-
नुदतिष्ठदिन्दुकिरणान्मदनः ॥ ३९ ॥
अविभावितेषुविषयः प्रथमं
मदनोऽपि नूनमभवत्तमसा ।
उदिते दिशः प्रकटयत्यमुना
यदधर्मधाम्नि धनुराचकृषे ॥ ४० ॥
युगपद्विकासमुदयाद्गमिते
शशिनः शिलीमुखगणोऽलभत ।
द्रुतमेत्य पुष्पधनुषो धनुषः
कुमुदेऽङ्गनामनसि चावसरम् ॥ ४१ ॥
ककुभां मुखानि सहसोज्ज्वलयन्
दधदाकुलत्वमधिकं रतये ।
अदिदीपदिन्दुरपरो दहनः
कुसुमेषुमत्रिनयनप्रभवः ॥ ४२ ॥
इति निश्चितप्रियतमागतयः
सितदीधितावुदयवत्यबलाः ।
प्रतिकर्म कर्तुमुपचक्रमिरे
समये हि सर्वमुपकारि कृतम् ॥ ४३ ॥

समंमेकमेव दधतुः सुतनोरुरु
हारभूषणमुरोजतटौ ।
घटते हि संहततया जनिता-
मिदमेव निर्विवरतां दधतोः ॥ ४४ ॥
कदलीप्रकाण्डरुचिरोरुतरौ
जघनस्थलीपरिसरे महति ।
रशनाकलापकगुणेन वधूर्-
मकरध्वजद्विरदमाकलयत् ॥ ४५ ॥
अधरेषुवलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः ।
नवमञ्जनं नयनपङ्कजयोर्-
बिभिदे न शङ्कनिहितात्पयसः ॥ ४६ ॥
स्फुरदुज्ज्वलाधरदलैर्-
विलसद्दशनांशुकेशरभरैः परितः ।
धृतमुग्धागण्डफलकैर्विबभुर्-
विकसद्भिरास्यकमलैः प्रमदाः ॥ ४७ ॥
भजते विदेशमधिकेन जित-
स्तदनुप्रवेशमथवा कुशलः ।
मुखमिन्दुरुज्ज्वलकपोलमतः
प्रतिमाच्छलेन सुदृशामविशत् ॥ ४८ ॥
ध्रुवमागताः प्रतिहतिं कठिने
मदनेषवः कुचतटे महति ।
इतराङ्गवन्न यदिदं गरिमग्ल-
पितावलग्नममगत्तनुताम् ॥ ४९ ॥
न मनोरमास्वपि विशेषविदां
निरचेष्ट योग्यमिदमेतदिति ।

गृहमेष्यति प्रियतमे सुदृशां
वसनाङ्गरागसुमनःसु मनः ॥ ५० ॥
वपुरन्वलिप्त परिरम्भसुख-
व्यवधानभीरुकतया न वधूः ।
क्षममस्य बाढमिदमेव हि
यत्प्रियसंगमेष्वनवलेपमदः ॥ ५१ ॥
निजपाणिपल्लवतलस्खलना-
दभिनासिकाविवरमुत्पतितैः ।
अपरा परीक्ष्य शनकैर्मुमुदे
मुखवासमास्यकमलश्वसनैः ॥ ५२ ॥
विधृते दिवा सवयसा च पुरः
परिपूर्णमण्डलविकाशभृति ।
हिमधाम्नि दर्पणतले च मुहुः
स्वमुखश्रियं मृगदृशो ददृशुः ॥ ५३ ॥
अधिजानु बाहुमुपधाय नमत्-
करपल्लवार्पितकपोलतलम् ।
उदकण्ठि कण्ठपरिवर्तिकल-
स्वरशून्यगानपरयापरया ॥ ५४ ॥
प्रणयप्रकाशनविदो मधुराः
सुतरामभीष्टजनचित्तहृतः ।
प्रजिघाय कान्तमनुमुग्धतरस्-
तरुणीजनो दृश इवाथ सखी ॥ ५५ ॥
न च मेऽवगच्छति यथा लघुतां
करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमुपगम्य वदे-
रभिदूति काचिदिति संदिदिशे ॥ ५६ ॥

दयिताय मानपरयाऽपरया
    त्वरितं ययावगदितापि सखी ।
किमु नोदिताः प्रियाहितार्थकृतः
    कृतिनो भवन्ति सुहृदः सुहृदाम् ॥ ५७ ॥
प्रतिभिद्य कान्तमपराधकृतं
    यदि तावदस्य पुनरेव मया ।
क्रियतेऽनुवृत्तिरुचितैव ततः
    कलयेदमानमनसं सखि माम् ॥ ५८ ॥
अवधीर्य धैर्यकलिता दयितं
    विदधे विरोधमथ तेन सह ।
तव गोप्यते किमिव कर्तुमिदं
    न सहास्मि साहसमसाहसिकी ॥ ५९ ॥
तदुपेत्य मा स्म तमुपालभथाः
    किल दोषमस्य न हि विद्म वयम् ।
इति सम्प्रधार्य रमणाय वधू-
    र्विहितागसेऽपि विससर्ज सखीम् ॥ ६० ॥
ननु सन्दिशेति सुदृशोदितया
    त्रपया न किञ्चन किलाभिदधे ।
निजमैक्षि मन्दमनिशं निशितैः
    कृशितं शरीरमशरीरशरैः ॥ ६१ ॥
ब्रुवते स्म दूत्य उपसृत्य नरान्-
    नरवत्प्रगल्भमति गर्भगिरः ।
सुहृदर्थमीहितमजिह्मधियां
    प्रकृतेर्विराजति विरुद्धमपि ॥ ६२ ॥
मम रूपकीर्तिमहरद्भुवि
    यस्तदनुप्रविष्टहृदयेयमिति ।

त्वयि मत्सरादिव निरस्तदयः
सुतरां क्षिणोति खलु तां मदनः ॥ ६३ ॥
तव सा कथासु परिघट्टयति
श्रवणं यदङ्गुलिमुखेन मुहुः ।
घनतां ध्रुवं नयति तेन
भवद्गुणपूगपूरितमतृप्ततया ॥ ६४ ॥
उपताप्यमानमलघूष्णिमभिः
श्वसितैः सितेतरसरोजदृशः ।
द्रवतां न नेतुमधरं क्षमते
नवनागवल्लिदलरागरसः ॥ ६५ ॥
दधति स्फुटं रतिपतेरिषवः
शिततां यदुत्पलपलाशदृशः ।
हृदयं निरन्तरबृहत्कठिन-
स्तनमण्डलावरणमत्यभिदन् ॥ ६६ ॥
कुसुमादपि स्मितदृशः सुतरां
सुकुमारमङ्गमिति नापरथा ।
अनिशं निजैरकरुणः करुणं
कुसुमेषुरुत्तपति यद्विशिखैः ॥ ६७ ॥
विषतां निषेवितमपक्रियया
समुपैति सर्वमिति सत्यमदः ।
अमृतस्रुतोऽपि विरहाद्भवतो
यदमूं दहन्ति हिमरश्मिरुचः ॥ ६८ ॥
उदितं प्रियां प्रति सहार्दमिति
श्रदधीयत प्रियतमेन वचः ।
विदितेङ्गिते हि पुर एव जने
सपदीरिताः खलु लगन्ति गिरः ॥ ६९ ॥
( कुलकम् )

दयिताहृतस्य युवभिर्मनसः
परिमूढतामिव गतैः प्रथमम् ।
उदिते ततः सपदि लब्धपदैः
क्षणदाकरेऽनुपदिभिः प्रयये ॥ ७० ॥
निपपात सम्भ्रमभृतः श्रवणा-
दसितभ्रुवः प्रणदितालिकुलम् ।
दयितावलोकविकसन्नयन-
प्रसरप्रणुन्नमिव वारिरुहम् ॥ ७१ ॥
उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमरुधत् ॥ ७२ ॥
अनुदेहमागतवतः प्रतिमां
परिणायकस्य गुरुमुद्वहता ।
मुकुरेण वेपथुभृतोऽतिभरात्
कथमप्यपाति न वधूकरतः ॥ ७३ ॥
अवनम्य वक्षसि निमग्नकुच-
द्वितयेन गाढमुपगूढवता ।
दयितेन तत्क्षणचलद्रशना-
कलकिङ्किणीरवमुदासि वधूः ॥ ७४ ॥
करुद्धनीवि दयितोपगतौ
गलित त्वराविरहितासनया ।
क्षणदृष्टहाटकशिलासदृश-
स्फुरदूरुभित्ति वसनं ववसे ॥ ७५ ॥
पिदधानमन्वगुपगम्य दृशौ
ब्रुवते जनाय वद कोऽयमिति ।

अभिधातुमध्यवससौ न गिरा
पुलकैः प्रियं नववधून्यंगदत् ॥ ७६ ॥
उदितोरुसादमतिवेपथुमत्-
सुदृशोऽभिभर्तृ विधुरं त्रपया ।
वपुरादरातिशयशंसि पुनः
प्रतिपत्तिमूढमपि बाढमभूत् ॥ ७७ ॥
परिमन्थराभिरलघूरुभरा-
दधिवेश्म पत्युरुपचारविधौ ।
स्खलिताभिरप्यनुपदं प्रमदाः
प्रणयातिभूमिमगमन्गतिभिः ॥ ७८ ॥
मधुरोन्नतभ्रु ललितं च दृशोः
सकरप्रयोगचतुरं च वचः ।
प्रकृतिस्थमेव निपुणागमितं
स्फुटनृत्यलीलमभवत्सुतनोः ॥ ७९ ॥
तदयुक्तमङ्ग तव विश्वसृजा
न कृतं यदीक्षणसहस्रतयम् ।
प्रकटीकृता जगति येन खलु
स्फुटमिन्द्रताद्य मयि गोत्रभिदा ॥ ८० ॥
न विभावयत्यनिशमक्षिगता-
मपि मां भवानतिसमीपतया ।
हृदयस्थितामपि पुनः परितः
कथमीक्षते बहिरभीष्टतमाम् ॥ ८१ ॥
इति गन्तुमिच्छुमभिधाय पुरः
क्षणदृष्टिपातविकसद्वदनाम् ।
स्वकरावलम्बनविमुक्तगलत्
कलकाञ्चि काञ्चिदरुणत्तरुणः ॥ ८२ ॥

अपयाति सरोषया निरस्ते
कृतकं कामिनि चुक्षुवे मृगाक्ष्या ।
कलयन्नपि सव्यथोऽवतस्थे-
ऽशकुनेन स्खलितः किलेतरोऽपि ॥ ८३ ॥

आलोक्य प्रियतममंशुके विनीवौ
यत्तस्थे नमितमुखेन्दु मानवत्या ।
तन्नूनं पदमवलोकयाम्बभूवे
मानस्य द्रुतमपयानमास्थितस्य ॥ ८४ ॥

सुदृशः सरसव्यलीकतप्तस्
तरसाश्लिष्टवतः सयौवनोष्मा ।
कथमप्यभवत्स्मरानलोष्णः
स्तनभारो न नखंपचः प्रियस्य ॥ ८५ ॥

दधत्युरोजद्वयमुर्वशीतलं भुवो
गतेव स्वयमुर्वशी तलम् ।
बभौ मुखेनाप्रतिमेन काचन
श्रियाधिका तां प्रति मेनका च न ॥ ८६ ॥

इत्थं नारीर्घटयितुमलं कामिभिः काममासन्
प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः ।
आचार्यत्वं रतिषु विलसन्मन्मथश्रीविलासा
ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासाम् ॥८७॥
( मन्दाक्रान्ता )

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
प्रदोषवर्णनं नाम नवमः सर्गः ॥ ९ ॥

## ॥ १० ॥ दशमः सर्गः ॥

( स्वागतावृत्तम् )

सज्जितानि सुरभीण्यथ यूनामुल्लसन्नयनवारिरुहाणि ।
आययुः सुघटितानि सुरायाः पात्रतां प्रियतमावदनानि ॥१॥

सोपचारमुपशान्तविचारं सानुतर्षमनुतर्षपदेन ।
ते मुहूर्तमथ मूर्तमपीप्यन् प्रेम मानमवधूय वधूः स्वाः ॥२॥

क्रान्तकान्तवदनप्रतिबिम्बे भग्नबालसहकारसुगन्धौ ।
स्वादुनि प्रणदितालिनि शीते निर्ववार मधुनीन्द्रियवर्गः ॥३॥

कापिशायनसुगन्धि विघूर्णन्नुन्मदोऽधिशयितुं समशेत ।
फुल्लदृष्टि वदनं प्रमदानामब्जचारु चषकं च षडङ्घ्रिः ॥४॥

बिम्बितं भृतपरिस्रुति जानन्
भाजने जलजमित्यबलायाः ।
घ्रातुमक्षि पतति भ्रमरः स्म
भ्रान्तिभाजि भवति क्व विवेकः ॥५॥

दत्तमिष्टतमया मधु पत्युर्बाढ-
मपि पिबतो रसवत्ताम् ।
यत्सुवर्णमुकुटांशुभिरासी-
च्चेतनाविरहितैरपि पीतम् ॥६॥

स्वादनेन सुतनोरविचारा-
दोष्ठतः समचरिष्ट रसोऽत्र ।
अन्यमन्यदिव यन्मधु यूनः
स्वादमिष्टमतनिष्ट तदेव ॥७॥

बिभ्रती मधुरतामतिमात्रं रागिभिर्युगपदेव पपाते ।
आननैर्मधुरसो विकसद्भिर्नासिकाभिरसितोत्पलगन्धः ॥८॥

पीतवत्यभिमते मधुतुल्यस्वादमोष्ठरुचकं विददङ्क्षौ ।
लभ्यस्ते स्म परिरक्ततयात्मा यावकेन वियतापि युवत्याः ॥९॥
कस्यचित्समदनं मदनीयप्रेयसीवदनपानपरस्य ।
स्वादितः सकृदिवासव एव प्रत्युत क्षणविदंशपदेऽभूत् ॥१०॥
पीतशीधुमधुरैर्मिथुनानामाननैः परिहृतं चषकान्तः ।
व्रीडया रुददिवालिविरावैर्नीलनीरजमगच्छदधस्तात् ॥११॥
प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥१२॥
हावहारि हसितं वचनानां
कौशलं दृशि विकारविशेषाः ।
चक्रिरे भृशमृजोरपि वध्वाः
कामिनेव तरुणेन मदेन ॥१३॥
अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्यम् ।
क्षालितं नु शमितं नु वधूनां
द्रावितं नु हृदयं मधुवारैः ॥१४॥
सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्गे ।
विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम् ॥१५॥
सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु ।
गन्तुमुत्थितमकारणतः स्म द्योतयन्ति मदविभ्रममासाम् ।१६।
मद्यमन्दविगलत्त्रपमीषच्चक्षुरुन्मिषितपक्ष्म दधत्या ।
वीक्ष्यते स्म शनकैर्नवबध्वा कामिनो मुखमधोमुखयैव ॥१७॥
या कथञ्चन सखीवचनेन प्रागभिप्रियतमं प्रजगल्भे ।
व्रीडजाड्यमभजन्मधुपा सा स्वां मदात्प्रकृतिमेति हि सर्वः ।१८।
छादितः कथमपि त्रपयान्तर्यः
प्रियं प्रति चिराय रमण्याः ।

वारुणीमदविशङ्कमथाविश्चक्षुषो-
ऽभवदसाविव रागः ॥१९॥
आगतानगणितप्रतियातान्
वल्लभानभिसिसारयिषूणाम् ।
प्रापि चेतसि सविप्रतिसारे
सुभ्रुवामवसरः सरकेण ॥२०॥
मा पुनस्तमभिसीसरमाग-
स्कारिणं मदविमोहितचित्ता ।
योषिदित्यभिललाष न हालां
दुस्त्यजः खलु सुखादपि मानः ॥२१॥
ह्रीविमोहमहरद्दयिताना-
मन्तिकं रतिसुखाय निनाय ।
सप्रसादमिव सेवितमासीत्
सद्य एव फलदं मधु तासाम् ॥२२॥
दत्तमात्तमदनं दयितेन
व्याप्तमातिशयिकेन रसेन ।
सस्वदे मुखसुरं प्रमदाभ्यो
नाम रूढमपि च व्युदपादि ॥२३॥
लब्धसौरभगुणो मदिराणा-
मङ्गनास्य चषकस्य च गन्धः ।
मोदितालिरितरेतरयोगाद-
न्यतामभजतातिशयं नु ॥२४॥
मानभङ्गपटुना सुरतेच्छां
तन्वता प्रथयता दृशि रागम् ।
लेभिरे सपदि भावयतान्तर्-
योषितः प्रणयिनेव मदेन ॥२५॥

पानधौतनवयावक रागं
सुभ्रुवो निभृतचुम्बनदक्षाः ।
प्रेयसामधररागरसेन स्वं
किलाधरमुपालि रख्नजुः ॥२६॥
अर्पितं रसितवत्यपि नाम-
ग्राहमन्ययुवतेर्दयितेन ।
उज्झति स्म मदमप्यपिबन्ती
वीक्ष्य मद्यमितरा तु ममाद ॥२७॥
अन्ययान्यवनितागतचित्तं
चित्तनाथमभिशङ्कितवत्या ।
पीतभूरिसुरयापि न मेदे
निर्वृतिर्हि मनसो मदहेतुः ॥२८॥
कोपवत्यनुनयानगृहीत्वा
प्रागथो मधुमदाहितमोहा ।
कोपितं विरहखेदितचित्ता
कान्तमेव कलयन्त्यनुनिन्ये ॥२९॥
कुर्वता मुकुलिताक्षियुगाना-
मङ्गसादमवसादितवाचाम् ।
ईर्ष्ययेव हरता ह्रियमासां
तद्गुणः स्वयमकारि मदेन ॥३०॥
गण्डभित्तिषु पुरा सदृशीषु
व्याञ्जि नाञ्चितदृशां प्रतिमेन्दुः ।
पानपाटलितकान्तिषु पश्चा-
ल्लोध्रचूर्णतिलकाकृतिरासीत् ॥३१॥
उद्धतैरिव परस्परसङ्गा-
दीरितान्युभयतः कुचकुम्भैः ।

योषितामतिमदेन जुघूर्णुर्
विभ्रमातिशयपुंषि वपूंषि ॥३२॥
चारुता वपुरभूषयदासां तामनूननवयौवनयोगः ।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसंगमभूषः ॥३३॥
क्षीबतामुपगतास्वनुवेलं तासु रोषपरितोषवतीषु ।
अग्रहीन्नु सशरं धनुरुज्झामास नूज्झितनिषङ्गमनङ्गः ॥३४॥
शङ्कयान्ययुवतौ वनिताभिः प्रत्यभेदि दयितः स्फुटमेव ।
न क्षमं भवति तत्त्वविचारे मत्सरेण हतसंवृति चेतः ॥ ३५ ॥
आननैर्विचकसे हृषिताभिर्वल्लभानभि तनूभिरभावि ।
आर्द्रतां हृदयमाप च रोषो लोलति स्म वचनेषु वधूनाम् ।३६।
रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्ष्य विकासि ।
चाटु चाकृतकसम्भ्रममासां कार्मणत्वमगमन् रमणेषु ॥ ३७ ॥
लीलयैव सुतनोस्तुलयित्वा गौरवाढ्यमपि लावणिकेन ।
मानवञ्चनविदा वदनेन क्रीतमेव हृदयं दयितस्य ॥ ३८ ॥
स्पर्शभाजि विशदच्छविचारौ कल्पिते मृगदृशां सुरताय ।
सन्नतिं दधति पेतुरजस्रं दृष्टयः प्रियतमे शयने च ॥ ३९ ॥
यूनि रागतरलैरपि तिर्यक्पातिभिः श्रुतिगुणेन युतस्य ।
दीर्घदर्शिभिरकारि वधूनां लङ्घनं न नयनैः श्रवणस्य ॥४०॥
संकथेच्छुरभिधातुमनीशा संमुखी न च बभूव दिदृक्षुः ।
स्पर्शनेन दयितस्य नतभ्रूरङ्गसङ्गचपलापि चकम्पे ॥ ४१ ॥
उत्तरीयविनयात्त्रपमाणा रुन्धती किल तदीक्षणमार्गम् ।
आवरिष्ट विकटेन विवोढुर्वक्षसैव कुचमण्डलमन्या ॥ ४२ ॥
अंशुकं हृतवता तनुबाहुस्वस्तिकापिहितमुग्धकुचाग्रा ।
भिन्नशङ्खवलयं परिणेत्रा पर्यरम्भि रभसादचिरोढा ॥ ४३ ॥
संजहार सहसा परिरब्धप्रेयसीषु विरहय्य विरोधम् ।
संहितं रतिपतिः स्मितभिन्नक्रोधमासु तरुणेषु महेषुम् ॥४४॥

स्र समानमुपयन्तरि वध्वाः श्लिष्टवत्युपसपत्नि रसेन ।
आत्मनैव रुरुधे कृतिनेव स्वेदसङ्गि वसनं जघनेन ॥ ४५ ॥
पीडिते पुर उरःप्रतिपेषं भर्तरि स्तनयुगेन युवत्याः ।
स्पष्टमेव दलतः प्रतिनार्यास्तन्मयत्वमभवद्धृदयस्य ॥ ४६ ॥
दीपितस्मरमुरस्युपपीडं वल्लभे घनमभिष्वजमाने ।
वक्रतां न ययतुः कुचकुम्भौ सुभ्रुवः कठिनतातिशयेन ॥ ४७ ॥

सम्प्रवेष्टुमिव योषित ईषुः
श्लिष्यतां हृदयमिष्टतमानाम् ।
आत्मनः सततमेव तदन्तर्-
वर्तिनो न खलु नूनमजानन् ॥ ४८ ॥

स्नेहनिर्भरमधत्त वधूना-
मार्द्रतां वपुरसंशयमन्तः ।
यूनि गाढपरिरम्भिणि
वस्त्रक्नोपमम्बु ववृषे यदनेन ॥ ४९ ॥

न स्म माति वपुषः प्रमदा-
नामन्तरिष्टतमसङ्गमजन्मा ।
तद्बहुर्बहिरवाप्य विकासं
व्यानशे तनुरुहाण्यमपि हर्षः ॥ ५० ॥

यत्प्रियव्यतिकराद्वनिता-
नामङ्गजेन पुलकेन बभूवे ।
प्रापि तेन भृशमुच्छ्वसिताभिर्
नीविभिः सपदि बन्धनमोक्षः ॥ ५१ ॥

ह्रीभरादवनतं परिरम्भे
रागवानवटुजेष्ववकृष्य ।
अर्पितोष्ठदलमाननपद्मं
योषितो मुकुलिताक्षमधासीत् ॥ ५२ ॥

पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरबिम्बमभीष्टे ।
पर्यकूजि सरुजेव तरुण्यास्
तारलोलवलयेन करेण ॥ ५३ ॥

केनचिन्मधुरमुल्बणरागं
बाष्पतप्तमधिकं विरहेषु ।
ओष्ठपल्लवमपास्य मुहूर्तं
सुभ्रुवः सरसमक्षि चुचुम्बे ॥ ५४ ॥

रेचितं परिजनेन महीयः
केवलाभिरतदम्पति धाम ।
साम्यमाप कमलासखविष्वक्-
सेनसेवितयुगान्तपयोधेः ॥ ५५ ॥

आवृतान्यपि निरन्तरमुच्चैर्-
योषितामुरसिजद्वितयेन ।
रागिणामित इतो विमृशद्भिः
पाणिभिर्जगृहिरे हृदयानि ॥ ५६ ॥

कामिनामसकलानि विभुग्नैः
स्वेदवारिमृदुभिः करजाग्रैः ।
आक्रियन्त कठिनेषु कथञ्चित्
कामिनीकुचतटेषु पदानि ॥ ५७ ॥

सोष्मणः स्तनशिलाशिखरा-
आदात्तघर्मसलिलैस्तरुणानाम् ।
उच्छ्वसत्कमलचारुषु हस्तैर्-
निम्ननाभिसरसीषु निपेते ॥ ५८ ॥

आमृशद्भिरभितो वलिवीचीर्-
लोलमानविततागुलिहस्तैः ।

सुभ्रुवामनुभवात्प्रतिपेदे
मुष्टिमेयमिति मध्यमभीष्टैः ॥ ५९ ॥
प्राप्य नाभिनदमज्जनमाशु
प्रस्थितं निवसनग्रहणाय ।
औपनीविकम रुन्ध किल स्त्री
वल्लभस्य करमात्मकराभ्याम् ॥ ६० ॥
कामिनः कृतरतोत्सवकालक्षेपमाकुलवधूकरसङ्गि ।
मेखलागुणविलग्नमसूयां दीर्घसूत्रमकरोत्परिधानम् ॥ ६१ ॥
अम्बरं विनयतः प्रियपाणेर्योषितश्च करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं कक्ष्यया च वलयैश्च शिशिञ्जे ६२
ग्रन्थिमुद्ग्रथयितुं हृदयेशे
वाससः स्पृशति मानधनायाः ।
भ्रूयुगेण सपदि प्रतिपेदे
रोमभिश्च सममेव विभेदः ॥ ६३ ॥
आशु लङ्घितवतीष्टकराग्रे
नीविमर्धमुकुलीकृतदृष्ट्या ।
रक्तवैणिकहताधरतन्त्री-
मण्डलक्वणितचारु चुकूजे ॥ ६४ ॥
आयताङ्गुलिरभूदतिरिक्तः
सुभ्रुवां कृशिमशालिनि मध्ये ।
श्रोणिषु प्रियकरः पृथुलासु
स्पर्शमाप सकलेन तलेन ॥ ६५ ॥
चक्रुरेव ललनोरुषु राजीः
स्पर्शलोभवशलोलकराणाम् ।
कामिनामनिभृतान्यपि रम्भा-
स्तम्भकोमलतलेषु नखानि ॥ ६६ ॥

ऊरुमूलचपलेक्षणमघ्नन्
यैर्वतंसकुसुमैः प्रियमेताः ।
चक्रिरे सपदि तानि यथार्थं
मन्मथस्य कुसुमायुधनाम ॥ ६७ ॥
धैर्यमुल्बणमनोभवभावा
वामतां च वपुरर्पितवत्यः ।
व्रीडितं ललितसौरतधार्ष्ट्यास्
तेनिरेऽभिरुचितेषु तरुण्यः ॥ ६८ ॥
पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरूर्-
हारि शुष्करुदितं च सुखेऽपि ॥ ६९ ॥
वारणार्थपदगद्गदवाचामीर्ष्यया मुहुरपत्रपया च ।
कुर्वते स्म सुदृशामनुकूलं प्रातिकूलिकतयैव युवानः ॥ ७० ॥
अन्यकालपरिहार्यमजस्रं तद्द्वयेन विदधे द्वयमेव ।
धृष्टता रहसि भर्तृषु ताभिर्निर्दयत्वमितरैरबलासु ॥ ७१ ॥
बाहुपीडनकचग्रहणाभ्यामाहतेन नखदन्तनिपातैः ।
बोधितस्तनुशयस्तरुणीनामुन्मिमील विशदं विषमेषुः ॥ ७२ ॥
कान्तया सपदि कोऽप्युपगूढः
प्रौढपाणिरपनेतुमियेष ।
संहतस्तनतिरस्कृतदृष्टिर्
भ्रष्टमेव न दुकूलमपश्यत् ॥ ७३ ॥
आहतं कुचतटेन तरुण्याः
साधु सोढमभुनेति पपात ।
त्रुट्यतः प्रियतमोरसि हारात्
पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥ ७४ ॥

सीत्कृतानि मणितं करुणोक्तिः
स्निग्धमुक्तमलमर्थवचांसि ।
हासभूषणरवाश्च रमण्याः
कामसूत्रपदतामुपजग्मुः ॥७५॥

उद्धतैर्निभृतमेकमनेकैश्छेदवन्मृगदृशामविरामैः ।
श्रूयते स्म मणितं कलकाञ्चीनूपुरध्वनिभिरक्षतमेव ॥७६॥

ईदृशस्य भवतः कथमेतल्लाघवं मुहुरतीव रतेषु ।
क्षिप्तमायतमदर्शयदुर्व्या काञ्चिदाम जघनस्य महत्त्वम् ॥७७॥

प्राप्यते स्म गतचित्रकचित्रै-
श्चित्रमार्द्रनखलक्ष्म कपोलैः ।
दध्रिरेऽथ रभसच्युतपुष्पाः
स्वेदबिन्दुकुसुमान्यलकान्ताः ॥७८॥

यद्यदेव रुरुचे रुचिरेभ्य
सुभ्रुवो रहसि तत्तदकुर्वन् ।
आनुकूलिकतया हि नराणा-
माक्षिपन्ति हृदयानि तरुण्यः ॥७९॥

प्राप्य मन्मथरसादतिभूमिं
दुर्वहस्तनभराः सुरतस्य ।
शश्रमुः श्रमजलार्द्रललाट-
श्लिष्टकेशमसितायतकेश्यः ॥८०॥

संगताभिरुचितैश्चलितापि प्रागमुच्यत चिरेण सखीव ।
भूय एव समगंस्त रतान्ते ह्रीर्वधूभिरसहा विरहस्य ॥८१॥

प्रेक्षणीयकमिव क्षणमासन् ह्रीविभङ्गुरविलोचनपाताः ।
सम्भ्रमद्रुतगृहीतदुकूलच्छाद्यमानवपुषः सुरतान्ताः ॥८२॥

अप्रभूतमतनीयसि तन्वी काञ्चिधाम्नि पिहितैकतरोरु ।
क्षौममाकुलकरा विचकर्ष क्रान्तपल्लवमभीष्टतमेन ॥८३॥

मृष्टचन्दनविशेषकभक्तिर्भ्रष्टभूषणकदर्थितमाल्यः ।
सापराध इव मण्डनमासीदात्मनैव सुदृशामुपभोगः ॥८४॥

योषितः पतितकाञ्चनकाञ्चौ मोहनातिरभसेन नितम्बे ।
मेखलेव परितः स्म विचित्रा राजते नवनखक्षतलक्ष्मीः ।८५।

भातु नाम सुदृशां दशनाङ्कः पाटलो धवलगण्डतलेषु ।
दन्तवाससि समानगुणश्रीः संमुखोऽपि परभागमवाप ॥८६॥

सुभ्रु वामधिपयोधरपीठं पीडनैस्त्रुटितवत्यपि पत्युः ।
मुक्तमौक्तिकलघुर्गुणशेषा हारयष्टिरभवद् गुरुरेव ॥८७॥

विश्रमार्थमुपगूढमजस्रं यत्प्रियैः प्रथमरत्यवसाने ।
योषितामुदितमन्मथमादौ तद्द्वितीयसुरतस्य बभूव ॥ ८८ ॥

आस्तृतेऽभिनवपल्लवपुष्पैरप्यनारतरताभिरताभ्यः ।
दीयते स्म शयितुं शयनीये न क्षणः क्षणदयापि वधूभ्यः ॥८९॥

योषितामतितरां नखलूनं गात्रमुज्ज्वलतया न खलूनम् ।
क्षोभमाशु हृदयं नयदूनां रागवृद्धिमकरोन्न यदूनाम् ॥९०॥

इति मदमदनाभ्यां रागिणः स्पष्टरागा-
ननवरतरतश्रीसङ्गिनस्तानवेक्ष्य ।
अभजत परिवृत्तिं साथ पर्यस्तहस्ता
रजनिरवनतेन्दुर्लज्जयाधोमुखीव ॥९१॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के सुरत-
वर्णनो नाम दशमः सर्गः ॥ १० ॥

卐

# ॥ अथोत्तरार्द्धम् ॥

## ॥ ११ ॥ एकादशः सर्गः ॥

( मालिनीवृत्तम् )

श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः
सततमृषभहीनं भिन्नकीकृत्य षड्जम् ।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः
परिणतिमिति रात्रेर्मागधा माधवाय ॥१॥

रतिरभसविलासाभ्यासतान्तं न याव-
न्नयनयुगममीलत्तावदेवाहतोऽसौ ।
रजनिविरतिशंसी कामिनीनां भविष्य-
द्विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः ॥ २ ॥

स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य
स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत् ।
शकटमिव महीयः शैशवे शार्ङ्गपाणे-
श्चपलचरणकाब्जप्रेरणोत्तुङ्गिताग्रम् ॥ ३ ॥

प्रहरकपमनीय स्वं निदिद्रास-
तोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति ।
मुहुरविशदवर्णा निद्रया शून्यशून्यां
दददपि गिरमन्तर्बुध्यते नो मनुष्यः ॥ ४ ॥

विपुलतरनितम्बाभोगरुद्धे रमण्याः
शयितुमनधिगच्छञ्जीवितेशोऽवकाशम् ।
रतिपरिचयनश्यन्नैद्रतन्द्रः कथंचिद्-
गमयति शयनीये शर्वरीं किं करोतु ॥ ५ ॥

क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगा-
नुदधिमहति राज्ये काव्यवद्दुर्विगाहे ।
गहनमपररात्रप्राप्तबुद्धिप्रसादाः
कवय इव महीपाश्चिन्तयन्त्यर्थजातम् ॥६॥
क्षितितटशयनान्तादुत्थितं दानपङ्क-
प्लुतबहुलशरीरं शाययत्येष भूयः ।
मृदुचलदपरान्तोदीरितान्दूनिनादं
गजपतिमधिरोहः पक्षकव्यत्ययेन ॥ ७ ॥
द्रुततरकरदक्षाः क्षिप्तवैशाखशैले
दधति दधनि धीरानारवान्वारिणीव ।
शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं बल्लवा लोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये ।
कथमपि परिवृत्ता निद्रयान्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥ ९ ॥
गतमनुगतवीणैरेकतां वेणुनादैः
कलमविकलतालं गायकैर्बोधहेतोः ।
असकृदनवगीतं गीतमाकर्णयन्तः
सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥१०॥
परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयःशष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥११॥
उदयमुदित दीप्तिर्याति यः संगतौ मे
पतति न वरमिन्दुः सोऽपरामेष गत्वा ।

स्मितरुचिरिव सद्यः साभ्यसूयं प्रभेति
स्फुरति विशदमेषा पूर्वकाष्ठाङ्गनायाः ।।१२।।
चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वतेन प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः ।।१३।।
कृतधवलिमभेदैः कुङ्कुमेनेव किञ्चि-
न्मलयरुहरजोभिर्भूषयन्पश्चिमाशाम् ।
हिमरुचिररुणिम्ना राजते राज्यमानै-
र्जरठकमलकन्दच्छेदगौरैर्मयूखैः ।।१४।।
दधदसकलमेकं खण्डितामानमद्भिः
श्रियमपरमपूर्णामुच्छ्वसद्भिः पलाशैः ।
कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ।।१५।।
मदरुचिमरुणेनोद्गच्छता लम्भितस्य
त्यजत इव चिरायस्थायिनीमाशु लज्जाम् ।
वसनमिव मुखस्य स्रंसते सम्प्रतीद
सितकरकरजालं वासवाशायुवत्याः ।।१६।।
अविरतरतलीलायासजातश्रमाणा-
मुपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानाम् ।
पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य
ज्वलयति मदनाग्निं मालतीनां रजोभिः ।।१७।।

अनिमिषमविरामा रागिणां सर्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य ।
इदमुदवसितानामस्फुटालोकसंप-
न्नयनमिव सनिद्रं घूर्णते दैपमर्चिः ।।१८।।

विकचकमलगन्धैरन्धयन्भृङ्गमाला:
सुरभितमकरन्दं मन्दं मन्दमावाति वात: ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्ष: ॥१९॥
लुलितनयनतारा: क्षामवक्त्रेन्दुबिम्बा
रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्य: ।
तिमिरमिव दधाना: स्रंसिन: केशपाशा-
नवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्व: ॥२०॥
शिशिरकिरणकान्तं वासरान्तेऽभिसार्य
श्वसनसुरभिगन्धि: साम्प्रतं सत्वरेव ।
व्रजति रजनिरेषा तन्मयूखाङ्गरागै:
परिमलितमनिन्द्यैरम्बरान्तं वहन्ती ॥२१॥
नवकुमुदवनश्रीहासकेलिप्रसङ्गा-
दधिकरुचिरमेषामप्युषां जागरित्वा ।
अयमपरदिशोऽङ्के मुञ्चति स्रस्तहस्त:
शिशयिषुरिव पाण्डुं म्लानमात्मायमिन्दु: ॥२२॥
सरभसपरिरम्भारम्भसंरम्भभाजा
यदधिनिशमपास्तं वल्लभेनाङ्गनाया: ।
वसनमपि निशान्ते नेष्यते तत्प्रदातुं
रथचरणविशालश्रोणिलोलेक्षणेन ॥२३॥
सपदि कुमुदिनीभिर्मीलितं हा क्षपापि
क्षयमगमदपेतास्तारकास्ता: समस्ता: ।
इति दयितकलत्रश्चिन्तयन्नङ्गमिन्दु-
र्वहति कृशमशेषं भ्रष्टशोभं शुचेव ॥२४॥
व्रजति विषयमक्ष्णामंशुमाली न याव-
त्तिमिरमखिलमस्तं तावदेवारुणेन ।

परपरिभवि तेजस्तन्वतामाशु कर्तुं
प्रभवति हि विपक्षोच्छेदमग्रेसरोऽपि ॥२५॥
विगततिमिरपङ्कं पश्यति व्योम याव-
द्धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥२६॥
मुदितयुवमनस्कास्तुल्यमेव प्रदोषे
रुचमदधुरुभय्यः कल्पिता भूषिताश्च ।
परिमलरुचिराभिर्न्यक्कृतास्तु प्रभाते
युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥२७॥
विलुलितकमलौघः कीर्णवल्लीवितानः
प्रतिवनमवधूताशेषशाखिप्रसूनः ।
क्वचिदयमनवस्थः स्थास्नुतामेति वायु-
र्वधूकुसुमविमर्दोद्गन्धिवेश्मान्तरेषु ॥२८॥
नखपदवलिनाभीसन्धिभागेषु लक्ष्यः
क्षतिषु च दशनानामङ्गनायाः सशेषः ।
अपि रहसि कृतानां वाग्विहीनोऽपि जातः
सुरतविलसितानां वर्णको वर्णकोऽसौ ॥२९॥
प्रकटमलिनलक्ष्मा मृष्टपत्रावलीकै-
रधिगतरतिशोभैः प्रत्युषः प्रोषितश्रीः ।
उपहसित इवासौ चन्द्रमाः कामिनीनां
परिणतशरकाण्डापाण्डुभिर्गण्डभागैः ॥३०॥
सकलमपि निकामं कामलोलान्यनारी-
रतिरभसविमर्दैर्भिन्नवत्यङ्गरागे ।
इदमतिमहदेवाश्चर्यमाश्चर्यधाम्न-
स्तव खलु मुखरागो यन्न भेदं प्रयातः ॥३१॥

प्रकटतरमिमं मा द्राक्षुरन्या रमण्यः
स्फुटमिति सविशङ्कं कान्तया तुल्यवर्णः ।
चरणतलसरोजाक्रान्तिसंक्रान्तयासौ
वपुषि नखविलेखो लाक्षया रक्षितस्ते ॥३२॥

तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः ।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥३३॥

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम् ॥३४॥

इति कृतवचनायाः कश्चिदभ्येत्य बिभ्यद्-
गलितनयनवारेर्याति पादावनामम् ।
करुणमपि समर्थं मानिनां मानभेदे
रुदितमुदितमस्त्रं योषितां विग्रहेषु ॥३५॥

मदमदनविकासस्पृष्टधाष्टर्योदयानां
रतिकलहविकीर्णैर्भूषणैरर्चितेषु ।
विदधति न गृहेषूत्फुल्लपुष्पोपहारं
विफलविनययत्नाः कामिनीनां वयस्याः ॥३६॥

करजदशनचिह्नं नैशमङ्गेऽन्यनारी-
जनितमिति सरोषामीर्ष्यया शङ्कमानाम् ।
स्मरसि न खलु दत्तं मत्तयैतत्त्वयैव
स्त्रियमनुनयतीत्थं व्रीडमानां विलासी ॥३७॥

कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ
परिशिथिलितगात्रे गन्तुमापृच्छमाने ।

विगलितनवमुक्तास्थूलबाष्पाम्बुबिन्दु-
स्तनयुगमबलायास्तत्क्षणं रोदितीव ॥३८॥
बहु जगद पुरस्तात्तस्य मत्ता किलाहं
चकर च किल चाटु प्रौढयोषिद्वदस्य ।
विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य
व्यपगतमदयाह्नि व्रीडितं मुग्धवध्वा ॥३९॥
अरुणजलजराजीमुग्धहस्ताग्रपादा
बहुलमधुपमालाकज्जलेन्दीवराक्षी ।
अनुपतति विरावं पत्रिणां व्याहरन्ती
रजनिमचिरजाता पूर्वसन्ध्या सुतेव ॥४०॥
प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
'विधिविहितविरिब्धैः सामिधेनीरधीत्य ।
कृतगुरुदुरितौघध्वंसमध्वर्युवर्यै-
र्हुतमयमुपलीढे साधु सान्नाय्यमग्निः ॥४१॥
प्रकृतजपविधीनामास्यमुद्रश्मिदन्तं
मुहुरपिहितमोष्ठैं रक्षरैर्लक्ष्यमन्यः ।
अनुकृतिमनुवेलं घट्टितोद्घट्टितस्य
व्रजति नियमभाजां मुग्धमुक्तापुटस्य ॥४२॥
नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम् ।
जनितभुवनदाहारम्भमम्भांसि दग्ध्वा
ज्वलितमिव महाब्धेरूर्ध्वमौर्वानलार्चिः ॥४३॥
विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव गरीयान्दिग्भिराकृष्यमाणः ।
कृतचपलविहङ्गालापकोलाहलाभि-
र्जलनिधिजलमध्यादेष उत्तार्यतेऽर्कः ॥४४॥

पयसि सलिलराशेर्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया वाडवाग्नेः ।
यदयमिदमिदानीमङ्गमुद्यन्दधाति
ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान् ॥४५॥
अतुहिनरुचिनासौ केवलं नोदयाद्रिः
क्षणमुपरिगतेन क्ष्माभृतः सर्व एव ।
नवकरनिकरेण स्पष्टबन्धूकसून-
स्तबकरचितमेते शेखरं बिभ्रतीव ॥४६॥
उदयशिखरिशृङ्गप्राङ्गणेष्वेष रिङ्गन्
सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवाऽङ्के हेलया बालसूर्यः ॥४७॥
क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः
प्रणतिपरमवेक्ष्य प्रीतमह्लाय लोकम् ।
भुवनतलमशेषं प्रत्यवेक्षिष्यमाणः
क्षितिधरतटपीठादुत्थितः सप्तसप्तिः ॥४८॥
परिणतमदिराभं भास्करेणांशुबाणै-
स्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः ।
रुधिरमिव वहन्त्यो भान्ति बालातपेन
च्छुरितमुभयरोधोवारितं वारि नद्यः ॥४९॥
दधति परिपतन्त्यो जालवातायनेभ्य-
स्तरुणतपनभासो मन्दिराभ्यन्तरेषु ।
प्रणयिषु वनितानां प्रातरिच्छत्सु गन्तुं
कुपितमदनमुक्तोत्तप्तनाराचलीलाम् ॥५०॥
अधिरजनि वधूभिः पीतमैरेयरिक्तं
कनकचषकमेतद्रोचनालोहितेन ।

उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्त-
मधुन इव तथैवापूर्णमद्यापि भाति ।।५१।।
सितरुचिशयनीये नक्तमेकान्तमुक्तं
दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति ।
निजमिति रतिबन्धोर्जानतीमुत्तरीयं
परिहसति सखी स्त्रीमाददानां दिनादौ ।।५२।।
प्लुतमिव शिशिरांशोरंशुभिर्यन्निशासु
स्फटिकमयमराजद्राजताद्रिस्थलाभम् ।
अरुणितमकठोरैर्वेश्म काश्मीरजाम्भः-
स्नपितमिव तदेतद्भानुभिर्भाति भानोः ।।५३।।
सरसनखपदान्तर्दष्टकेशप्रमोकं
प्रणयिनि विदधाने योषितामुल्लसन्त्यः ।
विदधति दशनानां सीत्कृताविष्कृताना-
मभिनवरविभासः पद्मरागानुकारम् ।।५४।।
अविरतदयिताङ्गासङ्गसञ्चारितेन
छुरितमभिनवासृक्कान्तिना कुङ्कुमेन ।
कनकनिकषरेखाकोमलं कामिनीनां
भवति वपुरवाप्तच्छायमेवातपेऽपि ।।५५।।
सरसिजवनकान्तं बिभ्रदभ्रान्तवृत्तिः
करनयनसहस्रं हेतुमालोकशक्तेः ।
अखिलमतिमहिम्ना लोकमाक्रान्तवन्तं
हरिरिव हरिदश्वः साधु वृत्रं हिनस्ति ।।५६।।
अवतमसभिदायै भास्वताभ्युद्गतेन
प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः ।
निरसितुमरिमिच्छोर्ये तदीयाश्रयेण
श्रियमधिगतवन्तस्तेऽपि हन्तव्यपक्षे ।।५७।।

प्रतिफलति करौघे सम्मुखावस्थितायां
रजतकटकभित्तौ सान्द्रचन्द्रांशुगौर्याम् ।
बहिरभिहतभद्रैः संहृतं कन्दरान्त-
र्गतमपि तिमिरौघं घर्मभानुर्भिनत्ति ॥५८॥
बहिरपि विलसन्त्यः काममानिन्यिरे यद्-
दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु ।
नियतविषयवृत्तेरप्यनल्पप्रताप-
क्षतसकलविपक्षस्तेजसः स स्वभावः ॥५९॥
चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाटः षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्कः करोति ॥६०॥
युगपदयुगसप्तिस्तुल्यसंख्यैर्मयूखै-
र्दशशतदलभेदं कौतुकेनाशु कृत्वा ।
श्रियमलिकुलगीतैर्लालितां पङ्कजान्त-
र्भवनमधिशयानामादरात्पश्यतीव ॥६१॥
अदयमिव कराग्रैरेष निष्पीड्य सद्यः
शशधरमहरादौ रागवानुष्णरश्मिः ।
अवकिरति नितान्तं कान्तिनिर्यासमब्द-
स्नुतनवजलपाण्डुं पुण्डरीकोदरेषु ॥६२॥
प्रविकसति चिराय द्योतिताशेषलोके
दशशतकरमूर्तावक्षिणीव द्वितीये ।
सितकरवपुषासौ लक्ष्यते संप्रति द्यौ-
र्विगलितकिरणेन व्यञ्जितैकेक्षणेव ॥६३॥
कुमुदवनमपश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।

उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाक: ।६४।
क्षणमतुहिनधाम्नि प्रोष्य भूय: पुरस्ता-
दुपगतवति पाणिग्राहवद्दिग्वधूनाम् ।
द्रुततरमुपयाति स्र समानांशुकोऽसा-
वुपपतिरिव नीचै: पश्चिमान्तेन चन्द्र: ।।६५।।
प्रलयमखिलतारालोकमह्नाय नीत्वा
श्रियमनतिशयश्री: सानुरागां दधान: ।
गगनसलिलराशिं रात्रिकल्पावसाने
मधुरिपुरिव भास्वानेष एकोऽधिशेते ।।६६।।
कृतसकलजगद्विबोधोऽवधूतान्धकारोदय:
क्षयितकुमुदतारकश्रीर्वियोगं नयन्कामिन: ।
बहुतरगुणदर्शनादभ्युपेताल्पदोष: कृती
तव वरद करोतु सुप्रातमह्नामयं नायक: ।६७।
(महामालिका)

।। इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
प्रत्यूषवर्णनो नामैकादश: सर्ग: ।। ११ ।।

## ।। १२ ।। द्वादश: सर्ग: ।।

( वंशस्थवृत्तम् )

इत्थं रथाश्वेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहि: ।
प्रस्थानकालक्षमवेषकल्पना-
कृतक्षणक्षेपमुदैक्षताच्युतम् ।।१।।

स्वक्षं सुपत्रं कनकोज्ज्वलद्युतिं
जवेन नागाञ्जितवन्तमुच्चकैः ।
आरुह्य तार्क्ष्यं नभसीव भूतले
ययावनुद्धातसुखेन सोऽध्वना ॥ २ ॥
हस्तस्थिताखण्डितचक्रशालिनं
द्विजेन्द्रकान्तं श्रितवक्षसं श्रिया ।
सत्यानुरक्तं नरकस्य जिष्णवो
गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः ॥ ३ ॥
शुक्लैः सतारैर्मुकुली कृतैः स्थुलैः
कुमुद्वतीनां कुमुदाकरैरिव ।
व्युष्टं प्रयाणं च वियोगवेदना-
विदूननारीकमभूत्समं तदा ॥ ४ ॥
उत्क्षिप्तगात्रः स्म विडम्बयन्नभः समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोहनिरूपितक्रमं करेणुरारोहयते निषादिनम् ।५।
स्वैरं कृतास्फालनलालितान्पुरः
स्फुरत्तनून्दर्शितलाघवक्रियाः ।
वङ्कावलग्नैकसवल्गपाणय-
स्तुरङ्गमानारुरुहुस्तुरङ्गिणः ॥ ६ ॥
अह्नाय यावन्न चकार भूयसे
निषेदिवानासनबन्धमध्वने ।
तीव्रोत्थितास्तावदसह्यरंहसो
विशृङ्खलं शृङ्खलकाः प्रतस्थिरे ॥ ७ ॥
गण्डोज्ज्वलामुज्ज्वलनाभिचक्रया
विराजमानां नवयोदरश्रिया ।
कश्चित्सुखं प्राप्तुमनाः सुसारथी
रथीं ययोजाविधुरां वधूमिव ॥ ८ ॥

उत्थातुमिच्छन्विधृतः पुरो बलान्निधीय-
मानो भरभाजि यन्त्रके ।
मर्धोज्झितोद्गारविभर्भरस्वरः
स्वनाम निन्ये रवणः स्फुटार्थताम् ॥ ९ ॥
नस्यागृहीतोऽपि धुवन्विषाणयो-
र्युगं ससूत्कारविवर्तितत्रिकः ।
गोणीं जनेन स्म निधातुमुद्धृता-
मनुक्षणं नोक्षतरः प्रतीच्छति ॥ १० ॥
नानाविधाविष्कृतसामजस्वरः
सहस्रवर्त्मा चपलैर्दुरध्ययः ।
गान्धर्वभूयिष्ठतया समानतां
स सामवेदस्य दधौ बलोदधिः ॥ ११ ॥
प्रत्यन्यनागं चलितस्त्वरावता
निरस्य कुण्ठं दधतान्यमङ्कुशम् ।
मूर्धानमूर्ध्वायतदन्तमण्डलं
धुवन्नरोधि द्विरदो निषादिना ॥ १२ ॥
सम्मूर्च्छदुच्छृङ्खलशङ्खनिःस्वनः
स्वनः प्रयाते पटहस्य शार्ङ्गिणि ।
सत्त्वानि निन्ये नितरां महान्त्यपि
व्यथां द्वयेषामपि मेदिनीभृताम् ॥ १३ ॥
कालीयकक्षोदविलेपनश्रियं
दिशद्दिशामुल्लसदंशुमद्द्युति ।
खातं खुरैर्मुद्गभुजां विपप्रथे
गिरेरधः काञ्चनभूमिजं रजः ॥ १४ ॥
मन्द्रैर्गजानां रथमण्डलस्वनै-
र्निजुह्नुवे तादृशमेव बृंहितम् ।

तारैर्बभूवे परभागलाभतः
परिस्फुटैस्तेषु तुरङ्गहेषितैः ॥ १५ ॥
अन्वेतुकामोऽवमताङ्कुशग्रह-
स्तिरोगतं साङ्कुशमुद्गहन्शिरः ।
स्थूलोच्चयेनागमदन्तिकागतां
गजोऽग्रयाताग्रकरः करेणुकाम् ॥ १६ ॥
यान्तोऽस्पृशन्तश्चरणैरिवावनिं
जवात्प्रकीर्णैरभितः प्रकीर्णकैः ।
अद्यापि सेनातुरगाः सविस्मयै-
रलूनपक्षा इव मेनिरे जनैः ॥ १७ ॥
ऋज्वीर्दधानैरवतत्य कन्धरा-
श्चलावचूडाः कलघर्घरारवैः ।
भूमिर्महत्यप्यविलम्बितक्रमं
क्रमेलकैस्तत्क्षणमेव चिच्छिदे ॥ १८ ॥
तूर्णं प्रणेत्रा कृतनादमुच्चकैः
प्रणोदितं वेसरयुग्यमध्वनि ।
आत्मीयनेमिक्षतसान्द्रमेदिनी-
रजश्चयाक्रान्तिभयादिवाद्रवत् ॥ १९ ॥
व्यावृत्तवक्त्रैरखिलैश्चमूचरै-
र्व्रजद्भिरेव क्षणमीक्षिताननाः ।
वल्गद्गरीयःस्तनकम्प्रकञ्चुकं
ययुस्तुरङ्गाधिरुहोऽवरोधिकाः ॥ २० ॥
पादैः पुरः कूबरिणां विदारिताः
प्रकाममाक्रान्ततलास्ततो गजैः ।
भग्नोन्नतानन्तरपूरितान्तरा
बभुर्भुवः कृष्टसमीकृता इव ॥ २१ ॥

दुर्दान्त मुत्कृत्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः ।
पर्याणतः स्रस्तमुरोविलम्बिन-
स्तुरङ्गमं प्रद्रुतमेकया दिशा ॥ २२ ॥

भूभृद्भिरप्यस्खलिताः खलून्नतै-
रपह्नुवाना सरितः पृथूरपि ।
अन्वर्थसंज्ञैव परं त्रिमार्गगा
ययावसंख्यैः पथिभिश्चमूरसौ ॥ २३ ॥

त्रस्तौ समासन्नकरेणुसूत्कृता-
न्नियन्तरि व्याकुलमुक्तरज्जुके ।
क्षिप्तावरोधाङ्गनमुत्पथेन गां
विलङ्घ्य लघ्वीं करभौ बभञ्जतुः ॥ २४ ॥

स्रस्ताङ्गसन्धौ विगताक्षपाटवे
रुजा निकामं विकलीकृते रथे ।
आप्तेन तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लङ्घनपूर्वकः क्रमः ॥ २५ ॥

धूर्भङ्गसंक्षोभविदारितोष्ट्रिका-
गलन्मधुप्लावितदूरवर्त्मनि ।
स्थाणौ निषङ्गिण्यनसि क्षणं पुरः
शुशोच लाभाय कृतक्रयो वणिक् ॥ २६ ॥

भेरीभिराकृष्टमहागुहामुखो
ध्वजांशुकैस्तर्जितकन्दलीवनः ।
उत्तुङ्गमातङ्गजितालघूपलो
बलैः स पश्चात्क्रियते स्म भूधरः ॥ २७ ॥

वन्येभदानानिलगन्धदुर्धराः
क्षणं तरुच्छेद विनोदितक्रुधः ।

व्यालद्विषा यन्तृभिरुन्मतिष्णवः
कथञ्चिदारादपथेन निन्यिरे ॥ २८ ॥
तैर्वैजयन्तीवनराजिराजिभि-
र्गिरिप्रतिच्छन्दमहामतङ्गजैः ।
बह्व्यः प्रसर्पज्जनतानदीशतै-
र्भुवो बलैरन्तरयाबभूविरे ॥ २९ ॥
तस्थे मुहूर्तं हरिणीविलोचनैः
सदृंशि दृष्ट्वा नयनानि योषिताम् ।
मत्वाथ सत्रासमनेकविभ्रम-
क्रियाविकाराणि मृगैः पलाय्यत ॥ ३० ॥
निम्नानि दुःखादवतीर्य सादिभिः
सयत्नमाकृष्टकशाः शनैः शनैः ।
उत्तेरुरुत्तालखुरारवं द्रुताः
श्लथीकृतप्रग्रहमर्वतां व्रजाः ॥ ३१ ॥
अध्यध्वमारूढवतैव केन-
चित्प्रतीक्षमाणेन जनं मुहुर्धृतः ।
दाक्ष्यं हि सद्यः फलदं यदग्रत-
श्चखाद दासेरयुवा वनावलीः ॥ ३२ ॥
शौरेः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्तिभिः ।
एकातपत्रा पृथिवीभृतां गणै-
रभूद्बहुच्छत्रतया पताकिनी ॥ ३३ ॥
आगच्छतोऽनूचि गजस्य घण्टयोः
स्वनं समाकर्ण्य समाकुलाङ्गनाः ।
दूरादपावर्तितभारवाहणाः
पथोऽपसस्त्वरितं चमूचराः ॥ ३४ ॥

ओजस्विवर्णोज्ज्वलवृत्तशालिनः
प्रसादिनोऽनुज्झितगोत्रसंविदः ।
श्लोकानुपेन्द्रस्य पुरःस्म भूयसो
गुणान्समुद्दिश्य पठन्ति वन्दिनः ॥ ३५ ॥
निःशेषमाक्रान्तमहीतलो जलै-
श्चलन्समुद्रोऽपि समुज्झति स्थितिम् ।
ग्रामेषु सैन्यैरकरोदवारितैः
किमव्यवस्थां चलितोऽपि केशवः ॥ ३६ ॥
कोशातकीपुष्पगुलुच्छकान्तिभि-
र्मुखैर्विनिद्रोल्बणबाणचक्षुषः ।
ग्रामीणवध्वस्तमलक्षिता जनै-
श्चिरं वृतीनामुपरि व्यलोकयन् ॥ ३७ ॥
गोष्ठेषु गोष्ठीकृतमण्डलासना-
न्सनादमुत्थाय मुहुः स वल्गतः ।
ग्राम्यानपश्यत्कपिशं पिपासतः
स्वगोत्रसङ्कीर्तनभावितात्मनः ॥ ३८ ॥
पश्यन्कृतार्थैरपि बल्लवीजनो
जनाधिनाथं न ययौ वितृष्णताम् ।
एकान्तमौग्ध्यानवबुद्धविभ्रमैः
प्रसिद्धविस्तारगुणैर्विलोचनैः ॥ ३९ ॥
प्रीत्या नियुक्तांल्लिहती स्तनन्धया-
न्निगृह्य पारीमुभयेन जानुनोः ।
वर्धिष्णुधाराध्वनि रोहिणीः पय-
श्चिरं निदध्यौ दुहतः स गोदुहः ॥ ४० ॥
अभ्याजतोऽभ्यागततूर्णतर्णका-
न्निर्याणहस्तस्य पुरो दुधुक्षतः ।

वर्गाद्गवां हुंकृतिचारु निर्यती-
मरिर्मधोरैक्षत गोमतल्लिकाम् ॥ ४१ ॥
स व्रीहिणां यावदपासितुं गताः
शुकान्मृगैस्तावदुपद्रुतश्रियाम् ।
केदारिकाणामभितः समाकुलाः
सहासमालोकयतिस्म गोपिकाः ॥ ४२ ॥
ज्यासेद्धुमस्मानवधानतः पुरा
चलत्यसावित्युपकर्णयन्नसौ ।
गीतानि गोप्याः कलमं मृगव्रजो
न नूनमत्तीति हरिर्व्यलोकयत् ॥ ४३ ॥
लीलाचलत्स्त्रीचरणारुणोत्पल-
स्खलत्तुलाकोटिनिनादकोमलः ।
शौरेरुपानूपमपाहरन्मनः
स्वनान्तरादुन्मदसारसारवः ॥ ४४ ॥
उच्चैर्गतामस्खलितां गरीयसीं
तदातिदूरादपि तस्य गच्छतः ।
एके समूहुर्बलरेणुसंहतिं
शिरोभिराज्ञामपरे महीभृतः ॥ ४५ ॥
प्रायेण नीचानपि मेदिनीभृतो
जनः समेनैव पथाधिरोहति ।
सेना मुरारेः पथ एव सा पुन-
र्महामहीध्रान्परितोऽध्यरोहयत् ॥ ४६ ॥
दन्ताग्रनिर्भिन्नपयोदमुन्मुखाः
शिलोच्चयानारुरुर्महीयसः ।
तिर्यक्कटप्लाविमदाम्बुनिम्नगा-
विपूर्यमाणश्रवणोदरं द्विपाः ॥ ४७ ॥

श्च्योतन्मदाम्भः कणकेन केनचि-
ज्जनस्य जीमूतकदम्बकद्युता ।
नगेन नागेन गरीयसोच्चकै-
ररोधि पन्थाः पृथुदन्तशालिना ॥ ४८ ॥
भग्नद्रुमाश्चक्रुरितस्ततो दिशः
समुल्लसत्केतनकाननाकुलाः ।
पिष्टाद्रिपृष्ठास्तरसा च दन्तिन-
श्चलन्निजाङ्गाचलदुर्गमा भुवः ॥ ४९ ॥
आलोकयामास हरिर्महीधरा-
नधिश्रयन्तीर्गजताः परःशताः ।
उत्पातवातप्रतिकूलपातिनी-
रुपत्यकाभ्यो बृहतीः शिला इव ॥ ५० ॥
शैलाधिरोहाभ्यसनाधिकोद्धुरैः
पयोधरैरामलकीवनाश्रिताः ।
तं पर्वतीयप्रमदाश्चचायिरे
विकासविस्फारितविभ्रमेक्षणाः ॥ ५१ ॥
सावज्ञमुन्मील्य विलोचने सकृ-
त्क्षणं मृगेन्द्रेण सुषुप्सुना पुनः ।
सैन्यान्न यातः समयापि विव्यथे
कथं सुराजंभवमन्यथाथवा ॥ ५२ ॥
उत्सेधनिर्धूतमहीरुहां ध्वजै-
र्जनावरुद्धोद्धतसिन्धुरंहसाम् ।
नागैरधिक्षिप्तमहाशिलं मुहु-
र्बलं बभूवोपरि तन्महीभृताम् ॥ ५३ ॥
श्मश्रूयमाणे मधुजालके तरो-
र्गजेन गण्डं कषता विधूनिते ।

क्षुद्राभिरक्षुद्रतराभिराकुलं
विदश्यमानेन जनेन दुद्रुवे ॥ ५४ ॥
नीते पलाशिन्युचिते शरीरवद्-
गजान्तकेनान्तमदान्तकर्मणा ।
संचेरुरात्मान इवापरं क्षणा-
त्क्षमारुहं देहमिव प्लवंगमाः ॥ ५५ ॥
प्रह्वानतीव क्वचिदुद्धतिश्रितः
क्वचित्प्रकाशानथ गह्वरानपि ।
साम्यादपेतानिति वाहिनी हरे-
स्तदातिचक्राम गिरीन्गुरूनपि ॥ ५६ ॥
स व्याप्तवत्या परितोऽपथान्यपि
स्वसेनया सर्वपथीनया तया ।
अम्भोभिरुल्लङ्घिततुङ्गरोधसः
प्रतीपनाम्नीः कुरुते स्म निम्नगाः ॥ ५७ ॥
यावद्व्यगाहन्त न दन्तिनां घटा-
स्तुरङ्गमैस्तावदुदीरितं खुरैः ।
क्षिप्तं समीरैः सरितां पुरः
पतज्जलान्यनैषीद्रज एव पङ्कताम् ॥ ५८ ॥
रन्तुं क्षतोत्तुङ्गनितम्बभूमयो
मुहुर्व्रजन्तः प्रमदं मदोद्धताः ।
पङ्कं करापाकृतशैवलांशुकाः
समुद्रगाणामुदवादयन्निभाः ॥ ५९ ॥
रुग्णोरुरोधः परिपूरिताम्भसः
समस्थलीकृत्य पुरातनीर्नदीः ।
कूलंकषौघाः सरितस्तथापराः
प्रवर्तयामासुरिभा मदाम्बुभिः ॥ ६० ॥

पद्मैरनन्वीतवधूमुखद्युतो
गता न हंसैः श्रियमातपत्रजाम् ।
दूरेऽभवन्भोजबलस्य गच्छतः
शैलोपमातीतगजस्य निम्नगाः ॥ ६१ ॥
स्निग्धाञ्जनश्यामतनूभिरुन्नतै-
र्निरन्तराला करिणां कदम्बकैः ।
सेना सुधाक्षालितसौधसम्पदां
पुरां बहूनां परभागमाप सा ॥ ६२ ॥
प्रासादशोभातिशयालुभिः पथि
प्रभोर्निवासाः पटवेश्मभिर्बभुः ।
नूनं सहानेन वियोगविक्लवा
पुरः पुरश्रीरपि निर्ययौ तदा ॥ ६३ ॥
वर्त्म द्विपानां विरुवन्त उच्चकै-
र्वनेचरेभ्यश्चिरमाचचक्षिरे ।
गण्डस्थलाघर्षगलन्मदोदक-
द्रवद्रुमस्कन्धनिलायिनोऽलयः ॥ ६४ ॥
आयामवद्भिः करिणां घटाशतै-
रधःकृताट्टालकपङ्क्तिरुच्चकैः ।
दूष्यैर्जितोदग्रगृहाणि सा चमू-
रतीत्य भूयांसि पुराण्यवर्तत ॥ ६५ ॥
उद्धूतमुच्चैर्ध्वजिनीभिरंशुभिः
प्रतप्तमभ्यर्णतया विवस्वतः ।
आह्लादिकह्लारसमीरणाहते
पुरः पपाताम्भसि यामुने रजः ॥ ६६ ॥
या घर्मभानोस्तनयापि शीतलैः
स्वसा यमस्यापि जनस्य जीवनैः ।

कृष्णापि शुद्धेरधिकं विधातृभि-
विहन्तुमंहांसि जलैः पटीयसी ॥ ६७ ॥
यस्या महानीलतटीरिव द्रुताः
प्रयान्ति पीत्वा हिमपिण्डपाण्डुराः ।
कालीरपस्ताभिरिवानुरञ्जिताः
क्षणेन भिन्नाञ्जनवर्णतां घनाः ॥ ६८ ॥
व्यक्तं बलीयान् यदि हेतुराग-
मादपूरयत्सा जलधिं न जाह्नवी ।
गाङ्गौघनिर्भर्त्स्मितशम्भुकन्धरा-
सवर्णमर्णः कथमन्यथास्य तत् ॥ ६९ ॥
अभ्युद्यतस्य क्रमितुं जवेन गां
तमालनीला नितरां धृतायतिः ।
सीमेव सा तस्य पुरः क्षणं बभौ
बलाम्बुराशेर्महतो महापगा ॥ ७० ॥
लोलैररित्रैश्चरणैरिवाभितो
जवादव्रजन्तीभिरसौ सरिज्जनैः ।
नौभिः प्रतेरे परितः प्लवोदित-
भ्रमीनिमीलल्ललनावलम्बितैः ॥ ७१ ॥
तत्पूर्वमंसद्वयसं द्विपाधिपाः क्षणं सहेला परितो जगाहिरे ।
सद्यस्ततस्तैरुरनारतस्रुतस्वदानवारिप्रचुरीकृतं पयः ॥७२॥
प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखै-
स्तुरङ्गमैरायतकीर्णवालधि ।
उत्कर्णमुद्ग्राहितधीरकन्धरै-
रतीयताग्रे तटदत्तदृष्टिभिः ॥ ७३ ॥
तीर्त्वा जनेनैव नितान्तदुस्तरां
नदीं प्रतिज्ञामिव तां गरीयसीम् ।

शृङ्गैरपस्कीर्णमहत्तटीभुवा-
मशोभतोच्चैर्नदितं ककुद्मताम् ॥ ७४ ॥

सीमन्त्यमाना यदुभूभृतां बलै-
र्बभौ तरद्भिर्गवलासितद्युतिः ।
सिन्दूरितानेकपकङ्कणाङ्किता
तरङ्गिणी वेणिरिवायता भुवः ॥ ७५ ॥

अव्याहतक्षिप्रगतैः समुच्छ्रिता-
ननुज्झितद्राघिमभिर्गरीयसः ।
नाव्यं पयः केचिदतारिषुर्भुजैः
क्षिपद्भिरूर्मीनपरैरिवोर्मिभिः ॥ ७६ ॥

विदलितमहाकूलामुक्ष्णां विषाणविघट्टनै-
रलघुचरणाकृष्टग्राहां विषाणिभिरुन्मदैः ।
सपदि सरितं सा श्रीभर्तुर्बृहद्रथमण्डल-
स्खलितसलिलामुल्लङ्घ्यैनां जगाम वरूथिनी ।७७।

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
प्रयाणवर्णनो नाम द्वादशः सर्गः ॥ १२ ॥

—

## ॥ १३ ॥ त्रयोदशः सर्गः ॥

यमुनामतीतमथ शुश्रुवानमुं तपस-
स्तनूज इति नाधुनोच्यते ।
स यदाचलन्निजपुरादहर्निशं नृपते-
स्तदादि समचारि वार्तया ॥ १ ॥
यदुभर्तु रागमनलब्धजन्मनः
प्रमदादमानिव पुरे महीयसि ।
सहसा ततः स सहितोऽनुजन्मभि-
र्वसुधाधिपोऽभिमुखमस्य निर्ययौ ॥ २ ॥
रभसप्रवृत्तकुरुचक्रदुन्दुभिध्वनिभि-
र्जनस्य बधिरीकृतश्रुतेः ।
समवादि वक्तृभिरभीष्टसङ्कथाः
प्रकृतार्थशेषमथ हस्तसंज्ञया ॥ ३ ॥
अपदान्तरं च परितः क्षिति-
क्षितामपतन्द्रुतभ्रमितहेमनेमयः ।
जविमारुताञ्चितपरस्परोपम-
क्षितिरेणुकेतुवसनाः पताकिनः ॥ ४ ॥
द्रुतमध्वनन्नुपरि पाणिवृत्तयः
पणवा इवाश्वचरणक्षता भुवः ।
ननृतुश्च वारिधरधीरवारण-
ध्वनिहृष्टकूजितकलाः कलापिनः ॥ ५ ॥
व्रजतोरपि प्रणयपूर्वमेकताम-
सुरारिपाण्डुसुतसैन्ययोस्तदा ।
रुरुषे विषाणिभिरनुक्षणम्मिथो
मदमूढबुद्धिषु विवेकिता कुतः ? ॥ ६ ॥

अवलोक एव नृपतेः स्म दूरतो
रभसाद्रथादवतरीतुमिच्छतः ।
अवतीर्णवान्प्रथममात्मना हरि-
विनयं विशेषयति सम्भ्रमेण सः ॥ ७ ॥
वपुषा पुराणपुरुषः पुरःक्षितौ
परिपुञ्ज्यमानपृथुहारयष्टिना ।
भुवनैर्नतोऽपि विहितात्मगौरवः
प्रणनाम नाम तनयं पितृष्वसुः ॥ ८ ॥
मुकुटांशुरञ्जितपरागमग्रतः स
न यावदाप शिरसा महीतलम् ।
क्षितिपेन तावदनपेक्षितक्रमं भुज-
पञ्जरेण रभसादगृह्यत ॥ ९ ॥
न ममौ कपाटतटविस्तृतं तनौ
मुरवैरिवक्ष उरसि क्षमाभुजः ।
भुजयोस्तथापि युगलेन दीर्घयो-
र्विकटीकृतेन परितोऽभिषस्वजे ॥ १० ॥
गतया निरन्तरनिवासमध्युरः
परिनाभि नूनमवमुच्य वारिजम् ।
कुरुराजनिर्दयनिपीडनाभया-
न्मुखमध्यरोहि मुरविद्विषः श्रिया ॥ ११ ॥
शिरसि स्म जिघ्रति सुरारिबन्धने
छलवामनं विनयवामनं तदा ।
यशसेव वीर्यविजितामरद्रुम-
प्रसवेन वासितशिरोरुहे नृपः ॥ १२ ॥
सुखवेदनाहृषितरोमकूपया
शिथिलीकृतेऽपि वसुदेवजन्मनि ।

कुरुभर्तुरङ्गलतया न तत्यजे
विकसत्कदम्बनिकुरम्बचारुता ॥ १३ ॥
इतरानपि क्षितिभुजोऽनुजन्मनः
प्रमनाः प्रमोदपरिफुल्लचक्षुषः ।
स यथोचितं जनसभाजनोचितः
प्रसभोद्धृतासुरसभोऽसभाजयत् ॥ १४ ॥
समयेत्य तुल्यमहसः शिलाघना-
न्घनपक्षदीर्घतरबाहुशालिनः ।
परिशिश्लिषुः क्षितिपतीन्क्षितीश्वराः
कुलिशात्परेण गिरयो गिरीनिव ॥ १५ ॥
इभकुम्भतुङ्गकठिनेतरेतरस्तन-
भारदूरविनिवारितोदराः ।
परिफुल्लगण्डफलकाः परस्परं
परिरेभिरे कुकुरकौरवस्त्रियः ॥ १६ ॥
रथवाजिपत्तिकरिणीसमाकुलं
तदनीकयोः समगत द्वयं मिथः ।
दधिरे पृथक्करिण एव दूरतो
महतां हि सर्वमथवा जनातिगम् ॥ १७ ॥
अधिरुह्यतामिति महीभृतोदितः
कपिकेतुनार्पितकरो रथं हरिः ।
अवलम्बितैलविलपाणिपल्लवः
श्रयति स्म मेघमिव मेघवाहनः ॥ १८ ॥
रथमास्थितस्य च पुराभिवर्तिन-
स्तिसृणां पुरामिव रिपोर्मुरद्विषः ।
अथ धर्ममूर्तिरनुरागभावितः
स्वयमादित प्रवयणं प्रजापतिः ॥ १९ ॥

शनकैरथास्य तनुजालकान्तर-
स्फुरितक्षपाकरकरोत्कराकृति ।
पृथुफेनकूटमिव निम्नगापते-
र्मरुतश्च सूनुरधुवत्प्रकीर्णकम् ॥ २० ॥
विकसत्कलायकुसुमासितद्युते-
रलघूडुपाण्डु जगतामधीशितुः ।
यमुनाह्रदोपरिगहंसमण्डलद्युति-
जिष्णु जिष्णुरभृतोष्णवारणम् ॥ २१ ॥
पवनात्मजेन्द्रसुतमध्यवर्तिना
नितरामरोचि रुचिरेण चक्रिणा ।
दधतेव योगमुभयग्रहान्तर-
स्थितकारितं दुरुधराख्यमिन्दुना ॥ २२ ॥
वशिनं क्षितेरयनयाविवेश्वरं
नियमो यमश्च नियतं यतिं यथा ।
विजयश्रिया वृतमिवार्कमारु-
तावनुसस्रतुस्तमथ दस्रयोः सुतौ ॥ २३ ॥
मुदितैस्तदेति दितिजन्मनां
रिपावविनीतसम्भ्रमविकासिभक्तिभिः ।
उपसेदिवद्भिरुपदेष्टरीव तैं-
र्ववृते विनीतमविनीतशासिभिः ॥ २४ ॥
गतयोरभेदमिति सैन्ययोस्तयो-
रथ भानुजह्नुतनयाम्भसोरिव ।
प्रतिनादितामरविमानमानकै-
र्नितरां मुदा परमयेव दध्वने ॥ २५ ॥
मखमीक्षितुं क्षितिपतेरुपेयुषां
परितः प्रकल्पितनिकेतनं बहिः ।

उपरुध्यमानमिव भूभृतां बलैः
पुटभेदनं दनसुतारिरैक्षत ॥ २६ ॥
प्रतिनादपूरितदिगन्तरः पतन्पु-
रगोपुरं प्रति स सैन्यसागरः ।
रुरुचे हिमाचलगुहामुखोन्मुखः
पयसां प्रवाह इव सौरसैन्धवः ॥ २७ ॥
असकृद्गृहीतबहुदेहसम्भव-
स्तदसौ विभक्तनवगोपुरान्तरम् ।
पुरुषः पुरं प्रविशति स्म पञ्चभिः
सममिन्द्रियैरिव नरेन्द्रसूनुभिः ॥ २८ ॥
तनुभिस्त्रिनेत्रनयनानवेक्षि-
तस्मरविग्रहद्युतिभिरच्युतन्नराः ।
प्रमदाश्च यत्र खलु राजयक्ष्मणः
परतो निशाकरमनोरमैर्मुखैः ॥ २९ ॥
अवलोकनाय सुरविद्विषां द्विषः
पटहप्रणादविहितोपहूतयः ।
अवधीरितान्यकरणीयसत्वराः
पतिरथ्यमीयुरथ पौरयोषितः ॥ ३० ॥
अभिवीक्ष्य सामिकृतमण्डनं यतीः
कररुद्धनीवि गलदंशुकाः स्त्रियः ।
दधिरेऽधिभित्ति पटहप्रतिस्वनैः
स्फुटमट्टहासमिव सौधपङ्क्तयः ॥ ३१ ॥
रभसेन हारपददत्तकाञ्चयः
प्रतिमूर्धजं निहितकर्णपूरकाः ।
परिवर्तिताम्बरयुगाः समापत-
न्वलीयकृतश्रवणपूरकाः स्त्रियः ॥ ३२ ॥

व्यतनोदपास्य चरणं प्रसाधिका-
करपल्लवाद्रसवशेन काचन ।
द्रुतयावकैकपदचित्रितावनिं
पदवीं गतेव गिरिजा हरार्धताम् ॥ ३३ ॥
व्यचलन्विशङ्कटकटीरकस्थली-
शिखरस्खलन्मुखरमेखलाकुलाः ।
भवनानि तुङ्गतपनीयसंक्रम-
क्रमणक्वणत्कनकनूपुराः स्त्रियः ॥ ३४ ॥
अधिरुक्ममन्दिरगवाक्षमुल्ल-
सत्सुदृशो रराज मुरजिद्दिदृक्षया ।
वदनारविन्दमुदयाद्रिकन्दरा-
विवरोदरस्थित मिवेन्दुमण्डलम् ॥ ३५ ॥
अधिरूढया निजनिकेतमुच्चकैः
पवनावधूतवसनान्तयैकया ।
विहितोपशोभमुपयाति माधवे
नगरं व्यरोचत पताकयेव तत् ॥ ३६ ॥
करयुग्मपद्ममुकुलापवर्जितैः
प्रतिवेश्म लाजकुसुमैरवाकिरन् ।
अवदीर्णशुक्तिपुटमुक्तमौक्तिक-
प्रकरैरिव प्रियरथाङ्गमङ्गनाः ॥ ३७ ॥
हिममुक्तचन्द्ररुचिरः सपद्मको
मदयन्द्विजाञ्जनितमीनकेतनः ।
अभवत्प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥ ३८ ॥
धरणीधरेन्द्रदुहितुर्भयादसौ
विषमेक्षणः स्फुटममूर्न पश्यति ।

मदनेन वीतभयमित्यधिष्ठिताः
क्षणमीक्षते स्म स पुरोविलासिनीः ॥ ३९ ॥
विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥ ४० ॥
अधिकोन्नमद्घनपयोधरं मुहुः
प्रचलत्कलापिकलशङ्खकस्वना ।
अभिकुण्णमङ्गुलिमुखेन काचन
द्रुतमेककर्णविवरं व्यघट्टयत् ॥ ४१ ॥
परिपाटलाब्जदलचारुणासकृच्च-
लिताङ्गुलीकिसलयेन, पाणिना ।
सशिरः प्रकम्पमपरा रिपुं मघो-
रनुदीर्णवर्णनिभृतार्थमाह्वयत ॥ ४२ ॥
नलिनान्तिकोपहितपल्लवश्रिया
व्यवधाय चारु मुखमेकपाणिना ।
स्फुरदङ्गुलीविवरनिःसृतोल्लस-
द्दशनप्रभाङ्कुरमजृम्भतापरा ॥ ४३ ॥
वलयार्पितासितमहोपलप्रभा-
बहुलीकृतप्रतनुरोमराजिना ।
हरिवीक्षणाक्षणिकचक्षुषान्यया
करपल्लवेन गलदम्बरं दधे ॥ ४४ ॥
निजसौरभभ्रमितभृङ्गपक्षतिव्य-
जनानिलक्षयितघर्मवारिणा ।
अभिशौरि काचिदनिमेषदृष्टिना
पुरदेवतेव वपुषा व्यभाव्यत ॥ ४५ ॥

अधियाति नः सतृष एष चक्षुषो
हरिरित्यखिद्यत नितम्बिनीजनः ।
न विवेद यः सततमेनमीक्षते
न वितृष्णतां व्रजति खल्वसावपि ॥ ४६ ॥

अकृतस्वसद्मगमनादरः क्षणं
लिपिकर्मनिर्मित इव व्यतिष्ठत ।
गतमच्युतेन सह शून्यतां गतः
प्रतिपालयन्मन इवाङ्गनाजनः ॥ ४७ ॥

अलसैर्मदेन सुदृशः शरीरकैः
स्वगृहान्प्रति प्रतिययुः शनैःशनैः ।
अलघुप्रसारितविलोचनाञ्जलि-
द्रुतपीतमाधवरसौघनिर्भरैः ॥ ४८ ॥

नवगन्धवारिविरजीकृताः पुरो
घनधूपधूमकृतरेणुविभ्रमाः ।
प्रचुरोद्धतध्वजविलम्बिवाससः
पुरवीथयोऽथ हरिणातिपेतिरे ॥ ४९ ॥

उपनीय बिन्दुसरसो मयेन या
मणिदारु चारु किल वार्षपर्वणम् ।
विदधेऽवधूतसुरसद्मसम्पदं
समुपासदत्सपदि संसदं स ताम् ॥ ५० ॥

अधिरात्रि यत्र निपतन्नभोलिहा
कलधौतधौतशिलवेश्मनां रुचौ ।
पुनरप्यवापदिव दुग्धवारिधिक्षण-
गर्भवासमनिदाघदीधितिः ॥ ५१ ॥

लयनेषु लोहितकनिर्मिता भुवः
शितिरत्नरश्मिहरितीकृतान्तराः ।

जमदग्निसूनुपितृतर्पणी रयो
वहति स्म या विरलशैवला इव ॥ ५२ ॥
विशदाश्मकूटघटिताः क्षपाकृतः
क्षणदासु यत्र च रुचैकतां गताः ।
गृहपङ्क्तयश्चिरमतीयिरे जनैस्त-
मसीव हस्तपरिमर्शसूचिताः ॥ ५३ ॥
निलयेषु नक्तमसिताश्मनां चयै-
र्बिसिनीवधूपरिभवस्फुटागसः ।
मुहुरत्रसद्भिरपि यत्र गौरवा-
च्छशलाञ्छनांशव उपांशु जघ्निरे ॥ ५४ ॥
सुखिनः पुरोऽभिमुखतामुपागतैः
प्रतिमासु यत्र गृहरत्नभित्तिषु ।
नवसङ्गमैरबिभरुः प्रियाजनैः
प्रमदं त्रपाभरपराङ्मुखैरपि ॥ ५५ ॥
तृणवाञ्छया मुहुरवाञ्चितानना-
न्निचयेषु यत्र हरिताश्मवेश्मनाम् ।
रसनाग्रलग्नकिरणाङ्कुराञ्जनो
हरिणान्गृहीतकवलानिवैक्षत ॥ ५६ ॥
विपुलालवालभृतवारिदर्पण-
प्रतिमागतैरभिविरेजुरात्मभिः ।
यदुपान्तिकेषु दधतो महीरुहः
सपलाशराशिमिव मूलसंहतिम् ॥ ५७ ॥
उरगेन्द्रमूर्धरुहरत्नसन्निधेर्मुहु-
रुन्नतस्य रसितैः पयोमुचः ।
अभवन्यदङ्गणभुवः समु-
च्छ्वसन्नववालवायजमणिस्थलाङ्कुराः ॥ ५८ ॥

नलिनी निगूढसलिला च यत्र सा
स्थलमित्यधः पतति या सुयोधने ।
अनिलात्मजप्रहसनाकुलाखिल-
क्षितिपक्षयागमनिमित्ततां ययौ ॥५९॥
हसितुं परेण परितः परिस्फुर-
त्करवालकोमलरुचावुपेक्षितः ।
उदकार्थि यत्र जलशङ्कया जनै-
र्मुहुरिन्द्रनीलभुवि दूरमम्बरम् ॥६०॥
अभितः सदोऽथ हरिपाण्डवौ
रथादमलांशुमण्डलसमुल्लसत्तनू ।
अवतेरतुर्नयननन्दनौ नभः
शशिभार्गवावुदयपर्वतादिव ॥६१॥
तदलक्ष्यरत्नमयकुड्यमादरा-
दभिधातरीत इत इत्यथो नृपे ।
धवलाश्मरश्मिपटलाविभावित-
प्रतिहारमाविशदसौ सदः शनैः ॥६२॥
नवहाटकेष्टकचितं ददर्श स
क्षितिपस्य पस्त्यमथ तत्र संसदि ।
गगनस्पृशां मणिरुचां चयेन
यत्सदनान्युदस्मयत नाकिना मपि ॥६३॥
उदयाद्रिमूर्ध्नि युगपच्चकासतो-
र्दिननाथपूर्णशशिनोरसम्भवाम् ।
रुचिमासने रुचिरधाम्नि बिभ्रता-
वलघुन्यथ न्यषदतां नृपाच्युतौ ॥६४॥
सुतरां सुखेन सकलक्लमच्छिदा
सनिदाघमङ्गमिव मातरिश्वना ।

यदुनन्दनेन तदुदन्वतः पयः
शशिनेव राजकुलमाप नन्दथुम् ॥६५॥

अनवद्यवाद्यलयगामि कोमलं
नवनीतमप्यनवगीततां दधत् ।
स्फुटसात्त्विकाङ्गिकमनृत्यदुज्ज्वलं-
सविलासलासिकविलासिनीजनः ॥६६॥

सकले च तत्र गृहमागते हरौ
नगरेऽप्यकालमहमादिदेश सः ।
सततोत्सवं तदिति नूनमुन्मुदो
रभसेन विस्मृतमभून्महीभृतः ॥६७॥

हरिराकुमारमखिलाभिधान-
वित्स्वजनस्य वार्तमयमन्वयुङ्क्त च ।
महतीमपि श्रियमवाप्य विस्मयः
सुजनो न विस्मरति जातु किंचन ॥६८॥

मर्त्यलोकदुरवापमवाप्तरसोदयं
नूतनत्वमतिरक्ततयानुपदं दधत् ।
श्रीपतिः पतिरसाववनेश्च परस्परं
सङ्कथामृतमनेकमसिस्वदतामुभौ ॥६९॥

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये अघङ्के
श्रीकृष्णसमागमो नाम त्रयोदशः सर्गः ॥१३॥

卐

## ॥ १४ ॥ चतुर्दशः सर्गः ॥

(रथोद्धता)

तं जगाद गिरमुद्गिरन्निव स्नेहमाहितविकासया दृशा ।
यज्ञकर्मणि मनः समादधद्वाग्विदां वरमकद्वदो नृपः ॥१॥

लज्जते न गदितः प्रियं परो वक्तुरेव भवति त्रपाधिका ।
व्रीडमेति न तव प्रियं वदन्ह्रीमतात्रभवतैव भूयते ॥२॥

तोषमेति वितथैः स्तवैः परस्ते च तस्य सुलभाः शरीरिभिः ।
अस्ति न स्तुतिवचोऽनृतं तव स्तोत्रयोग्य न च तेन तुष्यसि ।३।

बह्वपि प्रियमयं तव ब्रुवन्न व्रजत्यनृतवादितां जनः ।
सम्भवन्ति यददोषदूषिते सार्व सर्वगुणसम्पदस्त्वयि ॥४॥

सा विभूतिरनुभाव सम्पदां भूयसी तव यदायतायति ।
एतदूढगुरुभार भारतं वर्षमद्य मम वर्तते वशे ॥ ५ ॥

सप्ततन्तुमधिगन्तुमिच्छतः कुर्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते प्रभो त्वयि प्रापि धर्ममयवृक्षता मया ॥६॥

सम्भृतोपकरणेन निर्मलां कर्तुमिष्टिमभिवाञ्छता मया ।
त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजान्पुपूषता ॥७॥

वीतविघ्नमनघेन भाविता सन्निधेस्तव मखेन मेऽधुना ।
को विहन्तुमलमास्थितोदये वासरश्रियमशीतदीधितौ ॥८॥

स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधं च यत् ।
तीर्थगामि करवै विधानतस्तज्जुषस्व जुहवानि चानले ॥९॥

पूर्वमङ्ग जुहुधि त्वमेव वा स्नातवत्यवभृथे ततस्त्वयि ।
सोमपायिनि भविष्यते मया वांछितोत्तमवितानयाजिना ॥१०॥

किं विधेयमनसा विधीयतां
त्वत्प्रसादजितयार्थसम्पदा ।

शाधि शासक जगत्त्रयस्य
मामाश्रवोऽस्मि भवतः सहानुजः ॥११॥
तं वदन्तमिति विष्टरश्रवाः श्रावयन्नथ समस्तभूभृतः ।
व्याजहार दशनांशुमण्डलव्याजहारशबलं दधद्वपुः ॥१२॥
सादिताखिलनृपं महन्महः
सम्प्रति स्वनयसम्पदेव ते ।
किं परस्य स गुणः समश्नुते
पथ्यवृत्तिरपि यद्यरोगिताम् ॥१३॥
तत्सुराज्ञि भवति स्थिते पुनः
कः क्रतुं यजतु राजलक्षणम् ।
उद्धृतौ भवति कस्य वा भुवः
श्रीवराहमपहाय योग्यता ॥१४॥
शासनेऽपि गुरुणि व्यवस्थितं कृत्यवस्तुषु नियुङ्क्ष्व कामतः ।
त्वत्प्रयोजनधनं धनञ्जयादन्य एष इति मां च मावगाः ॥१५॥
यस्तवेह सवने न भूपतिः कर्म कर्मकरवत्करिष्यति ।
तस्य नेष्यति वपुः कबन्धतां बन्धुरेव जगतां सुदर्शनः ॥१६॥
इत्युदीरितगिरं नृपस्त्वयि श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदिति शौरिमुक्तवानुद्वहन्मुदमुदस्थित क्रतौ ॥१७॥
आननेन शशिनः कलां दधद्दर्शनक्षयितकामविग्रहः ।
आप्लुतः स विमलैर्जलैरभूदष्टमूर्तिधरमूर्तिरष्टमी ॥१८॥
तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः ।
कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि ॥१९॥
शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया ।
याज्यया यजनकर्मिणोऽत्यजन्द्रव्यजातमपदिश्य देवताम् ।२०।
सप्तभेदकरकल्पितस्वरं साम सामविदसङ्गमुज्जगौ ।
तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत ॥२१॥

बद्धदर्भमयकाञ्चिदामया वीक्षितानि यजमानजायया ।
शुष्मणि प्रणयनादिसंस्कृते तैर्हवींषि जुहवाम्बभूविरे ॥२२॥

नाञ्जसा निगदितुं विभक्तिभिर्व्य-
क्तिभिश्च निखिलाभिरागमे ।
तत्र कर्मणि विपर्यणीनमन्
मन्त्रमूहकुशलाः प्रयोगिणः ॥ २३ ॥

संशयाय दधतोः सरूपतां दूरभिन्नफलयोः क्रियां प्रति ।
शब्दशासनविदः समासयोर्विग्रहं व्यवससुः स्वरेण ते ॥२४॥
लोलहेतिरसनाशतप्रभामण्डलेन लसता हसन्निव ।
प्राज्यमाज्यमसकृद्वषट्कृतं निर्मलीमसमलीढ पावकः ॥२५॥
तत्र मन्त्रपवितं हविः क्रतावश्नतो न वपुरेव केवलम् ।
वर्णसम्पदमतिस्फुटां दधन्नाम चोज्ज्वलमभूद्धविर्भुजः ॥२६॥
स्पर्शमुष्णमुचितं दधच्छिखी यद्ददाह हविरद्भुतं न तत् ।
गन्धतोऽपि हुतहव्यसम्भवाद् देहिनामदहदोघमंहसाम् ॥२७॥
उन्नमन्सपदि धूम्रयन्दिशः सान्द्रतां दधदधःकृताम्बुदः ।
द्यामियाय दहनस्य केतनः कीर्तयन्निव दिवौकसां प्रियम् ॥२८॥
निर्जिताखिलमहार्णवौषधिस्यन्दसारममृतं ववल्गिरे ।
नाकिनः कथमपि प्रतीक्षितुं हूयमानमनले विषेहिरे ॥२९॥
तत्र नित्यविहितोपहूतिषु प्रोषितेषु पतिषु द्युयोषिताम् ।
गुम्फिताः शिरसि वेणयोऽभवन्न प्रफुल्लसुरपादपस्रजः ॥३०॥
प्राशुराशु हवनीयमत्र यत्तेन दीर्घममरत्वमध्यगुः ।
उद्धतानधिकमेधितौजसो दानवांश्च विबुधा विजिग्यिरे ।३१।
नापचारमगमन्क्वचित्क्रियाः सर्वमत्र समपादि साधनम् ।
अत्यशेरत परस्परं धियः सत्रिणां नरपतेश्च सम्पदः ॥३२॥
दक्षिणीयमवगम्य पङ्क्तिशः पङ्क्तिपावनमथ द्विजव्रजम् ।
दक्षिणः क्षितिपतिर्व्यशिश्रणद्दक्षिणाः सदसि राजसूयकीः ।३३।

वारिपूर्वमखिलासु सत्क्रियालब्धशुद्धिषु धनानि बीजवत् ।
भावि बिभ्रति फलं महद्द्विजक्षेत्रभूमिषु नराधिपोऽवपत् ।३४।
किं नु चित्रमधिवेदि भूपतिर्दक्षयन्द्विजगणानपूयत ।
राजतः पुपुविरे निरेनसः प्राप्य तेऽपि विमलं प्रतिग्रहम् ।३५।
स स्वहस्तकृतचिह्नशासनः पाकशासनसमानशासनः ।
आ शशाङ्कतपनार्णवस्थितेर्विप्रसादकृत भूयसीर्भुवः ॥३६॥
शुद्धमश्रुतिविरोधि बिभ्रतं शास्त्रमुज्ज्वलमवर्णसङ्करैः ।
पुस्तकैः सममसौ गणं मुहुर्वाच्यमानमशृणोद्द्विजन्मनाम् ।३७।
तत्प्रतीतमनसामुपेयुषां द्रष्टुमाहवनमग्रजन्मनाम् ।
आतिथेयमनिवारितातिथिः कर्तुमाश्रमगुरुः स नाश्रमत् ॥३८॥
मृग्यमाणमपि यद् दुरासदं भूरिसारमुपनीय तत्स्वयम् ।
आसतावसरकाङ्क्षिणो बहिस्तस्य रत्नमुपदीकृतं नृपाः ॥३९॥
एक एव वसु यद्ददौ नृपस्तत्समापकमतर्क्यत क्रतोः ।
त्यागशालिनि तपःसुते ययुः सर्वपार्थिवधनान्यपि क्षयम् ।४०।
प्रीतिरस्य ददतोऽभवत्तथा येन तत्प्रियचिकीर्षवो नृपाः ।
स्पर्शितैरधिकमागमन्मुदं नाधिवेश्म निहितैरुपायनैः ॥४१॥
यं लघून्यपि लघूकृताहितः शिष्यभूतमशिषत्स कर्मणि ।
सस्पृहं नृपतिभिर्नृपोऽपरैर्गौरवेण ददृशेतरामसौ ॥४२॥
आद्यकोलतुलितां प्रकम्पनैः कम्पितां मुहुरनोदगात्मनि ।
वाचि रोपितवताऽमुना महीं राजकाय विषया विभेजिरे ।४३।
आगताद्व्यवसितेन चेतसा सत्त्वसम्पदविकारिमानसः ।
तत्र नाभवदसौ महाहवे शात्रवादिव पराङ्मुखोऽर्थिनः ॥४४॥
नैक्षतार्थिनमवज्ञया मुहुर्याचितस्तु न च कालमाक्षिपत् ।
नादितात्पमथ न व्यकत्थयद्दत्तमिष्टमपि नान्वशेत सः ॥४५॥
निर्गुणोऽपि विमुखो स भूपतेर्दानशौण्डमनसः पुरोऽभवत् ।
वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्यमूषरम् ॥४६॥

प्रेम तस्य न गुणेषु नाधिकं
न स्म वेद न गुणान्तरं च सः ।
दित्सया तदपि पार्थिवोऽर्थिनं
गुण्यगुण्य इति न व्यजीगणत् ॥ ४७ ॥

दर्शनानुपदमेव कामतः स्वं वनीयकजनेऽधिगच्छति ।
प्रार्थनार्थरहितं तदाऽभवद् दीयतामिति वचोऽतिसर्जने ॥४८॥
नानवाप्तवसुनाऽर्थकाम्यता नाचिकित्सितगदेन रोगिणा ।
इच्छताशितुमनाशुषा न च प्रत्यगामि तदुपेयुषा सदः ॥४९॥
स्वादयन् रसमनेकसंस्कृत-प्राकृतैरकृतपात्रसङ्करैः ।
भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैः ॥५०॥
रक्षितारमिति तत्र कर्मणि न्यस्य दुष्टदमनक्षमं हरिम् ।
अक्षतानि निरवर्तयत्तदा दानहोमयजनानि भूपतिः ॥५१॥
एक एव सुसखैष सुन्वतां शौरिरित्यभिनयादिवोच्चकैः ।
यूपरूपकमनीनमद् भुजं भूश्चषालतुलिताङ्गुलीयकम् ॥५२॥
इत्थमत्र विततक्रमे क्रतौ वीक्ष्य धर्ममथ धर्मजन्मना ।
अर्घदानमनु नोदितो वचः सभ्यमभ्यधित शन्तनोः सुतः ।५३।
आत्मनैव गुणदोषकोविदः किं न वेत्सि करणीयवस्तुषु ।
यत्तथापि न गुरून्न पृच्छसि त्वं क्रमोऽयमिति तत्र कारणम् ।५४।
स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिम् ।
अर्घभाज इति कीर्तयन्ति षट् ते च ते युगपदागता सदः ।५५।
शोभयन्ति परितः प्रतापिनो मन्त्रशक्तिविनिवारितापदः ।
त्वन्मखं मुखभुवः स्वयम्भुवो भूभुजश्च परलोकजिष्णवः ।५६।
आभजन्ति गुणिनः पृथक्पृथक्पार्थ सत्कृतिमकृत्रिमाममी ।
एक एव गुणवत्तमोऽथवा पूज्य इत्ययमपीष्यते विधिः ॥५७॥
अत्र चैष सकलेऽपि भाति मां प्रत्यशेषगुणबन्धुरर्हति ।
भूमिदेवनरदेवसङ्गमे पूर्व देवरिपुरर्हणां हरिः ॥५८॥

मर्त्यमात्रमवदीधरद्भवान् मैनमानमितदैत्यदानवम् ।
अंश एष जनतातिवर्तिनो वेधसः प्रतिजनं कृतस्थितेः ॥५९॥
ध्येयमेकमपथे स्थितं धियः स्तुत्यनुत्तममतीतवाक्पथम् ।
आमनन्ति यमुपास्यमादराद् दूरवर्तिनमतीव योगिनः ॥६०॥
पद्मभूरिति सृजञ्जगद्रजः सत्त्वमच्युत इति स्थितिं नयन् ।
संहरन्हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः ॥६१॥
सर्ववेदिनमनादिमास्थित देहिनामनुजिघृक्षया वपुः ।
क्लेशकर्मफलभोगवर्जितं पुंविशेषममुमीश्वरं विदुः ॥ ६२ ॥
भक्तिमन्त इह भक्तवत्सले सन्ततस्मरणरीणकल्मषाः ।
यान्ति निर्वहणमस्य संसृति-क्लेशनाटकविडम्बनाविधेः ॥६३॥
ग्राम्यभावमपहातुमिच्छवो योगमार्गपतितेन चेतसा ।
दुर्गमेकमपुनर्निवृत्तये यं विशन्ति वशिनं मुमुक्षवः ॥६४॥
आदितामजननाय देहिनामन्ततां च दधतेऽनपायिने ।
बिभ्रते भुवमधः सदाथ च ब्रह्मणोऽप्युपरि तिष्ठते नमः ॥६५॥
केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि ।
धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः ॥६६॥
पूर्वमेष किल सृष्टवानपस्तासु वीर्यमनिवार्यमादधौ ।
तच्च कारणमभूद्धिरण्मयं ब्रह्मणोऽसृजदसाविदं जगत् ॥६७॥
मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥६८॥
श्रौतमार्गसुखगानकोविदब्रह्मषट्चरणगर्भमुज्ज्वलम् ।
श्रीमुखे दुसविधेऽपि शोभते यस्य नाभिसरसीसरोरुहम् ॥६९॥
सत्यवृत्तमपि मायिनं जगद्वृद्धमप्युचितनिद्रमर्भकम् ।
जन्म बिभ्रतमजं नवं बुधा यं पुराणपुरुषं प्रचक्षते ॥७०॥

स्कन्धधूननविसारिकेसरक्षिप्तसागरमहाप्लवामयम् ।
उद्धृतामिव मुहूर्तमैक्षत स्थूलनासिकवपुर्वसुन्धराम् ।।७१।।
दिव्यकेसरिवपुः सुरद्विषो नैव लब्धशममायुधैरपि ।
दुर्निवाररणकण्डु कोमलैर्वक्ष एष निरदारयन्नखैः ।।७२।।
वारिधेरिव कराग्रवीचिभिर्दिङ्मतङ्गजमुखान्यभिघ्नतः ।
यस्य चारुनखशुक्तयः स्फुरन्मौक्तिकप्रकरगर्भतां दधुः ।।७३।।
दीप्तिनिर्जितविरोचनादयं गां विरोचनसुतादभीप्सतः ।
आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ ।।७४।।
किं क्रमिष्यति किलैष वामनो यावदित्थमहसन्न दानवाः ।
तावदस्य न ममौ नभस्तले लङ्घितार्कशशिमण्डलः क्रमः ।।७५।।
गच्छतापि गगनाग्रमुच्चकैर्यस्य भूधरगरीयसाङ्घ्रिणा ।
क्रान्तकन्धर इवाबलो बलिः स्वर्गभर्तुरगमत्सुबन्धताम् ।।७६।।
क्रामतोऽस्य ददृशुर्दिवौकसो दूरमूरुमलिनीलमायतम् ।
व्योम्नि दिव्यसरिदम्बुपद्धतिस्पर्धयेव यमुनौघमुत्थितम् ।।७७।।
यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते ।।७८।।
सम्प्रदायविगमादुपेयुषीरेष नाशमविनाशिविग्रहः ।
स्मर्तुमप्रतिहतस्मृतिः श्रुतीर्दत्त इत्यभवदत्रिगोत्रजः ।।७९।।
रेणुकातनयतामुपागतः शातितप्रचुरपत्रसंहति ।
लूनभूरिभुजशाखमुज्झितच्छायमर्जुनवनं व्यधादयम् ।।८०।।
एष दाशरथिभूयमेत्य च ध्वंसितोद्धतदशाननामपि ।
राक्षसीमकृत रक्षितप्रजस्तेजसाधिकविभीषणां पुरीम् ।।८१।।
निष्प्रहन्तुममरेशविद्विषामर्थितः स्वयमथ स्वयंभुवा ।
सम्प्रति श्रयति सूनुतामयं कश्यपस्य वसुदेवरूपिणः ।।८२।।
तात नोदधिविलोडनं प्रति त्वद्विनाथ वयमुत्सहामहे ।
यः सुरैरिति सुरौघवल्लभो बल्लवैश्च जगदे जगत्पतिः ।।८३।।

नात्तगन्धमवधूय शत्रुभिश्छाययया च शमितामरश्रमम् ।
योऽभिमानमिव वृत्रविद्विषः पारिजातमुदमूलयद्दिवः ॥८४॥

यं समेत्य च ललाटलेखया बिभ्रतः सपदि शंभुविभ्रमम् ।
चण्डमारुतमिव प्रदीपवच्चेदिपस्य निरवाद्विलोचनम् ॥८५॥

यः कोलतां बल्लवतां च बिभ्रद्
दंष्ट्रामुदस्याशु भुजां च गुर्वीम् ।
मग्नस्य तोयापदि 'दुस्तरायां
गोमण्डलस्योद्धरणं चकार ॥८६॥

धन्योऽसि यस्य हरिरेष समक्ष एव
दूरादपि क्रतुषु यज्वभिरिज्यते यः ।
दत्त्वार्घमत्रभवते भुवनेषु यावत्-
संसारमण्डलमवाप्नुहि साधुवादम् ॥८७॥

भीष्मोक्तं तदिति वचो निशम्य सम्यक्
साम्राज्यश्रियमधिगच्छता नृपेण ।
दत्तेऽर्घे महति महीभृतां पुरोऽपि
त्रैलोक्ये मधुभिदभूदनर्घ एव ॥८८॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
श्रीकृष्णार्घदानो नाम चतुर्दशः सर्गः ॥ १४ ॥

卐

## ॥ १५ ॥ पञ्चदशः सर्गः ॥

अथ तत्र पाण्डुतनयेन
सदसि विहितं मुरद्विषः ।
मानमसहत न चेदिपतिः परि-
वृद्धिमत्सरि मनो हि मानिनाम् ॥१॥

पुर एव शार्ङ्गिण सवैरमथ पुनरमुं तदर्चया ।
मन्युरभजदवगाढतरः समदोषकाल इव देहिनं ज्वरः ॥२॥
अभितर्जयन्निव समस्तनृपगणमसावकम्पयत् ।
लोलमुकुटमणिरश्मि शनैरशनैः प्रकम्पितजगत्त्रयं शिरः ॥३॥
स वमन्रुषाश्रु घनघर्मविगलदुरुगण्डमण्डलः ।
स्वेदजलकणकरालकरो व्यरुचत्प्रभिन्न इव कुञ्जरस्त्रिधा ॥४॥
स निकामघर्मितमभीक्ष्णमधुवदवधूतराजकः ।
क्षिप्तबहुलजलबिन्दु वपुः प्रलयार्णवोत्थित इवादिशूकरः ॥५॥
क्षणमाश्लिषद् घटितशैलशिखरकठिनांसमण्डलः ।
स्तम्भमुपहितविधूतिमसावधिकावधूनितसमस्तसंसदम् ॥६॥
कनकाङ्गदद्युतिभिरस्य गमितमरुचत् पिशङ्गताम् ।
क्रोधमयशिखिशिखापटलैः परितः परीतमिव बाहुमण्डलम् ॥७॥
कृतसन्निधामिव तस्य पुनरपि तृतीयचक्षुषा ।
क्रूरमजनि कुटिलभ्रुगुरुभ्रुकुटीकठोरितललाटमाननम् ॥८॥
अतिरक्तभावमुपगम्य कृतमतिरमुष्य साहसे ।
दृष्टिरगणितभयासिलतामवलम्बते स्म समया सखीमिव ॥९॥
करकुड्मलेन निजमूरुमुरुतरनगाश्मकर्कशम् ।
त्रस्तचपलचलमानजनश्रुतभीमनादमयमाहतोच्चकैः ॥१०॥
इति चुक्रुधे भृशमनेन ननु महदवाप्य विप्रियम् ।
याति विकृतिमपि संवृतिमत् किमु यन्निसर्गनिरवग्रहं मनः ॥११॥

प्रथमं शरीरजविकारकृतमुकुलबन्धमव्यथी ।
भाविकलहफलयोगमसौ वचनेन कोपकुसुमं व्यचीकसत् ॥१२॥
ध्वनयन् सभामथ सनीरघनरवगभीरवागभीः ।
वाचमवददतिरोषवशादतिनिष्ठुरस्फुटतराक्षरामसौ ॥१३॥
यदपूपुजस्त्वमिह पार्थ मुरजितमपूजितं सताम् ।
प्रेम विलसति महत्तदहो दयितं जनः खलु गुणीति मन्यते ॥१४॥
यदराज्ञि राजवदिहार्घ्य-
मुपहितमिदं मुरद्विषि ।
ग्राम्यमृग इव हविस्तदयं
भजते ज्वलत्सु न महीशवह्निषु ॥१५॥
अनृतां गिरं न गदसीति
जगति पटहैर्विघुष्यसे ।
निन्द्यमथ च हरिमर्चयतस्तव
कर्मणैव विकसत्यसत्यता ॥१६॥
तव धर्मराज इति नाम कथमिदमपष्ठु पठ्यते ।
भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ॥१७॥
यदि वार्चनीयतम एव किमपि भवतां पृथासुताः ।
शौरिरवनिपतिभिर्निखिलैरवमाननार्थमिह निमन्त्रितैः ॥१८॥
अथवा न धर्ममसुबोध-
समयमवयात बालिशाः ।
काममयमिह वृथापलितो
हतबुद्धिरप्रणिहितः सरित्सुतः ॥१९॥
स्वयमेव शन्तनुतनूज यमपि गणमर्घ्यमभ्यधाः ।
तत्र मुररिपुरयं कतमो यमनिन्द्यबन्दिवदभिष्टुषे वृथा ॥२०॥
अवनीभृतां त्वमपहाय
गणमतिजडः समुन्नतम् ।

नीचि नियतमिव यच्चपलो निरतः
स्फुटं स्वसि निम्नगासुतः ॥ २१ ॥
प्रतिपत्तुमङ्ग घटते च
न तव नृपयोग्यमर्हणम् ।
कृष्ण कलय ननु कोऽहमिति
स्फुटमापदां पदमनात्मवेदिता ॥ २२ ॥
असुरस्त्वया न्यवधि कोऽपि
मधुरिति कथं प्रतीयते ।
दण्डदलितसरघः प्रथसे मधु-
सूदनस्त्वमिति सूदयन्मधु ॥ २३ ॥
मुचुकुन्दतल्पशरणस्य
मगधपतिशातितौजसः ।
सिद्धमबल सबलत्वमहो
तव रोहिणीतनयसाहचर्यतः ॥ २४ ॥
छलयन्प्रजास्त्वमनृतेन
कपटपटुरैन्द्रजालिकः ।
प्रीतिमनुभवसि नग्नजितः
सुतयेष्टसत्य इति सम्प्रतीयसे ॥ २५ ॥
धृतवाञ्च चक्रमरिचक्र-
भयचकितमाहवे निजम् ।
चक्रधर इति रथाङ्गमदः
सततं बिभर्षि भुवनेषु रूढये ॥ २६ ॥
जगति श्रिया विरहितोऽपि
यदुदधिसुतामुपायथाः ।
ज्ञातिजनजनितनामपदां
त्वमतः श्रियः पतिरिति प्रथामगाः ॥ २७ ॥

अभिशत्रु संयति कदा-
चिदविहितपराक्रमोऽपि यत् ।
व्योम्नि कथमपि चकर्थ पदं
व्यपदिश्यसे जगति विक्रमीत्यतः ॥ २८ ॥
पृथिवीं बिभर्थ यदि पूर्व-
मिदमपि गुणाय वर्तते ।
भूमिभृदिति परहारितभूस्त्व-
मुदाह्रियस्व कथमन्यथा जनैः ॥ २९ ॥
तव धन्यतेयमपि सर्वनृपति-
तुलितोऽपि यत्क्षणम् ।
क्लान्तकरतलधृताचलकः
पृथिवीतले तुलितभूभृदुच्यसे ॥ ३० ॥
त्वमशक्नुवन्न शुभकर्मनिरत !
परिपाकदारुणाम् ।
जेतुमकुशलमतिर्नरकं यशसे-
ऽधिलोकमजयः सुतं भुवः ॥ ३१ ॥
सकलैर्वपुः सकलदोषसमुदितमिदं गुणैस्तव ।
त्यक्तमपगुण गुणत्रितयत्यजनप्रयासमुपयासि किं मुधा ॥३२॥
त्वयि पूजनं जगति जाल्म कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरां शिरसीव कङ्कतमपेतमूर्धजे ॥ ३३ ॥
मृगविद्विषामिव यदित्थ-
मजनि मिषतां पृथासुतैः ।
अस्य वनशुन इवापचितिः
परिभाव एष भवतां भुवोऽधिपाः ॥ ३४ ॥
अवधीज्जनंगम इवैष यदि
हतवृषो वृषं ननु ।

स्पर्शमशुचिवपुरर्हति न प्रति-
मानना तु नितरां नृपोचिताम् ॥ ३५ ॥
यदि नाङ्गनेति मतिरस्य
मृदुरजनि पूतनां प्रति ।
स्तन्यमघृणमनसः पिबतः
किल धर्मतो भवति सा जनन्यपि ॥ ३६ ॥
शकटव्युदासतरुभङ्ग-
धरणिधरधारणादिकम् ।
कर्म यदयमकरोत्तरलः स्थिर-
चेतसां क इव तेन विस्मयः ॥ ३७ ॥
अयमुग्रसेनतनयस्य नृपशुरपरः पशूनवन् ।
स्वामिवधमसुकरं पुरुषैः कुरुते स्म यत्परममेतदद्भुतम् ॥३८॥

## ॥ प्रक्षिप्तश्लोकाः ॥

ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम् ।
सर्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्र को गुणः ॥१॥
न महाम्नयं न च बिभर्ति
गुणसमतया प्रधानताम् ।
स्वस्य कथयति चिराय पृथ-
ग्जनतां जगत्यनभिमानतां दधत् ॥ २ ॥
रहितं कलाभिरखिला-
भिरकृतरसभावसंविदम् ।
क्षेत्रविदमपदिशन्ति जनाः
पुरबाह्यमेनमगतं विदग्धताम् ॥ ३ ॥
अतिभूयसापि सुकृतेन
दुरुपचर एष शक्यते ।

भक्तिशुचिभिरुपचारपरै-
रपि न ग्रहीतुमभियोगिभिर्नृभिः ।। ४ ।।
व्रजति स्वतामनुचितोऽपि
सविनयमुपासितो जनैः ।
नित्यमपरिचितचित्ततया पर
एव सर्वजगतस्तथाप्ययम् ।। ५ ।।
उपकारिणं निरुपकारमन-
रिमरिमप्रियं प्रियम् ।
साधुमितरमबुधं बुधमित्य-
विशेषतः सततमेष पश्यति ।। ६ ।।
उपकारकस्य दधतोऽपि
बहुगुणतया प्रधानताम् ।
दुःखमयमनिशमाप्तवतो
न परस्य किंचिदुपकर्तुमिच्छति ।। ७ ।।
स्वयमक्रियः कुटिलमेष तृणमपि विधातुमक्षमः ।
भोक्तुमविरतमलज्जतया फलमीहते परकृतस्य कर्मणः ।।८।।
य इम समाश्रयति कश्चिदुदयविपदोर्निराकुलम् ।
तस्य भवति जगतीह कुतः पुनरुद्भवो विकरणत्वमेयुषः ।।९।।
गुणवन्तमप्ययमपास्य जनमखिलमव्यवस्थितैः ।
याति सुचिरमतिबालतया धृतिमेक एव परिवारितो जडैः ।१०।
सुकृतोऽपि सेवकजनस्य बहुदिवसखिन्नचेतसः ।
सर्वजनविहितनिर्विदयं सकृदेव दर्शनमुपैति कस्यचित् ।।११।।
स्वजने सखिष्वनुगतेषु नियतमनुरागवत्स्वपि ।
स्नेहममृदुहृदयः क्षपयन्निरपेक्ष एष समुपैति निर्वृतिम् ।।१२।।
क्षणमेष राजसतयैव जगदुदयदर्शितोद्यतिः ।
सत्वहितकृतमतिः सहसा तमसा विनाशयति सर्वमावृतः ।१३।

अभिहन्यते यदभिहन्ति
परितपति यच्च तप्यते ।
नास्य भवति वचनीयमिदं
चपलात्मिका प्रकृतिरेव हीदृशी ॥१४॥
अतिसत्वयुक्त इति पुंभिरयमतिशयेन वर्ण्यते ।
सूक्ष्ममतिभिरथ चापगते समुपैति नाल्पमपि सत्वसंकरम् ॥१५॥
प्रलयं परस्य महतोऽपि नियतमिह निःसुखे गुणाः ।
यान्ति जगदपि सदोषमदःस्वरुचैव पश्यति गुणान्द्विषन्नयम् १६
क्षितिपीठमम्भसि निमग्नमुदहरत यः परः पुमान् ।
एष किल-स इति कैरबुधैरभिधीयमानमपि तत्प्रतीयते ॥१७॥
नरसिंहमूर्तिरयमेव दितिसुतमदारयन्नखैः ।
आप्तजनवचनमेतदपि प्रतिपत्तुमोमिति जनोऽयमर्हति ॥१८॥
अपहाय तुङ्गमपि मानमुचितमवलम्ब्य नीचताम् ।
स्वार्थकरणपटुरेष पुरा बलिना परेण सह संप्रयुज्यते ॥१६॥
क्रमते नभो रभसयैव विरचयति विश्वरूपताम् ।
सर्वमतिशयगतं कुरुते स्फुटमिन्द्रजालमिदमेष मायया ॥२०॥
किल रावणारिरयमेव किमिदमियदेव कथ्यते ।
सत्वमतिबलमधिद्युति यत्तदशेषमेष इति धृष्टमुच्यताम् ॥२१॥
चलतैष पादयुगलेन गुरु शकटमीषदस्पृशत ।
दैवकलितमथ चोदलसद्दलितोरुभाण्डचयमात्मनैव तत् ॥२२॥
स्नुवतामुना स्तनयुगेन जनितजननीजनादरा ।
स्त्रीति सदयमविधाय मनस्तदकारि साधु यदघाति पूतना ।२३।
अभनक्तरू कथमिवैष कृतधरणिरिङ्गणः क्षणात् ।
बाढमिदमपि न बालकृतं ननु देवताविधिरियं विजृम्भते ।२४।
विहरन् वने विजन एव महति दधदेष गोपताम् ।
नाम जगति मधुसूदन इत्यगमद्धतेन मधुना महीयसा ॥२५॥

अविमृश्य गोवधसमुत्थमयमघममीरद्रुषा ।
रिष्टमुपगु समुपोढमदं यदसौ किलासुर इति प्रमार्ष्टि तत् ।२६।

मुखकन्दरान्तरगतोऽपि
विकटदशनेन केशिना ।
नास्य सपदि यदखादि भुजस्त-
दहो तिरश्चि सहजैव मूढता ॥२७॥

यदुदस्य बाहुमयमेकमधृत
गिरिमद्भुतं न तत् ।
भूरि सलिलमविषह्यमिय जलदे
विमुञ्चति गवां सभाग्यता ॥२८॥

किमिवात्र चित्रमयमन्नमचल-
महकल्पितं यदि ।
प्राश निखिलमखिलेऽपि जगत्युदरं
गते बहुभुजोऽस्य न व्यथा ॥२९॥

अमुना करेण पृथुदन्तमुसलमुदखानि दन्तिनः ।
तेन यदवधि स एव पुनर्बलशालिनां क इव तत्र विस्मयः ॥३०॥

शिशुरेव शिक्षितनियुद्धकरणमकृतक्रियः स्वयम् ।
मल्लमलघुकठिनांसतटं न्यवधीदेव तदहष्टकारितम् ॥३१॥

यदयुध्यमानमपि सन्तमुपहित सुरौघसाध्वसम् ।
कंसमभियमयमभ्यभवत्समुदा जनेन तदपि प्रशंस्यते ॥३२॥

इति निन्दितुं कृतधियापि वचनममुना यदाददे ।
स्तोतुमनिशमुचितस्य परैःस्तुतिरेव सा मधुनिघातिनोऽभवत् ॥

यदुवाच दुष्टमतिरेष परिविवदिषुर्मुरद्विषम् ।
द्व्यर्थमपि सदसि चेदिपतेस्तदतोऽपराधगणनामपाद्वचः ॥३४॥

॥ इति प्रक्षिप्तश्लोकाः ॥

इति वाचमुद्धतमुदीर्य सपदि सह वेणुदारिणा ।
सोढरिपुबलभरोऽसहनः स जहास दत्तकरतालमुच्चकैः ।।३९।।
कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः ।
सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते ।।४०।।
न च तं तदेति शपमानमपि यदुनृपाः प्रचुक्रुधुः ।
शौरिसमयनिगृहीतधियः प्रभुचित्तमेव हि जनोऽनुवर्तते ।।४१।।
विहितागसो मुहुरलङ्घ्यनिजवचनदामसंयतः ।
तस्य कतिथ इति तत्प्रथमं मनसा समाख्यदपराधमच्युतः ।४२।
स्मृतिवर्त्म तस्य न समस्तमपकृतमियाय विद्विषः ।
स्मर्तुमधिगतगुणस्मरणाः पटवो न दोषमखिलं खलूत्तमाः ।४३।
नृपतावधिक्षिपति शौरिमथ सुरसरित्सुतो वचः ।
स्माह चलयति भुवं मरुति क्षुभितस्य नादमनुकुर्वदम्बुधेः ।४४।
अथ गौरवेण परिवादमपरिगणयंस्तमात्मनः ।
प्राह मुररिपुतिरस्करणक्षुभितः स्म वाचमिति जाह्नवीसुतः ।।
विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनम् ।
यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृताम् ।४६।
इति भीष्मभाषितवचोऽर्थमधिगतवतामिव क्षणात् ।
क्षोभमगमदतिमात्रमथो शिशुपालपक्षपृथिवीभृतां गणः ।।४७।।
शितितारकानुमितताम्रनयनमरुणीकृतं क्रुधा ।
बाणवदनमुददीपि भिये जगतः सकीलमिव सूर्यमण्डलम् ।।४८।।
प्रविदारितारुणतरोग्रनयनकुसुमोज्ज्वलः स्फुरन् ।
प्रातरहिमकरताम्रतनुविषजद्रुमोऽपर इवाभवद्द्रुमः ।।४९।।
अनिशान्तवैरदहनेन विरहितवतान्तरार्द्रताम् ।
कोपमरुदभिहतेन भृशं नरकात्मजेन तरुणेव जज्वले ।।५०।।
अभिधित्सतः किमपि राहुवदनविकृतं व्यभाव्यत ।
ग्रस्तशशधरमिवोपलसत्सितदन्तपङ्क्ति मुखमुत्तमौजसः ।५१।

कुपिताकृतिं प्रथममेव हसितमशनैरसूचयत् ।
क्रुद्धमशनिदलिताद्रितटध्वनि दन्तवक्रमरिचक्रभीषणम् ॥५२॥
प्रतिघः कुतोऽपि समुपेत्य नरपतिगणं समाश्रयत् ।
जामिहरणजनितानुशयः समुदाचचार निज एव रुक्मिणः ।५३।
चरणेन हन्ति सुबलः स्म शिथिलितमहीध्रबन्धनाम् ।
तीरतरलजलराशिजलामवभुग्नभोगिफणमण्डलां भुवम् ।५४।
कुपितेषु राजसु तथापि रथचरणपाणिपूजया ।
चित्तकलितकलहागमनो मुदमाहुकिः सुहृदिवाधिकां दधौ ।५५।
गुरुकोपरुद्धपदमापदसितयवनस्य रौद्रताम् ।
व्यात्तमशितुमिव सर्वजगद्विकरालमास्यकुहरं विवक्षतः ॥५६॥
विवृतोरुबाहुपरिघेण सरभसपदं निधित्सता ।
हन्तुमखिलनृपतीन्वसुना वसने विलम्बिनि निजे विचस्खले ५७
इति तत्तदा विकृतरूपमभजत्तदविभिन्नचेतसम् ।
मारबलमिव भयंकरतां हरिबोधिसत्त्वमभिराजमण्डलम् ।५८।
रभसादुदस्थुरथ युद्धमनुचितभियोऽभिलाषुकाः ।
सान्द्रमुकुटकिरणोच्छलितस्फटिकांशवः सदसि मेदिनीभृतः ५९
स्फुरमाणनेत्रकुसुमोष्ठदलमभृत भूभृदङ्घ्रिपैः ।
धूतपृथुभुजलतं चलितैर्द्रुतयातपातवनविभ्रमं सदः ॥६०॥
हरिमप्यमंसत तृणाय कुरुपतिमजीगणन्न वा ।
मानतुलितभुवनत्रितयाः सरितः सुतादबिभयुर्न भूभृतः ॥६१॥
गुरु निःश्वसन्नथ विलोलसदवथुवपुर्वचोविषम् ।
कीर्णदशनकिरणाग्निकणः फणवानिवैष विससर्ज चेदिपः ।६२।
किमहपो नृपाः सममभीभिरुपपतिसुतैर्न पञ्चभिः ।
वध्यमभिहत भुजिष्यममुं सह चानया स्थविरराजकन्यया ।६३।
अथवाध्वमेव खलु यूयमगणितमरुद्गणौजसः ।
वस्तु कियदिदमयं न मृधे मम केवलस्य मुखमोक्षितुं क्षमः ।६४।

विदतुर्यमुत्तममशेषपरिषदि नदीजधर्मजौ ।
यातु निकषमधियुद्धमसौ वचनेन किं भवतु साध्वसाधु वा ।६५।
अचिरान्मया सह गतस्य समरमुरगारिलक्ष्मणः ।
तीक्ष्णविशिखमुखपीतमसृक्पततां गणैः पिबतु सार्धमुर्वरा ।६६।
अभिधाय रूक्षमिति मा स्म गम इति पृथासुतेरिताम् ।
वाचमनुनयपरां स ततः सहसावकर्ण्य निरियाय संसदः ।।६७।।
गृहमागताय कृपया च कथ-
मपि निसर्गदक्षिणाः ।
क्षान्तिमहितमनसो जननीस्व-
सुरात्मजाय चुकुपुर्न पाण्डवाः ।।६८।।
चलितं ततोऽनभिहतेच्छमवनिपतिं यज्ञभूमितः ।
तूर्णमथ ययुमिवानुययुर्दमघोषसुनुमवनीशसूनवः ।।६९।।
त्रिशिखान्तराण्यतिपपात सपदि जवनैः स वाजिभिः ।
द्रष्टुमलघुरभसापतिता वनिताश्चकार न सकामचेतसः ।।७०।।
क्षणमीक्षितः पथि जनेन किमि-
दमिति जल्पता मिथः ।
प्राप्य शिबिरमविशङ्कमनाः सम-
नीनहद्द्रुतमनीकिनीमसौ ।।७१।।
त्वरमाणशाङ्खिकसवेगवदनपवनाभिपूरितः ।
शैलकटकतटभिन्नरवः प्रणनाद सांनहनिकोऽस्य वारिजः ।७२।
जगदन्तकालसमवेतविषदविषमेरितारवम् ।
धीरनिजरवविलीनगुरुप्रतिशब्दमस्य रणतूर्यमावधि ।।७३।।
सहसा ससम्भ्रमविलोलसकलजनतासमाकुलम् ।
स्थानमगमदथ तत्परितश्चलितोडुमण्डलनभःस्थलोपमाम्।७४।
दधतो भयानकतरत्वमुपगतवतः समानताम् ।
धूमपटलपिहितस्य गिरेः समवर्मयन्सपदि मेदिनीभृतः ।।७५।।

परिमोहिणा परिजनेन कथमपि चिरादुपाहृतम् ।
वर्म करतलयुगेन महत्तनुचूर्णपेषमपिषद्द्विषा परः ॥७६॥
रणसम्मदोदयविकासिबलकलकलाकुलीकृते ।
शारिमशकदधिरोपयितुं द्विरदे मदच्युति जनः कथञ्चन ॥७७॥
परितश्च धौतमुखरुक्मविलसदहिमांशुमण्डलाः ।
तेनुरतनुवपुषः पृथिवीं स्फुटलक्ष्यतेजस इवात्मजाः श्रियः ॥७८॥
प्रधिमण्डलोद्धतपरागघनवलयमध्यवर्तिनः ।
पेतुरशनय इवाशनकैर्गुरुनिःस्वनव्यथितजन्तवो रथाः ॥७९॥
दधतः शशाङ्कितशशाङ्करुचि लसदुरश्छदं वपुः ।
चक्रुरथ सह पुरन्ध्रिजनैरयथार्थसिद्धि सरकं महीभृतः ॥८०॥
दयिताय सासवमुदस्तमपतदवसादिनः करात् ।
कांस्यमुपहितसरोजपतद्भ्रमरौघभारगुरु राजयोषितः ॥८१॥
भृशमङ्गसादमरुणत्वमविशददृशः कपोलयोः ।
वाक्यमसकलमपास्य मदं विदधुस्तदीयगुणमात्मना शुचः ॥८२॥
सुदृशः समीकगमनाय युवभिरथ संबभाषिरे ।
शोकपिहितगलरुद्धगिरस्तरसागताश्रुजलकेवलोत्तराः ॥८३॥
विपुलाचलस्थलघनेन जिगमिषुभिरङ्गनाः प्रियैः ।
पीनकुचतटनिपीडदलद्वरवारबाणमुरसाऽऽलिलिङ्गिरे ॥८४॥
न मुमोच लोचनजलानि दयितजयमङ्गलैषिणी ।
यातमवनिमवसन्नभुजान्न गलद्विवेद वलयं विलासिनी ॥८५॥
प्रविवत्सतः प्रियतमस्य निगडमिव चक्षुरक्षिपत् ।
नीलनलिनदलदामरुचि प्रतिपादयुग्ममचिरोढसुन्दरी ॥८६॥
व्रजतः क्व तात व्रजसीति परिचयगतार्थमस्फुटम् ।
धैर्यमभिनद्रुदितं शिशुना जननीनिर्भर्त्सनविवृद्धमन्युना ॥८७॥
शठ नाकलोकललनाभिरविरतरतं रिरंससे ।
तेन वहसि मुदमित्यवदद्रणरागिणं रमणमीर्ष्ययाऽपरा ॥८८॥

ध्रियमाणमप्यगलदश्रु चलति दयिते नतभ्रुवः ।
स्नेहमकृतकरसं दधतामिदमेव युक्तमतिमुग्धचेतसाम् ॥८९॥
सह कज्जलेन विरराज नयनकमलाम्बुसन्ततिः ।
गण्डफलकमभितः सुतनोः पदवीव शोकमयकृष्णवर्त्मनः ॥९०॥
क्षणमात्ररोधि चलितेन कतिपयपदं नतभ्रुवः ।
स्रस्तभुजयुगगलद्वलयस्वनितं प्रतिक्षुतमिवोपशुश्रुवे ॥९१॥
अभिवर्त्म वल्लभतमस्य विगलदमलायतांशुका ।
भूमिनभसि रभसेन यती विरराज काचन समं महोल्कया ।९२।
समरोन्मुखे नृपगणेऽपि तदनुमरणोद्यतैकधीः ।
दीनपरिजनकृताश्रुजलो न भटीजनः स्थिरमना विचक्लमे ।९३।
विदुषीव दर्शनममुष्य युवतिरतिदुर्लभं पुनः ।
यान्तमनिमिषमतृप्तमना: पतिमीक्षते स्म भृशमा दृशः पथः ९४
सम्प्रत्युपेयाः कुशली पुनर्युधः सस्नेहमाशीरिति भर्तुरीरिता ।
सद्यः प्रसह्य द्वितयेन नेत्रयोः प्रत्याचचक्षे गलता भटस्त्रियाः ९५
काचित्कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्त्रेन्दुलक्ष्मी-
रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमापुः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः ॥९६॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्रयङ्के
(अपशकुनाविर्भावो नाम) पञ्चदशः सर्गः ॥१५॥

卐

## ॥ १६ ॥ षोडशः सर्गः ॥

( वैतालयवृत्तम् )

दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ ।
उपगम्य हरिं सदस्यदः स्फुटभिन्नाथमुदाहरद्वचः ॥ १ ॥
अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः ।
भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननाम् ॥ २ ॥
विपुलेन निपीड्य निर्दयं मुदमायातु नितान्तमुन्मनाः ।
प्रचुराधिगताङ्गनिर्वृति परितस्त्वां खलु विग्रहेण सः ॥ ३ ॥
प्रणतः शिरसा करिष्यते सकलैरेत्य समं धराधिपैः ।
तव शासनमाशु भूपतिः परवानद्य यतस्त्वयैव सः ॥ ४ ॥
अधिवह्निपतङ्गतेजसो नियतस्वान्तसमर्थकर्मणः ।
तव सर्वविधेयवर्तिनः प्रणतिं बिभ्रति केन भूभृतः ॥ ५ ॥
जनतां भयशून्यधीः परैरभिभूतामवलम्बसे यतः ।
तव कृष्ण गुणास्ततो नरैरसमानस्य दधत्यगण्यताम् ॥ ६ ॥
अहितादनपत्रपस्त्रसन्नतिमात्रोज्झितभीरनास्तिकः ।
विनयोपहितस्त्वया कुतः सदृशोऽन्यो गुणवानविस्मयः ॥ ७ ॥

कृतगोपवधूरतेर्घ्नतो वृषमुग्रे नरकेऽपि संप्रति ।
प्रतिपत्तिरधःकृतैनसो जनताभिस्तव साधु वर्ण्यते ॥ ८ ॥

विहितापचितिर्महीभृता द्विषतामाहितसाध्वसो बलैः ।
भव सानुचरस्त्वमुच्चकैर्महतामप्युपरि क्षमाभृताम् ॥ ९ ॥

घनजालनिभैर्दुरासदाः परितो नागकदम्बकैस्तव ।
नगरेषु भवन्तु वीथयः परिकीर्णा वनजैर्मृगादिभिः ॥१०॥

सकलापिहितस्वपौरुषो नियतव्यापदवर्धितोदयः ।
रिपुरुन्नतधीरचेतसः सततव्याधिरनीतिरस्तु ते ॥११॥

विकचोत्पलचारुलोचनस्तव चैद्येन घटामुपेयुषः ।
यदुपुङ्गवबन्धुसौहृदात्त्वयिपाता ससुरो नवासवः ।।१२।।
चलितानकदुन्दुभिः पुरः सबलस्त्वं सह सारणेन तम् ।
समितौ रभसादुपागतं सगदः संप्रतिपत्तुमर्हसि ।।१३।।
समरेषु रिपून् विनिघ्नता शिशुपालेन समेत्य संप्रति ।
सुचिरं सह सर्वसात्वतैर्भव विश्वस्तविलासिनीजनः ।।१४।।
विजितक्रथमीक्षतामसौ महतां त्वामहितं महीभृताम् ।
असकृज्जितसंयतं पुरो मुदितः सप्रमदं महीपतिः ।।१५।।
इति जोषमवस्थितं द्विषः प्रणिधिं गामभिधाय सात्यकिः ।
वदति स्म वचोऽथ चोदितश्चलितैकभ्रुः रथाङ्गपाणिना ।।१६।।
मधुरं बहिरन्तरप्रियं कृतिनाऽवाचि वचस्तथा त्वया ।
सकलार्थतया विभाव्यते प्रियमन्तर्बहिरप्रियं यथा ।।१७।।
अतिकोमलमेकतोऽन्यतः सरसाम्भोरुहवृन्तकर्कशम् ।
वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम् ।।१८।।
प्रकटं मृदु नाम जल्पतः परुषं सूचयतोऽर्थमन्तरा ।
शकुनादिव मार्गवर्तिभिः पुरुषादुद्विजितव्यमीदृशः ।।१९।।
हरिरर्चितवान्महीपतिर्यदि राज्ञस्तव कोऽत्र मत्सरः ।
न्यसनाय ससौरभस्य कस्तरुसूनस्य शिरस्यसूयति ।।२०।।
सुकुमारमहो लघीयसां हृदयं तद्गतमप्रियं यतः ।
सरसेव समुद्गिरन्त्यमी जरयन्त्येव हि तन्मनीषिणः ।।२१।।
उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः ।
असतामनिशं तथाप्यहो गुरुहृद्रोगकरी तदुन्नतिः ।।२२।।
परितप्यत एव नोत्तमः परितप्तोऽप्यपरः सुसंवृतिः ।
परवृद्धिभिराहितव्यथः स्फुटनिर्भिन्नदुराशयोऽधमः ।।२३।।
अनिराकृततापसंपदं फलहीनां सुमनोभिरुज्झिताम् ।
खलतां खलतामिवासतीं प्रतिपद्येत कथं बुधो जनः ।।२४।।

प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे ।
अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥२५॥
जितरोषरया महाधियः सपदि क्रोधजितो लघुर्जनः ।
विजितेन जितस्य दुर्मतेर्मतिमद्भिः सह का विरोधिता ॥२६॥
वचनैरसतां महीयसो न खलु व्येति गुरुत्वमुद्धतैः ।
किमपैति रजोभिरौर्वरैरवकीर्णस्य मणेर्महार्घता ॥२७॥
परितोषयिता न कश्चन स्वगतो यस्य गुणोऽस्ति देहिनः ।
परदोषकथाभिरल्पकः स्वजनं तोषयितुं किलेच्छति ॥२८॥
सहजान्धदृशः स्वदुर्नये परदोषेक्षणदिव्यचक्षुषः ।
स्वगुणोच्चगिरो मुनिव्रताः परवर्णग्रहणेष्वसाधवः ॥२९॥
प्रकटान्यपि नैपुणं महत्परवाच्यानि चिराय गोपितुम् ।
विवरीतुमथात्मनो गुणान्भृशमाकौशलमार्यचेतसाम् ॥३०॥
किमिवाखिललोककीर्तितं कथयत्यात्मगुणं महामनाः ।
वदिता न लघीयसोऽपरः स्वगुणं तेन वदत्यसौ स्वयम् ॥३१॥
विसृजन्त्यविकत्थिनः परे विषमाशीविषवन्नराः क्रुधम् ।
दधतोऽन्तरसाररूपतां ध्वनिसाराः पटहा इवेतरे ॥३२॥
नरकच्छिदमिच्छतीक्षितुं विधिना येन स चेदिभूपतिः ।
द्रुतमेतु न हापयिष्यते सदृशं तस्य विधातुमुत्तरम् ॥३३॥
समनद्ध किमङ्ग भूपतिर्यदि संचित्सुरसौ सहामुना ।
हरिराक्रमणेन संनतिं किल बिभ्रीत भियेत्यसंभवः ॥३४॥
महतस्तरसा विलङ्घयन्निजदोषेण कुधीर्विनश्यति ।
कुरुते न खलु स्वयेच्छया शलभानिन्धनमिद्धदीधितिः ॥३५॥
यदपूरि पुरा महीपतिर्न मुखेन स्वयमागसां शतम् ।
अथ संप्रति पर्यपूपुरत्तदसौ दूतमुखेन शार्ङ्गिणः ॥३६॥
यदनर्गलगोपुराननस्त्वमितो वक्ष्यसि किंचिदप्रियम् ।
विवरिष्यति तच्चिरस्य नः समयोद्वीक्षणरक्षितां क्रुधम् ॥३७॥

निशमय्य तदूर्जितं शिनेर्वचनं नप्तुरनाप्तुरेनसाम् ।
पुनरुज्झितसाध्वसं द्विषामभिधत्ते स्म वचो वचोहरः ॥३८॥
विविनक्ति न बुद्धिदुर्विधः स्वयमेव स्वहितं पृथग्जनः ।
यदुदीरितमप्यदः परैर्न विजनाति तदद्भुतं महत् ॥३९॥
विदुरेष्यदपायमात्मना परतः श्रद्दधतेऽथवा बुधाः ।
न परोपहितं न च स्वतः प्रमिमीतेऽनुभवादृतेऽल्पधीः ॥४०॥
कुशलं खलु तुभ्यमेव तद्वचनं कृष्ण यदभ्यधामहम् ।
उपदेशपराः परेष्वपि स्वविनाशाभिमुखेषु साधवः ॥४१॥
उभयं युगपन्मयोदितं त्वरया सान्त्वमथेतरच्च ते ।
प्रविभज्य पृथङ्मनीषया स्वगुणं यत्किल तत्करिष्यसि ॥४२॥
अथवाभिनिविष्टबुद्धिषु व्रजति व्यर्थकतां सुभाषितम् ।
रविरागिषु शीतरोचिषः करजालं कमलाकरेष्विव ॥४३॥
अनपेक्ष्य गुणागुणौ जनः स्वरुचिं निश्चयतोऽनुधावति ।
अपहाय महीशमार्चिचत्सदसि त्वां ननु भीमपूर्वजः ॥४४॥
त्वयि भक्तिमतः न सत्कृतः कुरुराजा गुरुरेव चेदिपः ।
प्रियमांसमृगाधिपोज्झितः किमवद्यः करिकुम्भजो मणिः ॥४५॥
ध्रियते धवलः खलूच्चकैर्धवलैरेव सितेतरैरधः ।
शिरसौघमधत्त शङ्करः सुरसिन्धोर्मधुजित्तमङ्घ्रिणा ॥४६॥
अबुधैः कृतमानसंविदस्तव पार्थैः कुत एव योग्यता ।
सहसि प्लवगैरुपासितं न हि गुञ्जाफलमेति सोष्मताम् ॥४७॥
अपराधशतक्षमं नृपः क्षमयाऽत्येति भवन्तमेकया ।
हृतवत्यपि भीष्मकात्मजां त्वयि चक्षाम समर्थ एव यत् ॥४८॥
गुरुभिः प्रतिपादितां वधूमपहृत्य स्वजनस्य भूपतेः ।
जनकोऽसि जनार्दन स्फुटं हृतधर्मार्थतया मनोभुवः ॥४९॥
अनिरूपितरूपसंपदस्तमसो वान्यभृतच्छदच्छवेः ।
तव सर्वगतस्य संप्रति क्षितिपः क्षिप्नुरभीशुमानिव ॥५०॥

क्षुभितस्य महीभृतस्त्वयि प्रशमोपन्यसनं वृथा मम ।
प्रलयोल्लसितस्य वारिधेः परिवाहो जगतः करोति किम् ।।५१।।
प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता ।
न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव ।।५२।।
तदयं समुपैति भूपतिः पयसां पूर इवानिवारितः ।
अविलम्बितमेधि वेतसस्तरुवन्माधव मा स्म भज्यथाः ।।५३।।
परिपाति स केवलं शिशूनिति तन्नामनि मा स्म विश्वसीः ।
तरुणानपि रक्षति क्षमी स शरण्यः शरणागतान् द्विषः ।।५४।।
न विदध्युरशङ्कमप्रियं महतः स्वार्थपराः परे कथम् ।
भजते कुपितोऽप्युदारधीरनुनीतिं नतिमात्रकेण सः ।।५५।।
हितमप्रियमिच्छसि श्रुतं यदि संधत्स्व पुरा न नश्यसि ।
अनृतैरथ तुष्यसि प्रियैर्जयताज्जीव भवाऽवनीश्वरः ।।५६।।
प्रतिपक्षजिदप्यसंशयं युधि चैद्येन विजेष्यते भवान् ।
ग्रसते हि तमोपहं मुहुर्ननु राह्वाह्वमहर्पति तमः ।।५७।।
अचिराज्जितमीनकेतनो विलसन् वृष्णिगणैर्नमस्कृतः ।
क्षितिपः क्षयितोद्धतान्धको हरलीलां स विडम्बयिष्यति ।।५८।।
निहतोन्मददुष्टकुञ्जराद्दधतो भूरिः यशः क्रमार्जितम् ।
न बिभेति रणे हरेरपि क्षितिपः का गणनाऽस्य वृष्णिषु ।।५९।।
न तदद्भुतमस्य यन्मुखं युधि पश्यन्ति भिया न शत्रवः ।
द्रवतां ननु पृष्ठमीक्षते वदनं सोऽपि न जातु विद्विषाम् ।।६०।।
प्रतनूल्लसिताचिरद्युतः शरदं प्राप्य विखण्डितायुधाः ।
दधतेऽरिभिरस्य तुल्यतां यदि नासारभृतः पयोभृतः ।।६१।।
मलिनं रणरेणुभिर्मुहुर्द्विषतां क्षालितमङ्गनाश्रुभिः ।
नृपमौलिमरीचिवर्णकैरथ यस्याङ्घ्रियुगं विलिप्यते ।।६२।।
समराय निकामकर्कशं क्षणमाकृष्टमुपैति यस्य च ।
धनुषा सममाशु विद्विषां कुलमाशङ्कितभङ्गमानतिम् ।।६३।।

तुहिनांशुममुं सुहृज्जनाः कलयन्त्युष्णकरं विरोधिनः ।
कृतिभिः कृतदृष्टिविभ्रमाः स्रजमेके भुजगं यथापरे ।।६४।।
दधतोऽसुलभक्षयागमास्तनुमेकान्तरताममानुषीम् ।
भुवि सम्प्रति न प्रतिष्ठिताः सदृशा यस्य सुरैररातयः ।।६५।।
अतिविस्मयनीयकर्मणो नृपतेर्यस्य विरोधि किंचन ।
यदमुक्तनयो नयत्यसावहितानां कलमक्षयं क्षयम् ।।६६।।
चलितोर्ध्वकबन्धसम्पदो मकरव्यूहनिरुद्धवर्त्मनः ।
अतरत् स्वभुजौजसा मुहुर्महतः सङ्गरसागरानसौ ।।६७।।
न चिकीर्षति यः स्मयोद्धतो नृपतिस्तच्चरणोपगं शिरः ।
चरणं कुरुते गतस्मयः स्वमसावेव तदीयमूर्धनि ।।६८।।
स्वभुजद्वयकेवलायुधश्चतुरङ्गामपहाय वाहिनीम् ।
बहुशः सह शक्रदन्तिना स चतुर्दन्तमगच्छदाहवम् ।।६९।।
अविचालितचारुचक्रयोरनुरागादुपगूढयोः श्रिया ।
युवयोरिदमेव भिद्यते यदुपेन्द्रस्त्वमतीन्द्र एव सः ।।७०।।
भृतभूतिरहीनभोगभाग्विजितानेकपुरोऽपि विद्विषाम् ।
रुचिमिन्दुदले करोत्यजः परिपूर्णेन्दुरुचिर्महीपतिः ।।७१।।
नयति द्रुतमुद्धतिश्रितः प्रसभं भङ्गमभङ्गुरोदयः ।
नमयत्यवनीतलस्फुरद्भुजशाखं भृशमन्यमुन्नतिम् ।।७२।।
अधिगम्य च रन्ध्रमन्तरा जनयन्मण्डलभेदमन्यतः ।
खनति क्षतसंहति क्षणादपि मूलानि महान्ति कस्यचित् ।।७३।।
घनपत्रभृतोऽनुगामिनस्तरसाकृष्य करोति कांश्चन ।
दृढमप्यपरं प्रतिष्ठितं प्रतिकूलं नितरां निरस्यति ।।७४।।
इति पूर इवोदकस्य यः सरितां प्रावृषिजस्तटद्रुमैः ।
क्वचनापि महानखण्डितप्रसरः क्रीडति भूभृतां गणैः ।।७५।।
अलघूपलपंक्तिशालिनीः परितो रुद्धनिरन्तराम्बराः ।
अधिरूढनितम्बभूमयो न विमुञ्चन्ति चिराय मेखलाः ।।७६।।

कटकानि भजन्ति चारुभिर्नवमुक्ताफलभूषणैर्भुजैः ।
नियतं दधते च चित्रकैरतियोगं पृथुगण्डशैलतः ॥७७॥
इति यस्य ससंपदः पुरा यदवापुर्भवनेष्वरिस्त्रियः ।
स्फुटमेव समस्तमापदा तदिदानीमवनीध्रमूर्धसु ॥७८॥
महतः कुकुरान्धकद्रुमानतिमात्रं दववद्दहन्नपि ।
अतिचित्रमिदं महीपतिर्यदकृष्णामवनीं करिष्यति ॥७९॥

परितः प्रमिताक्षरापि सर्वं विषयं
व्याप्तवती गता प्रतिष्ठाम् ।
न खलु प्रतिहन्यते कुतश्चित्परि-
भाषेव गरीयसी यदाज्ञा ॥८०॥

यामूढवानूढवराहमूर्तिर्मुहूर्तमादौ पुरुषः पुराणः ।
तेनोह्यते सांप्रतमक्षतैव क्षतारिणा सम्यगसौ पुनर्भूः ॥८१॥

भूयांसः क्वचिदपि काममस्खलन्त-
स्तुङ्गत्वं दधति च यद्यपि द्वयेऽपि ।
कल्लोलाः सलिलनिधेरवाप्य पारं
शीर्यन्ते न गुणमहोर्मयस्तदीयाः ॥८२॥

लोकालोकव्याहतं घर्मरश्मेः शालीनं वा धाम नालं प्रसर्तुम् ।
लोकस्याग्रे पश्यतो धृष्टमाशु क्रामत्युच्चैर्भूभृतो तेजः ॥८३॥

विच्छित्तिर्नवचन्दनेन वपुषो भिन्नोऽधरोऽलक्तकै-
रच्छाच्छे पतिताञ्जने च नयने श्रोण्योऽलसन्मेखलाः ।
प्राप्तो मौक्तिकहारमुन्नतकुचाभोगस्तदीयद्विषा-
मित्थं नित्यविभूषणा युवतयः संपत्सु चापत्स्वपि ॥८४॥

विनिहत्य भवन्तमूर्जितश्रीर्युधि सद्यः शिशुपालतां यथार्थाम् ।
रुदतां भवदङ्गनागणानां करुणान्तःकरणः करिष्यतेऽसौ ।८५।

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
दूतसंवादो नाम षोडशः सर्गः ॥ १६ ॥

## ॥ १७ ॥ सप्तदशः सर्गः ॥

( रुचिरावृत्तम् )

इतीरिते वचसि वचस्विनामुना
युगक्षयक्षुभितमरुद्गरीयसि ।
प्रचुक्षुभे सपदि तदम्बुराशिना
समं महाप्रलयसमुद्यतं सदः ॥१॥

सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविखण्डितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे ।२।

अलक्ष्यत क्षणदलिताङ्गदे गदे
करोदरप्रहितनिजांसधामनि ।
समुल्लसच्छकलितपाटलोपलैः
स्फुलिङ्गवान्स्फुटमिव कोपपावकः ॥ ३ ॥

अवज्ञया यदहसदुच्चकैर्बलः
समुल्लसद्दशनमयूखमण्डलः ।
रुषारुणीकृतमपि तेन तत्क्षणं
निजं वपुः पुनरनयन्निजां रुचिम् ॥ ४ ॥

यदुत्पतत्पृथुतरहारमण्डलं
व्यवर्तत द्रुतमभिद्रुतगुल्मकः ।
बृहच्छिलातलकठिनांसघट्टितं
ततोऽभवद्भ्रमितमिवाखिलं सदः ॥ ५ ॥

प्रकुप्यतः श्वसनसमीरणाहति-
स्फुटोष्मभिस्तनुवसनान्तमारुतैः ।
युधाजितः कृतपरितूर्णवीजनं
पुनस्तरां वदनसरोजमस्विदत् ॥ ६ ॥

प्रजापतिक्रतुनिधनार्थमुत्थितं
व्यतर्कयज्ज्वरमिवरौद्रमुद्धतम् ।
समुद्यतं सपदि वधाय विद्विषा-
मतिक्रुधं निषधमनौषधं जनः ॥ ७ ॥
परस्परं परिकुपितस्य पिंषतः
क्षतोर्मिकाकनकपरागपङ्किलम् ।
करद्वयं सपदि सुधन्वनो निजै-
रनारतस्रुतिभिरधाव्यताम्बुभिः ॥ ८ ॥
निरायतामनलशिखोज्ज्वलां
ज्वलन्नखप्रभाकृतपरिवेषसंपदम् ।
अविभ्रमद्भ्रमदनलोल्मुका-
कृतिं प्रदेशिनीं जगदिव दग्धुमाहुकिः ॥९॥
दुरीक्षतामभजत मन्मथस्तथा
यथा पुरा परिचितदाहधार्ष्ट्यया ।
ध्रुवं पुरः सशरममुं तृतीयया
हरोऽपि न व्यसहत वीक्षितुं दृशा ॥१०॥
विचिन्तयन्नुपनतमाहवं रसा-
दुरः स्फुरत्तनुरुहमग्रपाणिना ।
परामृशत्कठिनकठोरकामिनी-
कुचस्थलप्रमुषितचन्दनं पृथुः ॥ ११ ॥
विलङ्घितस्थितिमभिवीक्ष्य रूक्षया
रिपोर्गिरा गुरुमपि गान्दिनीसुतम् ।
जनैस्तदा युगपरिवर्तवायुभि-
र्विवर्तिता गिरिपतयः प्रतीयिरे ॥१२॥
विवर्तयन्मदकलुषीकृते दृशौ
कराहतक्षितिकृतभैरवारवः ।

क्रुधा दधत्तनुमति लोहिनीमगू-
त्प्रसेनजिद्गज इव गैरिकारुणः ॥१३॥
सकुङ्कुमैरविरलमम्बुबिन्दुभि-
र्गवेषणः परिणतदाडिमारुणैः ।
स मत्सरस्फुटितवपुर्विनिःसृतै-
र्बभौ चिरं निचित इवासृजां लवैः ॥१४॥
ससंभ्रमं चरणतलाभिताता-
डनस्फुटन्महीविवरवितीर्णवर्त्मभिः ।
रवेः करैरनुचिततापितोरगं
प्रकाशतां शिनिरनयद्रसातलम् ॥१५॥
प्रतिक्षणं विधुवति शारणे शिरः
शिखिद्युतः कनककिरीटरश्मयः ।
अशङ्कितं युधमधुना विशन्त्वमी
क्षमापतीनिति निरराजयन्निव ॥१६॥
दधौ चलत्पृथुरसनं विवक्षया
विदारितं विततबृहद्भुजालतः ।
विदूरथः प्रतिभयमास्यकन्दरं
चलत्फणाधरमिव कोटरं तरुः ॥१७॥
समाकुले सदसि तथापि विक्रियां
मनोऽगमन्न मुरभिदः परोदितैः ।
घनाम्बुभिर्बहुलितनिम्नगाजलैर्जलं
न हि व्रजति विकारमम्बुधेः ॥१८॥
परानमी यदपवदन्त आत्मनः
स्तुवन्ति च स्थितिरसतामसाविति ।
निनाय नो विकृतिमविस्मितः-
स्मितं मुखं शरच्छशधरमुग्धमुद्धवः ॥१९॥

निराकृते यदुभिरिति प्रकोपिभिः
स्पशे शनैर्गतवति तत्र विद्विषाम् ।
मुरद्विषः स्वनितभयानकानकं
बलं क्षणादथ समनह्यताजये ॥२०॥
मुहुः प्रतिस्खलितपरायुधा युधि
स्थवीयसीरचलनितम्बनिर्भराः ।
अदंशयन्नरहितशौर्यदंशनास्तनू-
रयं नय इति वृष्णिभूभृतः ॥२१॥
दुरुद्वहाः क्षणमपरैस्तदन्तरे
रणश्रवादुपचयमाशु बिभ्रति ।
महीभुजां महिमभृतां न संम-
मुमुदोऽन्तरा वपुषि बहिश्च कञ्चुकाः ॥२२॥
संकल्पनं द्विरदगणं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाजिनः ।
त्वरायुजः स्वयमपि कुर्वतो
नृपाः पुनः पुनस्तदधिकृतानतत्वरन् ॥२३॥
युधे परैः सह दृढबद्धकक्षया
कलक्वणन्मधुपकुलोपगीतया ।
अदीयत द्विपघटया सवारिभिः
करोदरैः स्वयमथ दानमक्षयम् ॥२४॥
सुमेखलाः सिततरदन्तचारवः
समुल्लसत्तनुपरिधानसंपदः ।
रणैषिणां पुलकभृतोऽधिकंधरं
ललम्बिरे सदसिलताः प्रिया इव ॥२५॥
मनोहरैः प्रकृतमनोरमाकृति-
भयप्रदैः समितिषु भीमदर्शनः ।

सदैवतः सततमथानपायिभि-
र्निजाङ्गवन्मुरजिदसेव्यतायुधैः ॥२६॥

अवारितं गतमुभयेषु भूरिशः
क्षमाभृतामथ कटकान्तरेष्वपि ।
मुहुर्युधि क्षतसुरशत्रुशोणित-
प्लुतप्रधिं रथमधिरोहति स्म सः ॥२७॥

उपेत्य च स्वनगुरुपक्षमारुतं
दिवस्त्विषा कपिशितदूरदिङ्मुखः ।
प्रकम्पितस्थिरतरयष्टि तत्क्षणं
पतत्पतिः पदमधिकेतनं दधौ ॥२८॥

गभीरताविजितमृदङ्गनादया
स्वनश्रिया हतरिपुहंसहर्षया ।
प्रमोदयन्नथ मुखरान्कलापिनः
प्रतिष्ठते नवघनवद्रथः स्म सः ॥२९॥

निरन्तरस्थगितदिगन्तरं ततः
समुच्चलद्बलमवलोकयञ्जनः ।
विकौतुकः प्रकृतमहाप्लवेऽभव-
द्विशृङ्खलं प्रचलितसिन्धुवारिणि ॥३०॥

बबृंहिरे गजपतयो महानकाः
प्रदध्वनुर्जयतुरगा जिहेषिरे ।
असम्भवद्गिरिवरगह्वरै-
रभूत्तदा रवैर्दलित इव स्व आश्रयः ॥३१॥

अनारतं रसति जयाय दुन्दुभौ
मधुद्विषः फलदलघुप्रतिस्वनैः ।
विनिष्पतन्मृगपतिभिर्गुहामुखै-
र्गताः परां मुदमहसन्निवाद्रयः ॥३२॥

जडीकृतश्रवणपथे दिवौकसां
चमूरवे विशति सुराद्रिकन्दराः ।
अनर्थकैरजनि विदग्धकामिनी-
रतान्तरक्वणितविलासकौशलैः ॥३३॥
अरातिभिर्युधि सहयुध्वनो
हताञ्जिघृक्षवः श्रुतरणतूर्यनिःस्वनाः ।
अकुर्वत प्रथमसमागमोचितं
चिरोज्झितं सुरगणिकाः प्रसाधनम् ॥३४॥
प्रणोदिताः परिचितयन्तृकर्मभि-
र्निषादिभिर्विदितयताङ्कुशक्रियैः ।
गजाः सकृत्करतललोलनालि-
काहता मुहुः प्रणदितघण्टमाययुः ॥३५॥
सविक्रमक्रमणचलैरितस्ततः
प्रकीर्णकैः क्षिपत इव क्षिते रजः ।
व्यरंसिषुर्न खलु जनस्य दृष्टय-
स्तुरंगमादभिनवभाण्डभारिणः ॥३६॥
चलाङ्गुलीकिसलयमुद्धतैः करै-
रनृत्यत स्फुटकृतकर्णतालया ।
मदोदकद्रवकटभित्तिसङ्गिभिः
कलस्वरं मधुपगणैरगीयत ॥३७॥
असिच्यत प्रशमितपांशुभिर्मही
मदाम्बुभिर्धृतनवपूर्णकुम्भया ।
अवाद्यत श्रवणसुखं समुन्न-
मत्पयोधरध्वनिगुरु तूर्यमाननैः ॥३८॥
उदासिरे पवनविधूतवाससस्त-
तस्ततो गगनलिहश्च केतवः ।

यतः पुरः प्रतिरिपु शार्ङ्गिणः स्वयं
व्यधीयत द्विपघटयेति मङ्गलम् ॥ ३९ ॥
न शून्यतामगमदसौ निवेशभूः
प्रभूततां दधति बले चलत्यपि ।
पयस्यभिद्रवति भुवं युगावधौ
सरित्पतिर्न समुपैति रिक्तताम् ॥ ४० ॥
यियासितामथ मधुभिद्विवस्वता
जनो जरन्महिषविषाणधूसराम् ।
पुरः पतत्परबलरेणुमालिनीमल-
क्षयद्दिशमभिधूमितामिव ॥ ४१ ॥
मनस्विनामुदितगुरुप्रतिश्रुतिः
श्रुतस्तथा न निजमृदङ्गनिःस्वनः ।
यथा पुरःसमरसमुद्यतद्विष-
द्बलानकध्वनिरुदकर्षयन्मनः ॥ ४२ ॥
यथा यथा पटहरवः समीपता-
मुपागमत् स हरिवराग्रतः सरः ।
तथा तथा हृषितवपुर्मदाकुला
द्विषां चमूरजनि जनीव चेतसा ॥ ४३ ॥
प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ।
व्यभाव्यत प्रलयजकालिकाकृति-
र्विदूरतः प्रतिबलकेतनावलिः ॥ ४४ ॥
क्षणेन च प्रतिमुखतिग्मदीधिति-
प्रतिप्रभास्फुरदसिदुःखदर्शना ।
भयङ्करा भृशमपि दर्शनीयतां
ययावसावसुरचमूश्च भूभृताम् ॥ ४५ ॥

पयोमुचामभिपततां दिवि द्रुतं
विपर्ययः परित इवातपस्य सः ।
समक्रमः समविषमेष्वथ क्षणात्
क्षमातलं बलजलराशिरानशे ॥ ४६ ॥
ममौ पुरः क्षणमिव पश्यतो
महत्तनूदरस्थितभुवनत्रयस्य तत् ।
विशालतां दधति नितान्तमायते
बलं द्विषां मधुमथनस्य चक्षुषि ॥ ४७ ॥
भृशस्विदः पुलकविकासिमूर्तयो
रसाधिके मनसि निविष्टसाहसाः ।
मुखे युधः सपदि रतेरिवाभवन्
ससम्भ्रमाः क्षितिपचमूवधूगणाः ॥ ४८ ॥
ध्वजांशुकैर्ध्रुवमनुकूलमारुतप्रसारितैः प्रसभकृतोपहूतयः ।
यदूनभि द्रुततरमुद्यतायुधाः क्रुधा परं रयमरयः प्रपेदिरे ॥४९॥
हरेरपि प्रति परकीयवाहिनी-
रभिस्यदं प्रववृतिरे चमूचराः ।
विलम्बितं न खलु सदा मनस्विनो
विधित्सतः कलहमवेक्ष्य विद्विषः ॥ ५० ॥
उपाहितैर्वपुषि निवातवर्मभिः
स्फुरन्मणिप्रसृतमरीचिसूचिभिः ।
निरन्तरं नरपतयो रणाजिरे
रराजिरे शरनिकराचिता इव ॥ ५१ ॥
अथोच्चकैर्जरठकपोतकन्धरा-
तनूरुहप्रकरविपाण्डुरद्युति ।
बलैश्चलच्चरणविधूतमुच्च-
रद्धनावलीरुदचरत क्षमारजः ॥ ५२ ॥

विषङ्गिभिर्भृशमितरेतरं क्वचित्तुरङ्गमैरुपरि निरुद्धनिर्गमाः ।
चलाचलैरनुपदमाहताः खुरैर्विबभ्रमुश्चिरमध एव धूलयः ॥५३॥

गरीयसः प्रचुरमुखस्य रागिणो
रजोऽभवद्व्यवहितसत्त्वमुत्कटम् ।
सिसृक्षतः सरसिजजन्मनो जगद्
बलस्य तु क्षयमपनेतुमिच्छतः ॥ ५४ ॥

पुरा शरक्षतिजनितानि संयुगे
नयन्ति नः प्रसभमसृञ्जि पङ्कताम् ।
इति ध्रुवं व्यलगिषुरात्तभीतयः
समुच्चकैरनलसखस्य केतवः ॥ ५५ ॥

क्वचिल्लसद्घननिकुरम्बकर्बुरः
क्वचिद्धिरण्मयकणपुञ्जपिञ्जरः ।
क्वचिच्छरच्छशधरखण्डपाण्डुरः
खुरक्षतक्षितितलरेणुरुद्ययौ ॥ ५६ ॥

महीयसां महति दिगन्तदन्तिना-
मनीकजे रजसि मुखानुषङ्गिणि ।
विसारितामजिहत कोकिलावली-
मलीमसा जलदमदाम्बुराजयः ॥ ५७ ॥

शिरोरुहैरलिकुलकोमलैरमी
मुधा मृधे मृषत युवान एव मा ।
बलोद्धतं धवलितमूर्धजानिति
ध्रुवं जनाञ्जरत इवाकरोद्रजः ॥ ५८ ॥

सुसंहतैर्दधदपि धाम नीयते
तिरस्कृतिं बहुभिरसंशयं परैः ।
यतः क्षितेरवयवसंपदोऽणव-
स्त्विषां निधेरपि वपुरावरीषत ॥ ५९ ॥

द्रुतद्रवद्रथचरणक्षतक्षमातलोल्लसद्बहुलरजोवगुण्ठितम् ।
युगक्षयक्षणनिरवग्रहे जगत्पयोनिधेर्जल इव मग्नमाबभौ ॥६०॥

समुल्लसद्दिनकरवक्त्रकान्तयो
रजस्वलाः परिमलिताम्बरश्रियः ।
दिगङ्गनाः क्षणमविलोकनक्षमाः
शरीरिणां परिहरणीयतां ययुः ॥ ६१ ॥

निरीक्षितुं वियति समेत्य कौतुकात्
पराक्रमं समरमुखे महीभृताम् ।
रजस्ततावनिमिषलोचनोत्पल-
व्यथाकृति त्रिदशगणैः पलाय्यत ॥ ६२ ॥

विषङ्गिणि प्रतिपदमापिबत्यपो
हताचिरद्युतिनि समीरलक्ष्मणि ।
शनैः शनैरुपचितपङ्कभारिकाः
पयोमुचः प्रययुरपेतवृष्टयः ॥ ६३ ॥

नभोनदीव्यतिकरधौतमूर्तिभि-
र्वियद्गतैरनधिगतानि लेभिरे ।
चलच्चमूतुरगखुराहतोत्पत-
न्महीरजःस्नपनसुखानि दिग्गजैः ॥ ६४ ॥

गजव्रजाक्रमणभरावनम्रया
रसातलं यदखिलमानशे भुवा ।
नभस्तलं बहुलतरेण रेणुना
ततोऽगमत् त्रिजगदिवैकतां स्फुटम् ॥ ६५ ॥

समस्थलीकृतविवरेण पूरिता
महीभृतां बलरजसा महागुहाः ।
रहस्त्रपाविधुरवधूरतार्थिनां
नभःसदामुपकरणीयतां ययुः ॥ ६६ ॥

गते मुखच्छदपटसादृशीं दृशः
पथिस्थिरो दधति घने रजस्यपि ।
मदानिलैरधिमधुचूतगन्धिभि-
र्द्विपा द्विपानभिययुरेव रंहसा ॥ ६७ ॥
मदाम्भसा परिगलितेन सप्तधा
गजाञ्जनः शमितरजश्चयानधः ।
उपर्यवस्थितधनपांशुमण्डलान-
लोकयत्ततपटमण्डपानिव ॥ ६८ ॥
अन्यूनोन्नतयोऽतिमात्रपृथवः पृथ्वीधरश्रीभृतः
स्तन्वन्तः कनकावलीभिरुपमां सौदामनीदामभिः ।
वर्षन्तः शममानयन्नुपलसच्छृङ्गारलेखायुधाः
काले कालियकायकालवपुषः पांसून् गजाम्भोमुचः ६९

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्रयङ्के 'यदुवंश-
क्षोभणो' नाम सप्तदशः सर्गः ॥ १७ ॥

---

## ॥ १८ ॥ अष्टादशः सर्गः ॥

( शालिनीवृत्तम् )

सञ्जग्माते तावपायानपेक्षौ
सेनाम्भोधी धीरनादौ रयेण ।
पक्षच्छेदात्पूर्वमेकत्र देशे
वाञ्छन्तौ वा विन्ध्यसह्यौ निलेतुम् ॥ १ ॥
पत्तिः पत्तिं वाहमेयाय वाजी
नागं नागः स्यन्दनस्थो रथस्थम् ।
इत्थं सेना वल्लभस्येव रागा-
दङ्गेनाङ्गं प्रत्यनीकस्य भेजे ॥ २ ॥

रथ्याघोषैबृ हणैर्वारणाना-
मैक्यंगच्छन् वाजिनां ह्रेषया च ।
व्योमव्यापी सन्ततं दुन्दुभीना-
मव्यक्तोऽभूदीशितेव प्रणादः ॥ ३ ॥
रोषावेशाद्गच्छतां प्रत्यमित्रं
दूरोत्क्षिप्तस्थूलबाहुध्वजानाम् ।
दीर्घास्तिर्यग्वैजयन्तीसदृश्यः
पादातानां भ्रेजिरे खड्गलेखाः ॥ ४ ॥
वर्ध्राबद्धा घोरितेन प्रयाता-
मश्वीयानामुच्चकैरुच्चलन्तः ।
रौक्मा रेजुः स्थासका मूर्तिभाजो
दर्पस्येव व्याप्तदेहस्य शेषाः ॥ ५ ॥
सान्द्रत्वक्कास्तल्पलाश्लिष्टकक्षा
भाङ्क्षीं शोभामाप्नुवन्तश्चतुर्थीम् ।
कल्पस्यान्ते मारुतेनोपनुन्नाश्चे-
लुश्चण्डं गण्डशैला इवेभाः ॥ ६ ॥
संक्रीडन्ती तेजिताश्वस्य रागादु-
द्यम्यारामग्रकायोत्थितस्य ।
रंहोभाजामक्षधूः स्यन्दनानां
हाहाकारं प्राजितुः प्रत्यनन्दत् ॥ ७ ॥
कुर्वाणानां साम्परायान्तरायं
भूरेणूनां मृत्युना मार्जनाय ।
सम्मार्जन्यो नूनमुद्धूयमाना
भान्ति स्मोच्चैः केतनानां पताकाः ॥ ८ ॥
उद्यत्नादं धन्विभिर्निष्ठुराणि
स्थूलान्युच्चैर्मण्डलत्वं दधन्ति ।

आस्फाल्यन्ते कार्मुकाणि स्म कामं
हस्त्यारोहैः कुञ्जराणां शिरांसि ॥ ९ ॥
घण्टानादो निस्वनो डिण्डिमानां
ग्रैवेयाणामारवो बृंहितानि ।
आमेतीव प्रत्यवोचन् गजाना-
मुत्साहाथ वाचमाधोरणस्य ॥ १० ॥
यातैश्चातुर्विध्यमस्त्रादिभेदा-
दभ्यासङ्गैः सौष्ठवाल्लाघवाच्च ।
शिक्षाशक्तिं प्राहरन्दर्शयन्तो
मुक्तामुक्तैरायुधैरायुधीयाः ॥ ११ ॥
रोषावेशादाभिमुख्येन कौचि-
त्पाणिग्राहं रंहसैवोपयातौ ।
हित्वा हेतीर्मल्लवन्मुष्टिघातं
घ्नन्तौ बाहूबाहवि व्यासृजेताम् ॥ १२ ॥
शुद्धाः सङ्गं न क्वचित् प्राप्तवन्तो
दूरान्मुक्ताः शीघ्रतां दर्शयन्तः ।
अन्तःसेनं विद्विषामाविशन्तो
युक्तं चक्रुः सायका वाजितायाः ॥ १३ ॥
आक्रम्याजेरग्रिमस्कन्धमुच्चै-
रास्थायाथो वीतशङ्कं शिरश्च ।
हेलालोला वर्त्म गत्वातिमर्त्यं
द्यामारोहन्मानभाजः सुखेन ॥ १४ ॥
रोदोरन्ध्रं व्यश्नुवानानि लोलै-
रङ्गस्यान्तर्मादितैः स्थावराणि ।
केचिद्गुर्वीमित्य संयन्निषद्यां
क्रीणन्ति स्म प्राणमूल्यैर्यशांसि ॥ १५ ॥

वीर्योत्साहश्लाघि कृत्वाऽवदानं
सङ्ग्रामाग्रे मानिनां लज्जितानाम् ।
अज्ञातानां शत्रुभिर्युक्तमुच्चैः
श्रीमन्नाम श्रावयन्ति स्म नग्नाः ॥ १६ ॥
आघावन्तः सम्मुखं धारितानां-
मन्यैरन्ये तीक्ष्णकौक्षेयकाणाम् ।
वक्षःपीठैरात्सरोरात्मनैव कोषे-
नान्धाः प्राविशन्पुष्कराणि ॥ १७ ॥
मिश्रीभूते तत्र सैन्यद्वयेऽपि
प्रायेणायं व्यक्तमासीद्विशेषः ।
आत्मीयास्ते ये पराञ्चः पुरस्ता-
दभ्यावर्ती संमुखो यः परोऽसौ ॥ १८ ॥
सद्वंशत्वादङ्गसंसङ्गिनीत्वं
नीत्वा कामं गौरवेणावबद्धा ।
नीता हस्तं वञ्चयित्वा परेण
द्रोहं चक्रे कस्यचित्स्वा कृपाणी ॥ १९ ॥
नीते भेदं धौतधाराभिघाता-
दम्भोदाभे शात्रवेणापरस्य ।
सासृग्राजिस्तीक्ष्णमार्गस्य मार्गो
विद्युद्दीप्तः कङ्कटे लक्ष्यते स्म ॥ २० ॥
आमूलान्तात्सायकेनायतेन
स्यूते बाह्वौ मण्डुकश्लिष्टमुष्टेः ।
प्राप्यासह्यां वेदनामस्तधैर्या-
दप्यभ्रश्यच्चर्म नान्यस्य पाणेः ॥ २१ ॥
भित्वा घोणामायसेनाधिवक्षः
स्थूरीपृष्ठो गार्ध्रपक्षेण विद्धः ।

शिक्षाहेतोर्गाढरज्ज्वेव बद्धो
हर्तुं वक्त्रं नाशकद् दुर्मुखोऽपि ॥ २२ ॥
कुन्तेनोच्चैः सादिना हन्तुमिष्टा-
न्नाजानेयो दन्तिनस्त्रस्यति स्म ।
कर्मोदारं कीर्तये कर्तुकामान्किवा
जात्याः स्वामिनो ह्रेपयन्ति ॥ २३ ॥
जेतुं जैत्राः शेकिरे नारिसैन्यैः
पश्यन्तोऽधो लोकमस्तेषुजालाः ।
नागारूढाः पार्वतानि श्रयन्तो
दुर्गाणीव त्रासहीनास्त्रसानि ॥ २४ ॥
विष्वद्रीचीर्विक्षिपन्सैन्यवीची-
राजावन्तः क्वापि दूरं प्रयातम् ।
बभ्रामैको बन्धुमिष्टं दिदृक्षुः
सिन्धौ वाद्यो मण्डलं गोर्वराहः ॥ २५ ॥
यावच्चक्रे नाञ्जनं बोधनाय
व्युत्थानज्ञो हस्तिचारी मदस्य ।
सेनास्वानाद्दन्तिनामात्मनैव
स्थूलास्तावत्प्रावहन्दानकुल्याः ॥ २६ ॥
क्रुध्यन् गन्धादन्यनागाय दूरा-
दारोढारं धूतमूर्धावमत्य ।
घोरारावध्वानिताशेषदिक्के
विष्के नागः पर्यणंसीत्स्व एव ॥ २७ ॥
प्रत्यासन्ने दन्तिनि प्रातिपक्षे
यन्त्रा नागः प्रास्तवक्त्रच्छदोऽपि ।
क्रोधाक्रान्तः क्रूरनिर्दारिताक्षः
प्रेक्षांचक्रे नैव किञ्चिन्मदान्धः ॥ २८ ॥

तूर्णं यावन्नापनिन्ये निषादी वासश्चक्षुर्वारणं वारणस्य ।
तावत्पूगैरन्यनागाधिरूढः कादम्बानामेकपातैरसीव्यत् ॥२९॥
आस्थद्दृष्टेराच्छदं च प्रमत्तो यन्ता यातुः प्रत्यरीभं द्विपस्य ।
मग्नस्योच्चैर्बर्हभारेण शङ्कोरावव्राते वीक्षणे च क्षणेन ॥३०॥

यत्नाद्रक्षन्सुस्थितत्वादनाशं
निश्चित्यान्यश्चेतसा भावितेन ।
अन्त्यावस्थाकालयोग्योपयोगं
दध्रेऽभीष्टं रागमापद्धनं वा ॥ ३१ ॥

अन्योन्येषां पुष्करैरामृशन्तो
दानोद्भेदानुच्चकैर्भुग्नवालाः ।
उन्मूर्धानः सन्निपत्यापरान्तैः
प्रायुध्यन्त स्पष्टदन्तध्वनीभाः ॥ ३२ ॥

द्राघीयांसः संहता स्थेमभाजश्-
चारूदग्रास्तीक्ष्णतामत्यजन्तः ।
दन्ता दन्तैराहताः सामजानां
भङ्गं जग्मुर्न स्वयं सामजाताः ॥ ३३ ॥

मातङ्गानां दन्तसङ्घट्टजन्मा
हेमच्छेदच्छायचञ्चच्छिखाग्रः ।
लग्नोऽप्यग्निश्चामरेषु प्रकामं
माञ्जिष्ठेषु व्यज्यते न स्म सैन्यैः ॥ ३४ ॥

ओषामासे मत्सरोत्पातवाता-
श्लिष्यद्दन्तक्ष्मारुहां घर्षणोत्थैः ।
यौगान्तैर्वा वह्निभिर्वारणाना-
मुच्चैर्मूर्धन्व्योम्नि नक्षत्रमाला ॥ ३५ ॥

सान्द्राम्भोदश्यामले सामजानां
वृन्दे नीताः शोणितैः शोणिमानम् ।

दन्ताः शोभामापुरम्भोनिधीनां
कन्दोद्भेदा वैद्रुमा वारिणीव ॥ ३६ ॥
आकम्प्राग्रैः केतुभिः सन्निपातं
तारोदीर्णग्रैवनादं व्रजन्तः ।
मग्नानङ्गे गाढमन्यद्विपानां
दन्तान्दुःखादुत्खनन्ति स्म नागाः ॥ ३७ ॥
उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्या-
मीषादन्तः कुञ्जरं शात्रवीयम् ।
शृङ्गप्रोतप्रावृषेण्याम्बुदस्य
स्पष्टं प्रापत्साम्यमुर्वीधरस्य ॥ ३८ ॥
भग्नेऽपीभे स्वे परावर्त्य देहं
योद्धा सार्धं व्रीडया मुञ्चतेषून् ।
साकं यन्तुः संमदेनानुबन्धी
दूनोऽभीक्ष्णं वारणः प्रत्यरोधि ॥ ३९ ॥
व्याप्तं लोकैर्दुःखलभ्यापसारं
संरम्भित्वादेत्य धीरो महीयः ।
सेनामध्यं गाहते वारणः स्म
ब्रह्मेव प्रागादिदेवोदरान्तः ॥ ४० ॥
भृङ्गश्रेणीश्यामभासां समूहैर्ना-
राचानां विद्धनीरन्ध्रदेहः ।
निर्भीकत्वादाहवेनाहतेच्छो
हृष्यन्हस्ती हृष्टरोमेव रेजे ॥ ४१ ॥
आताम्राभा रोषभाजः कटान्ता-
दाशूत्खाते मार्गणे धूर्गतेन ।
निश्च्योतन्ती नागराजस्य जज्ञे
दानस्याहो लोहितस्येव धारा ॥ ४२ ॥

आमन्दन्तौ दन्तिनः साहसिक्या-
दीषादण्डौ मृत्युशय्यातलस्य ।
सैन्यैरन्यस्तत्क्षणादाशशङ्के
स्वर्गस्योच्चैरधमार्गाविरूढः ॥ ४३ ॥
कुर्वञ्ज्योत्स्नाविप्रुषां तुल्यरूप-
स्तारस्ताराजालसारामिव द्याम् ।
खड्गाघातैर्दारिताद्धस्तिकुम्भा-
दाभाति स्म प्रोच्छलन्मौक्तिकौघः ॥ ४४ ॥
दूरोत्क्षिप्तक्षिप्रचक्रेण कृत्तं मत्तो हस्तं हस्तिराजः स्वमेव ।
भीमं भूमौ लोलमानं सरोषः पादेनासृक्पङ्कपेषं पिपेष ॥४५॥
आपस्कारात्लूनगात्रस्य भूमिं
निःसाधारं गच्छतोऽवाङ्मुखस्य ।
लब्धायामं दन्तयोर्युग्ममेव
स्वं नागस्य प्रापदुत्तम्भनत्वम् ॥ ४६ ॥
लब्धस्पर्शं भूव्यधादव्यथेन
स्थित्वा किंचिद्दन्तयोरन्तराले ।
ऊर्ध्वाघातिच्छिन्नदन्तप्रवेष्ट
जित्वोत्तस्थे नागमन्येन सद्यः ॥ ४७ ॥
हस्तेनाग्रे वीतभीतिं गृहीत्वा
कश्चिद्व्यालः क्षिप्तवानूर्ध्वमुच्चैः ।
आसीनानां व्योम्नि तस्यैव हेतोः
स्वर्गस्त्रीणामर्पयामास नूनम् ॥ ४८ ॥
कंचिद् दूरादायतेन द्रढीयःप्रासप्रोतस्रोतसान्तःक्षतेन ।
हस्ताग्रेण प्राप्तमप्यग्रतोऽभूदानैश्वर्यं वारणस्य ग्रहीतुम् ॥४९॥
तन्वाः पुंसी नन्दगोपात्मजायाः
कंसेनेव स्फोटिताथा गजेन ।

दिव्या मूर्तिर्व्योमगैरुत्पतन्ती
वीक्षामासे विस्मितैश्चण्डिकेव ॥ ५० ॥
आक्रम्यैकामग्रपादेन जङ्घा-
मन्यामुच्चैराददानः करेण ।
सास्थिस्वानं दारुवद्दारुणात्मा
कञ्चिन्मध्यात्पाटयामास दन्ती ॥ ५१ ॥
शोचित्वाग्रे भृत्ययोर्मृत्युभाजो-
र्यः प्रेम्णा नो तथा वल्लभस्य ।
पूर्वं कृत्वा नेतरस्य प्रसादं
पश्चात्तापादाप दाहं यथान्तः ॥ ५२ ॥
उत्प्लुत्यारादर्धचन्द्रेण लूने
वक्त्रेऽन्यस्य क्रोधदष्टोष्ठदन्ते ।
सैन्यैः कण्ठच्छेदलीने कबन्धाद्
भूयो बिभ्ये वल्गतः सासिपाणेः ॥ ५३ ॥
तूर्यारावैराहितोत्तालतालैर्गा-
यन्तीभिः कालहं काहलाभिः ।
नृत्ते चक्षुःशून्यहस्तप्रयोगं
काये कूजन् कम्बुरुच्चैर्जहास ॥ ५४ ॥
प्रत्यावृत्तं भङ्गभाजि स्वसैन्ये
तुल्यं मुक्तैराकिरन्ति स्म कञ्चित् ।
एकौघेन स्वर्णपुङ्खैर्द्विषन्तः
सिद्धा माल्यैः साधुवादैर्द्वयेऽपि ॥ ५५ ॥
बाणाक्षिप्तारोहशून्यासनानां
प्रक्रान्तानामन्यसैन्यैर्ग्रहीतुम् ।
संरब्धाना भ्रम्यतामाजिभूमौ
वारी वारैः सस्मरे वारणानाम् ॥ ५६ ॥

पौनःपुन्यादस्रगन्धेन मत्तो
मृद्नन्कोपाल्लोकमायोधनोर्व्याम् ।
पादे लग्नामत्र मालामिभेन्द्रः
पाशीकल्पामायतामाचकर्ष ॥ ५७ ॥
कश्चिन्मूर्च्छामेत्य गाढप्रहारः
सिक्तः शीतैः शीकरैर्वारणस्य ।
उच्छ्वास प्रस्थिता तं जिघृक्षु-
व्यर्थीकृता नाकनारी मुमूर्च्छ ॥ ५८ ॥
लूनग्रीवात् सायकेनापरस्य
द्यामत्युच्चैराननादुत्पतिष्णोः ।
त्रेसे मुग्धैः सैंहिकेयानुकारा-
द्रौद्राकारादप्सरोवक्त्रचन्द्रैः ॥ ५९ ॥
वृत्तं युद्धे शूरमाश्लिष्य कान्ति-
द्रन्तुं तूर्णं मेरुकुञ्ज जगाम ।
त्यक्त्वा नाग्नौ देहमेति स्म
यावत्पत्नी सद्यस्तद्वियोगासमर्था ॥ ६० ॥
त्यक्तप्राणं संयुगे हस्तिनीस्था
वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासुः ।
प्राप्याखण्डं देवभूयं सतीत्वा-
दाशिश्लेष स्वैव कञ्चित्पुरन्ध्री ॥ ६१ ॥
स्वर्गवासं कारयन्त्या चिराय
प्रत्यग्रत्वं प्रत्यहं धारयन्त्या ।
कश्चिद्भेजे दिव्यनार्या परस्मि-
ल्लोके लोकं प्रीणयन्त्येह कीर्त्या ॥ ६२ ॥
गत्वा नूनं वैबुधं सद्म रम्यं
मूर्च्छाभाजामाजगामान्तरात्मा ।

भूयो दृष्टप्रत्यया: प्राप्तसंज्ञा:
साधीयस्ते यद्रणायाद्रियन्ते ।। ६३ ।।
कश्चिच्छस्त्रापातमूढोऽपवोढु-
र्लब्ध्वा भूयश्चेतनामाहवाय ।
व्यावर्तिष्ट क्रोशत: सख्युरुच्चै-
स्त्यक्तश्चात्मा का च लोकानुवृत्ति: ।। ६४ ।।
भिन्नोरस्कौ शत्रुणाकृष्य दूरादासन्नत्वात्कौचिदेकेषुणैव ।
अन्योन्यावष्टम्भसामर्थ्ययोगादूर्ध्वावेव स्वर्गतावप्यभूताम् ।६५।
भिन्नानस्त्रैर्मोहभाजोऽभिजातान्
हन्तुं लोलं वारयन्त: स्ववर्गम् ।
जीवग्राहं ग्राहयामासुरन्ये
योग्येनार्थ: कस्य न स्याज्जनेन ।। ६६ ।।
भग्नैर्दण्डैरातपत्राणि भूमौ
पर्यस्तानि प्रौढचन्द्रद्युतीनि ।
आहाराय प्रेतराजस्य रौप्य-
स्थालानीव स्थापितानि स्म भान्ति ।। ६७ ।।
रेजुर्भ्रष्टा वक्षस: कुङ्कुमाङ्का
मुक्ताहारा: पार्थिवानां व्यसूनाम् ।
हासाल्लक्ष्या: पूर्णकामस्य मन्ये
मृत्योर्दन्ता: पीतरक्तासवस्य ।। ६८ ।।
निम्नेष्वोघीभूतमस्त्रक्षताना-
मस्रं भूमौ यच्चकासाञ्चकार ।
रागार्थं तत्किं तु कौसुम्भमम्भ:
संव्यानानामन्तकान्त:पुरस्य ।। ६९ ।।
रामेण: त्रि:सप्तकृत्वो ह्रदानां
चित्रं चक्रे पञ्चकं क्षत्रियास्त्रै: ।

रक्ताम्भोभिस्तत्क्षणादेव तस्मि-
न्संख्येऽसंख्याः प्रावहन्द्वीपवत्यः ॥ ७० ॥
संदानान्तादस्त्रिभिः शिक्षितास्त्रै-
राविश्याधः शातशस्त्रावलूनाः ।
कूर्मौपम्यं व्यक्तमन्तर्नदीना-
*मेभाः प्रापन्नङ्घ्रयोऽसृङ्मयीनाम्* ॥ ७१ ॥
पद्माकारैर्योधवक्त्रैरिभानां
कर्णभ्रष्टैश्चामरैरेव हंसैः ।
सोपस्काराः प्रावहन्नस्रतायाः
स्रोतस्विन्यो वीचिभूच्चैस्तरद्भिः ॥७२॥
उत्क्रान्तानामामिषायोपरिष्टा-
दध्याकाशं बभ्रमुः पत्रवाहाः ।
मूर्ताः प्राणा नूनमद्याप्यवेक्षा-
मासुः कायं त्याजिता दारुणास्त्रैः ॥ ७३ ॥
आतन्वद्भिर्दिक्षु पत्राग्रनादं
प्राप्तं दूरादाशु तीक्ष्णैर्मुखाग्रैः ।
आदौ रक्तं सैनिकानामजीवै-
र्जीवैः पश्चात्पत्रिपूगैरपायि ॥ ७४ ॥
ओजोभाजां यद्रणे संस्थितानां-
मादत्तीव्रं सार्धमङ्गेन नूनम् ।
ज्वालाव्याजादुद्वमन्ती तदन्त-
स्तेजस्तारं दीप्तजिह्वा ववाशे ॥ ७५ ॥
*नैरन्तर्याच्छिन्नदेहान्तरालं*
दुर्भक्षस्य ज्वालिना वाशितेन ।
योद्धुर्बाणप्रोतमादीप्य मांसं
*पाकापूर्वस्वादमादे शिवाभिः* ॥ ७६ ॥

ग्लानिच्छेदी क्षुत्प्रबोधाय पीत्वा
रक्तारिष्टं शोणिताजीर्णशेषम् ।
स्वादुंकारं कालखण्डोपदंशं
क्रोष्टा डिम्बं व्यष्वणद्व्यस्वनच्च ॥ ७७ ॥

क्रव्यात्पूगैः पुष्कराण्यानकानां
प्रत्याशाभिर्मेदसो दारितानि ।
आभीलानि प्राणिनः प्रत्यव-
स्यन्कालो नूनं व्याददावाननानि ॥ ७८ ॥

कीर्णा रेजे साजिभूमिः समन्ता-
दप्राणद्भिः प्राणभाजां प्रतीकैः ।
बह्वारम्भैरर्धसंयोजितैर्वा
रूपैः स्रष्टुः सृष्टिकर्मान्तशाला ॥ ७९ ॥

आयन्तीनामविरतरयं राजकानीकिनीना-
मित्थं सैन्यैः सममलघुभिः श्रीपतेरूर्मिमद्भिः ।
आसीदोघैर्मुहुरिव महद्वारिधेरापगानां
दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम् ॥ ८० ॥

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
सङ्कुलयुद्धवर्णनो नामाष्टादशः सर्गः ॥ १८ ॥

## ॥ १९ ॥ एकोनविंशः सर्गः ॥

( अनुष्टुब )

अथोत्तस्थे रणाटव्यामसुहृद्वेणुदारिणा ।
नृपाङ्घ्रिपौघसंघर्षादग्निवद्वेणुदारिणा ॥ १ ॥
आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥ २ ॥

॥ एकाक्षरपादः ॥

जजौजोजाजिजिज्जाजी तं ततोऽतितताततुत् ।
भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥ ३ ॥
भवन्भयाय लोकानामाकम्पितमहीतलः ।
निर्घात इव निर्घोषभीमस्तस्यापतद्रथः ॥ ४ ॥
रामे रिपुः शरानाजिमहेष्वास विचक्षणे ।
कोपादथैनं शितया महेष्वा स विचक्षणे ॥ ५ ॥
दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत् ।
मन्दप्रतापं तं सूतः शीघ्रमाजिविहायसः ॥ ६ ॥
कृत्वा शिनेः शाल्वचमूं सप्रभावा चमूजिताम् ।
ससर्ज वक्त्रैः फुल्लाब्जसप्रभा वाचमूर्जिताम् ॥ ७ ॥
उल्मुकेन द्रुमं प्राप्य संकुचत्पत्रसंपदम् ।
तेजः प्रकिरता दिक्षु सप्रतापमदीप्यत ॥ ८ ॥
पृथोरध्यक्षिपद्रुक्मी यया चापमुदायुधः ।
तयैव वाचापगमं ययाचापमुदायुधः ॥ ९ ॥
समं समन्ततो राज्ञामापतन्तीरनीकिनीः ।
कार्ष्णिः प्रत्यग्रहीदेकः सरस्वानिव निम्नगाः ॥ १० ॥
दधानैर्घनसादृश्यं लसदायसदंशनैः ।
तत्र काञ्चनसच्छाया ससृजे तैः शराशनिः ॥ ११ ॥

नखांशुमञ्जरीकीर्णामसौ तरुरिवोच्चकैः ।
बभौ बिभ्रद्धनुःशाखामधिरूढशिलीमुखाम् ॥ १२ ॥
प्राप्य भीममसौ जन्यं सौजन्यं दधदानते ।
विध्यन्मुमोच न रिपूनरिपूगान्तकः शरैः ॥ १३ ॥
कृतस्य सर्वक्षितिपैर्विजयाशंसया पुरः ।
अनेकस्य चकारासौ बाणैर्बाणस्य खण्डनम् ॥ १४ ॥
या बभार कृतानेकमाया सेना ससारताम् ।
धनुः स कर्षन् रहितमायासेनाससार ताम् ॥ १५ ॥
ओजो महौजाः कृत्वाधस्तत्क्षणादुत्तमौजसः ।
कुर्वन्नाजावमुख्यत्वमनमन्नाम मुख्यताम् ॥ १६ ॥
दूरादेव चमूर्मल्लैः कुमारो हन्ति स स्म याः ।
न पुनः सांयुगीं तां स्म कुमारो हन्ति सस्मयाः ॥ १७ ॥
निपीड्य तरसा तेन मुक्ताः काममनास्थया ।
उपाययुर्विलक्षत्वं विद्विषो न शिलीमुखाः ॥ १८ ॥
तस्यावदानैः समरे सहसा रोमहर्षिभिः ।
सुरैरशंसि व्योमस्थैः सह सारो महर्षिभिः ॥ १९ ॥
सुगन्धयद्दिशः शुभ्रमम्लानि कुसुमं दिवः ।
भूरि तत्रापतत्तस्मादुत्पपात दिवं यशः ॥ २० ॥
सोढुं तस्य द्विषो नालमपयोधरवा रणम् ।
ऊर्णुनाव यशश्च द्यामपयोधरवारणम् ॥ २१ ॥
केशप्रचुरलोकस्य पर्यस्कारि विकासिना ।
शेखरेणेव युद्धस्य शिरः कुसुमलक्ष्मणा ॥ २२ ॥
सादरं युध्यमानापि तेनान्यनरसादरम् ।
सा दरं पृतना निन्ये हीयमाना रसादरम् ॥ २३ ॥
इत्यालिङ्गितमालोक्य जयलक्ष्म्या झषध्वजम् ।
क्रुद्धयेव क्रुधा सद्यः प्रपेदे चेदिभूपतिः ॥ २४ ॥

अहितानभि वाहिन्या स मानी चतुरङ्गया ।
चचाल वल्गत्कलभसमानीचतुरङ्गया ॥ २५ ॥
ततस्ततधनुर्मौर्वीविस्फारस्फारनिःस्वनैः ।
तूर्यैर्युगक्षये क्षुभ्यदकूपारानुकारिणी ॥ २६ ॥

॥ सर्वतोभद्र ॥

स का र ना ना र का स
का य सा द द सा य का ।
र सा ह वा वा ह सा र
ना द वा द द वा द ना ॥ २७ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | का | र | ना | मा | र | का | स |
| का | य | सा | द | द | सा | य | का |
| र | सा | ह | वा | वा | ह | सा | र |
| ना | द | वा | द | द | वा | द | ना |
| ना | द | वा | द | द | वा | द | ना |
| र | सा | ह | वा | वा | ह | सा | र |
| का | य | सा | द | द | सा | य | का |
| स | का | र | ना | ना | र | का | स |

लोलासिकालियकुला यमस्यैव स्वसा स्वयम् ।
चकीर्षुरुल्लसल्लोहवर्मश्यामा सहायताम् ॥ २८ ॥

॥ मुरजबन्धः ॥

सा से ना ग म ना र म्भे
र से ना सी द ना र ता ।
ता र ना द ज ना म त्त
धी र ना ग म ना म या ॥ २९ ॥



धूतधौतासयः प्रष्ठाः प्रातिष्ठन्त क्षमाभृताम् ।
शौर्यानुरागनिकषः सा हि वेलानुजीविनाम् ॥ ३० ॥

दिवमिच्छन्युधा गन्तुं कोमलामलसम्पदम् ।
दधौ दधानोऽसिलतां कोऽमलामलसम्पदम् ॥ ३१ ॥

कृतोरुवेगं युगपद्व्यजिगीषन्त सैनिकाः ।
विपक्षं बाहुपरिघैर्जङ्घाभिरितरेतरम् ॥ ३२ ॥

वाहनाजनि मानासे साराजावनमा ततः ।
मत्तसारगराजेभे भारीहावज्जनध्वनि ॥ ३३ ॥

॥ श्लोकप्रतिलोमयमकम् ॥

निध्वनज्जवहारीभा भेजे रागरसात्तमः ।
ततमानवजारासा सेना मानिजनाहवा ॥ ३४ ॥

प्रभग्नवृत्ताः प्रसभादाकृष्टा यौवनोद्धतैः ।
चक्रन्दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लताः ॥ ३५ ॥

करेणुः प्रस्थितोऽनेको रेणुर्घण्टाः सहस्रशः ।
करेणुः शीकरो जज्ञे रेणुस्तेन शमं ययौ ॥ ३६ ॥
धृतप्रत्यग्रशृङ्गाररसरागैरपि द्विपैः ।
सरोषसम्भ्रमैर्बभ्रे रौद्र एव रणे रसः ॥ ३७ ॥
न तस्थौ भर्तृतः प्राप्तमानसम्प्रतिपत्तिषु ।
रणैकसर्गेषु भयं मानसं प्रति पत्तिषु ॥ ३८ ॥
बाणाहिपूर्णतूणीरकोटरैर्धन्विशाखिभिः ।
गोत्राश्लिष्टभुजाशाखैरभूद्भीमा रणाटवी ॥ ३९ ॥

॥ प्रतिलोमानुलोमपादः ॥

नानाजाववजानाना सा जनौघघनौजसा ।
परानिहाऽह्वानिराप तान्वियाततयाऽन्विता ॥ ४० ॥
विषमं सर्वतोभद्रचक्रगोमूत्रिकादिभिः ।
श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद्बलम् ॥ ४१ ॥
संहृत्या सात्वतां चैद्यं प्रति भास्वरसेनया ।
ववले योद्धुमुत्पन्नप्रतिभा स्वरसेन या ॥ ४२ ॥
विस्तीर्णमायामवतीं लोललोकनिरन्तरा ।
नरेन्द्रमार्गं रथ्येव पपात द्विषतां बलम् ॥ ४३ ॥
वारणागगभीरा सा साराऽभीगगणारवा ।
कारितारिवधा सेना नासेधा वारितारिका ॥ ४४ ॥
अधिनागं प्रजविनो विकसत्पिच्छचारवः ।
पेतुर्बर्हिणदेशीयाः शङ्कवः प्राणहारिणः ॥ ४५ ॥

॥ गोमूत्रिकाबन्धः ।

प्र वृ त्ते वि क स द्ध्वा नं सा ध ने ष्य वि षा दि भिः ।
व वृ धे वि क स द्दा न यु ध मा प्य वि षा णि भिः ॥४६॥



पुरः प्रयुक्तैर्युद्धं तच्चलितैर्लब्धशुद्धिभिः ।
आलापैरिव गान्धर्वमदीप्यत पदातिभिः ।।४८।।

केनचित्स्वासिनान्येषां मण्डलाग्रानवद्यता ।
प्रापे कीर्तिप्लुतमहीमण्डलाग्राऽनवद्यता ।।४८।।

विहन्तुं विद्विषस्तीक्ष्णः सममेव सुसंहतेः ।
परिवारात्पृथक्चक्रे खड्गश्चात्मा च केनचित् ४६

अन्येन विदधेऽरीणामतिमात्रा विलासिना ।
उद्गूर्णेन चमूस्तूर्णमतिमात्राविलाऽसिना ।५०।

सहस्रपूरणः कश्चिल्लूनमूर्धाऽसिना द्विषः ।
तथोर्ध्व एव कावन्धीमभजन्नर्तनक्रियाम् ।।५१।।

शस्त्रव्रणमयश्रीमदलङ्करणभूषितः ।
ददृशेऽन्यो रावणवदलङ्करणभूषितः ।।५२।।

द्विषद्विशसनच्छेदनिरस्तोरुयुगोऽपरः ।
सिक्तश्चास्रै रुभयथा बभूवारुणविग्रहः ।।५३।।

भीमतामपरोऽम्भोधिसमेऽधित महाहवे ।
दाक्षे कोपः शिवस्येव समेधितमहा हवे ।।५४।।

दन्तैश्चिच्छिदिरे कोपात् प्रतिपक्षं गजा इव ।
परनिस्त्रिंशनिर्लूनकरवालाः पदातयः ।।५५।।

रणे रभसनिर्भिन्नद्विपपाट विकासिनि ।
न तत्र गतभीः कश्चिद्विपपाट विकासिनि ।५६।

यावन्न सत्कृतैर्भर्तुः स्नेहस्यानृण्यमिच्छुभिः ।
अमर्षादितरैस्तावत्तत्यजे युधि जीवितम् ।।५७।।

। समुद्गयमकम् ।।

अयशोभिदुरालोके कोपधाम-रणादृते ।
अयशोभिदुरा लोके कोपधा मरणादृते ।। ५८ ।।

स्खलन्ती न क्वचित्तैक्ष्ण्यादभ्यग्रफलशालिनी ।
अमोचि शक्तिः शाक्तीकैर्लोहजा न शरीरजा ॥ ५९ ॥
आपदि व्यापृतनयास्तथा युयुधिरे नृपाः ।
आप दिव्या पृतनया विस्मयं जनता यथा ॥ ६० ॥
स्वगुणैराफलप्राप्तेराकृष्य गणिका इव ।
कामुकानिव नालीकास्त्रिणताः सहसामुचन् ॥ ६१ ॥
वाजिनः शत्रुसैन्यस्य समारब्धनवाजिनः ।
वाजिनश्च शरा मध्यमविशन्द्रुतवाजिनः ॥ ६२ ॥
पुरस्कृत्य फलं प्राप्तैः सत्पक्षाश्रयशालिभिः ।
कृतपुङ्खतया लेभे लक्षमप्याशु मार्गणैः ॥ ६३ ॥
रक्तस्रुति जपासूनसमरागामिषुर्व्यधात् ।
कश्चित्पुरः सपत्नेषु समरागामिषु व्यधात् ॥ ६४ ॥
रयेण रणकाम्यन्तौ दूरादुपगताविभौ ।
गतासुरन्तरा दन्ती वरण्डक इवाभवत् ॥ ६५ ॥

॥ द्व्यक्षरः ॥

भूरिभिर्भारिभिर्भीरैर्भूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ ६६ ॥
निशितासिलतालूनैस्तथा हस्तैर्न हस्तिनः ।
युध्यमाना यथा दन्तैर्भग्नैरापुर्विहस्तताम् ॥ ६७ ॥

॥ असंयोगः ॥

निपीडनादिव मिथो दानतोयमनारतम् ।
वपुषामदयापातादिभानामभितोऽगलत् ॥ ६८ ॥
रणाङ्गणं सर इव प्लावितं मदवारिभिः ।
गजः पृथुकराकृष्टशतपत्रमलोडयत् ॥ ६९ ॥
शरक्षते गजे भृङ्गैः सविषादिविषादिनि ।
रुतव्याजेन रुदितं तत्रासीदतिसीदति ॥ ७० ॥

अन्तकस्य पृथौ तत्र शयनीय इवाहवे ।
दशनव्यसनादीयुर्मत्कुणत्वं मतङ्गजाः ॥ ७१ ॥

॥ अर्धभ्रमकः ॥

अ भी क म ति के ने द्धे
भी ता न न्द स्य ना श ने ।
क न त्स का म से ना के
म न्द का म क म स्य ति ॥ ७२ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | भी | क | म | ति | के | ने | द्धे |
| भी | ता | न | न्द | स्य | ना | श | ने |
| क | न | त्स | का | म | से | ना | के |
| म | न्द | का | म | क | म | स्य | ति |

दधतोऽपि रणे भीममभीक्ष्णं भावमासुरम् ।
हताः परैरभिमुखाः सुरभूयमुपाययुः ॥ ७३ ॥

येनाङ्गमूहे व्रणवत्सरुञ्जा परतोऽमरैः ।
समत्वं स ययौ खड्गत्सरुचापरतोऽमरैः ॥ ७४ ॥

निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम् ।
पाणिनीयमिवालोकि धीरैस्तत्समराजिरम् ॥ ७५ ॥

अभावि सिन्धवा सन्ध्याभ्रसद्दग्रुधिरतोयया ।
हृते योद्धुं जनः पांशौ स दग्रुधि रतो यया ॥ ७६ ॥

विदलत्पुष्कराकीर्णाः पतच्छङ्खकुलाकुलाः ।
तरत्पत्त्ररथा नद्यः प्रासर्पन्रक्तवारिजाः ॥ ७७ ॥

असृग्जनोऽस्त्रक्षतिमानवमज्जवसादनम् ।
रक्षःपिशाचं मुमुदे नवमज्जवसादनम् ॥ ७८ ॥
चित्रं चापैरपेतज्यैः स्फुरद्रक्तशतह्रदम् ।
पयोदजालमिव तद्वीराशंसनमाबभौ ॥ ७९ ॥
बन्धौ विपन्नेऽनेकेन नरेणेह तदन्तिके ।
अशोचि सैन्ये घण्टाभिर्न रेणे हतदन्तिके ॥ ८० ॥
कृत्तैः कीर्णा मही रेजे दन्तैर्गात्रैश्च दन्तिनाम् ।
क्षुण्णलोकासुभिर्मृत्योर्मुसलोलूखलैरिव ॥ ८१ ॥
युद्धमित्थं विधूतान्यमानवानभियो गतः ।
चैद्यः परान्पराजिग्ये मानवानभियोगतः ॥ ८२ ॥
अथ वक्षोमणिच्छायाच्छुरितापीतवाससा ।
स्फुरदिन्द्रधनुर्भिन्नतडितेव तडित्वता ॥ ८३ ॥

॥ द्व्यक्षरः ॥

नीलेनानालनलिननिलीनोल्ललनालिना ।
ललनालालनेनालं लीलालोलेन लालिना ॥ ८४ ॥
अपूर्वयेव तत्कालसमागमसकामया ।
दृष्टेन राजन्वपुषा कटाक्षैर्विजयश्रिया ॥ ८५ ॥

॥ द्व्यक्षरः ॥

विभावी विभवी भाभो विभाभावी विवो विभीः ।
भवाभिभावी भावावो भवाभावो भुवो विभुः ॥ ८६ ॥
उपैतुकामैस्तत्पारं निश्चितैर्योगिभिः परैः ।
देहत्यागकृतोद्योगैरदृश्यत परः पुमान् ॥ ८७ ॥

॥ गतप्रत्यागतम् ॥

तं श्रिया घनयाऽनस्तरुचा सारतया तया ।
यातया तरसा चारुस्तनयाऽनघया श्रितम् ॥ ८८ ॥
विद्विषोऽद्विषुरुद्वीक्ष्य तथाप्यासन्निरेनसः ।
अरुच्यमपि रोगघ्नं निसर्गादेव भेषजम् ॥ ८९ ॥

।। प्रतिलोमेनायमेवार्थः ।।

विदितं दिवि केऽनीके तं यातं निजिताजिनि ।
विगद गवि रोद्धारो योद्धा यो नतिमेति नः ।। ९० ।।

नियुज्यमानेन पुरः कर्मण्यतिगरीयसि ।
आरोप्यमाणोरुगुणं भर्त्रा कार्मुकमानमत् ।। ९१ ।।

तत्र बाणाः सुपरुषः समधीयन्त चारवः ।
द्विषामभूत्सुपरुषस्तस्याकृष्टस्य चारवः ।। ९२ ।।

पश्चात्कृतानामप्यस्य नराणामिव पत्रिणाम् ।
यो यो गुणेन संयुक्तः स स कर्णान्तमाययौ ।। ९३ ।।

।। द्व्यक्षरः ।।

प्रापे रूपी पुराऽरेपाः परिपूरी परः परैः ।
रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः ।। ९४ ।।

दिङ्मुखव्यापिनस्तीक्ष्णान्ह्लादिनो मर्मभेदिनः ।
चिक्षेपैकक्षणेनैव सायकानहितांश्च सः ।। ९५ ।।

।। गूढचतुर्थः ।।

शरवर्षी महानादः स्फुरत्कार्मुककेतनः ।
नीलच्छविरसौ रेजे केशवच्छलनीरदः ।। ९६ ।।

न केवलं जनैस्तस्य लघुसंधायिनो धनुः ।
मण्डलीकृतमेकान्ताद्बलमैक्षि द्विषामपि ।। ९७ ।।

।। द्व्यक्षरः ।।

लोकालोकी कलोऽकल्ककलिलोऽलिकुलालकः ।
कालोऽकलोऽकलिः काले कोलकेलिकिलः किल ।। ९८ ।।

अक्षितारासु विव्याध द्विषतः स तनुत्रिणः ।
दानेषु स्थूललक्ष्यत्वं न हि तस्य शरासने ।। ९९ ।।

।। द्व्यक्षरः ।।

वररोऽविवरो वैरिविवारी वारिरारवः ।
विववार वरो वैरं वीरो रविरिवौर्वरः ।। १०० ।।

मुक्तानेकशरं प्राणानहरद्भूयसां द्विषाम् ।
तदीयं धनुरन्यस्य न हि सेहे सजीवताम् ॥ १०१ ॥
॥ द्व्यक्षरः ॥
राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः ।
रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः ॥ १०२ ॥
उद्धतान्द्विषतस्तस्य निघ्नतो द्वितयं ययुः ।
पानार्थे रुधिरं बालौ रक्षार्थे भुवनं शराः ॥ १०३ ॥
॥ द्व्यक्षरः ॥
क्रूवारिकारि कोरेककारकः कारिकाकरः ।
कोरकाकारकरकः करीरः कर्करोऽर्करुक् ॥ १०४ ॥
विधातुमवतीर्णोऽपि लघिमानमसौ भुवः ।
अनेकमरिसंघातमकरोद् भूमिवर्धनम् ॥ १०५ ॥
॥ द्व्यक्षर ॥
दारी दरदरिद्रोऽरिदारूदारोऽद्रिदूरदः ।
दूरादरौद्रोऽददरद्रोदोरुद्दारुरादरी ॥ १०६ ॥
एकेषुणा सङ्गतिथान्द्विषो भिन्दन्द्रुमानिव ।
स जन्मान्तररामस्य चक्रे सदृशमात्मनः ॥ १०७ ॥
॥ द्व्यक्षरः ॥
शूरः शौरिरशिशिरैराशाशैराशु राशिशः ।
शरारुः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः ॥ १०८ ॥
व्यक्तासीदरितारीणां यत्तदीयास्तदा मुहुः ।
मनोहृतोऽपि हृदये लेगुरेषां न पत्रिणः ॥ १०९ ॥
॥ अतालव्यः ॥
नामाक्षराणां मलना मा भूद्भर्तु रतः स्फुटम् ।
अगृह्णत पराङ्गानामसूनस्र न मार्गणाः ॥ ११० ॥
आच्छिद्य योधसार्थस्य प्राणसर्वस्वमाशुगाः ।
ऐकागारिकवद्भूमौ दूराज्जग्मुरदर्शनम् ॥ १११ ॥

भीमास्त्रराजिनस्तस्य बलस्य ध्वजराजिनः ।
कृतघोराजिनश्चक्रे भुवः सरुधिरा जिनः ॥ ११२ ॥

मांसव्यवोचितमुखैः शून्यतां दधदक्रियम् ।
शकुन्तिभिः शत्रुबलं व्यापि तस्येषुभिर्नभः ॥ ११३ ॥

॥ एकाक्षरः ॥

दाददो दुद्दुद्दादी दादादो दूददीददोः ।
दुद्दादं ददद्दे दुद्दे ददाददददोऽददः ॥ ११४ ॥

प्लुतेभकुम्भोरसिजैर्हृदयक्षतिजन्मभिः ।
प्रावर्तयन्नदीरस्रैर्द्विषां तद्योषितां च सः ॥ ११५ ॥

॥ अर्थत्रयवाची ॥

सदामदबलप्रायः समुद्धृतरसो बभौ ।
प्रतीतविक्रमः श्रीमान्हरिर्हरिरिवापरः ॥ ११६ ॥

द्विधा त्रिधा चतुर्धा च तमेकमपि शत्रवः ।
पश्यन्तः स्पर्धया सद्यः स्वयं पञ्चत्वमाययुः ॥ ११७ ॥

॥ समुद्गः ॥

सदैव संपन्नवपू रणेषु स दैवसंपन्नवपूरणेषु ।
महो दधेऽस्तारि महानितान्तं महोदधेस्तारिमहा
नितान्तम् ॥ ११८ ॥

इष्टं कृत्वार्थं पत्रिणः शार्ङ्गपाणे-
रैत्याधोमुख्यं प्राविशन्भूमिमाशु ।
शुद्धया युक्तानां वैरिवर्गस्य मध्ये
भर्त्रा क्षिप्तानामेतदेवानुरूपम् ॥११९॥

॥ चक्रबन्धः ॥

सत्त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो
लब्धाधक्षयशुद्धिरुद्धरतरश्रीवत्सभूमिर्मुदा ।

मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे-
रेकौघैः समकालमभ्रमुदयी रोपैस्तदा तस्तरे ।१२०।

॥ इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
एकोनविंशतितमः सर्गः ॥ १९ ॥



★★

## ॥ २० ॥ विंशः सर्गः

( वैतालीयवृत्तम् )

मुखमुल्लसितत्रिरेखमुच्चै-
भिदुरभ्रूयुगभीषणं दधानः ।
समिताविति विक्रमान-
मृष्यन्गतभीराह्वत चेदिराण्मुरारिम् ॥ १ ॥

शितचक्रनिपातसंप्रतीक्षं
वहतः स्कन्धगतं च तस्य मृत्युम् ।
अभिशौरि रथोऽथ नोदिताश्वः
प्रययौ सारथिरूपया नियत्या ॥ २ ॥

अभिचैद्यमगाद्रथोऽपि शौरे-
रवनिं जागुडकुङ्कुमाभिताम्रैः ।
गुरुनेमिनिपीडनावदीर्ण-
व्यसुदेहस्रुतशोणितैर्विलिम्पन् ॥ ३ ॥

स निरायतकेतनांशुकान्तः
कलनिक्वाणकरालकिङ्किणीकः ।
विरराज रिपुक्षय-
प्रतिज्ञामुखरो मुक्तशिखः स्वयं नु मृत्युः ॥ ४ ॥

सजलाम्बुधरारवानुकारी
ध्वनिरापूरितदिङ्मुखो रथस्य ।
प्रगुणीकृतकेकमूर्ध्वकण्ठैः
शितिकण्ठैरुपकर्णयाम्बभूवे ॥ ५ ॥

अभिवीक्ष्य विदर्भराजपुत्री-
कुचकाश्मीरजचिह्नमच्युतोरः ।

चिरसेवितयापि चेदिराजः
सहसावाप रुषा तदैव योगम् ॥ ६ ॥
जनिताशनिशब्दशङ्कमुच्चै-
र्धनुरास्फालितमध्वनन्नृपेण ।
चपलानिलचोद्यमानकल्प-
क्षयकालाग्निशिखानिभस्फुरज्ज्यम् ॥ ७ ॥
समकालमिवाभिलक्षणीय-
ग्रहसंधानविकर्षणापवर्गैः ।
अथ साभिसरं शरैस्तरस्वी
स तिरस्कर्तुमुपेन्द्रमध्यवर्षत् ॥ ८ ॥
ऋजुताफलयोगशुद्धिभाजां
गुरुपक्षाश्रयिणां शिलीमुखानाम् ।
गुणिना नतिमागतेन सन्धिः
सह चापेन समञ्जसो बभूव ॥ ९ ॥
अविषह्यतमे कृताधिकारं
वशिना कर्मणि चेदिपार्थिवेन ।
अरसद्धनुरुच्चकैर्दार्ति-
प्रसभाकर्षणवेपमानजीवम् ॥ १० ॥
अनुसन्ततिपातिनः पटुत्वं
दधतः शुद्धिभृतो गृहीतपक्षाः ।
वदनादिव वादिनोऽथ शब्दाः
क्षितिभर्तुर्धनुषः शराः प्रसस्रुः ॥ ११ ॥
गवलासितकान्ति तस्य मध्य-
स्थितघोरायतबाहुदण्डनासम् ।
ददृशे कुपितान्तकोन्नमद्-
भ्रूयुगभीमाकृति कार्मुकं जनेन ॥ १२ ॥

तडिदुज्ज्वलजातरूपपुङ्खैः
खमयःश्याममुखैरभिध्वनद्भिः ।
जलदैरिव रंहसा पतद्भिः
पिदधे संहतिशालिभिः शरौघैः ।। १३ ।।
शितशल्यमुखावदीर्णमेघक्षरदम्भः स्फुटतोव्रवेदनानाम् ।
स्रवदस्रु ततीव चक्रवालं ककुभामौर्णविधुः सुवर्णपुङ्खाः ।।१४।।
अमनोरमतां यतौ जनस्य
क्षणमालोकपथान्नभः सदा वा ।
रुरुधे विहिताहिमद्युतिद्यौ-
र्विशिखैरन्तरिता च्युता धरित्री ।।१५।।
विनिवारितभानुतापमेकं सकलस्यापि मुरद्विषो बलस्य ।
शरजालमयं समं समन्तादुरु सद्मेव नराधिपेन तेने ।। १६ ।।
इति चेदिमहीभृता तदानीं तदनीकं दनुसूनुसूदनस्य ।
वयसामिव चक्रमक्रियाकं परितोऽरोधि विपाटपञ्जरेण ।१७।
इषुवर्षमनेकमेकवीरस्तदरिप्रच्युतमच्युतः पृषत्कैः ।
अथ वादिकृतं प्रमाणमन्यैः प्रतिवादीव निराकरोत्प्रमाणैः ।१८।
प्रतिकुञ्चितकूर्परेण तेन श्रवणोपान्तिकनीयमानगव्यम् ।
ध्वनति स्म धनुर्घनान्तमत्तप्रचुरक्रौञ्चरवानुकारमुच्चैः ।१९।
उरसा विततेन पातितांसः
स मयूराञ्चितमस्तकस्तदानीम् ।
क्षणमालिखितो नु सौष्ठवेन
स्थिरपूर्वापरमुष्टिराबभौ वा ।। २० ।।
ध्वनतो नितरां रयेण गुर्व्यस्तडिदाकारचलद्गुणादसंख्याः ।
इषवो धनुषः सशब्दमाशु न्यपतन्नम्बुधरादिवाम्बुधाराः ।२१।
शिखरोन्नतनिष्ठुरांसपीठः स्थगयन्नेकदिगन्तमायतान्तः ।
निरवर्णि सकृत्प्रसारितोऽस्य क्षितिभर्तेव चमूभिरेकबाहुः ।२२।

तमकुण्ठमुखाः सुपर्णकेतोरिषवः क्षिप्तमिषुव्रजं परेण ।
विभिदामनयन्त कृत्यपक्षं नृपतेर्नेतुरिवायथार्थवर्णाः ॥२३॥
दयितैरिव खण्डिता मुरारेर्विशिखैः सम्मुखमुज्ज्वलाङ्गलेखैः ।
लघिमानमुपेयुषी पृथिव्यां विफला शत्रुशरावलिः पपात ।२४।
प्रमुखेऽभिहताश्च पत्रवाहाः प्रसभं माधवमुक्तवत्सदन्तैः ।
परिपूर्णतरं भुवो गतायाः परतः कातरवत्प्रतीपमीयुः ॥२५॥
इतरेतरसंनिकर्षजन्मा गलसंघट्टविकीर्णविस्फुलिङ्गः ।
पटलानि लिहन्बलाहकानामपरेषु क्षणमज्ज्वलत्कृशानुः ।२६।
शरदीव शरश्रिया विभिन्ने विभुना शत्रुशिलीमुखाभ्रजाले ।
विकसन्मुखवारिजाः प्रकामं बभुराशा इव यादवध्वजिन्यः ।२७।
स दिवं समचिच्छदच्छरौघैः कृततिग्मद्युतिमण्डलापलापैः ।
ददृशेऽथ च तस्य चापयष्ट्यामिषुरेकैव जनैः सकृद्विसृष्टा ।२८।

भवति स्फुटमागतो विपक्षान्न
सपक्षोऽपि हि निर्वृतेविघाता ।
शिशुपालबलानि कृष्णमुक्तः
सुतरां तेन तताप तोमरौघः ॥ २९ ॥

गुरुवेगविराविभिः पतत्रैरिषवः काञ्चनपिङ्गलाङ्गभासः ।
विनतासुतवत्तलं भुवः स्म व्यथितभ्रान्तभुजंगमं विशन्ति ।३०।

शतशः परुषाः पुरो विशङ्कं
शिशुपालेन शिलीमुखाः प्रयुक्ताः ।
परमर्मभिदोऽपि दानवारे-
रपराधा इव न व्यथां वितेनुः ॥ ३१ ॥

विहिताद्भुतलोकसृष्टिमाये जयमिच्छन्किल मायया मुरारौ ।
भुवनक्षयकालयोगनिद्रे नृपतिः स्वापनमस्त्रमाजहार ॥३२॥
सलिलार्द्रवराहदेहनीलो विदधद्भास्करमर्थशून्यसंज्ञम् ।
प्रचला यतलोचनारविन्दं विदधे तद्बलमन्धमन्धकारः ।३३।

गुरवोऽपि निषद्य यन्निदद्गु-
धनुषि क्षमापतयो न वाच्यमेतत् ।
क्षयितापदि जाग्रतोऽपि नित्यं
ननु तत्रैव हि तेऽभवन्निषण्णाः ।। ३४ ।।

श्लथतां व्रजतस्तथा परेषा-
मगलद्धारणशक्तिमुज्झतः स्वाम् ।
सुगृहीतमपि प्रमादभाजां
मनसः शास्त्रमिवास्त्रमग्रपाणेः ।। ३५ ।।

उचितस्वपनोऽपि नीरराशौ
स्वबलाम्भोनिधिमध्यगस्तदानीम् ।
भुवनत्रयकार्यजागरूकः
स परं तत्र परः पुमानजागः ।। ३६ ।।

अथ सूर्यरुचीव तस्य दृष्टावुदभूत्कौस्तुभदर्पणं गतायाम् ।
पटु धाम ततो न चाद्भुतं तद्विभुरिन्द्वर्कविलोचनः किलासौ ३७

महतः प्रणतेष्विव प्रसादः
स मणेरंशुचयः ककुम्मुखेषु ।
व्यकसद्विकसद्विलोचनेभ्यो
ददालोकमनाविलं बलेभ्यः ।। ३८ ।।

प्रकृतिं प्रतिपादुकैश्च पादै-
श्चक्लृपे भानुमतः पुनः प्रसर्तुम् ।
तमसोऽभिभवादपास्य मूर्च्छा-
मुपजीवत्सहसैव जीवलोकः ।। ३९ ।।

घनसंतमसैर्जवेन भूयो
यदुयोधैर्युधि रेधिरे द्विषन्तः ।
ननु वारिधरोपरोधमुक्तः
सुतरामुत्तपते पतिः प्रभाणाम् ।। ४० ।।

व्यवहार इवानृताभियोगं तिमिरं निर्जितवत्यथ प्रकाशे ।
रिपुरुल्बणभीमभोगभाजां भुजगानां जननीं जजाप विद्याम् ४१
पृथुदर्विभृतस्ततः फणीन्द्रा विषमाशीभिरनारतं वमन्तः ।
अभवन्युगपद्विलोलजिह्वायुगलीढोभयसृक्कभागमाविः ॥४२॥
कृतकेशविडम्बनैर्विहायो विजयं तत्क्षणमिच्छुभिश्छलेन ।
अमृताग्रभुवः पुरेव पुच्छं वडवाभर्तुरवारि काद्रवेयैः ॥ ४३ ॥
दधतस्तनिमानमानुपूर्व्या बभुरक्षिश्रवसो मुखे विशालाः ।
भरतज्ञकविप्रणीतकाव्यग्रथिताङ्का इव नाटकप्रपञ्चाः ।४४।
सविषश्वसनोद्धतोरुधूमव्यवधिम्लानमरीचि पन्नगानाम् ।
उपरागवतेव तिग्मभासा वपुरौदुम्बरमण्डलाभमूहे ॥ ४५ ॥
शिखिपिच्छकृतध्वजाव चूडक्षणसाशङ्कविवर्तमानभोगाः ।
यमपाशवदाशुबन्धनाय न्यपतन्वृष्णिगणेषु लेलिहानाः ॥४६॥
पृथुवारिधिवीचिमण्डलान्त विलसत्फेनवितानपाण्डुराणि ।
दधति स्म भुजङ्गमाङ्गमध्ये नवनिर्मोकरुचिध्वजांशुकानि ।४७।
कृतमण्डलबन्धमुल्लसद्भिः शिरसि प्रत्युरसं विलम्बमानैः ।
व्यरुचज्जनता भुजङ्गभोगैर्दलितेन्दीवरमालभारिणीव ॥४८॥
परिवेष्टितमूर्तयश्च मूलादुरगैराशिरसः सरत्नपुष्पैः ।
दधुरायतवल्लिवेष्टितानामुपमानं मनुजा महीरुहाणाम् ।४९।
बहुलाञ्जनपङ्कपट्टनीलद्युतयो देहमितस्ततः श्रयन्तः ।
दधिरे फणिनस्तुरङ्गमेषु स्फुट पल्याणनिबद्धवर्ध्रलीलाम् ।५०।
प्रसृतं रभसादयोभिनीला प्रतिपादं परितोऽभिवेष्टयन्ती ।
तनुरायतिशालिनी महाहेर्गजमन्दूरिव निश्चलं चकार ॥५१॥
अथ सस्मितवीक्षितादवज्ञाचलितैकोन्नमितभ्रु माधवेन ।
निजकेतुशिरःश्रितः सुपर्णादुदपप्तन्नयुतानि पक्षिराजाम् ।५२।

द्रुतहेमरुचः खगाः खगेन्द्रा-
दलघूदीरितनादमुत्पतन्तः ।

क्षणमैक्षिषतोच्चकैश्च भूमि-
ज्वलतः सप्तरुचेरिव स्फुलिङ्गाः ॥ ५३ ॥
उपमानमलाभिलोलपक्षक्षणविक्षिप्तमहाम्बुवाहमत्स्यैः ।
गगनार्णवमन्तरा सुमेरोः कुलजानां गरुडैरिलाधराणाम् ॥५४॥
पततां परितः परिस्फुरद्भिः
परिपिङ्गीकृतदिङ्मुखैर्मयूखैः ।
सुतरामभवद्दुरीक्ष्यबिम्ब-
स्तपनस्तत्किरणैरिवात्मदर्शः ॥ ५५ ॥
दधुरम्बुधिमन्थनाद्रिमन्थ भ्रमणायस्तफणीन्द्रपित्तजानाम् ।
रुचमुल्लसमानवैनतेयद्युतिभिन्नाः फणभारिणो मणीनाम् ॥५६॥
अभितः क्षुभिताम्बुराशिघोरध्वनिराकृष्टसमूलपादपौघः ।
जनयन्नभवद्युगान्तशङ्कामनिलो नागविपक्षपक्षजन्मा ॥५७॥
प्रचलत्पतगेन्द्रपत्रवातप्रसभोन्मूलितशैलदत्तमार्गैः ।
भयविह्वलमाशु दन्दशूकैर्विवशैराविविशे स्वमेव धाम ॥५८॥
खचरैः क्षयमक्षयेऽहिसैन्ये सुकृतैर्दुष्कृतवत्तदोपनीते ।
अयुगार्चिरिव ज्वलन्रुषाथो रिपुरौर्दाचिषमाजुहाव मन्त्रम् ॥५९॥
सहसा दधदुद्धताट्टहासश्रियमुत्त्रासितजन्तुना स्वनेन ।
विततायतहेतिबाहुरुच्चैरथ वेताल इवोत्पपात वह्निः ॥६०॥
चलितोद्धतधूमकेतनोऽसौ रभसादम्बररोहिरोहिताश्वः ।
द्रुतमारुतसारथिः शिखावान्कनकस्यन्दनसुन्दरश्चचाल ॥६१॥
ज्वलदम्बरकोटरान्तरालं
बहुलार्द्राम्बुदपत्रबद्धधूमम् ।
परिदीपितदीर्घकाष्ठमुच्चै-
स्तरुवद्विश्वमुवोष जातवेदाः ॥ ६२ ॥
गुरुतापविशुष्यदम्बुशुभ्राः क्षणमालग्नकृशानुताम्रभासः ।
स्वमसारतया मषाभवन्तः पुनराकारमवापुरम्बुवाहाः ॥६३॥

ज्वलितानललोलपल्लवान्ताः स्फुरदष्टापदपत्रपीतभासः ।
क्षणमात्रभवामभावकाले सुतरामापुरिवायतिं पताकाः ।६४।
निखिलामिति कुर्वतश्चिराय द्रुतचामीकरचारुतामिव द्याम् ।
प्रतिघातसमर्थमस्त्रमग्नेरथमेघंकरमस्मरन्मुरारिः ॥ ६५ ॥

चतुरम्बुधिगर्भघोरकुक्षे-
र्वपुषःसन्धिषु लीनसर्वसिन्धोः ।
उदगुः सलिलात्मनस्त्रिधाम्नो
जलवाहावलयः शिरोरुहेभ्यः ॥ ६६ ॥

ककुभः कृतनादमास्तृण-
न्तस्तिरयन्तः पटलानि भानुभासाम् ।
उदनंसिषुरभ्रमभ्रसङ्घाः
सपदि श्यामलिमानमानयन्तः ॥ ६७ ॥

तपनीयनिकर्षराजिगौरस्फुरदुत्तालतडिच्छटाट्टहासम् ।
अनुबद्धसमुद्धताम्बुवाहध्वनिताडम्बरमम्बरं बभूव ॥ ६८ ॥

सवितुः परिभावुकैर्मरीची-
नचिराभ्यक्तमतङ्गजाङ्गभाभिः ।
जलदैरभितः स्फुरद्भिरुच्चै-
र्विदधे केतनतेव धूमकेतोः ॥ ६९ ॥

ज्वलतः शमनाय चित्रभानोः
प्रलयाप्लावमिवाभिदर्शयन्तः ।
ववृषुर्घनादिनो नदीनां
प्रतटारोपितवारि वारिवाहाः ॥ ७० ॥

मधुरैरपि भूयसा स मेघ्यैः प्रथमं प्रत्युत वारिभिर्दिदीपे ।
पवमानसखस्ततः क्रमेण प्रणयक्रोध इवाशमद्विवादैः ॥७१॥

परितः प्रसभेन नीयमानः शरवर्षैरवसायमाश्रयाशः ।
प्रबलेषु कृती चकार विशुद्ध्यपदेशेन घनेष्वनुप्रवेशम् ॥ ७२ ॥

प्रयतः प्रशमं हुताशनस्य क्वचिदालक्ष्यत मुक्तमूलमर्चिः ।
बलभित्प्रहितायुधाभिघातात्त्रुटितं पत्रिपतेरिवैकपत्रम् ॥७३॥

व्यगमन् सहसा दिशां मुखेभ्यः
शमयित्वा शिखिनां घनाघनौघाः ।
उपकृत्य निसर्गतः परेषा-
मुपरोधं न हि कुर्वते महान्तः ॥ ७४ ॥

कृतदाहमुदर्चिषः शिखाभिः
परिषिक्तं मुहुरम्भसा नवेन ।
विगताम्बुधरव्रणं प्रपेदे
गगनं तापितपायितासिलक्ष्मीम् ॥ ७५ ॥

इति नरपतिरस्त्रं यद्यदाविश्चकार
प्रकुपित इव रोगः क्षिप्रकारी विकारम् ।
भिषगिव गुरुदोषच्छेदिनोपक्रमेण
क्रमविदथ मुरारिः प्रत्यहंस्तत्तदाशु ॥ ७६ ॥

शुद्धिं गतैरपि परामृजुभिर्विदित्वा
बाणैरजय्यमविघट्टितमर्मभिस्तम् ।
मर्मातिगैरनृजुभिर्नितरामशुद्धै-
र्वाक्शायकैरथ तुतोद तदा विपक्षः ॥ ७७ ॥

राहुस्त्रीस्तनयोरकारि सहसा येनाश्लथालिङ्गन-
व्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्वृथा ।
तेनाक्रोशत एव तस्य मुरजित्तत्काललोलामल-
ज्वालापल्लवितेन मूर्धविकलं चक्रेण चक्रे वपुः ॥७८॥

श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षै-
र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय ।

प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्भिस्मिताक्षै-
नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षांबभूवे ।७९।

।। इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्रयङ्के
शिशुपालवधो नाम विंशतितमः सर्गः ।। २० ।।

## ।। अथ कविवंशवर्णनम् ।।

सर्वाधिकारी सुकृताधिकारः श्रीवर्मलाख्यस्य बभूव राज्ञः ।
असक्तदृष्टिर्विरजाः सदैव देवोऽपरः सुप्रभदेवनामा ।। १ ।।

काले मितं तथ्यमुदर्कपथ्यं तथागतस्येव जनः सचेताः ।
विनानुरोधात् स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार ।।२।।

तस्याभवद्दत्तक इत्युदात्तः क्षमी मृदुर्धर्मपरस्तनूजः ।
यं वीक्ष्य वैयासमजातशत्रोर्वचो गुणग्राहि जनैः प्रतीये ।। ३ ।।

सर्वेण सर्वाश्रय इत्यनिन्द्यमानन्दभाजा जनितं जनेन ।
यश्च द्वितीयं स्वयमद्वितीयो मुख्यः सतां गौणमवाप नाम ।४।

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म
लक्ष्मीपतेश्चरितकीर्तनमात्रचारु ।
तस्यात्मजः सुकविकीर्तिदुराशयाऽदः
काव्यं व्यधत्त शिशुपालवधाभिधानम् ।। ५ ।।

।। इति कविवंशवर्णनम् ।।

।। **समाप्तोऽयं ग्रन्थः** ।।

---

॥ अर्हम् ॥

पू. पं. श्री पुष्पविजयगणिभ्यो नमः ।

महाकविश्रीहर्षप्रणीतं

# नैषधीयचरितम्

—०—

## ॥ १ ॥ प्रथम सर्गः ॥

निपीय यस्य क्षितिरक्षिणः कथा-
स्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥ १ ॥

रसैः कथा यस्य सुधावधीरणी
नलः स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रित-
ज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ २ ॥

पवित्रमत्रातनुते जगद्युगे
स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि
स्वसेविनीमेव पवित्रयिष्यति ॥ ३ ॥

अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान्कुतः स्वयं
न वेद्मि विद्यासु चतुर्दश स्वयम् ॥ ४ ॥

अमुष्य विद्या रसनाग्रनर्तकी
त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथग्जयश्रियाम् ॥ ५ ॥
दिगीशवृन्दांशविभूतिरीशिता
दिशां स कामप्रसरावरोधिनीम् ।
बभार शास्त्राणि दशं द्वयाधिकां
निजत्रिनेत्रावतरत्वबोधिकाम् ॥ ६ ॥
पदैश्चतुर्भिः सुकृते स्थिरीकृते
कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्द-
धावधर्मोऽपि कृशस्तपस्विताम् ॥ ७ ॥
यदस्य यात्रासु बलोद्धतं रजः
स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ
दधाति पङ्कीभवदङ्कतां विधौ ॥ ८ ॥
स्फुरद्धनुर्निस्वनतद्घनाशुग-
प्रगल्भवृष्टिव्ययितस्य सगरे ।
निजस्य तेजःशिखिनः परश्शता
वितेनुरिङ्गालमिवायशः परे ॥ ९ ॥
अनल्पदग्धारिपुरानलोज्ज्वलै-
निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया
रराज नीराजनया स राजघः ॥ १० ॥
निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिवृष्टयः ।

न तत्यजुर्नूनमनन्यविश्रमाः
प्रतीपभूपालमृगीदृशां दृशः ॥ ११ ॥
सितांशुवर्णैर्वयति स्म तद्गुणै-
र्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गावरणं रणाङ्गणे
यशःपटं तद्भटचातुरीतुरी ॥ १२ ॥
प्रतीपभूपैरिव किं ततो भिया
विरुद्धधर्मैरपि भेत्तृतोज्झिता ।
अमित्रजिन्मित्रजिदोजसा स
यद्विचारदृक्चारदृगप्यवर्तत ॥ १३ ॥
तदोजसस्तद्यशसः स्थिताविमौ
वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा
विधिः कुण्डलनां विधोरपि ॥ १४ ॥
अयं दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषां न चक्रेऽल्पितकल्पपादपः
प्रणीय दारिद्र्यदरिद्रतां नलः ॥ १५ ॥
विभज्य मेरुर्न यदर्थिसात्कृतो न
सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं
द्विफालबद्धाश्चिकुराःशिरःस्थितम् ॥ १६ ॥
अजस्रमभ्यासमुपेयुषा समं
मुदैव देवः कविना बुधेन च ।
दधौ पटीयान्समयं नयन्नयं
दिनेश्वरश्रीरुदयं दिने दिने ॥ १७ ॥

अधोविधानात्कमलप्रवालयोः
शिरःसु दानादखिलक्षमाभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा
पदं किमस्याङ्कितमूर्ध्वरेखया ॥ १८ ॥

जगज्जयं तेन च कोशमक्षयं
प्रणीतवान् शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं
वपुस्तथालिङ्गदथास्य यौवनम् ॥ १९ ॥

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व
तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां
न शारदः पार्विकशर्वरीश्वरः ॥ २० ॥

किमस्य लोम्नां कपटेन कोटिभि-
र्विधिर्न लेखाभिरजीगणद्गुणान् ।
न रोमकूपौघमिषाज्जगत्कृता
कृताश्च किं दूषणशून्यबिन्दवः ॥ २१ ॥

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने
ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुर-
त्कपाटदुर्धर्षतिरःप्रसारिता ॥ २२ ॥

स्वकेलिलेशस्मितनिन्दितेन्दुनो
निजांशदृक्तर्जितपद्मसंपदः ।
अतद्द्वयीजित्वरसुन्दरान्तरे
न तन्मुखस्य प्रतिमा चराचरे ॥ २३ ॥

सरोरुहं तस्य दृशैव निर्जितं
जिताः स्मितेनैव विधोरपि श्रियः ।

कुतः परं भव्यमहो महीयसी
तदाननस्योपमितौ दरिद्रता ॥ २४ ॥
स्वबालभारस्य तदुत्तमाङ्गजैः
समं चमर्येव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं
पुनः पुनः पुच्छविलोलनच्छलात् ॥ २५ ॥
महीभृतस्तस्य च मन्मथश्रिया
निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां
नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥ २६ ॥
निमीलनभ्रंशजुषा दृशा भृशं
निपीय तं यस्त्रिदशीभिरर्जितः ।
अमूस्तमभ्यासभरं विवृण्वते
निमेषनिःस्वैरधुनापि लोचनैः ॥ २७ ॥
अदस्तदाकर्णि फलाढ्यजीवितं
दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।
इति स्म चक्षुःश्रवसां प्रिया नले
स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥ २८ ॥
विलोकयन्तीभिरजस्रभावना-
बलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने
न विघ्नलेशोऽपि निमेषनिर्मितः ॥ २९ ॥
न का निशि स्वप्नगतं ददर्श तं
जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का
चकार वा न स्वमनोभवोद्भवम् ॥ ३० ॥

श्रियास्य योग्याहमिति स्वमीक्षितुं
करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया न
दर्पणः श्वासमलीमसः कृतः ॥ ३१ ॥
यथोह्यमानः खलु भोगभोजिना
प्रसह्य वैरोचनिजस्य पत्तनम् ।
विदर्भजाया मदनस्तथा मनो-
नलावरुद्धं वयसैव वेशितः ॥ ३२ ॥
नृपेऽनुरूपे निजरूपसंपदां
दिदेश तस्मिन्बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दना
मनोभवाज्ञैकवशंवदं मनः ॥ ३३ ॥
उपासनामेत्य पितुः स्म रज्यते
दिने दिने सावसरेषु वन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं
विनिद्ररोमाजनि शृण्वती नलम् ॥ ३४ ॥
कथाप्रसङ्गेषु मिथः सखीमुखा-
त्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया
मुदा तदाकर्णनसज्जकर्णया ॥ ३५ ॥
स्मरात्परासोरनिमेषलोचना-
द्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे
निदर्शनं नैषधमभ्यषेचयत् ॥ ३६ ॥
नलस्य पृष्टा निषधागता गुणा-
न्मिषेण दूतद्विजबन्दिचारणाः ।

निपीय तत्कीर्तिकथामथानया
चिराय तस्थे विमनायमानया ॥ ३७ ॥
प्रियं प्रियां च त्रिजगज्जयिश्रियौ
लिखाधिलीलागृहभित्ति कावपि ।
इति स्म सा कारुवरेण लेखितं
नलस्य च स्वस्य च सख्यमीक्षते ॥ ३८ ॥
मनोरथेन स्वपतीकृतं नलं
निशि क्व सा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवा-
त्करोति सुप्तिर्जनदर्शनातिथिम् ॥ ३९ ॥
निमीलितादक्षियुगाच्च निद्रया
हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि संगोप्य कदाप्यवीक्षितो
रहस्यमस्याः स महन्महीपतिः ॥ ४० ॥
अहो अहोभिर्महिमा हिमागमे-
ऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्तावपि मेदसां भरा
विभावरीभिर्बिभरांबभूविरे ॥ ४१ ॥
स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः
श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपनं
नलोऽपि लोकादशृणोद्गुणोत्करम् ॥ ४२ ॥
तमेव लब्ध्वावसरं ततः स्मरः
शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्तया
तया विनिर्जेतुमियेष नैषधम् ॥ ४३ ॥

अकारि तेन श्रवणातिथिर्गुणः
क्षमाभुजा भीमनृपात्मजालयः ।
तदुच्चधैर्यव्ययसहितेषुणा
स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥
अमुष्य धीरस्य जयाय साहसी
तदा खलु ज्यां विशिखैः सनाथयन् ।
निमज्जयामास यशांसि संशये
स्मरस्त्रिलोकीविजयार्जितान्यपि ॥ ४५ ॥
अनेन भैमीं घटयिष्यतस्तथा
विधेरवन्ध्येच्छतया व्यलासि तत् ।
अभेदि तत्तादृगनङ्गमार्गणै-
र्यदस्य पौष्पैरपि धैर्यकञ्चुकम् ॥ ४६ ॥
किमन्यदद्यापि यदस्त्रतापितः
पितामहो वारिजमाश्रयत्यहो ।
स्मरं तनुच्छायतया तमात्मनः
शशाक शङ्के स न लङ्घितुं नलः ॥ ४७ ॥
उरोभुवा कुम्भयुगेन जृम्भितं
नवोपहारेण वयःकृतेन किम् ।
त्रपासरिद्दुर्गमपि प्रतीर्य सा
नलस्य तन्वी हृदयं विवेश यत् ॥ ४८ ॥
अपह्नुवानस्य जनाय यन्निजा-
मधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी
निशा च शय्या च शशाङ्ककोमला ॥ ४९ ॥
स्मरोऽपतप्तोपि भृशं न स
प्रभुर्विदर्भराजं तनयामयाचत ।

त्यजन्त्यसून्शर्म च मानिनोवरं
त्यजन्ति न त्वेकमयाचितव्रतम् ॥ ५० ॥
मृषाविषादाभिनयादयं क्वचिज्जुगोप
निःश्वासततिं वियोगजाम् ।
विलेपनस्याधिकचन्द्रभागता-
विभावनाच्चापललाप पाण्डुताम् ॥ ५१ ॥
शशाक निह्नोतुमयेन तत्प्रिया-
मयं बभाषे यदलीकवीक्षिताम् ।
समाज एवालपितासु वैणिकै-
र्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च ॥ ५२ ॥
अवाप सापत्रपतां स भूपति-
र्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शंवरवैरिविक्रमे
क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५३ ॥
अलं नलं रोद्धममी किलाभव-
न्गुणा विवेकप्रमुखा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव
यत्सृजत्ययं सर्वनिसर्ग ईदृशः ॥ ५४ ॥
अनङ्गचिह्नं स विना शशाक
नो यदासितुं संसदि यत्नवानपि ।
क्षणं तदारामविहारकैतवा-
न्निषेवितुं देशमियेष निर्जनम् ॥ ५५ ॥
अथ श्रिया भर्त्सितमत्स्यलाञ्छनः
समं वयस्यैः स्वरहस्यवेदिभिः ।
पुरोपकण्ठोपवनं किलेक्षिता
दिदेश यानाय निदेशकारिणः ॥ ५६ ॥

अभी ततस्तस्य विभूषितं सितं
जवेऽपि मानेऽपि च पौरुषाधिकम् ।
उपाहरन्नश्वमजस्रचञ्चलैः
खुराञ्चलैः क्षोदितमन्दुरोदरम् ॥ ५७ ॥
अथान्तरेणावटुगामिनाध्वना
निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितै-
र्विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥
अजस्रभूमीतटकुट्टनोत्थितै-
रुपास्यमानं चरणषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतै-
र्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ ५९ ॥
चलाचलप्रोथतया महीभृते
स्ववेगदर्पानिव वक्तुमुत्सुकम् ।
अलं गिरा वेद किलायमाशयं
स्वयं हयस्येति च मौनमास्थितम् ॥ ६० ॥
महारथस्याध्वनि चक्रवर्तिनः
परानपेक्षोद्वहनाद्यशःसितम् ।
रदावदातांशुमिषादनीदृशां
हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१ ॥
सितत्विषश्चञ्चलतामुपेयुषो
मिषेण पुच्छस्य च केसरस्य ।
स्फुटं चलच्चामरयुग्मचिह्ननै-
रनिहुवानं निजवाजिराजताम् ॥ ६२ ॥
अपि द्विजिह्वाभ्यवहारपौरुषे
मुखानुषक्तायतवल्गुवल्गया ।

उपेयिवांसं प्रतिमल्लतां रय-
स्मये जितस्य प्रसभं गरुत्मतः ॥ ६३ ॥
स सिन्धुजं शीतमहःसहोदरं
हरन्तमुच्चैःश्रवसः श्रियं हयम् ।
जिताखिलक्ष्माभृदनल्पलोचन-
स्तमारुरोह क्षितिपाकशासनः ॥ ६४ ॥
निजा मयूखा इव तीक्ष्णदीधिति
स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।
तमश्ववारा जवनाश्वयायिनं
प्रकाशरूपा मनुजेशमन्वयुः ॥ ६५ ॥
चलन्नलंकृत्य महारयं हयं
स्ववाहवाहोचितवेषपेशलः ।
प्रमोदनिःस्पन्दतराक्षिपक्ष्मभि-
र्व्यलोकि लोकैर्नगरालयैर्नलः ॥ ६६ ॥
क्षणादथैष क्षणदापतिप्रभः
प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभि-
र्बहिः पुरोऽभूत्पुरुहूतपौरुषः ॥ ६७ ॥
ततः प्रतीच्छ प्रहरेति भाषिणी
परस्परोल्लासितशल्यपल्लवे ।
मृषामृधं सादिबले कुतूहला-
न्नलस्य नासीरगते वितेनतुः ॥ ६८ ॥
प्रयातुमस्माकमियं कियत्पदं
धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधक्षममुद्धत रजः ॥ ६९ ॥

हरेर्यदक्रामि पदैककेन खं
पदैश्चतुर्भिः क्रमणेऽपि तस्य नः ।
त्रपा हरीणामिति नम्रिताननै-
र्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥ ७० ॥
चमूचरास्तस्य नृपस्य सादिनो
जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डली-
मकारयन् भूरितुरंगमानपि ॥ ७१ ॥
द्विषद्भिरेवास्य विलङ्घिता दिशो
यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य मण्डली-
क्रियाश्रियाऽमण्डि तुरंगमैः स्थली ॥ ७२ ॥
अचीकरच्चारु हयेन या भ्रमी-
र्निजातपत्रस्य तलस्थले नलः ।
मरुत्किमद्यापि न तासु शिक्षते
वितत्य वात्यामयचक्रचङ्क्रमान् ॥ ७३ ॥
विवेश गत्वा स विलासकाननं
ततः क्षणात्क्षोणिपतिर्धृतीच्छया ।
प्रवालरागच्छुरितं सुषुप्सया
हरिर्घनच्छायमिवार्णसां निधिम् ॥ ७४ ॥
वनान्तपर्यन्तमुपेत्य सस्पृहं
क्रमेण तस्मिन्नवतीर्णदृक्पथे ।
न्यवर्ति दृष्टिप्रकरैः पुरौकसा-
मनुव्रजद्बन्धुसमाजबन्धुभिः ॥ ७५ ॥
ततः प्रसूने च फले च मञ्जुले
स संमुखस्थाङ्गुलिना जनाधिपः ।

निवेद्यमानं वनपालपाणिना
व्यलोकयत्काननकामनीयकम् ॥ ७६ ॥
फलानि पुष्पाणि च पल्लवे करे
वयोतिपातोद्गतवातवेपिते ।
स्थितैः समादाय महर्षिवार्धका-
द्वने तदातिथ्यमशिक्षि शाखिभिः ॥ ७७ ॥
विनिद्रपत्रालिगतालिकैतवा-
न्मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः
स कौतुको तत्र ददर्श केतकम् ॥ ७८ ॥
वियोगभाजां हृदि कण्टकैः कटु-
र्निधीयसे कर्णिशरः स्मरेण यत् ।
ततो दुराकर्षतया तदन्तकृ-
द्विगीयसे मन्मथदेहदाहिना ॥ ७९ ॥
त्वदग्रसूचीसचिवेन कामिनो-
र्मनोभवः सीव्यति दुर्यशःपटौ ।
स्फुटं स पत्रैः करपत्रमूर्तिभि-
र्वियोगिहृद्दारुणि दारुणायते ॥ ८० ॥
धनुर्मधुस्विन्नकरोऽपि भीमजा-
परं परागैस्तव धूलिहस्तयन् ।
प्रसूनधन्वा शरसात्करोति
मामिति क्रुधाकुश्यत तेन केतकम् ॥ ८१ ॥
विदर्भसुभ्रूस्तनतुङ्गताप्तये
घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखा-
न्स दाडिमे दोहदधूपिनि द्रुमे ॥ ८२ ॥

वियोगिनीमैक्षत दाडिमीमसौ
प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
फलस्तनस्थानविदीर्णरागिहृ-
द्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥ ८३ ॥
स्मरार्धचन्द्रेषुनिभे कृशीयसां
स्फुटं पलाशेऽध्वजुषां पलाशनात् ।
स वृन्तमालोकत खण्डमन्वितं
वियोगिहृत्खण्डिनि कालखण्डजम् ॥ ८४ ॥
नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥ ८५ ॥
विचिन्वतीः पान्थपतङ्गहिंसनै-
रपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकावलीः
स शम्बरारेर्बलिदीपिका इव ॥ ८६ ॥
अमन्यतासौ कुसुमेषुगर्भगं
परागमन्धंकरणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये
तदङ्गभस्मेव शरेषु संगतम् ॥ ८७ ॥
पिकाद्वने शृण्वति भृङ्गहुंकृतै-
र्दशामुदञ्चत्करुणे वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं
ददर्श दूनः स्थलपद्मिनीं नलः ॥ ८८ ॥
रसालसालः समदृश्यतामुना
स्फुरद्द्विरेफारवरोषहुंकृतिः ।

समीरलोलैर्मुकुलैर्वियोगिने
जनाय दित्सन्निव तर्जनाभियम् ॥ ८९ ॥
दिने दिने त्वं तनुरेधि रेऽधिकं
पुनः पुनर्मूर्च्छ च तापमृच्छ च ।
इतीव पान्थाञ्शपतः पिकान्द्विजा-
न्सखेदमैक्षिष्ट स लोहितेक्षणान् ॥ ९० ॥
अलिस्रजा कुड्मलमुच्चशेखरं
निपीय चाम्पेयमधीरया धिया ।
स धूमकेतुं विपदे वियोगिना-
मुदीतमातङ्कितवानशङ्कत ॥ ९१ ॥
गलत्परागं भ्रमिभङ्गिभिः पत-
त्प्रसक्तभृङ्गावलि नागकेसरम् ।
स मारनाराचनिघर्षणस्खल-
ज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥ ९२ ॥
तदङ्गमुद्दिश्य सुगन्धि पातुकाः
शिलीमुखालीः कुसुमाद्गुणस्पृशः ।
स्वचापदुर्निर्गतमार्गणभ्रमा-
त्स्मरः स्वमन्तीरवलोक्य लज्जितः ॥ ९३ ॥
मरुल्ललत्पल्लवकण्टकैः क्षतं
समुच्छलच्चन्दनसारसौरभम् ।
स वारनारीकुचसंचितोपमं
ददर्श मालूरफलं पचेलिमम् ॥ ९४ ॥
युवद्वयीचित्तनिमज्जनोचित-
प्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषुधीकृत्य धिया भयान्धया
स पाटलायाः स्तवकं प्रकम्पितः ॥ ९५ ॥

मुनिद्रुमः कोरकितः शितिद्युति-
वनेऽमुनाऽमन्यत सिंहिकासुतः ।
तमिस्रपक्षत्रुटिकूटभक्षितं
कलाकलापं किल वैधवं वमन् ॥ ९६ ॥
पुरा हठाक्षिप्ततुषारपाण्डुरच्छदा
वृतेर्वीरुधि बद्धविभ्रमाः ।
मिलन्निमीलं ससृजुर्विलोकिता
नभस्वतस्तं कुसुमेषु केलयः ॥ ९७ ॥
गता यदुत्सङ्गतले विशालतां
द्रुमाः शिरोभिः फलगौरवेण ताम् ।
कथं न धात्रीमतिमात्रनामितैः
स वन्दमानानभिनन्दति स्म तान् ॥ ९८ ॥
नृपाय तस्मै हि मितं ववानानिलैः
सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं केतकरेणुभिः सितं
वियोगिनेऽदत्त न कौमदीमुदः ॥ ९९ ॥
अयोगभाजोऽपि नृपस्य पश्यता
तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः
कुहूरुताहूयत चन्द्रवैरिणी ॥ १०० ॥
अशोकमर्थान्वितनामताशया-
गतान् शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः
प्रतीष्टकामज्वलदस्त्रजालकम् ॥ १०१ ॥
विलासवापीतटवीचिवादना-
त्पिकालिगीतेः शिखिलास्यलाघवात् ।

वनेऽपि तौर्यत्रिकमारराध तं
क्व भोगमाप्नोति न भाग्यभाग्जनः ॥१०२॥
तदर्थमध्याप्य जनेन तद्वने
शुका विमुक्ताः पटवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च सारिका-
स्तथैव तत्पौरुषगायनीकृताः ॥ १०३ ॥

इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च ।
अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम् ।१०४।

करेण मीनं निजकेतनं दधद्द्रुमालवालाम्बुनिवेशशङ्कया ।
व्यतर्कि सर्वर्तुघने वने मधुं स मित्रमत्रानुसरन्निव स्मरः ।१०५।

लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः १०६

अथ स्वमादाय भयेन मन्थना-
च्चिरत्नरत्नाधिकमुच्चितं चिरात् ।
निलीय तस्मिन्निव सन्नपांनिधि-
र्वने तडाको ददृशेऽवनीभुजा ॥ १०७ ॥

पयोनिलीनाभ्रमुकामुकावली-
रदाननन्तोरगपुच्छसुच्छवीन् ।
जलार्धरुद्धस्य तटान्तभूभिदो
मृणालजालस्य मिषाद्बभार यः ॥ १०८ ॥

तटान्तविश्रान्ततुरंगमच्छटा-
स्फुटानुबिम्बोदयचुम्बनेन यः ।
बभौ चलद्वीचिकशान्तशातनैः
सहस्रमुच्चैःश्रवसामिवाश्रयन् ॥ १०९ ॥

सिताम्बुजानां निवहस्य यश्छला-
द्बभावलिश्यामलितोदरश्रियाम् ।

तमःसमच्छायकलङ्कसंकुलं
कुलं सुधांशोर्बहलं वहन्बहु ॥ ११० ॥
रथाङ्गभाजा कमलानुषङ्गिणा
शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवा-
न्मृणालशेषाहिभुवान्वयायि यः ॥ १११ ॥
तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गरेखा बिभरांबभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसंचयश्च यः ।११२।
महीयसः पङ्कजमण्डलस्य
यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयो-
स्त्विषं विमुञ्चन्विधुकालकूटयोः ॥ ११३ ॥
चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमधूमधूमताम् ।११४।
प्रकाममादित्यमवाप्य कण्टकैः
करम्बितामोदभरं विवृण्वती ।
धृतस्फुटश्रीगृहविग्रहा दिवा
सरोजिनी यत्प्रभवाप्सरायिता ॥ ११५ ॥
यदम्बुपूरप्रतिबिम्बितायति-
र्मरुत्तरङ्गैस्तरलस्तटद्रुमः ।
निमज्ज्य मैनाकमहीभृतः सत-
स्ततान पक्षान्धुवतः सपक्षताम् ॥ ११६ ॥
पयोधिलक्ष्मीमुषि केलिपल्वले
रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विचरन्तमन्तिके
हिरण्मयं हंसमबोधि नैषधः ॥ ११७ ॥

प्रियासु बालासु रतक्षमासु च
द्विपत्रितं पल्लवितं च बिभ्रतम् ।
स्मराजितं रागमहीरुहाङ्कुरं
मिषेण चञ्च्वोश्चरणद्वयस्य च ।। ११८ ।।
महीमहेन्द्रस्तमवेक्ष्य स क्षणं
शकुन्तमेकान्तमनोविनोनदिम् ।
प्रियावियोगाद्विधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत् ।। ११९ ।।
अवश्यभव्येष्वनवग्रहग्रहा
यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते
जनस्य चित्तेन भृशावशात्मना ।। १२० ।।
अथावलम्ब्य क्षणमेकपादिकां
तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकंधरः शिरः
पिधाय पक्षेण रतिक्लमालसः ।। १२१ ।।
सनालमात्माननिर्जितप्रभं
ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं
स पीतमम्भःप्रभुचामरं नु किम् ।। १२२ ।।
कृतावरोहस्य हयादुपानहौ
ततः पदे रेजततुरस्य बिभ्रती ।
तयोः प्रवालैर्वनयोस्तथाम्बुजै-
र्नियोद्धुकामे किमु बद्धवर्मणी ।। १२३ ।।
विधाय मूर्ति कपटेन वामनीं
स्वयं बलिध्वंसिविडम्बिनीमयम् ।

उपेतपार्श्वश्चरणेन मौनिना
नृपः पतङ्गं समधत्त पाणिना ॥ १२४ ॥
तदात्तमात्मानमवेत्य संभ्रमा-
त्पुनः पुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां
करौ निरोद्धुर्दशति स्म केवलम् ॥ १२५ ॥
ससंभ्रमोत्पातिपतत्कुलाकुलं सरः
प्रपद्योत्कतयाऽनुकम्पताम् ।
तमूर्मिलोलैः पतगग्रहान्नृप
न्यवारयद्वारिरुहैः करैरिव ॥ १२६ ॥
पतत्रिणा तद्रुचिरेण वञ्चितं
श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा
चुकूज कूले कलहंसमण्डली ॥ १२७ ॥
न वासयोग्या वसुधेयमीदृश-
स्त्वमङ्ग ! यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः
खगास्तमाचुक्रुशुरारवैः खलु ॥ १२८ ॥
न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन्मुहुः ।
अवादि तेनाथ स मानसौकसा
जनाधिनाथः करपञ्जरस्पृशा ॥ १२९ ॥
धिगस्तु तृष्णातरलं भवन्मनः
समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरै-
र्भवेदमीभिः कमलोदयः कियान् ॥ १३० ॥

न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्मधनैर्निबर्हणं
विशिष्य विश्वासजुषां द्विषामपि ।। १३१ ।।
पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते ! कुविक्रमं
कृपाश्रये यः कृपणे पतत्रिणि ।। १३२ ।।
फलेन मूलेन च वारिभूरुहां
मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा
कथं न पत्या धरणी हृणीयते ।। १३३ ।।
इतीदृशैस्तं विरचय्य वाङ्मयैः
सचित्रवैलक्ष्यकृपं नृप खगः ।
दयासमुद्रे स तदाशयेऽतिथी-
चकार कारुण्यरसापगा गिरः ।। १३४ ।।
मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो
विधे ! त्वां करुणा रुणद्धि न ।। १३५ ।।
मुहूर्तमात्रं भवनिन्दया दया-
सखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तर-
स्त्वयैव मातः ! सुतशोकसागरः ।। १३६ ।।
मदर्थसंदेशमृणालमन्थरः
प्रियः कियद्दुर इति त्वयोदिते ।

विलोकयन्त्या रुदतोऽथ पक्षिण:
प्रिये ! स कीदृग्भविता तव क्षण: ।। १३७ ।।
कथं विधातर्मयि पाणिपङ्कजा-
त्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा ।। १३८ ।।
अयि ! स्वयूथ्यैरशनिक्षतोपमं
ममाद्य वृत्तान्तमिमं वतोदिता ।
मुखानि लोलाक्षि ! दिशामसंशयं
दशापि शून्यानि विलोकयिष्यसि ।। १३९ ।।
ममैव शोकेन विदीर्णवक्षसा
त्वया विचित्राङ्गि ! विपद्यते यदि ।
तदास्मि दैवेन हतोऽपि हा हत:
स्फुटं यतस्ते शिशव: परासव: ।। १४० ।।
तवापि हा हा विरहात्क्षुधाकुला:
कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथै-
र्गता: क्षणेनास्फुटितेक्षणा मम ।। १४१ ।।
सुता: ! कमाहूय चिराय चुंकृतै-
र्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य
स: स्रुतस्य सेकाद्बुबुधे नृपाश्रुण: ।। १४२ ।।
इत्थममुं विलपन्तममुञ्च-
द्दीनदयालुतयावनिपाल: ।
रूपमदर्शि धृतोऽसि यदर्थं
गच्छ यथेच्छमथेत्यभिधाय ।। १४३ ।।

आनन्दजाश्रुभिरनुस्रियमाण मार्गा-
न्प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् ।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानाम् ।।१४४।।
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ।१४५।

।। इति महाकविश्रीहर्षप्रणीते नैषधीयप्रकाशे
प्रथमः सर्गः समाप्तः ।। १ ।।

## ।। २ ।। द्वितीयः सर्गः ।।

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ।। १ ।।
अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ।। २ ।।
अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ।। ३ ।।
स गरुद्वनदुर्गदुर्ग्रहान्कटु कीटान्दशतः सतः क्वचित् ।
नुनुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ।। ४ ।।
अयमेत्य तडागनीडजैर्लघु पर्यव्रियताथ शङ्कितैः ।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ।। ५ ।।
वहतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः ।
स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ।। ६ ।।
पतगश्चिरकाललालनादतिविश्रम्भमवापितो नु सः ।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः ।। ७ ।।

नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु ।
अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत ॥ ८ ॥
मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः ।
स्मरसुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः ॥९॥
अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भूभुजां घ्नताम् ॥१०॥
यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।
कृतमातपसज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥ ११ ॥
उपनम्रमयाचितं हितं परिहर्तुं न तवापि सांप्रतम् ।
करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥१२॥
पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥१३॥
अचिरादुपकर्तुराचरेदथ वात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥ १४ ॥
भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम् ।
खगवागियमित्यतोऽपि किं न मुदं धास्यति कीरगीरिव ॥१५॥
स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥ १६ ॥
दमनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात् ।
वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ॥ १७ ॥
भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ॥ १८ ॥
श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् ।
व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ॥१९॥
चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि साबिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥ २० ॥

स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥ २१ ॥
अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि ।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते ? ॥ २२ ॥
नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥२३॥
अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् ।
लभतेऽधरबिम्बमित्यदःपदमस्या रदनच्छदं वदत् ॥ २४ ॥
हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ २५ ॥
धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधिः ।
भ्रमयत्युचितं विदर्भजाननमनीराजनवर्धमानकम् ॥ २६ ॥
सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात् ।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥२७॥
धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥२८॥
सदृशी तव शूर ! सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥ २९ ॥
वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः ॥३०॥
अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥३१॥
कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः ।
स तदुच्चकुचौ भवन्प्रभाझरचक्रभ्रममातनोति यत् ॥३२॥
भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥ ३३ ॥

उदरं नतमध्यपृष्ठतास्फुटदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥ ३४ ॥
उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ।
धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥ ३५ ॥
पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया ।
विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥३६॥
तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम् ।
तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनीम् ॥ ३७ ॥
जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः ।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्रदंपती ॥ ३८ ॥
श्रितपुण्यसरःसरित्कथं न समाधिक्षपिताखिलक्षपम् ।
जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ॥३९॥
सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता ।
अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ॥ ४० ॥
अवधृत्य दिवोऽपि यौवतैर्नसहाधीतवतीमिमामहम् ।
कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ॥ ४१ ॥
अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् ।
युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥ ४२ ॥
अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ।४३।
त्वयि वीर ! विराजते परं दमयन्तीकिलकिञ्चितं किल ।
तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥ ४४ ॥
तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।
इयमृद्धधना वृथावनी स्ववनी संप्रवदत्पिकापि का ॥ ४५ ॥
अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।
घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥ ४६ ॥

तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ।। ४७ ।।
तव संमतिमेव केवलामधिगन्तुं धिगिदं निवेदितम् ।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ।।४८।।
तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् ।
अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ।।४९।।
परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः ।
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः ।। ५० ।।
न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता ।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ।। ५१ ।।
न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातितानवलम्बे किमु मादृशेऽपि सा ।। ५२ ।।
भृशतापभृता मया भवान्मरुदासादि तुषारसारवान् ।
घनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः ।। ५३ ।।
शतशः श्रुतिमागतैव सा त्रिजगन्मोहमहौषधिर्मम ।
अमुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ।। ५४ ।।
अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि न सूक्ष्मसाक्षिणी वदनालंकृतिमात्रमक्षिणी ।।५५।।
अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः ।
मदनानलबोधने भवेत्खग ! धाय्या धिगधैर्यधारिणः ।।५६।।
विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः ।
खग ! कालकलत्रदिग्भवः पवनस्तद्विरहानलैधसा ।। ५७ ।।
प्रतिमासमसौ निशापतिः खग ! संगच्छति यद्दिनाधिपम् ।
किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ।। ५८ ।।
कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमूर्मम यच्चातितरामतीतपन् ।। ५९ ।।

तदिहानवधौ निमज्जतो मम कंदर्पशराग्निनीरधौ ।
भव पोत इवावलम्बनं विधिनाकस्मिकसृष्टसंनिधिः ॥ ६० ॥
अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥ ६१ ॥
तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः ।
अयि ! साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ! ॥६२॥
इति तं स विसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः ।
अविशद्वनवेश्म विस्मितः स्मृतिलग्नैः कलहंसशंसितैः ॥६३॥
अथ भीमसुतावलोकनैः सफलं कर्तुमहस्तदेव सः ।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥ ६४ ॥
प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम् ।
कलसं जलसंभृतं पुरः कलहंसः कलयांबभूव सः ॥ ६५ ॥
अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसं गतम् ।
स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतम् ॥ ६६ ॥
नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपं नगम् ।
स ददर्श पतङ्गपुंगवो विटपच्छन्नतरक्षुपन्नगम् ॥ ६७ ॥
स ययौ धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः ।
विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ॥ ६८ ॥
तनुदीधितिधारया रयाद्गतया लोकविलोकनामसौ ।
छदहेम कषन्निवालसत्कषपाषाणनिभे नभस्तले ॥ ६९ ॥
विनमद्भिरधःस्थितैः खगैर्झटिति श्येननिपातशङ्किभिः ।
स निरैक्षि दृशैकयोपरि स्यदझांकारितपत्रपद्धतिः ॥ ७० ॥
ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात् ।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तदृक्पथः ॥ ७१ ॥
न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचारुतम् ।
न सगोत्रजमन्ववादि वा गतिवेगप्रसरद्रुचा रुतम् ॥ ७२ ॥

अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥ ७३ ॥
दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥
नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणार्थमुवास वासरेऽप्यसदावृत्युदयत्तमं तमः ॥ ७५ ॥
सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ।७६।
सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया ।
न निशाखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी ॥७७॥
क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया ।
मणिवेश्ममयं स्म निर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥७८॥
विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या ।
परिखाकपटस्फुटस्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ॥ ७९ ॥
व्रजते दिवि यद्गृहावलीचलचेलाञ्चलदण्डताडनाः ।
व्यतरन्नरुणाय विश्रमं सृजते हेलिहयालिकालनाम् ॥ ८० ॥
क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक् ।
जगतां किल याखिलाद्भुताजनि सारैर्निजचिह्नधारिभिः ।८१।
दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः ।
कथमृच्छतु यत्र नाम न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ।८२।
बहुरूपक-शालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः ।
यदनेककसौधकधराहरिभिः कुक्षिगतीकृता इव ॥ ८३ ॥
बलिसद्मदिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः ।
अधराथ कृता ययेव सा विपरीताजनि भूविभूषया ॥ ८४ ॥
प्रतिहट्टपथे घरट्टजात्पथिकाह्वानदसक्तुसौरभैः ।
कलहान्न घनाद्यदुत्थितादधुनाप्युज्झति घर्घरस्वरः ॥ ८५ ॥

वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम् ।
घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्नुवास याम् ।। ८६ ।।
अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवेरवहद्द्राणपुरोपराध्यताम् ।। ८७ ।।
बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ।। ८८ ।।
यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ।। ८९ ।।
रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः किल ।
अनुसायमभुर्विलेपनापणकश्मीरजपण्यवीथयः ।। ९० ।।
विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते ।
मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ।। ९१ ।।
समम्रेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् ।
पणिता न जनारवै-रवैदपि गुञ्जन्तमलिं मलीमसम् ।। ९२ ।।
रविकान्तमयेन सेतुना सकलाहृज्वलनाहितोष्मणा ।
शिशिरे निशि गच्छतां पुरा चरणौ यत्र दुनोति नो हिमम् ।९३।
विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम् ।
शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः ।। ९४ ।।
परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किकाविषमा कुण्डलनामवापिता ।।९५।।
मुखपाणिपदाक्षिण पङ्कजैः रचिताङ्गेष्वपरेषु चम्पकैः ।
स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ।। ९६ ।।
जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः ।
ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः ।। ९७ ।।
स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या ।
स्वरभेदमुपेतु या कथं कलितानल्पमुखारवा न वा ।। ९८ ।।

स्वरुचारुणया पताकया दिनमर्केण समीयुषोत्तृषः ।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥९९॥
लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम् ।
श्रितमर्ककरैः पिपासु यन्नृपसद्मामलपद्मरागजम् ॥ १०० ॥
अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया ।
वलयायितशेषशायिन सखितामादित पीतवाससः ॥ १०१ ॥
अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥१०२
यदतिविमलनीलवेश्मरश्मि-
भ्रमरितभाः शुचिसौधवस्त्रवल्लिः ।
अलभत शमनस्वसुः शिशुत्वं
दिवसकराङ्कतले चला लुठन्ती ॥ १०३ ॥
स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी ।
साक्षादप्सरसो विमानकलितव्योमान एवाभव-
द्यत्र प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि ॥१०४॥
वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै-
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ।१०५।
विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।
विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥ १०६ ॥

अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विस्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥ १०७ ॥
अमरणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः
शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ॥१०८॥
अनुभवति शचीत्थं सा घृताचीमुखाभि-
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत् पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिः सार्धमाबद्धकेलिम् ।१०९।
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।११०।

॥ इति महाकविहर्षप्रणीते नैषधीयप्रकाशे द्वितीयः सर्गः
समाप्तः ॥ २ ॥

## ॥ ३ ॥ तृतीयः सर्गः ॥

आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसावतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥ १ ॥
आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः संभ्रान्तमन्तःकरणं चकार ॥२॥
नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि ।
प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ॥ ३ ॥

हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ।
ग्रहीतुकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥ ४ ॥
तामिङ्गितैरप्यनुमाय मायामयं न भैम्या वियदुत्पपात ।
तत्पाणिमात्मोपरिपातुकं तु मोघं वितेने प्लुतिलाघवेन ॥५॥
व्यर्थीकृतं पत्ररथेन तेन तथाऽवसाय व्यवसायमस्याः ।
परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यतालम् ॥ ६ ॥
उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः ।
यान्वेति मां द्रुह्यति मह्यमेव सात्रेत्युपालम्भि तयालिवर्गः ॥७॥
धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः ।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥८॥
शस्ता न हंसाभिमुखी पुनस्ते यात्रेति ताभिश्छलहस्यमाना ।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः ॥ ९ ॥
हंसोऽप्यसौ हंसगतेः सुदत्याः पुरः पुरश्चारु चलन्बभासे ।
वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः ॥ १० ॥
पदे पदे भाविनि भाविनी तं यथा करप्राप्यमवैति नूनम् ।
तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ॥ ११ ॥
रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयांचकार ।
तदा श्रमाम्भःकणभूषिताङ्गीं स कीरवन्मानुषवागवादीत् ॥१२॥
अये ! कियद्यावदुपैषि दूरं
व्यर्थं परिश्राम्यसि वा किमित्थम् ।
उदेति ते भीरपि किं नु बाले !
विलोकयन्त्या न घना वनालीः ॥ १३ ॥
वृथार्पयन्तीमपथे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः ।
आलीव पश्य प्रतिषेधतीयं कपोतहुंकारगिरा वनाली ॥ १४ ॥
धार्यः कथंकारमहं भवत्या वियद्विहारी वसुधैकगत्या ।
अहो ! शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाप्यनेन ॥१५॥

सहस्रपत्रासनपत्रहंसवंशस्य पत्राणि पतत्रिणः स्मः ।
अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥१६॥
स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥१७॥
धातुर्नियोगादिह नैषधीयं लीलासरः सेवितुमागतेषु ।
हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ॥ १८ ॥
विधेः कदाचिद्भ्रमणीविलासे
श्रमातुरेभ्यः स्वमहत्तरेभ्यः ।
स्कन्धस्य विश्रान्तिमदां तदादि
श्राम्यामि नाविश्रमविश्वगोऽपि ॥ १९ ॥
बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषः स्यात् ।
एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य ॥२०॥
इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।
महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥ २१ ॥
सुवर्णशैलादवतीर्य तूर्णं स्वर्वाहिनीवारिकणावकीर्णैः ।
तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यैः ॥ २२ ॥
क्रियेत चेत्साधुविभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलासै-
स्तावत्क्षमानामपदं बहु स्यात् ॥ २३ ॥
राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यम् ।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमन्त्यम् २४
दारिद्र्यदारिद्रविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे ।
संतुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् ।२५।
अस्मत्किल श्रोतसुधां विधाय रम्भा चिरं भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥ २६ ॥

स्वर्लोकमस्माभिरितः प्रयातैः
केलीषु तद्गानगुणान्निपीय ।
हा हेति गायन्यदशोचि तेन
नाम्नैव हाहा हरिगायनोऽभूत् ॥ २७ ॥
शृण्वन्सदारस्तदुदारभावं हृष्यन्मुहुर्लोम पुलोमजायाः ।
पुण्येन नालोकत लोकपालः प्रमोदबाष्पावृतनेत्रमालः ॥२८॥
सापीश्वरे शृण्वति तद्गुणौघान्प्रसह्य चेतो हरतोऽर्धशम्भुः ।
अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन ॥ २९ ॥
अलं सजन्धर्मविधौ विधाता
रुणद्धि मौनस्य मिषेण वाणीम् ।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां
न वेद तां वेदजडः स वक्राम् ॥ ३० ॥
श्रियस्तदालिङ्गनभूर्न नूता व्रतक्षतिः कापि पतिव्रतायाः ।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणुनापि ॥३१॥
धिक् तं विधेः पाणिमजातलज्जं
निर्माति यः पर्वणि पूर्णमिन्दुम् ।
मन्ये स विज्ञः स्मृततन्मुखश्रीः
कृत्वार्धमौज्झद्धरमूर्ध्नि यस्तम् ॥ ३२ ॥
निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥ ३३ ॥
संज्ञाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यञ्जनलास्यनृत्यैः ।
तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥३४॥
रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः ।
चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः ।३५।
श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मराम ।
वासेन तस्मिन्क्षमयोश्च सम्यग्बुद्धौ न दध्मः खलु शेषबुद्धौ ।३६।

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः ।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ॥३७॥
संग्रामभूमीषु भवत्यरीणामस्त्रैर्नदीमातृकतां गतासु ।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥३८॥
यशो यदस्याजनि संयुगेषु कण्डूलभावं भजता भुजेन ।
हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं तदीयम् ॥ ३९ ॥
यदि त्रिलोकी गणनापरा स्यात्त-
स्याः समाप्तिर्य नायुषः स्यात् ।
पारेपरार्धं गणितं यदि स्या-
द्गणेयनिःशेषगुणोऽपि स स्यात् ॥ ४० ॥
अवारितद्वारतया तिरश्चामन्तपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विलेषमध्यापयामः परमाणुमध्याः ॥४१॥
पीयूषधारानधराभिरन्तस्तासां
रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः
काव्येन काव्यं सृजतास्ताभिः ॥ ४२ ॥
काभिर्न तत्राभिनवस्मराज्ञाविश्वासनिक्षेपवणिक् क्रियेऽहम् ।
जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥४३॥
वार्तापि नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे ।
विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥४४॥
नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या ।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥४५॥
तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म ।
रसालवन्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥
तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य ।
अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ ४७ ॥

निशा-शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥४८॥
वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्यासि नलेतरेण ।
संदर्भ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥ ४९ ॥
विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम् ।
त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रिचक्रे ॥५०॥

अन्येन पत्या त्वयि योजितायां
विज्ञत्वकीर्त्या गतजन्मनो वा ।
जनापवादार्णवमुत्तरीतुं
विधा विधातुः कतमा तरीः स्यात् ॥ ५१ ॥

आस्तां तदप्रस्तुतचिन्तयालं मयासि तन्वि ! श्रमितातिवेलम् ।
सोऽहं तदागः परिमार्ष्टुकामः किमीप्सितं ते विदधेऽभिधेहि ५२
इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः ।
ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥५३॥
किंचित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाच्यं मनसा मुहूर्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥ ५४ ॥
धिक्चापले वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरलोभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या मया तटस्थस्त्वमुपद्रुतोऽसि ।५५।
आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः ।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ।५६।
अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य ! तावत् ।
हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ५७
मत्प्रीतिमाधित्ससि कां त्वदीक्षामुदं मदक्ष्णोरपि यातिशेताम् ।
निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुः सृजति प्रजानाम् ।५८।
मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः ।
का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदलज्जा ।५९।

वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः ।
तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ।६०।
मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किंचन संशयालुर्गिरा मुखाम्भोजमयं युयोज ।।६१।।

करेण वाञ्छेव विधुं विधर्तुं
यमित्थमात्थादरिणी तमर्थम् ।
पातुं श्रुतिभ्यामपि नाधिकुर्वे
वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ।।६२।।
अवाप्यते वा किमियद्भवत्या
चित्तैकपद्यामपि विद्यते यः ।
यत्रान्धकारः किल चेतसोऽपि
जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ।।६३।।

ईशाणिमैश्वर्यविवर्तमध्ये लोकेशलोकेशयलोकमध्ये ।
तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ।।६४।।
मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः ।
ह्रियेव ताभ्यश्चलतीयमद्धा पथा न सत्सङ्गगुणेन नद्धा ।।६५।।
पर्यङ्कतापन्नसरस्वदङ्कां लङ्कां पुरीमप्यभिलाषि चित्तम् ।
कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु ।।६६।।
इतीरिता पत्त्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी ।
चेतो नलङ्कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ।६७।
विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणामेनां स चक्राङ्गपतङ्गशक्रः ।६८।
नृपेण पाणिग्रहणे स्पृहेति नलं मनः कामयते ममेति ।
आश्लेषि न श्लेषकवेर्भवत्याः श्लोकद्वयार्थः सुधिया मया किम् ६९
त्वच्चेतसः स्थैर्यविपर्ययं तु संभाव्य भाव्यस्मि तमज्ञ एव ।
लक्ष्ये हि बालाहृदि लोलशीले दरापराद्धेषुरपि स्मरः स्यात् ७०

महीमहेन्द्रः खलु नैषधेन्दुस्तद्वोधनीयः कथमित्थमेव ।
प्रयोजनं सांशयिकं प्रतीक्ष्यपृथग्जनेनेव स मद्विधेन ॥७१॥
पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे ।
त्वदर्थमर्थित्वकृति प्रतीतिः कीदृङ्मयि स्यान्निषधेश्वरस्य ॥७२॥
त्वयापि किं शङ्कितविक्रियेऽस्मिन्नधिक्रिये वा विषये निधातुम् ।
इतः पृथक्प्रार्थयसे तु यद्यत्कुर्वे तदुर्वीपतिपुत्रि ! सर्वम् ॥७३॥
श्रवःप्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना ।
ऊचे ह्रियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ॥ ७४ ॥
मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषा ।
निशोऽपि सोमेतरकान्तशङ्कामोंकारमग्रेसरमस्य कुर्याः ॥७५॥
सरोजिनीमानसरागवृत्तेरनर्कसंपर्कमतर्कयित्वा ।
मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ॥७६॥
साधु त्वया तर्कितमेतदेव स्वेनानलं यत्किल संश्रयिष्ये ।
विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ७७
मद्विप्रलभ्यं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः ।
अशक्यशङ्काव्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के तु ॥७८॥
अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥७९॥
तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुता ते ।
अहेलिना किं नलिनी विधत्ते सुधाकरेणापि सुधाकरेण ॥८०॥
तदेकलुब्धे हृदि मेऽस्ति लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम् ।
चित्ते ममैकः सकलत्रिलोकीसारो निधिः पद्ममुखः स एव ॥८१॥
श्रुतः स दृष्टश्च हरित्सु मोहाद्ध्यातः स नीरन्ध्रितबुद्धिधारम् ।
ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेकशेषः ॥८२॥

संचीयतामाश्रुतपालनोत्थं
मत्प्राणविश्राणनजं च पुण्यम् ।

निवार्यतामार्य ! वृथा विशङ्का
भद्रेऽपि मुद्रेयमये ! भृशं का ॥ ८३ ॥
अलं विलङ्घ्य प्रियविज्ञ ! याच्ञां
कृत्वापि वाम्यं विविधं विधेये ।
यशःपथादाश्रवतापदोत्थात्खलु
स्खलित्वास्तखलोक्तिखेलात् ॥ ८४ ॥
स्वजीवमप्यार्तमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः ।
मह्यं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः ८५
दत्त्वात्मजीवं त्वयि जीवदेऽपि शुध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणान्यशोद्भ्रममुद्रदारिद्र्यसमुद्रमग्नाम् ॥८६॥
क्रीणीष्व मज्जीवितमेव पण्यमन्यन्न चेदस्ति तदस्तु पुण्यम् ।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ॥८७॥
वराटिकोपक्रिययापि लभ्यान्नेभ्याः कृतज्ञानथवाद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ८८
स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे ।
न हीतरस्माद्घटते यदेत्य स्वयं तदाप्तिप्रतिभूर्ममाभूः ॥८९॥
अकाण्डमेवात्मभुवार्जितस्य भूत्वापि मूलं मयि वीरणस्य ।
भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥९०॥
अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः ।
गुरूपदेशं प्रतिभेव तीक्ष्णा प्रतीक्षते जातु न कालमर्तिः ॥९१॥
अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥९२॥
शुद्धान्तसंभोगनितान्ततुष्टे
न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥ ९३ ॥

त्वया विधेया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस ! ॥९४॥
धरातुरासाहि मदर्थयाञ्चा कार्या न कार्यान्तरचुम्बिचित्ते ।
तदार्थितस्यानवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥९५॥

विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन्समयं समीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः
कार्यस्य कार्यस्य शुभा विभाति ॥९६॥
इत्युक्तवत्या यदलोपि लज्जा
सानौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषताया-
मुन्माद्य यस्तत्तदवीवदत्ताम् ॥९७॥

उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते ।
पूर्वः परस्पर्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ॥९८॥
तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् ।
अमोचि चञ्चूपुटमौनमुद्रा विहायसा तेन विहस्य भूयः ॥९९॥
इदं यदि क्ष्मापतिपुत्रि ! तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन् ।
त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाजनि योजनेयम् ॥१००॥
त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः ।
त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयं चरितार्थमस्तु ॥१०१॥
तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं सास्य न ताप्यतेऽपि ।
इत्यभ्यसूयन्निव देहतापं तस्यातनुस्त्वद्विरहाद्विधत्ते ॥१०२॥
लिपिं दशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः ।
चक्षुर्भरैरर्पितमात्मचक्षूरागं स धत्ते रचितं त्वया नु ॥१०३॥
पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ते ।
ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥१०४॥

त्वं हृद्गता भैमि ! बहिर्गतापि
प्राणायिता नासिकयास्यगत्या ।
न चित्रमाक्रामतो तत्र चित्र-
मेतन्मनो यद्भवदेकवृत्ति ॥ १०५ ॥
अजस्रमारोहसि दूरदीर्घां
संकल्पसोपानतति तदीयाम् ।
श्वासान्स वर्षत्यधिकं पुनर्यद्-
ध्यानात्तव त्वन्मयतां तदाप्य ॥ १०६ ॥
हृत्तस्य यन्मन्त्रयते रहस्त्वां
तद्व्यक्तमामन्त्रयते मुखं यत् ।
तद्वैरिपुष्पायुधमित्रचन्द्र-
सख्यौचिती सा खलु तन्मुखस्य ॥ १०७ ॥
स्थितस्य रात्रावधिशय्य शय्यां
मोहे मनस्तस्य निमज्जयन्ती ।
आलिङ्ग्य या चुम्बति लोचने सा
निद्राधुना न त्वदृतेऽङ्गना वा ॥ १०८ ॥
स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि ।
अनङ्गतामप्ययमाप्यमानः स्पर्धां न सार्धं विजहाति तेन ।१०६।
त्वत्प्रापकात्त्रस्यति नैनसोऽपि
त्वय्येष दास्येऽपि न लज्जते यत् ।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः
स्वभावोऽपि कियान्किमस्य ॥ ११० ॥
स्मारं ज्वरं घोरमपत्रपिष्णोः
सिद्धागदङ्कारचये चिकित्सौ ।
निदानमौनादविशद्विशाला
साङ्क्रामिकी तस्य रुजेव लज्जा ॥ १११ ॥

बिभेति रुष्टासि किलेत्यकस्मात्सत्वां किलापेति हसत्यकाण्डे ।
यान्तीमिव त्वामनु यात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम् ११२
भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः ।
मूर्च्छामयद्वीपमहान्ध्यपङ्के हा हा महीभृद्भटकुञ्जरोऽयम् ११३

सव्यापसव्यत्यजनाद्द्विरुक्तैः
पञ्चेषुबाणैः पृथगर्जितासु ।
दशासु शेषा खलु तद्दशा या
तया नभः पुष्यतु कोरकेण ॥ ११४ ॥
त्वयि स्मराधेः सततास्मितेन
प्रस्थापितो भूमिभृतास्मि तेन ।
आगत्य भूतः सफलो भवत्या
भावप्रतीत्या गुणलोभवत्याः ॥ ११५ ॥
धन्यासि वैदर्भि ! गुणैरुदारै-
र्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः कः खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥ ११६ ॥
नलेन भायाः शशिना निशेव
त्वया स भायान्निशया शशीव ।
पुनः पुनस्तद्युगयुग्विधाता
योग्यामुपास्ते नु युवां युयुक्षुः ॥ ११७ ॥
स्तनद्वये तन्वि ! परं तवैव
पृथौ यदि प्राप्स्यति नैषधस्य ।
अनल्पवैदग्ध्यविवर्धिनीनां
पत्रावलीनां वलना समाप्तिम् ॥ ११८ ॥
एकः सुधांशुर्न कथंचन स्या-
त्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।

त्वल्लोचनासेचनकस्तदस्तु
नलास्यशीतद्युतिसद्द्वितीयः ॥ ११९ ॥
अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः १२०
यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्ते ।
अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव १२१
कांसीकृतासीत्खलु मण्डलीन्दोः
संसक्तरश्मिप्रकरा स्मरेण ।
तुला च नाराचलता निजैव
मिथोनुरागस्य समीकृतौ वाम् ॥ १२२ ॥
सस्वस्तु तस्वेदमधूत्थसान्द्रे
तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्रलेखा-
स्तन्निर्गतास्तं प्रविशन्तु भूयः ॥ १२३ ॥
बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः ।
प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि ! युवां युवानौ ।१२४।
अन्योन्यसंगमवशादधुना विभातां
तस्यापि तेऽपि मनसी विकसद्विलासे ।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्त-
मादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥१२५॥
कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।
ग्रीवालंकृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कचरेखयेव निवसत्सिन्दूरसौन्दर्यया ॥१२६॥
त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो-
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् ।

यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस-
न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ।१२७।
पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भ्रूलमूले धनू
रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे ।
निर्विद्याश्रयदाश्रयं स वितनुस्त्वां तज्जयायाधुना
पत्रालिस्त्वदुरोजशैलनिलया तत्पर्णशालायते ॥१२८॥
इत्यालपत्यथ पतत्रिणि तत्र भैमीं
सख्यश्चिरात्तदनुसंधिपराः परीयुः ।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य
वेगाज्जगाम निषधाधिपराजधानीम् ॥ १२९ ॥
चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रय-
त्प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात् ।
स्वादं स्वादमसीममिष्टसुरभि प्राप्तापि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्च्छ मूर्च्छामपि ।१३०।
तस्या दृशो नृपतिबन्धुमनुव्रजन्त्या-
स्तं बाष्पवारि न चिरादवधीबभूव ।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टे-
राराद्पि व्यवदधे न तु चित्तवृत्तेः ॥ १३१ ॥
अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन्पक्षतेः कम्पभेदै-
राख्यातुं वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे ।
कान्तारे निर्गतासि प्रियसखि ! पदवी विस्मृता किं नु मुग्धे !
मा रोदीरेहि यामेत्युपहृतवचसो निन्युरन्यां वयस्याः १३२
सरसि नृपमपश्यद्यत्र तत्तीरभाजः
स्मरतरलमशोकानोकहस्योपमूलम् ।
किसलयदलतल्पम्लायिनं प्राप तं स
ज्वलदसमशरेषुस्पर्धिपुष्पर्द्धिमौलेः ॥ १३३ ॥

परवति दमयन्ति ! त्वां न किंचिद्वदामि
द्रुतमुपनम किं मामाह सा शंस हंस ! ।
इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ।। १३४ ।।
कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन्भाषितं स प्रियायाः ।
अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ।। १३५ ।।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।१३६।

।। कविहर्षविरचिते नैषधीयप्रकाशे
तृतीयः सर्गः समाप्तः ।।३।।

## ।। ४ ।। चतुर्थः सर्गः ।।

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशःकुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ।१।
यदतनुज्वरभाक्तनुते स्म सा प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ।।२।।
ध्रुवमधीतवतीयमधीरतां दयितदूतपतद्गतवेगतः ।
स्थितिविरोधकरीं द्वयणुकोदरी तदुदितः स हि यो यदनन्तरः ।३।
अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ।४।

किमु तदन्तरुभौ भिषजौ दिवः
स्मरनलौ विशतः स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां
मखभुजामधिपेन नियोजितौ ॥ ५ ॥
कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम् ।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ।६।
तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा ।
अनलसंगतितापमुपैतु नो कुसुमचापकुलालविलासजम् ॥७॥
अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा ।
स्पृशति तत्कदनं कदलीतरुर्यदि मरुज्वलदूषरदूषितः ॥ ८ ॥
स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः ।
अनपिधानपतत्तपनातपं तपनिपीतसरःसरसीरुहम् ॥ ९ ॥
मदनतापभरेण विदीर्य नो यदुदपाति हृदा दमनस्वसुः ।
निबिडपीनकुचद्वययन्त्रया तमपराधमधात्प्रतिबन्धतो ॥१०॥
निविशते यदि शूकशिखा पदे
सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं न ता-
मवनिभृत्तु निविश्य हृदि स्थितः ॥ ११ ॥
मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयान्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययोरपि न संमुखवास्तुनि वस्तुनि ॥१२॥
हृदि दमस्वसुरश्रुझरप्लुते
प्रतिफलद्विरहात्तमुखानतेः ।
हृदयभाजमराजत चुम्बितुं
नलमुपेत्य किलागमि तन्मुखम् ॥१३॥
सुहृदमग्निमुदञ्चयितुं स्मरं
मनसि गन्धवहेन मृगीदृशः ।

अकलि निःश्वसितेन विनिर्गमा-
नुमितनिह्नुतवेशनमायिता ॥ १४ ॥
विरहपाण्डिमरागतमोमषी-
शितिमतन्निजपीतिमवर्णकैः ।
दश दिशः खलु तद्दृगकल्प-
यल्लिपिकरी नलरूपकचित्रिताः ॥ १५ ॥
स्मरकृतां हृदयस्य मुहुर्दशां
बहु वदन्निव निःश्वसितानिलः ।
व्यधित वाससि कम्पमदःश्रिते
असति कः सति नाश्रयबाधने ॥ १६ ॥
करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे ।
रविमहो बहुपीतचरं चिरादनिशतापमिषादुदसृज्यत ॥ १७ ॥
उदयति स्म तदद्भुतमालिभि-
र्धरणिभृद्भुवि तत्र विमृश्य यत् ।
अनुमितोऽपि च बाष्पनिरीक्षणाद्-
व्यभिचचार न तापकरो नलः ॥ १८ ॥
हृदि विदर्भभुवः प्रहरञ्शरै रतिपतिर्निषधाधिपतेः कृते ।
कृततदन्तरगस्वदहृव्यथैः फलदनीतिरमूर्च्छदलं खलु ॥ १९ ॥
विधुरमानि तया यदि भानुमान्
कथमहो स तु तद्धृदयं तथा ।
अपि वियोगभरास्फुटनस्फुटी-
कृतदृषत्त्वमजिज्वलदंशुभिः ॥ २० ॥
हृदयदत्तसरोरुहया तया
क्व सदृगस्तु वियोगनिमग्नया ।
प्रियधनुः परिरभ्य हृदा रतिः
किमनुमर्तुमशेत चिताचिषि ॥ २१ ॥

अनलभावमियं स्वनिवासिनो
न विरहस्य रहस्यमबुध्यत ।
प्रशमनाय विधाय तृणान्यसू-
ञ्ज्वलति तत्र यदुज्झितुमैहत ॥२२॥

प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदु नाम यत् ।
तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ॥२३॥

रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ज्वरयितुं विशवेशधराविशत् ॥२४॥

हृदि विदर्भभुवोऽश्रुभृति स्फुटं
विनमदास्यतया प्रतिबिम्बितम् ।
मुखदगोष्ठमरोपि मनोभुवा
तदुपमाकुसुमान्यखिलाः शराः ॥२५॥

विरहपाण्डुकपोलतले विधु-
र्व्यधित भैमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं
निजसखं सुखमङ्कमृगार्पणात् ॥२६॥

विरहतापिनि चन्दनपांशुभि-
र्वपुषि सार्पितपाण्डिममण्डना ।
विषधराभविसाभरणा दधे
रतिपतिं प्रति शंभुविभीषिकाम् ॥२७॥

विनिहितं परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ ।
उपनमन्सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ॥ २८ ॥

स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम् ।
श्रयितुमर्धपथे कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम् ॥२९॥

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति ।
जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ॥३०॥

त्वदितरो न हृदापि मया धृतः
पतिरितीव नलं हृदयेशयम् ।
स्मरहविर्भुजि बोधयति स्म सा
विरहपाण्डुतया निजशुद्धताम् ॥३१॥

विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ॥३२॥

इयमनङ्गशरावलिपन्नग-
क्षतविसारिवियोगविषावशा ।
शशिकलेव खरांशुकरार्दिता
करुणनीरनिधौ निदधौ न कम् ॥३३॥

ज्वलति मन्मथवेदनया निजे
हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोस्त्रपया सविधस्थयो-
र्मलिनतामभजद्भुजयोर्भृशम् ॥३४॥

पिकरुतिश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ ।
सततत्द्गतहृच्छयकेतुना हृतमिव स्वतनूघनघर्षिणा ॥३५॥

न खलु मोहवशेन तदाननं नलमनः शशिकान्तमबोधि तत् ।
इतरथा शशिनोऽभ्युदये ततः कथमसुस्रुवदस्रुमयं पयः ॥३६॥

रतिपतेर्विजयास्त्रमिषुर्यथा
जयति भीमसुतापि तथैव सा ।
स्वविशिखानिव पञ्चतया ततो
नियतमैहत योजयितुं स ताम् ॥३७॥

शशिमयं दहनास्त्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी ।
झटिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे ॥३८॥

अतनुना नवमम्बुदमाम्बुदं
सुतनुरस्त्रमुदस्तमवेक्ष्य सा ।

उचितमायतनिःश्वसितच्छला-
च्छ्वसनशस्त्रममुञ्चदमुं प्रति ॥३९॥

रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले ।
तदुरुतापभयात्तमृणालिकामयमियं भुजगास्त्रमिवादित ॥४०॥

व्यधित तद्धृदि शल्यमिव द्वयं
विरहितां च तथापि च जीवितम् ।
किमथ तत्र निहत्य निखातवान्-
रतिपतिः स्तनबिल्वयुगेन तत् ॥४१॥

अतिशरव्ययता मदनेन तां
निखिलपुष्पमयस्वशरव्ययात् ।
स्फुटमकारि फलान्यपि मुञ्चता
तदुरसि स्तनतालयुगार्पणम् ॥४२॥

अथ मुहुर्बहुनिन्दितचन्द्रया
स्तुतविधुंतुदया च तया मुहुः ।
पतितया स्मरतापमये गदे
निजगदेऽश्रुविमिश्रमुखी सखी ॥४३॥

नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्वतवद्युवक्षणमितं न कथं गणितागमे ॥४४॥

जनुरधत्त सती स्मरतापिता
हिमवतो न तु तन्महिमादृता ।
ज्वलति भालतले लिखितः सती-
विरह एव हरस्य न लोचनम् ॥४५॥

दहनजा न पृथुर्दवथुव्यथा
विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः
प्रियमपासुमुपासितुमुद्धराः ॥४६॥

हृदि लुठन्ति कला नितराममू-
विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु वहिष्कृताः
सखि ! विलोकय दुर्विनयं विधोः ॥ ४७ ॥
अयि ! विधुं परिपृच्छ गुरोः कुतः
स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशंभुगलाद्गरलात्त्वया
किमुदधौ जड ! वा वडवानलात् ॥ ४८ ॥
अयमयोगिवधूवधपातकै-
र्भ्रमिमवाप्य दिवः खलु पात्यते ।
शितिनिशाद्दषदि स्फुटदुत्पत-
त्कणगणाधिकतारकिताम्बरः ॥ ४९ ॥
त्वमभिधेहि विधुं सखि ! मद्गिरा
किमिदमीदृगधिक्रियते त्वया ।
न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ॥ ५० ॥
निपततापि न मन्दरभूभृता
त्वमुदधौ शशलाञ्छन ! चूर्णितः ।
अपि मुनेर्जठरार्चिषि जीर्णतां
बत गतोऽसि न पीतपयोनिधेः ॥ ५१ ॥
किमसुभिर्ग्लपितैर्जड ! मन्यसे
मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां
नलमुखेन्दुपरां विबुधः स्मरः ॥ ५२ ॥
मुखरय स्वयशोनवडिण्डिमं
जलनिधेः कुलमुज्ज्वलयाधुना ।

अपि गृहाण वधूवधपौरुषं
हरिणलाञ्छन ! मुञ्च कदर्थनाम् ।। ५३ ।।
निशि शशिन् ! भज कैतवभानुता-
मसति भास्वति तापय पाप ! माम् ।
अहमहन्यवलोकयितास्मि ते
पुनरहर्पतिनिह्नुतदर्पताम् ।। ५४ ।।
शशकलङ्क ! भयंकर ! मादृशां
ज्वलसि यन्निशि भूतपतिं श्रितः ।
तदमृतस्य तवेदृशभूतताद्-
भुतकरी परमूर्धविधूननी ।। ५५ ।।
श्रवणपूरतमालदलाङ्कुरं
शशिकुरङ्गमुखे सखि ! निक्षिप ।
किमपि तुन्दिलितः स्थगयत्ययं
सपदि तेन तदुच्छ्वसिमि क्षणम् ।। ५६ ।।
असमये मतिरुन्मिषति ध्रुवं
करगतैव गता यदियं कुहूः ।
पुनरुपैति निरुध्य निवास्यते
सखि ! मुखं न विधोः पुनरीक्ष्यते ।। ५७ ।।
अयि ! ममैष चकोरशिशुर्मुने-
र्व्रजति सिन्धुपिबस्य न शिष्यताम् ।
अशितुमब्धिमधीतवतोऽस्य च
शशिकराः पिबतः कति शीकराः ।। ५८ ।।
कुरु करे गुरुमेकमयोघनं
बहिरतो मुकुरं च कुरुष्व मे ।
विशति तत्र यदैव विधुस्तदा
सखि ! सुखादहितं जहि तं द्रुतम् ।। ५९ ।।

उदर एव धृतः किमुदन्वता
न विषमो वडवानलवद्विधुः ।
विषवदुज्झितमप्यमुना न स
स्मरहरः किममुं बुभुजे विभुः ॥ ६० ॥
असितमेकसुराशितमप्यभून्न
पुनरेष विधुर्विशदं विषम् ।
अपि निपीय सुरैर्जनितक्षयं
स्वयमुदेति पुनर्नवमार्णवम् ॥ ६१ ॥
विरहिवर्गवधव्यसनाकुलं
कलय पापमशेषकुलं विधुम् ।
सुरनिपीतसुधाकमपापकं
ग्रहविदो विपरीतकथाः कथम् ॥ ६२ ॥
विरहिभिर्बहुमानमवापि यः
स बहुलः खलु पक्ष इहाजनि ।
तदमितिः सकलैरपि यत्र तै-
र्व्यरचि सा च तिथिः किममाकृता ॥ ६३ ॥
स्वरिपुतीक्ष्णसुदर्शनविभ्रमा-
त्किमु विधुं ग्रसते स विधुंतुदः ।
निपतितं वदने कथमन्यथा
बलिकरम्भनिभं निजमुज्झति ॥ ६४ ॥
वदनगर्भगतं न निजेच्छया
शशिनमुज्झति राहुरसंशयम् ।
अशित एव गलत्ययमत्ययं
सखि ! विना गलनालबिलाध्वना ॥ ६५ ॥
ऋजुदृशः कथयन्ति पुराविदो
मधुभिदं किल राहुशिरश्छिदम् ।

-विरहिमूर्धभिदं निगदन्ति न
क्व नु शशी यदि तज्जठरानलः ॥ ६६ ॥
स्मरसखौ रुचिभिः स्मरवैरिणा
मखमृगस्य यथा दलितं शिरः ।
सपदि संदधतुर्भिषजौ दिवः
सखि ! तथा तमसोऽपि करोतु कः ॥ ६७ ॥

नलविमस्तकितस्य रणे रिपोर्मिलति किं न कबन्धगलेन वा ।
मृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ॥६८॥
सखि ! जरां परिपृच्छ तमःशिरः
सममसौ दधतापि कबन्धताम् ।
मगधराजवपुर्दलयुग्मव-
त्किमिति न व्यतिसीव्यति केतुना ॥ ६९ ॥
वद विधुंतुदमालि ! मदीरितै-
स्त्यजसि किं द्विजराजधिया रिपुम् ।
किमु दिवं पुनरेति यदीदृशः
पतित एष निषेव्य हि वारुणीम् ॥ ७० ॥
दहति कण्ठमयं खलु तेन किं
गरुडवद्द्विजवासनयोज्झितः ।
प्रकृतिरस्य विधुंतुद ! दाहिका
मयि निरागसि का वद विप्रता ॥ ७१ ॥
सकलया कलया किल दंष्ट्रया
समवधाय यमाय विनिर्मितः ।
विरहिणीगणचर्वणसाधन
विधुरतो द्विजराज इति श्रुतिः ॥ ७२ ॥
स्मरमुखं हरनेत्रहुताशना-
ज्ज्वलदिदं चक्रुषे विधिना विधुः ।

बहुविधेन वियोगिवधैनसा
　　शशमिषादथ कालिकयाङ्कितः ।। ७३ ।।
द्विजपतिग्रसनाहितपातक-
　　प्रभवकुष्ठसितीकृतविग्रहः ।
विरहिणीवदनेन्दुजिघत्सया
　　स्फुरति राहुरयं न निशाकरः ।। १ ।।
इति विधोर्विविधोक्तिविगर्हणं
　　व्यवहितस्य वृथेति विमृश्य सा ।
अतितरां दधती विरहज्वरं
　　हृदयभाजमुपालभत स्मरम् ।। ७४ ।।
हृदयमाश्रयसे यदि मामकं
　　ज्वलयसीत्थमनङ्ग ! तदेव किम् ।
स्वयमपि क्षणदग्धनिजेन्धनः क्व
　　भवितासि हताश ! हुताशवत् ।। ७५ ।।
पुरभिदा गमितस्त्वमदृश्यतां
　　त्रिनयनत्वपरिप्लुतिशङ्कया ।
स्मर ! निरैक्ष्यत कस्यचनापि न
　　त्वयि किमक्षिगते नयनैस्त्रिभिः ।। ७६ ।।
सहचरोऽसि रतेरिति विश्रुति-
　　स्त्वयि वसत्यपि मे न रतिः कुतः ।
अथ न संप्रति संगतिरस्ति वा-
　　मनुमृता न भवन्तमियं किल ।। ७७ ।।
रतिवियुक्तमनात्मपरज्ञ ! किं
　　स्वमिव मामपि तापितवानसि ।
कथमतापभृतस्तव संगमा-
　　दितरथा हृदयं मम दह्यते ।। ७८ ।।

अनुममार न मार ! कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।
इयदनाथवधूवधपातकी
दयिततापि तथासि किमुज्झितः ॥७९॥

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥८०॥

फलमलभ्यत यत्कुसुमैस्त्वया
विषमनेत्रमनङ्ग ! विगृह्णता ।
अहह नीतिरवाप्तभया ततो
न कुसुमैरपि विग्रहमिच्छति ॥८१॥

अपि धयन्नितरामतवत्सुधां त्रिनयनात्कथमापिथ तां दशाम् ।
भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु नापिवः ॥८२॥

भुवनमोहनजेन किमेनसा
तव बभूव परेत ! पिशाचता ।
यदधुना विरहाधिमलीमसा-
मभिभवन्भ्रमसि स्मर ! मद्विधाम् ॥८३॥

बत ददासि न मृत्युमपि स्मर !
स्खलति तेऽकृपया न धनुः करात् ।
अथ मृतोऽसि मृतेन च मुच्यते
न खलु मुष्टिरुरीकृतबन्धनः ॥८४॥

दृगुपहत्यपमृत्युविरूपताः
शमयतेऽपरनिर्जरसेविता ।
अतिशयान्ध्यवपुःक्षतिपाण्डुताः
स्मर ! भवन्ति भवन्तमुपासितुः ॥८५॥

स्मर ! नृशंसतमस्त्वमतो विधिः
सुमनसः कृतवान्भवदायुधम् ।

यदि धनुर्दृढमाशुगमायसं
तव सृजेत्त्रिजगत्प्रलयं व्रजेत् ॥८६॥
स्मररिपोरिव रोपशिखी पुरां
दहतु ते जगतामपि मा त्रयम् ।
इति विधिस्त्वदिषून्कुसुमानि किं
मधुभिरन्तरसिञ्चदनिर्वृतः ॥८७॥
विधिरनंशमभेद्यमवेक्ष्य ते
जनमनः खलुः लक्षमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा
त्वदिषुभिर्व्यदलिष्यदसावपि ।८८॥
अपि विधिः कुसुमानि तवाशुगान्
स्मर ! विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तां-
स्तदपि तैर्बत जर्जरितं जगत् ।८९॥
उपहरन्ति न कस्य सुपर्वणः
सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां
धिगियतापि न तेऽङ्ग ! विगर्हणा ॥९०॥
कुसुममप्यतिदुर्णयकारि ते
किमु वितीर्य धनुर्विधिरग्रहीत् ।
किमकृतैष तवैकतदास्पदे
द्वयमभूदधुना हि नलभ्रुवौ ॥९१॥
षड्टतवः कृपया स्वकमेककं
कुसुममक्रमनन्दितनन्दनाः ।
ददति षड्भवते कुरुते भवान्
धनुरिवैकमिषूनिव पञ्च तैः ॥९२॥

यदतनुस्त्वमिदं जगते हितं
क्व स मुनिस्तव यः सहते हतीः ।
विशिखमाश्रवणं परिपूर्य चेद्-
विचलद्भुजमुज्झितुमीशिषे ॥६३॥
सह तया स्मर ! भस्म झटित्यभूः
पशुपति प्रति यामिषुमग्रहीः ।
ध्रुवमभूदधुना वितनोः शर-
स्तव पिकस्वर एव स पञ्चमः ॥६४॥
स्मर ! स मद्दुरितैरफलीकृतो
भगवतोऽपि भवद्दहनश्रमः ।
सुरहिताय हुतात्मतनुः पुन-
र्ननुजनुर्दिवि तत्क्षणमापिथ ॥६५॥
विरहिणो विमुखस्य विधूदये
शमनदिक्पवनः स न दक्षिणः ।
सुमनसो नमयन्नटनौ धनु-
स्तव तु बाहुरसौ यदि दक्षिणः ॥६६॥
किमु भवन्तमुमापतिरेककं
मदमुदान्धमयोगिजनान्तकम् ।
यदजयत्तत एव न गीयते स
भगवान्मदनान्धकमृत्युजित् ॥६७॥
त्वमिव कोऽपि परापकृतौ कृती
न ददृशे न च मन्मथ ! शुश्रुवे ।
स्वमदहो दहनाज्ज्वलतात्मना
ज्वलयितुं परिरभ्य जगन्ति यः ॥६८॥
त्वमुचितं नयनार्चिषि शंभुना
भुवनशांतिकहोमहविः कृतः ।

तव वयस्यमपास्य मधुं मधुं
हृतवता हरिणा बत किं कृतम् ।। ९९ ।।
इति कियद्वचसैव भृशं प्रिया-
धरपिपासु तदाननमाशु तत् ।
अजनि पांशुलमप्रियवाग्ज्व-
लन्मदनशोषणबाणहतेरिव ।। १०० ।।
प्रियसखीनिवहेन सहाथ सा
व्यरचयद्गिरमर्धसमस्यया ।
हृदयमर्मणि मन्मथसायकैः
क्षततमा बहु भाषितुमक्षमा ।। १०१ ।।
अकरुणादव सूनशरादसून्
सहजयापदि धीरतयात्मनः ।
असव एव ममाद्य विरोधिनः
कथमरीन्सखि ! रक्षितुमात्थ माम् ।। १०२ ।।
हितगिरं न शृणोषि किमाश्रवे !
प्रसभमप्यव जीवितमात्मनः ।
सखि ! हिता यदि मे भवसीदृशी
मदरिमिच्छसि या मम जीवितम् ।। १०३ ।।
अमृतदीधितिरेष विदर्भजे !
भजसि तापममुष्य किमंशुभिः ।
यदि भवन्ति मृताः सखि ! चन्द्रिकाः
शशभृतः क्व तदा परितप्यते ।। १०४ ।।
व्रज धृतिं त्यज भीतिमहेतुका-
मयमचण्डमरीचिरुदञ्चति ।
ज्वलयति स्फुटमातपमुर्मुरै-
रनुभवं वचसा सखि ! लुम्पसि ।। १०५ ।।

अयि ! शपे हृदयाय तवैव
तद्यदि विधोर्न रुचेरसि गोचरः ।
रुचिफलं सखि ! दृश्यत एव
तज्ज्वलयति त्वचमुल्ललयत्यसून् ॥१०६॥
विधुविरोधितिथेरभिधायिनीं
ननु न किं पुनरिच्छसि कोकिलाम् ।
सखि ! किमर्थगवेषणया गिरं
किरति सेयमनर्थमयीं मयि ॥१०७॥
हृदय एव तवास्ति स वल्लभ-
स्तदपि किं दमयन्ति ! विषीदसि ।
हृदि परं न बहिः खलु वर्तते
सखि ! यतस्तत एव विषद्यते ॥१०८॥
स्फुटति हारमणौ मदनोष्मणा
हृदयमप्यनलंकृतमद्य ते ।
सखि ! हतास्मि तदा यदि हृद्यपि
प्रियतमः स मम व्यवधापितः ॥१०९॥
इदमुदीर्य तदैव मुमूर्च्छ सा
मनसि मूर्च्छितमन्मथपावका ।
क्व सहतामवलम्बलवच्छिदा-
मनुपपत्तिमतीमतिदुःखिता ॥११०॥
अधित कापि मुखे सलिलं सखी
प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं
न्यधित कापि हिमं सुतनोस्तनौ ॥१११॥
उपचचार चिरं मृदुशीतलै-
र्जलजनालमृणालजलादिभिः ।

प्रियसखीनिवहः स तथा क्रमा-
दियमवाप यथा लघु चेतनाम् ॥११२॥
अथ कले ! कलय श्वसिति स्फुटं
चलति पक्ष्म चले ! परिभावय ।
अधरकम्पनमुन्नय मेनके !
किमपि जल्पति कल्पलते ! शृणु ॥११३॥
रचय चारुमति ! स्तनयोर्वृतिं
कलय केशिनि ! कैश्यमसंयतम् ।
अवगृहाण तरङ्गिणि ! नेत्रयो-
र्जलभराविति शुश्रुविरे गिरः ॥११४॥
कलकलः स तदालिजनानना-
दुदलसद्विपुलस्त्वरितेरितः ।
यमधिगम्य सुतालयमीयिवान्
धृतदरः स त्रिदशपुरंदरः ॥११५॥
कन्यान्तःपुरबाधनाय यदधीकाराच्च दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः ।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ।११६।
ताभ्यामभूद्युगपदप्यभिधीयमानं
भेदव्यपाकृति मिथः प्रतिघातमेव ।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किंचिद्-
भैष्म्यामनिष्टशतशङ्कितयाकुलस्य ॥११७॥
द्रुतविगमितविप्रयोगचिह्नामपि
तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिमग्नां
झटिति पराशयवेदिनो हि विज्ञाः ॥११८॥

व्यंतरदथ पिताशिषं सुतायै
नतशिरसे सहसोन्नमय्य मौलिम् ।
दयितमभिमत स्वयंवरे ! त्वं
गुणमयमाप्नुहि वासरैः कियद्भिः ॥११९॥

तदनु स तनुजासखीरवादी-
त्तुहिनऋतौ गत एव हीदृशीनाम् ।
कुसुममपि शरायते शरीरे
तदुचितमाचरतोपचारमस्याः ॥१२०॥

कतिपयदिवसैर्वयस्यया वः
स्वयमभिलष्य वरिष्यते वरीयान् ।
ऋशिमशमनयानया तदाप्तुं
रुचिरुचिताथ भवद्भिधाविधाभिः ॥१२१॥

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ।
यच्चाशीःकपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनो मनोऽब्धिमतनोदानन्दमन्दाक्षयोः ॥१२२॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२३॥

॥ कविहर्ष विरचिते नैषधीयप्रकाशे
चतुर्थः सर्गः समाप्तः ॥ ४ ॥

## ॥ ५ ॥ पञ्चमः सर्गः ॥

यावदागमयतेऽथ नरेन्द्रान्स स्वयंवरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥ १ ॥
नात्र चित्रमनु तं प्रययौ यत्पर्वतः स खलु तस्य सपक्षः ।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥२॥

गच्छता पथि विनैव विमानं
व्योम तेन मुनिना विजगाहे ।
साधने हि नियमोऽन्यजनानां
योगिनां तु तपसाखिलसिद्धिः ॥३॥

खण्डितेन्द्रभवनाद्यभिमानाँल्लङ्घते स्म मुनिरेष विमानान् ।
अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥४॥
तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः ।
यावदेव दिवसेन शशीव द्रागतप्यत न तन्महसैव ॥५॥
पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम् ।
पर्यभूत्खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते ॥६॥
विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥७॥
स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप ।
संप्रतीर्य भवसिन्धुमनादि ब्रह्म शर्मभरचारु यतीव ॥८॥
अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृतातिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ॥९॥
नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाद्रियत द्राक् ।
पर्वतोऽपि लभतां कथमर्चां न द्विजः स विबुधप्रभुलम्भी ॥१०॥

तद्भुजादतिवितीर्णसपर्या-
द्द्युद्रुमानपि विवेद मुनीन्द्रः ।

स्वःसहस्थितिसुशिक्षितया
तान्दानपारमितयैव वदान्यान् ।।११।।
मुद्रितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत् ।
आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः ।।१२।।
तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम् ।
भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ।।१३।।
प्रागिव प्रसुवते नृपवंशाः किंनु संप्रति न वीरकरीरान् ।
ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ।।१४।।
पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि ।
गौरवाद्वपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ।।१५।।
साभिशापमिव नातिथयस्ते मां यदद्य भगवन्नुपयन्ति ।
तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकार्यकदर्याम् ।।१६।।
पूर्वपुण्यविभवव्ययलब्धाः श्रीभरा विपद एव विमृष्टाः ।
पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः ।।१७।।
तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाधम् ।
भूयतां भगवतः श्रुतिसारैरद्य वाग्भिरघमर्षणऋग्भिः ।।१८।।
इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय ।।१९।।
वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ।।२०।।
भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ ।
तत्फले यदि परं तव हेला क्लेशलब्धमधिकादरदं तु ।।२१।।
संपदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते ।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ।।२२।।
श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि ।।२३।।

श्रा: स्वभावमधुरैरनुभावै-
स्तावकैरतितरां तरला: स्म: ।
द्यां प्रशाधि गलितावधिकालं
साधु साधु विजयस्व बिडौज: ! ॥२४॥
संख्यविक्षततनुस्रवदस्रक्षालिताखिलनिजाघलघूनाम् ।
यत्त्विहानुपगम: शृणु राज्ञां तज्जगद्युवमुदं तमुदन्तम् ॥२५॥
सा भुव: किमपि रत्नमनर्घं भूषणं जयति तत्र कुमारी ।
भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघम् ॥२६॥
संप्रति प्रतिमुहूर्तमपूर्वा
कापि यौवनजवेन भवन्ती ।
आशिखं सुकृतसारभृते
सा क्वापि यूनि भजते किल भावम् ॥२७॥
कथ्यते न कतम: स इति त्वं
मां विवक्षुरसि किं चलदोष्ठ: ।
अर्धवर्त्मनि रुणत्सि न पृच्छां
निर्गमेण न परिश्रमयैनाम् ॥२८॥
यत्पथावधिरणु: परम: सा योगिधीरपि न पश्यति यस्मात् ।
बालया निजमन:परमाणौ ह्रीदरीशयहरीकृतमेनम् ॥२९॥
सा शरस्य कुसुमस्य शरव्यं सूचिता विरहवाचिभिरङ्गै: ।
तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ॥३०॥
मन्मथाय यदथादित राज्ञां हूतिदूत्यविधये विधिराज्ञाम् ।
तेन तत्परवशा: पृथिवीशा: संगरं गरमिवाकलयन्ति ॥३१॥
येषु येषु सरसा दमयन्ती
भूषणेषु यदि वापि गुणेषु ।
तत्र तत्र कलयापि विशेषो
य: स हि क्षितिभृतां पुरुषार्थ: ॥३२॥

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥३३॥
इत्यमी वसुमतीकमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम् ॥३४॥
तेन जाग्रदधृतिर्दिवमागां संख्यसौख्यमनुसर्तुं मनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥३५॥
वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि ।
पृच्छयसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥३६॥
एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥३७॥

कानुजे मम निजे दनुजारौ
जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं
शर्मणा स्वपिमि वीतविशङ्कः ॥३८॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनि स निनाय ॥३९॥

ईदृशानि मुनये त्रिनयाब्धि-
स्तस्थिवान् स वचनान्युपहृत्य ।
प्रांशुनिःश्वसितपृष्ठचरी
वाङ्नारदस्य निरियाय निरोजाः ॥४०॥

स्वारसातलभवाहवशङ्की निर्वृणोमि न वसन्वसुमत्याम् ।
द्यां गतस्य हृदि मे दुरुदर्कः क्ष्मातलद्वयभटाजिवितर्कः ॥४१॥
वीक्षितस्त्वमसि मामथ गन्तुं तन्मनुष्यजगतेऽनुमनुष्व ।
किं भुवः परिवृढा न विवोढुं तत्र तामुपगता विवदन्ते ॥४२॥
इत्युदीर्य स ययौ मुनिरुर्वीं स्वर्पतिं प्रतिनिवर्त्य बलेन ।
वारितोऽप्यनुजगाम सयत्नं तं कियन्त्यपि पदान्यपराणि ।४३।

पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे ।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ॥४४॥
पाणये बलरिपोरथ भैमीशीतकोमलकरग्रहमर्हम् ।
भेषजं चिरचिताशनिवासव्यापदामुपदिदेश रतीशः ॥४५॥
नाकलोकभिषजोः सुषमा या पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसंक्रमितवैद्यकविद्यः ॥४६॥
मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥४७॥
यो मघोनि दिवमुच्चरमाणे
रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः
शान्तमान्तरमभाषत भङ्ग्या ॥४८॥
जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः ।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमितेन ॥४९॥
साधु नः पतनमेवमितः स्यादित्यभण्यत तिलोत्तमयापि ।
चामरस्य पतनेन कराब्जात्तद्विलोलनचलद्भुजनालात् ॥५०॥
मेनका मनसि तापमुदीतं यत्पिधित्सुरकरोदवहित्थाम् ।
तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम् ॥५१॥
उर्वशी गुणवशीकृतविश्वा तत्क्षणस्तिमितभावनिभेन ।
शक्रसौहृदसमापनसीमस्तम्भकार्यमपुषद्वपुषैव ॥५२॥
कापि कामपि बभाण बुभुत्सुं
शृण्वति त्रिदशभर्तरि किंचित् ।
एष कश्यपसुतामभिगन्ता
पश्य कश्यपसुतः शतमन्युः ॥५३॥
आलिमात्मसुभगत्वसगर्वा
कापि शृण्वति मघोनि बभाषे ।

वीक्षणेऽपि सघृणासि नृणां किं
यासि न त्वमपि सार्थगुणेन ।।५४।।
अन्वयुर्द्युलिपयःपितृनाथास्तं मुदाथ हरितां कमितारः ।
वर्त्म कर्षतु पुरः परमेकस्तद्गतानुगतिको न महार्घः ।।५५।।
प्रेषिताः पृथगथो दमयन्त्यै
चित्तचौर्यचतुरा निजदूत्यः ।
तद्गुरुं प्रति च तैरुपहाराः
संख्यसौख्यकपटेन निगूढाः ।।५६।।
चित्रमत्र विबुधैरपि यत्तैः
स्वर्विहाय बत भूरनुसस्रे ।
द्यौर्न काचिदथवास्ति निरूढा
सैव सा चलति यत्र हि चित्तम् ।।५७।।
शीघ्रलङ्घितपथैरथ वाहैर्लम्भिता भुवममी सुरसाराः ।
वक्रितोन्नमितकंधरबन्धाः शुश्रुवुर्ध्वनितमध्वनि दूरम् ।।५८।।
किं घनस्य जलधेरथवैवं नैव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्यन्निःस्वनश्रुतिसहोपनतं ते ।।५९।।
सूतविश्रमदकौतुकिभावं भावबोधचतुरं तुरगाणाम् ।
तत्र नेत्रजनुषः फलमेते नैषधं बुबुधिरे विबुधेन्द्राः ।।६०।।
वीक्ष्य तस्य वरुणस्तरुणत्वं
यद्बभार निबिडं जडभूयम् ।
नौचिती जलपतेः किमु सास्य
प्राज्यविस्मयरसस्तिमितस्य ।।६१।।
रूपमस्य विनिरूप्य तथातिम्लानिमाप रविवंशवतंसः ।
कीर्त्यते यदधुनापि स देवः काल एव सकलेन जनेन ।।६२।।
यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य ।
तत्र भूदनलता जनिकर्त्री सा तदप्यनलतैव तु हेतुः ।।६३।।

कामनीयकमधःकृतकामं
काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकः स्वमखिलं परिपश्यन्म-
न्यते स्म खलु कौशिकमेव ॥६४॥

रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबभूवुः ॥६५॥

प्रैयरूपकविशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः ।
एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥६६॥

तेषु तद्विधवधूवरणार्हं भूषणं स समयः स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन् भूपतेर्व्यवसितानि शशंसुः ॥६७॥

धर्मराजसलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः ।
प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ॥६८॥

नैव नः प्रियतमोभयथासौ यद्यमुं न वृणुते वृणुते वा ।
एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः ॥६९॥

मां वरिष्यति तदा यदि मत्तो वेद नेयमियदस्य महत्त्वम् ।
ईदृशी च कथमाकलयित्री मद्विशेषमपरन्नृपपुत्री ॥७०॥

नैषधे बत वृते दमयन्त्या
व्रीडितो नहि बहिर्भवितास्मि ।
स्वां गृहेऽपि वनितां कथमास्यं
ह्रीनिमीलि खलु दर्शयिताहे ॥७१॥

इत्यवेत्य मनसात्मविधेयं
किंचन त्रित्रिबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं
सा स्म पश्यति परस्परमास्यम् ॥७२॥

किं विधेयमधुनेति विमुग्ध स्वानुगाननमवेक्ष्य ऋभुक्षाः ।
शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलष्य नलस्य ॥७३॥

सर्वतः कुशलवानसि कश्चित्त्वं स नैषध इति प्रतिभा नः ।
स्वासनार्धसुहृदस्त्वयि रेखां वीरसेननृपतेरिव विद्मः ॥७४॥

क्व प्रयास्यसि नलेत्यलमुक्त्वा
यात्रयात्र शुभयाजनि यत्नः ।
तत्तयैव फलसत्वरया त्वं
नाध्वनोऽर्धमिदमागमितः किम् ॥७५॥

एष नैषध ! स दण्डभृदेष
ज्वालजालजटिलः स हुताशः ।
यादसां स पतिरेष च शेषं
शासितारमधिगच्छ सुराणाम् ॥७६॥

अर्थिनो वयममी समुपेम-
स्त्वां नलेति फलितार्थमवेहि ।
अध्वनः क्षणमपास्य च खेदं
कुर्महे भवति कार्यनिवेदम् ॥७७॥

ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे ।
नात्र चित्रमभिधाकुशलत्वे शैशवावधि गुरुर्गुरुरस्य ॥७८॥

अर्थिनामहृषिताखिललोमा स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ॥७९॥

दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥८०॥

जीवितावधि वनीयकमात्रैर्याच्यमानमखिलैः सुलभं यत् ।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ॥८१॥

भीमजा च हृदि मे परमास्ते
जीवितादपि धनादपि गुर्वी ।
न स्वमेव मम सार्हति यस्याः
षोडशीमपि कलां किल नोर्वी ॥८२॥

मीयतां कथमभीप्सितमेषां दीयतां कथमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ॥८३॥
प्रापितेन चटुकाकुविडम्बं
लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदघमर्जति दाता
तन्न लुम्पति विलम्ब्य ददानः ॥८४॥
यत्प्रदेयमुपनीय वदान्यै-
र्दीयते सलिलमर्थिजनाय ।
सार्थनोक्तिविफलत्वविशङ्का-
त्रासमूर्च्छंदपमृत्युचिकित्सा ॥८५॥
अर्थिने न तृणवर्द्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम् ।
एवमाह कुशवज्जलदायी द्रव्यदानविधिरुक्तिविदग्धः ॥८६॥
पङ्कसंकरविगर्हितमर्हं
न श्रियः कमलमाश्रयणाय ।
अर्थिपाणिकमलं विमलं तद्वास-
वेश्म विदधीत सुधीस्तत् ॥८७॥
याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥८८॥
मा धनानि कृपणः खलु जीवंस्तृष्णयार्पयतु जातु परस्मै ।
तत्र चैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि ॥८९॥
माममीभिरिह याचितवद्भि-
र्दातृजातमवमत्य जगत्याम् ।
यद्दशो मयि निवेशितमेत-
न्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥९०॥
लोक एष परलोकमुपेता हा विहाय निधने धनमेकः ।
इत्यमूं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥९१॥

दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥९२॥
एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम् ।
अर्थिदुर्लभमवाप्य सहर्षान् याच्यमानमुखमुल्लसितश्रि ॥९३॥
नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनूममृतादं दृङ्निमज्जनमुपैति सुधायाम् ॥९४॥
मत्तपः क्व नु तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति ।
ईदृशं परिणमन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति ॥९५॥
प्रत्यतिष्ठिपदिलां खलु देवीं कर्म सर्वसहनव्रतजन्म ।
यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः ॥९६॥

जीवितावधि किमप्यधिकं वा
यन्मनीषितमितो नरडिम्भात् ।
तेन वश्चरणमर्चतु सोऽयं
ब्रूत वस्तु पुनरस्तु किमीदृक् ॥९७॥

एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन ।
वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे ॥९८॥

पाणिपीडनमहं दमयन्त्याः
कामयेमहि महीमिहिकांशो ! ।
दूत्यमत्र कुरु नः स्मरभीतिं
निर्जितस्मर ! चिरस्य निरस्य ॥९९॥

आसते शतमधिक्षिति भूपा-
स्तोयराशिरसि ते खलु कूपाः ।
किं ग्रहा दिवि न जाग्रति ते ते
भास्करस्य कतमस्तुलयास्ते ॥१००॥

विश्वदृश्वनयना वयमेव
त्वद्गुणाम्बुधिमगाधमवेमः ।

त्वामिहैवमनिवेश्य रहस्ये
निर्वृतिं नहि लभेमहि सर्वे ॥१०१॥
शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः ।
क्षिप्रुरेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः ॥१०२॥
तेन तेन वचसैव मघोनः
स स्म वेद कपटं पटुरुच्चैः ।
आचरत्तदुचितामथ वाणी-
मार्जवं हि कुटिलेषु न नीतिः ॥१०३॥
सेयमुन्नतरता दुरिताना-
मन्यजन्मनि मयैव कृतानाम् ।
युष्मदीयमपि या महिमानं
जेतुमिच्छति कथापथपारम् ॥१०४॥
विश्व चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम् ।
ह्रीगिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपरास्ता ॥१०५॥
यन्मतौ विमलदर्पणिकायां
संमुखस्थमखिलं खलु तत्त्वम् ।
तेऽपि किं वितरथेदृशमाज्ञां
या न यस्य सदृशी वितरीतुम् ॥१०६॥
यामि यामिह वरीतुमहो तद्-
दूततां नु करवाणि कथं वः ।
ईदृशां न महतां बत जाता
वञ्चने मम तृणस्य घृणापि ॥१०७॥
उद्भ्रमामि विरहान्मुहुरस्या मोहमेमि च मुहूर्तमहं यः ।
ब्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः ॥१०८॥
यां मनोरथमयीं हृदि कृत्वा
यः श्वसिम्यथ कथं स तदग्रे ।

भावगुप्तिमवलम्बितुमीशे
दुर्जया हि विषया विदुषापि ॥१०९॥
यामिकाननुपमृद्य च मादृक्
तां निरीक्षितुमपि क्षमते कः ।
रक्षिलक्षजयचण्डचरित्रे
पुंसि विश्वसिति कुत्र कुमारी ॥११०॥
आदधीचि किल दातृकृतार्घं
प्राणमात्रपणसीम यशो यत् ।
आददे कथमहं प्रियया तत्
प्राणतः शतगुणेन पणेन ॥१११॥
अर्थना मयि भवद्भिरिवास्यं कर्तुमर्हति मयापि भवत्सु ।
भीमजार्थपरयाचनचाटौ यूयमेव गुरवः करणीयाः ॥११२॥
अर्थिताः प्रथमतो दमयन्तीं
यूयमन्वहमुपास्य मया यत् ।
ह्रीर्न चेद्व्यतियतामपि तद्वः
सा ममापि सुतरां न तदस्तु ॥११३॥
कुण्डिनेन्द्रसुतया किल पूर्वं
मां वरीतुमुररीकृतमास्ते ।
व्रीडमेष्यति परं मयि दृष्टे
स्वीकरिष्यति न सा खलु युष्मान् ॥११४॥
तत्प्रसीदत विधत्त न खेदं
दूत्यमत्यसदृशं हि ममेदम् ।
हास्यतैव सुलभा न तु साध्यं
तद्विधित्सुभिरनौपयिकेन ॥११५॥
ईदृशानि गदितानि तदानी-
माकलय्य स नलस्य बलारिः ।

शंसति स्म किमपि स्मयमानः
स्वानुगाननविलोकनलोलः ॥११६॥
नाभ्यधायि नृपते ! भवतेदं
रोहिणीरमणवंशभुवैव ।
लज्जते न रसना तव वाम्या-
दर्थिषु स्वयमुरीकृतकाम्या ॥११७॥
भङ्गुरं न वितथं न कथं वा
जीवलोकमवलोकयसीमम् ।
येन धर्मयशसी परिहातुं
धीरहो चलति धीर ! तवापि ॥११८॥
कः कुलेऽजनि जगन्मुकुटे वः
प्रार्थकेप्सितमपूरि न येन ।
इन्दुरादिरजनिष्ट कलङ्की
कष्टमत्र स भवानपि मा भूत् ॥११९॥
यापदृष्टिरपि या मुखमुद्रा
याचमानमनु या च न तुष्टिः ।
त्वादृशस्य सकलः स कलङ्कः
शीतभासि शशकः परमङ्कः ॥१२०॥
नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि ।
इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥१२१॥
अब्रवीत्तमनलः क्व नलेदं
लब्धमुज्झसि यशः शशिकल्पम् ।
कल्पवृक्षपतिमर्थिनमित्थं
नाप कोऽपि शतमन्युमिहान्यः ॥१२२॥
न व्यहन्यत कदापि मुदं यः
स्वःसदामुपनयन्नभिलाषः ।

तत्पदे त्वदभिषेककृतां नः
स त्यजत्वसमतामदमद्य ॥१२३॥
अब्रवीदथ यमस्तमहृष्टं
वीरसेनकुलदीप ! तमस्त्वाम् ।
यत्किमप्यभिबुभूषति तत्किं
चन्द्रवंशवसतेः सदृशं ते ॥१२४॥
रोहणः किमपि यः कठिनानां
कामधेनुरपि या पशुरेव ।
नैनयोरपि वृथाऽभवदर्थी
हा विधित्सुरसि वत्स ! किमेतत् ॥१२५॥
याचितश्चिरयति क्व नु धीरः
प्राणने क्षणमपि प्रतिभूः कः ।
शंसति द्विनयनीं दृढनिद्रां
द्राङ्निमेषमिषघूर्णनपूर्णा ॥१२६॥
अभ्रपुष्पमपि दित्सति शीतं
सार्थिना विमुखता यदभाजि ।
स्तोककस्य खलु चञ्चुपुटेन
म्लानिरुल्लसति तद्धनसङ्घे ॥१२७॥
ऊचिवानुचितमक्षरमेनं
पाशपाणिरपि पाणिमुदस्य ।
कीर्तिरेव भावतां प्रियदारा
दाननीरझरमौक्तिकहारा ॥१२८॥
चर्म वर्म किल यस्य नभेद्यं
यस्य वज्रमयमस्थि च तौ चेत् ।
स्थायिनाविह न कर्णदधीची
तन्न धर्ममवधीरय धीर ! ॥१२९॥

अद्य यावदपि येन निबद्धौ
न प्रभू विचलितुं बलिविन्ध्यौ ।
आस्थितावितथतागुणपाश-
स्त्वादृशः स विदुषा दुरपासः ॥१३०॥
प्रेयसी जितसुधांशुमुखश्री-
र्या न मुञ्चति दिगन्तगतापि ।
भङ्गिसङ्गमकुरङ्गदृगर्थे
कः कदर्थयति तामपि कीर्तिम् ॥१३१॥
यान्वरं प्रति परेऽर्थयितार-
स्तेऽपि यं वयमहो स पुनस्त्वम् ।
नैव नः खलु मनोरथमात्रं
शूर ! पूरय दिशोऽपि यशोभिः ॥१३२॥
अर्थितां त्वयि गतेषु सुरेषु
म्लानदानजनिजोरुयशःश्रीः ।
अद्य पाण्डु गगनं सुरशाखी
केवलेन कुसुमेन विधत्ताम् ॥१३३॥
प्रवसते भरतार्जुनवैन्यव-
त्स्मृतिधृतोऽपि नल ! त्वमभीष्टदः ।
स्वगमनाफलतां यदि शङ्कसे
तदफलं निखिलं खलु मङ्गलम् ॥१३४॥
इष्टं नः प्रति ते प्रतिश्रुतिरभूद्याद्य स्वराह्लादिनी
धर्मार्था सृज तां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम् ।
त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशनाद्-
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१३५॥
यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति ।

एतस्योत्तरमद्य नः समजनि स्वत्तेजसां लङ्घने
साहस्रै रपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ।।१३६।।
इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार ।
अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः संभृतानन्दमूचे
भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ।।१३७।।
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः ।।१३८।।

।। इति महाकवि श्रीहर्षविरचित्त नैषधीयप्रकाशे
पञ्चमः सर्गः समाप्तः ।। ५ ।।

## ।। ६ ।। षष्ठः सर्गः ।।

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानम् ।
स भीमभूमीपतिराजधानीं लक्षीचकाराथ रथस्यदस्य ।।१।।
भैम्या समं नाजगणद्वियोगं स दूतधर्मे स्थिरधीरधीशः ।
पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः ।।२।।
नलप्रणालीमिलदम्बुजाक्षीसंवादपीयूषपिपासवस्ते ।
तदध्ववीक्षार्थमिवानिमेषा देशस्य तस्याभरणीबभूवुः ।।३।।
तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः ।
मनोरथः सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ।।४।।
भैमीपदस्पर्शकृतार्थरथ्या
सेयं पुरीत्युत्कलिकाकुलस्ताम् ।

नृपो निपीय क्षणमीक्षणाभ्यां
भृशं निशश्वास सुरैः क्षताशः ॥५॥
स्विद्यत्प्रमोदाश्रुलवेन वामं
रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः ।
अन्यत्पुनः कम्प्रमपि स्फुरत्त्वा-
त्तस्याः पुरः प्राप नवोपभोगम् ॥६॥
रथादसौ सारथिना सनाथा-
द्राजावतीर्याथ पुरं विवेश ।
निर्गत्य बिम्बादिव भानवीया-
त्सौधाकरं मण्डलमंशुसङ्घः ॥७॥
चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्ववृते न दृश्या ।
बभूव तच्चित्रतरं तथापि विश्वकदृश्यैव यदस्य मूर्तिः ॥८॥
जनैर्विदग्धैर्भवनैश्च मुग्धैः
पदे पदे विस्मयकल्पवल्लीम् ।
तां गाहमानस्य चिरं नलस्य
दृष्टिर्ययौ राजकुलातिथित्वम् ॥९॥
हेलां दधौ रक्षिजनेऽस्त्रसज्जे
*लीनश्चरामीति हृदा ललज्जे ।*
द्रक्ष्यामि भैमीमिति संतुतोष
दूतं विचिन्त्य स्वमसौ शुशोच ॥१०॥
अथोपकार्याममरेन्द्र कार्या-
त्कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षु-
र्दिशन्नसौ तामविशद्विशङ्कः ॥११॥
अयं क इत्यन्यनिवारकाणां
गिरा विभुर्द्वारि विभुज्य कण्ठम् ।

दृशं ददौ विस्मयनिस्तरङ्गां
स लङ्घितायामपि राजसिंहः ।।१२।।
अन्तःपुरान्तः स विलोक्य बालां
कांचित्समालब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या
संघट्टमासाद्य चमच्चकार ।।१३।।
अनादिसर्गस्रजि वानुभूता
चित्रेषु वा भीमसुता नलेन ।
जातेव यद्वा जितशम्बरस्य
सा शाम्बरीशिल्पमलक्षि दिक्षु ।।१४।।
अलीकभैमीसहदर्शनाच्च
तस्यान्यकन्याप्सरसो रसाय ।
भैमीभ्रमस्यैव ततः प्रसादाद्-
भैमीभ्रमस्तेन न तास्वलम्भि ।।१५।।
भैमीनिराशे हृदि मन्मथेन
दत्तस्वहस्ताद्विरहाद्विहस्तः ।
स तामलीकामवलोक्य तत्र
क्षणादपश्यन्व्यषदद्विबुद्धः ।।१६।।
प्रियां विकल्पोपहृतां स यावद्दिगीशसंदेशमजल्पदल्पम् ।
अदृश्यवाग्भीषितभूरिभीरुभवो रवस्तावदचेतयत्तम् ।।१७।।
पश्यन्स तस्मिन्मरुतापि तन्व्याः
स्तनौ परिस्प्रष्टुमिवास्तवस्त्रौ ।
अक्षान्तपक्षान्तमृगाङ्कमास्यं
दधार तिर्यग्वलितं विलक्षः ।।१८।।
अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः ।
न कालसारं हरिणं तदक्षिद्वयं प्रभुर्बद्धमभून्मनोभूः ।।१९।।

दोर्मूलमालोक्य कचं रुहत्सोस्ततः कुचौ तावनुलेपयन्त्याः ।
नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥२०॥

मीलन्न शेकेऽभिमुखागताभ्यां
धर्तुं निपीड्य स्तनसान्तराभ्याम् ।
स्वाङ्गान्यपेतो विजगौ स पश्चात्
पुमङ्गसङ्गोत्पुलके पुनस्ते ॥२१॥

निमीलनस्पष्टविलोकनाभ्यां
कदर्थितस्तां कलयन्कटाक्षैः ।
स रागदर्शीव भृशं ललज्जे
स्वतः सतां ह्रीः परतोऽतिगुर्वी ॥२२॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षै-
र्भ्रान्तेन कान्तेन रतेर्निदिष्टः ।
मोघः शरौघः कुसुमानि नाभू-
त्तदर्घपूजां प्रति पर्यवस्यन् ॥२३॥

हित्वैव वर्त्मैकमिह भ्रमन्त्याः
स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य ।
चतुष्पथस्याभरणं बभूव
लोकावलोकाय सतां स दीपः ॥२४॥

उद्वर्तयन्त्या हृदये निपत्य
नृपस्य दृष्टिर्न्यवृतद्द्रुतैव ।
वियोगिवैरात्कुचयोर्नखाङ्कै-
रर्धेन्दुलीलैर्गलहस्तितेव ॥२५॥

तन्वीमुखं द्रागधिगत्य चन्द्रं
वियोगिनस्तस्य निमीलिताभ्याम् ।
द्वयं द्रढीयः कृतमीक्षणाभ्यां
तदिन्दुता च स्वसरोजता च ॥२६॥

चतुष्पथे तं विनिमीलिताक्षं
चतुर्दिगेताः सुखमग्रहीष्यन् ।
संघट्टय तस्मिन्भृशभीनिवृत्ता-
स्ता एव तद्धर्म न चेद्‌दास्यन् ॥२७॥
संघट्टयन्त्यास्तरसात्मभूषा-
हीराङ्कुरप्रोतदुकूलहारी ।
दिशा नितम्बं परिधाप्य तन्व्या-
स्तत्पापसंतापमवाप भूपः ॥२८॥
हृतः कयाचित्पथि कन्दुकेन
संघट्टय भिन्नः करजैः कयापि ।
कयाचनाक्तः कुचकुङ्कुमेन
संभुक्तकल्पः स बभूव ताभिः ॥२९॥
छायामयः प्रैक्षि कयापि हारे
निजे स गच्छन्नथ नेक्ष्यमाणः ।
तच्चिन्तयान्तर्निरचायि चारु
स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥३०॥
तच्छायसौन्दर्यनिपीतधैर्याः
प्रत्येकमालिङ्गदमू रतीशः ।
रतिप्रतिद्वन्द्विसमासु नूनं
नामूषु निर्णीतरतिः कथंचित् ॥३१॥
तस्मादहश्यादपि नातिबिभ्यु-
स्तच्छायरूपाहितमोहलोलाः ।
मन्यन्त एवाहतमन्मथाज्ञाः
प्राणानपि स्वान्सुदृशस्तृणानि ॥३२॥
जागर्ति तच्छायदृशां पुरा यः
स्पृष्टे च तस्मिन्विससर्प कम्पः ।

द्रुते द्रुतं तत्पदशब्दभीत्या
स्वहस्तितश्चारुदृशां पर सः ॥३३॥
उल्लास्यतां स्पृष्टनलाङ्गमङ्गं
तासां नलच्छायपिबाऽपि दृष्टिः ।
श्रमैव रत्यास्तदनति पत्या
छेदेऽप्यबोधं यदहर्षि लोम ॥३४॥
यस्मिन्नलस्पृष्टकमेत्य हृष्टा
भूयोऽपि तं देशमगान्मृगाक्षी ।
निपत्य तत्रास्य धरारजःस्थे
पादे प्रसीदेति शनैरवादीत् ॥३५॥
भ्रमन्नमुष्यामुपकारिकाया-
मायस्य भैमीविरहात्कृशीयान् ।
असौ मुहुः सौधपरम्पराणां
व्यधत्त विश्रान्तिमधित्यकासु ॥३६॥
उल्लिख्य हंसेन दले नलिन्या-
स्तस्मै यथादर्शि तथैव भैमी ।
तेनाभिलिख्योपहृतस्वहारा
कस्या न दृष्टाजनि विस्मयाय ॥३७॥
कौमारगन्धीनि निवारयन्ती
वृत्तानि रोमावलिवेत्रचिह्ना ।
सालिख्य तेनैक्ष्यत यौवनीय-
द्वाःस्थामवस्थां परिचेतुकामा ॥३८॥
पश्याः पुरंध्रीः प्रति सान्द्रचन्द्र-
रजःकृतक्रीडकुमारचक्रे ।
चित्राणि चक्रेऽध्वनि चक्रवर्ति-
चिह्नं तदङ्घ्रिप्रतिमासु चक्रम् ॥३९॥

तारुण्यपुण्यामवलोकयन्त्योरन्योन्यमेणेक्षणयोरभिख्याम् ।
मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ।।४०।।

पुरःस्थितस्य क्वचिदस्य भूषा-
रत्नेषु नार्यः प्रतिबिम्बितानि ।
व्योमन्यदृश्येषु निजान्यपश्य-
न्विस्मित्य विस्मित्य सहस्रकृत्वः ।।४१।।

तस्मिन्विषज्यार्धपथात्तपातं
तदङ्गरागच्छुरितं निरीक्ष्य ।
विस्मेरतामापुरविस्मरन्त्यः
क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ।।४२।।

पुंसि स्वभर्तृव्यतिरिक्तभूते
भूत्वाप्यनीक्षानियमव्रतिन्यः ।
छायासु रूपं भुवि वीक्ष्य तस्य
फलं दृशोरानशिरे महिष्यः ।।४३।।

विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधापि धत्ते ।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ।।४४।।

रूपं प्रतिच्छायिकयोपनीत-
मालोकि ताभिर्यदि नाम कामम् ।
तथापि नालोकि तदस्य रूपं
हारिद्रभङ्गाय वितीर्णभङ्गम् ।।४५।।

भवन्नदृश्यः प्रतिबिम्बदेह-
व्यूहं वितन्वन्मणिकुट्टिमेषु ।
पुरं परस्य प्रविशन्वियोगी
योगीव चित्रं स रराज राजा ।।४६।।

पुमानिवास्पर्शि मया व्रजन्त्या
छाया मया पुंस इव व्यलोकि ।

अवन्निवार्तांकि मयापि कश्चि-
दिति स्म स स्त्रैणगिरः शृणोति ॥४७॥
अम्बां प्रणत्योपनता नताङ्गी
नलेन भैमी पथि योगमाप ।
स भ्रान्तिभैमीषु न तां व्यविक्त
सा तं च नादृश्यतया ददर्श ॥४८॥
प्रसूप्रसादाधिगता प्रसून-
माला नलस्योद्भ्रमवीक्षितस्य ।
क्षिप्तापि कण्ठाय तयोपकण्ठे
स्थितं तमालम्बत सत्यमेव ॥४९॥
स्रग्वासनादृष्टजनप्रसादः
सत्येयमित्यद्भुतमाप भूपः ।
क्षिप्तामदृश्यत्वमितां च माला-
मालोक्य तां विस्मयते स्म बाला ॥५०॥
अन्योन्यमन्यत्रवदीक्षमाणौ
परस्परेणाध्युषितेऽपि देशे ।
आलिङ्गितालीकपरस्परान्त-
स्तथ्यं मिथस्तौ परिषस्वजाते ॥५१॥
स्पर्शं तमस्याधिगतापि भैमी
मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीत-
स्तम्भो न धर्तुं सहसा शशाक ॥५२॥
स्पर्शातिहर्षादृतसत्यमत्या
प्रवृत्य मिथ्याप्रतिलब्धबाधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ
न श्रद्दधाते पथि तौ विमुग्धौ ॥५३॥

सर्वत्र संवाद्यमबाधमानौ रूपश्रियातिथ्यकरं परं तौ ।
न शेकतुः केलिरसाद्विरन्तुमलीकमालोक्य परस्परं तु ॥५४॥

परस्परस्पर्शरसोर्मिसेका-
त्तयोः क्षणं चेतसि विप्रलम्भः ।
स्नेहातिदानादिव दीपिकार्चि-
र्निमिष्य किंचिद्द्विगुणं दिदीपे ॥५५॥

वेश्माप सा धैर्यवियोगयोगाद्बोधं च मोहं च मुहुर्दधाना ।
पुनःपुनस्तत्र पुरः स पश्यन्बभ्रामतां सुभ्रुवमुद्भ्रमेण ॥५६॥

पङ्क्त्यां नृपः संचरमाण एष चिरं परिभ्रम्य कथंकथंचित् ।
विदर्भराजप्रभवाभिरामं प्रासादमभ्रंकषमाससाद ॥५७॥

सखीशतानां सरसैर्विलासैः
स्मरावरोधभ्रममावहन्तीम् ।
विलोकयामास सभां स भैम्या-
स्तस्य प्रतोलीमणिवेदिकायाम् ॥५८॥

कण्ठः किमस्याः पिकवेणुवीणा-
स्तिस्रो जिताः सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत यत्र कापि
नलेन बाला कलमालपन्ती ॥५९॥

एतं नलं तं दमयन्ति ! पश्य
त्यजार्तिमित्यालिकुलप्रबोधात् ।
श्रुत्वा स नारीकरवर्तिसारी-
मुखात्स्वमाशङ्कत यत्र दृष्टम् ॥६०॥

यत्रैकयालीकनलीकृताली-
कण्ठे मृषाभीमभवीभवन्त्या ।
तद्दृक्पथे दोहदिकोपनीता
शालीनमाघायि मधूकमाला ॥६१॥

चन्द्राभमाश्रं तिलकं दधाना
तद्बन्निजास्येन्दुकृतानुबिम्बम् ।
सखीमुखे चन्द्रसमे ससर्ज
चन्द्रानवस्थामिव कापि यत्र ॥६२॥
दलोदरे काञ्चनकेतकस्य
क्षणान्मसीभावुकवर्णलेखम् ।
तस्यैव यत्र स्वमनङ्गलेखं
लिलेख भैमी नखलेखिनीभिः ॥६३॥
विलेखितुं भीमभुवो लिपीषु
सख्याऽतिविख्यातिभृतापि यत्र ।
अशाकि लीलाकमलं न पाणि-
रपारि कर्णोत्पलमक्षि नैव ॥६४॥
भैमीमुपावीणयदेत्य यत्र
कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्वबध्वःस्वरमध्वरीण-
तत्कण्ठनालैकधुरोणवीणः ॥६५॥
नावा स्मरः किं हरभीतिगुप्ते
पयोधरे खेलति कुम्भ एव ।
इत्यर्धचन्द्राभनखाङ्कचुम्बि-
कुचा सखी यत्र सखीभिरूचे ॥६६॥
स्मराशुगीभूय विदर्भशुभ्रू-
वक्षो यदक्षोभि खलु प्रसूनैः ।
स्रजं सृजन्त्या तदशोधि तेषु
यत्रैकया सूचिशिखां निखाय ॥६७॥
यत्रावदत्तामतिभीय भैमी
त्यज त्यजेदं सखि ! साहसिक्यम् ।

त्वमेव कृत्वा मदनाय दत्से
बाणान्प्रसूनानि गुणेन सज्जान् ॥६८॥
आलिख्य सख्याः कुचपत्रभङ्गी-
मध्ये सुमध्या मकरीं करेण ।
यत्रालपत्तामिदमालि ! यानं
मन्ये त्वदेकावलिनाकनद्याः ॥६९॥
तामेव सा यत्र जगाद भूयः
पयोधियादः कुचकुम्भयोस्ते ।
सेयं स्थिता तावकहृच्छयाङ्क-
प्रियास्तु विस्तारयशःप्रशस्तिः ॥७०॥
शारीं चरन्तीं सखि ! मारयैता-
मित्यक्षदाये कथिते कयापि ।
यत्र स्वघातभ्रमभीरुशारी-
काकुत्थसाकूतहसः स जज्ञे ॥७१॥
भैमीसमीपे स निरीक्ष्य यत्र
ताम्बूलजाम्बूनदहंसलक्ष्मीम् ।
कृतप्रियादूत्यमहोपकार-
मरालमोहद्रढिमानमूहे ॥७२॥
तस्मिन्नियं सेति सखीसमाजे
नलस्य संदेहमथ व्युदस्यन् ।
अपृष्ट एव स्फुटमाचचक्षे
स कोऽपि रूपातिशयः स्वयं ताम् ॥७३॥
भैमीविनोदाय मुदा सखीभि-
स्तदाकृतीनां भुवि कल्पितानाम् ।
नातर्कि मध्ये स्फुटमप्युदीतं
तस्यानुबिम्बं मणिवेदिकायाम् ॥७४॥

हुताशकीनाशजलेशदूती-
निराकरिष्णोः कृतकाकुयाञ्चाः ।
भैम्या वचोभिः स निजां तदाशां
न्यवर्तयद्दूरमपि प्रयाताम् ॥७५॥

विज्ञप्तिमन्तःसभयः स भैम्या
मध्येसभं वासवसम्भलीयाम् ।
संभालयामास भृशं कृशाश-
स्तदालिवृन्दैरभिनन्द्यमानाम् ॥७६॥

लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य ।
इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानैः ॥७७॥

सलीलमालिङ्गनयोपपीडमनामयं पृच्छति वासवस्त्वाम् ।
शेषस्त्वदाश्लेषकथापुनिद्रैस्तद्रोमभिः संदिदिशे भवत्यै ॥७८॥

यः प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमापदागः ।
स्वयंवरस्थानजुषस्तमस्य बधान कण्ठं वरणस्रजाशु ॥७९॥

नैनं त्यज क्षीरधिमन्थनाद्यै-
रस्यानुजायोद्गमितामरैः श्रीः ।
अस्मै विमथ्येक्षुरसोदमन्यां
श्राम्यन्तु नोत्थापयितुं श्रियं ते ॥८०॥

लोकस्रजि द्यौर्दिवि चादितेया
अप्यादितेयेषु महान्महेन्द्रः ।
किंकर्तुमर्थी यदि सोऽपि रागा-
ज्जागर्ति कक्षा किमतः परापि ॥८१॥

पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः ।
कुरु प्रसादं तदलंकुरुष्व स्वीकारकृद्भ्रूनटनश्रमेण ॥८२॥

मन्दाकिनीनन्दनयोर्विहारे
देवे धवे देवरि माधवे च ।

श्रेयः श्रियां यातरि यत्र सख्यां
तच्चेतसा भाविनि ! भावयस्व ॥८३॥

रज्यस्व राज्ये जगतामितीन्द्राद्याञ्चाप्रतिष्ठां लभसे त्वमेव ।
लघूकृतस्व बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥८४॥

यानेव देवान्नमसि त्रिकालं
न तत्कृतघ्नीकृतिरौचिती ते ।
प्रसीद तानप्यनृणान्विधातुं
पतिष्यतस्त्वत्पदयोस्त्रिसंध्यम् ॥८५॥

इत्युक्तवत्या निहितादरेण
भैम्या गृहीता मघवत्प्रसादः ।
स्रक्पारिजातस्य ऋते नलाशां
वासैरशेषामपुपूरदाशाम् ॥८६॥

आर्ये ! विचार्यालमिहेति कापि
योग्यं सखि ! स्यादिति काचनापि ।
ओंकार एवोत्तरमस्तु वस्तु
मङ्गल्यमत्रेति च काप्यवोचत् ॥८७॥

अनाश्रवा वः किमहं कदापि
वक्तुं विशेषः परमस्ति शेषः ।
इतीरिते भीमजया न दूती-
मालिङ्गदालीश्च मुदामियत्ता ॥८८॥

भैमीं च दूत्यं च न किंचिदाप-
मिति स्वयं भावयतो नलस्य ।
आलोकमात्राद्यदि तन्मुखेन्दो-
रभून्न भिन्नं हृदयारविन्दम् ॥८९॥

ईषत्स्मितक्षालितसृक्विभागा स्वसंज्ञया वारिततत्सदालिः ।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूस्तरयांचकार ॥९०॥

स्तुतौ मघोनस्त्यज साहसिक्यं
वक्तुं वियत्तं यदि वेद वेदः ।
मृषोत्तरं साक्षिणि हृत्सु नृणाम-
ज्ञातृविज्ञापि ममापि तस्मिन् ॥९१॥

आज्ञां तदीयामनु कस्य नाम
नकारपारुष्यमुपैतु जिह्वा ।
प्रह्वा तु तां मूर्ध्नि विधाय मालां
बालापराध्यामि विशेषवाग्भिः ॥९२॥

तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ॥९३॥

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसंपदेऽपि ।
विशेषलेशोऽयमदेवदेहमंशागतं तु क्षितिभृत्तयेह ॥९४॥

अश्रौषमिन्द्रादरिणीर्गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः ।
त्वं प्रागहं प्रादिषि नामराय किं नाम तस्मै मनसा नराय ॥९५॥

तस्मिन्विमृश्यैव वृते हृदेषा मैन्द्री दया मामनुतापिकाभूत् ।
निर्वातुकामं भवसंभवानां धीरं सुखानामवधीरणेव ॥९६॥

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु ।
तत्रास्मि पत्युर्वरिवस्ययेह शर्मोर्मिकिर्मीरितधर्मलिप्सुः ॥९७॥

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च ।
शक्या मखेनापि मुदोऽमराणां कथं विहाय त्रयमेकमीहे ॥९८॥

साधोरपि स्वः खलु गामिताधो गमी स तु स्वर्गमितः प्रयाणे ।
इत्यायती चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥९९॥

प्रक्षीण एवायुषि कर्मकृष्टे
नरान्न तिष्ठत्युपतिष्ठते यः
बुभुक्षते नाकमपथ्यकल्पं
धीरस्तमापातसुखोन्मुखं कः ॥१००॥

इतीन्द्रदूत्याः प्रतिवाचमर्थं
प्रत्युह्य सैषाभिदधे वयस्याः ।
किंचिद्विवक्षोल्लसदोष्ठलक्ष्मी-
जितापनिद्रद्दलपङ्कजास्याः ॥१०१॥

अनादिधाविस्वपरम्पराया
हेतुस्रजः स्रोतसि वेश्वरे वा ।
आयत्तधीरेष जनस्तदार्याः !
किमीदृशः पर्यनुयोगयोग्यः ॥१०२॥

नित्यं नियत्या परवत्यशेषे
कः संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हे-
द्वक्ता तु वक्त्रश्रमकर्म भुङ्क्ते ॥१०३॥

क्रमेलकं निन्दति कोमलेच्छुः
क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोः समायां
मध्यस्थता नैकतरोपहासः ॥१०४॥

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहापयन्ति ।
न लोकमालोकयथापवर्गात्त्रिवर्गमर्वाञ्चममुञ्चमानम् ।१०५।

आकीटमाकंटभवैरि तुल्यः
स्वाभीष्टलाभात्कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चार्थमर्थं
द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥१०६॥

अध्वाग्रजाग्रन्निभृतापदन्धु-
र्बन्धुर्यदि स्यात्प्रतिबन्धुमर्हः ।
जोषं जनः कार्यविदस्तु वस्तु
प्रच्छाया निजेच्छा पदवीं मुदस्तु ॥१०७॥

इत्थं प्रतीपोक्तिमतिं सखीनां
विलुप्य पाण्डित्यबलेन बाला ।
अपि श्रुतस्वर्पतिमन्त्रिसूक्ति
दूतीं बभाषेऽद्भुतलोलमौलिम् ॥१०८॥
परेतभर्तुर्मनसेव दूतीं
नभस्वतेवानिलसख्यभाजः ।
त्रिस्रोतसेवाम्बुपतेस्तदाशु
स्थिरास्थमायातवतीं निरास्थम् ॥१०९॥
भूयोऽर्थमेनं यदि मां त्वमात्थ
तदा पदावालभसे मघोनः ।
सतीव्रतैस्तीव्रमिमं तु मन्तु-
मन्तर्वरं वज्रिणि मार्जितास्मि ॥११०॥
इत्थं पुनर्वागवकाशनाशा-
न्महेन्द्रदूत्यामपयातवत्याम् ।
विवेश लोलं हृदयं नलस्य
जीवः पुनः क्षीबमिव प्रबोधः ॥१११॥
श्रवणपुटयुगेन स्वेन साधूपनितं
दिगधिपकृपयाप्तादीदृशः संविधानात् ।
अलभत मधु बालारागवागुत्थ मित्थं
निषधजनपदेन्द्रः पातुमानन्दसान्द्रम् ॥११२॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
षष्ठः खण्डनखण्डतोऽपि सहजात्क्षोदक्षमे तन्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११३॥

॥ इति महाकवि हर्षविरचिते नैषधीयप्रकाशे
षष्ठः सर्गः समाप्तः ॥

## ॥७॥ सप्तमः सर्गः ॥

अथ प्रियासादनशीलनादौ मनोरथः पल्लवितश्चरं यः ।
विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥१॥
प्रतिप्रतीकं प्रथमं प्रियायामथान्तरानन्दसुधासमुद्रे ।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥२॥
ब्रह्माद्वयस्यान्वभवत्प्रमोदं रोमाग्र एवाग्रनिरीक्षितेऽस्याः ।
यथौचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथासौ ॥३॥

वेलामतिक्रम्य पृथुं मुखेन्दो-
रालोकपीयूषरसेन तस्याः ।
नलस्य रागाम्बुनिधौ विवृद्धे
तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥४॥
मग्ना सुधायां किमु तन्मुखेन्दो-
र्लग्ना स्थिता तत्कुचयोः किमन्तः ।
चिरेण तन्मध्यममुञ्चतास्य
दृष्टिः कृशीयः स्खलनाद्भिया नु ॥५॥
प्रियाङ्गपान्था कुचयोर्निवृत्य
निवृत्य लोला नलदृग्भ्रमन्ती ।
बभौतमां तन्मृगनाभिलेप-
तमःसमासादितदिग्भ्रमेव ॥६॥
विभ्रम्य तच्चारुनितम्बचक्रे
दूतस्य दृक्तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भा-
स्तम्भावुपाश्लिष्य करेण गाढम् ॥७॥

वासः परं नेत्रमहं न नेत्रं किमु त्वमालिङ्गय तन्मयापि ।
उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ॥८॥

दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः ।
इदं प्रमोदाद्भुतसंभृतेन महीमहेन्द्रो मनसा जगाद ॥९॥

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेतापि न वा तदेतत्प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥१०॥

तरङ्गिणी भूमिभृतः प्रभूता
जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि, यौवनेन
यस्यां तथोच्चैस्तनताघनेन ॥११॥

अस्यां वपुर्व्यूहविधानविद्यां
किं द्योतयामास नवां स कामः ।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा
लावण्यसीमा यदिमामुपास्ते ॥१२॥

जम्बालजालात्किमकर्षि जम्बूनद्याः न हारिद्रनिभप्रभेयम् ।
अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ॥१३॥

सत्येव साम्ये सदृशादशेषाद्
गुणान्तरेणोच्चकृषे यदङ्गैः ।
अस्यास्ततः स्यात्तुलनापि नाम
वस्तु त्वमीषामुपमापमानः ॥१४॥

पुराकृतिस्त्रैणमिमां विधातु-
मभूद्विधातुः खलु हस्तलेखः ।
येयं भवद्भाविपुरंध्रिसृष्टिः
सास्यै यशस्तज्जयजं प्रदातुम् ॥१५॥

भव्यानि ह्रानीरगुरेतदङ्गा-
द्यया यथार्नति तथा तथा तैः ।
अस्याधिकस्योपमयोपमाता
दाता प्रतिष्ठां खलु तेभ्य एव ॥१६॥

नास्पर्शि दृष्टापि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये ।
अन्येषु तैराकुलितस्तदस्यां वसत्यसापत्न्यसुखी गुणौघः ।।१७।।

औज्झि प्रियाङ्गैर्घृणयैव रूक्षा
न वारिदुर्गात्तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्ति-
र्धूलीभृता काञ्चनकेतकस्य ।।१८।।

प्रत्यङ्गमस्यामभिकेन रक्षां
कर्तुं मघोनेव निजास्त्रमस्ति ।
वज्रं च भूषामणिमूर्तिधारि
नियोजितं तद्द्युतिकार्मुकं च ।।१९।।

अस्याः सपक्षैकविधोः कचौघः
स्थाने मुखस्योपरि वासमाप ।
पक्षस्थतावद्बहुचन्द्रकोऽपि
कलापिनां येन जितः कलापः ।।२०।।

अस्या यदास्येन पुरस्तिरश्च
तिरस्कृतं शीतरुचान्धकारम् ।
स्फुटस्फुरद्भृङ्गिकचच्छलेन
तदेव पश्चादिदमस्ति बद्धम् ।।२१।।

अस्याः कचानां शिखिनश्च किंनु
विधिं कलापौ विमतेरगाताम् ।
तेनायमेभिः किमपूजि पुष्पै-
र्भर्त्सि दत्त्वा स किमर्धचन्द्रम् ।।२२।।

केशान्धकारादथ दृश्यभाल-
स्थलार्धचन्द्रा स्फुटमष्टमीयम् ।
एनां यदासाद्य जगज्जयाय
मनोभुवा सिद्धिरसाधि साधु ।।२३।।

पौष्पं धनु: किं मदनस्य दाहे
श्यामीभवत्केसरशेषमासीत् ।
व्यधाद्विधेशस्तदपि क्रुधा किं
भैमीभ्रुवौ येन विधिर्व्यधत्त ॥२४॥
भ्रूभ्यां प्रियाया भवता मनोभूचापेनचापे घनसारभाव: ।
निजां यदप्लोषदशामपेक्ष्य संप्रत्यनेनाधिकवीर्यताजि ॥२५॥
स्मारं धनुर्यद्विधुनोज्झितास्या
यास्येन भूतेन च लक्ष्मलेखा ।
एतद्भ्रुवौ जन्म तदाप युग्मं
लीलाचलत्वोचितबालभावम् ॥२६॥
इषुत्रयेणैव जगत्त्रयस्य
विनिर्जयात्पुष्पमयाशुगेन ।
शेषा द्विबाणी सफलीकृतेयं
प्रियादृगम्भोजपदेऽभिषिच्य ॥२७॥
सेयं मृदु: कौसुमचापयष्टि:
स्मरस्य मुष्टिग्रहणार्हमध्या ।
तनोति न: श्रीमदपाङ्गमुक्तां
मोहाय या दृष्टिशरौघवृष्टिम् ॥२८॥
आघूर्णितं पक्ष्मलमक्षिपद्मं
प्रान्तद्युतिश्वैत्यजितामृतांशु ।
अस्या इवास्याश्चलदिन्द्रनील-
गोलामलश्यामलतारतारम् ॥२९॥
कर्णोत्पलेनापि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन ।
यद्येतदीयेन तत: कृतार्था स्वचक्षुषी किं कुरुते कुरङ्गी ॥३०॥
त्वच: समुत्तार्य दलानि रीत्या मोचात्वच: पञ्चषपाटनायाम् ।
सारैर्गृहीतैर्विधिरुत्पलौघादस्यामभूदीक्षणरूपशिल्पी ॥३१॥

चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः ।
सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ।।३२।।

ऋणीकृता किं हरिणीभिरासी-
दस्याः सकाशान्नयनद्वयश्रीः ।
भूयोगुणेयं सकला बलाद्य-
त्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः ।।३३।।

दृशौ किमस्याश्चपलस्वभावे
न दूरमाक्रम्य मिथो मिलेताम् ।
न चेत्कृतः स्यादनयोः प्रयाणे
विघ्नः श्रवःकूपनिपातभीत्या ।।३४।।

केदारभाजा शिशिरप्रवेशात्-
पुण्याय मन्ये मृतमुत्पलिन्या ।
जाता यतस्तत्कुसुमेक्षणेयं
यातश्च तत्कोरकदृक्चकोरः ।।३५।।

नासादसीया तिलपुष्पतूणं
जगत्त्रयव्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां
दधद्द्विबाणीं कुसुमायुधस्य ।।३६।।

बन्धूकबन्धूभवदेतदस्या
मुखेन्दुनानेन सहोज्जिहाना ।
रागश्रिया शैशवयौवनीयां
स्वमाह संध्यामधरोष्ठलेखा ।।३७।।

अस्या मुखेन्दावधरः सुधाभू-
बिम्बस्य युक्तः प्रतिबिम्ब एषः ।
तस्याथ वा श्रीद्रुमभाजि देशे
संभाव्यमानास्य तु विद्रुमे सा ।।३८।।

जानेऽतिरागादिदमेव बिम्बं
बिम्बस्य च व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाणां
नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥३९॥
मध्योपकण्ठावधरोष्ठभागौ
भातः किमप्युच्छ्वसितौ यदस्याः ।
तत्स्वप्नसंभोगवितीर्णदन्त-
दंशेन किं वा न मयापराद्धम् ॥४०॥
विद्या विदर्भेन्द्रसुताधरोष्ठे
नृत्यन्ति कत्यन्तरभेदभाजः ।
इतीव रेखाभिरपश्रमस्ताः
संख्यातवान् कौतुकवान्विधाता ॥४१॥
संभुज्यमानाद्य मया निशान्ते
स्वप्नेऽनुभूता मधुराधरेयम् ।
असीमलावण्यरदच्छदेत्थं
कथं मयैव प्रतिपद्यते वा ॥४२॥
यदि प्रसादीकुरुते सुधांशो-
रेषासहस्रांशमपि स्मितस्य ।
तत्कौमुदीनां कुरुते तमेव
निमिच्छय देवः सफलं स जन्म ॥४३॥
चन्द्राधिकैतन्मुखचन्द्रिकाणां
दरायतं तत्किरणाद्धनानाम् ।
पुरःसरस्रस्तपृषद्द्वितीयं
रदावलिद्वन्द्वति बिन्दुवृन्दम् ॥४४॥
सेयं ममैतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति संध्या ।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ॥४५॥

राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत् ।
उद्वेगरागादिमृजावदाताश्चत्वार एते तदवैमि मुक्ताः ॥४६॥
शिरीषकोषादपि कोमलाया वेधा विधायाङ्गमशेषमस्याः ।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥४७॥
प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरुभ्यः ४८

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मी-
मेकस्य विष्णोः श्रयणात्सपत्नीम् ।
आस्येन्दुमस्या भजते जिताब्जं
सरस्वती तद्विजिगीषया किम् ॥४९॥

कण्ठे वसन्ती चतुरा यदस्याः
सरस्वती वादयते विपञ्चीम् ।
तदेव वाग्भूय मुखे मृगाक्ष्याः
श्रोतुः श्रुतौ याति सुधारसत्वम् ॥५०॥

विलोकितास्या मुखमुन्नमय्य
किं वेधसेयं सुषमासमाप्तौ ।
धृत्युद्भवा यच्चिबुके चकास्ति
निम्ने मनागङ्गुलियन्त्रणेव ॥५१॥

प्रियामुखीभूय सुखी सुधांशुर्जयत्ययं राहुभयव्ययेन ।
इमां दधाराधरबिम्बलीलां तस्यैव बालं करचक्रवालम् ॥५२॥

अस्या मुखस्यास्तु न पूर्णमास्यं
पूर्णस्य जित्वा महिमा हिमांशुम् ।
भ्रूलक्ष्म खण्ड दधदर्धमिन्दु-
र्भालस्तृतीयः खलु यस्य भागः ॥५३॥

व्यधत्त धाता मुखपद्ममस्याः
सम्राजमम्भोजकुलेऽखिलेऽपि ।

सरोजराजौ सृजतोऽदसीयां
नेत्राभिधेयाव्रत एव सेवाम् ॥५४॥
दिवारजन्यो रविसोमभीते
चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् ।
आस्ये यदास्या न तदा तयोः श्री-
रेकश्रियेदं तु कदा न कान्तम् ॥५५॥
अस्या मुखश्रीप्रतिबिम्बमेव
जलाच्च तातान्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ
विभूषणं याचितकं कदाचित् ॥५६॥
अर्काय पत्ये खलु तिष्ठमाना
भृङ्गैर्मितामक्षिभिरम्बुकेलौ ।
भैमीमुखस्य श्रियमम्बुजिन्यो
याचन्ति विस्तारितपद्महस्ताः ॥५७॥
अस्या मुखेनैव विजित्य नित्य-
स्पर्धी मिलत्कुङ्कुमरोषभासा ।
प्रसह्य चन्द्रः खलु नह्यमानः
स्यादेव तिष्ठत्परिवेषपाशः ॥५८॥
विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि ।
अभङ्गुरश्रीकममुं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥५९॥
कपोलपत्रान्मकरात्सकेतुर्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति ।
इहावलम्ब्यास्ति रतिं मनोभू रज्यद्द्वयस्यो मधुनाधरेण ॥६०॥
वियोगबाष्पाञ्चितनेत्रपद्म-
च्छद्मार्पितोत्सर्गपयःप्रसूनौ ।
कर्णौ किमस्या रतितत्पतिभ्यां
निवेद्यपूपौ विधिशिल्पमोदक् ॥६१॥

इहाविशद्येन पथातिवक्रः
शास्त्रौघनिष्यन्दसुधाप्रवाहः ।
सोऽस्याः श्रवःपत्रयुगे प्रणाली-
रेखेव धावत्यभिकर्णकूपम् ॥६२॥
अस्या यदष्टादश संविभज्य
विद्याः श्रुती दध्रतुरर्धमर्धम् ।
कर्णान्तरुत्कीर्णगभीररेखः
किं तस्य संख्यैव नवा नवाङ्कः ॥६३॥
मन्येऽमुना कर्णलतामयेन
पाशद्वयेन च्छिदुरेतरेण ।
एकाकिपाशं वरुणं विजिग्ये-
ऽनङ्गीकृतत्रयासततौ रतीशः ॥६४॥
आत्मेव तातस्य चतुर्भुजस्य
जातश्चतुर्दोरुचितः स्मरोऽपि ।
तच्चापयोः कर्णलते भ्रुवोर्ज्ये
वंशत्वगंशौ चिपिटे किमस्याः ॥६५॥
ग्रीवाद्भुतैवावटुशोभितापि
प्रसाधिता माणवकेन सेयम् ।
आलिङ्ग्यतामप्यवलम्बमाना
सुरूपताभागखिलोर्ध्वकाया ॥६६॥
कवित्वगानप्रियवादसत्या-
न्यस्या विधाता व्यधिताधिकण्ठम् ।
रेखात्रयन्याससिषादमीषां
वासाय सोऽयं विबभाज सीमाः ॥६७॥
बाहू प्रियाया जयतां मृणालं
द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् ।

उच्चैस्तु तच्चित्रममुष्य भग्न-
स्यालोक्यते निर्व्यथनं यदन्तः ॥६८॥
अजीयतावर्तशुभंयुनाभ्यां
दोर्भ्यां मृणालं किमु कोमलाभ्याम् ।
निःसूत्रमास्ते घनपङ्कमृत्सु-
मूर्तासु नाकीर्तिषु तन्निमग्नम् ॥६९॥

रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपत्रतूणे ।
हैमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥७०॥

अस्याः करस्पर्धनगर्धनर्द्धि-
बलित्वमापत् खलु पल्लवो यः ।
भूयोऽपि नामाधरसाम्यगर्वं
कुर्वन्कथं वास्तु न स प्रवालः ॥७१॥
अस्यैव सर्गाय भवत्करस्य
सरोजसृष्टिर्मम हस्तलेखः ।
इत्याह धाता हरिणेक्षणायां
किं हस्तलेखीकृतया तयाऽस्याम् ॥७२॥
किं नर्मदाया मम सेयमस्या
दृश्याभितो बाहुलतामृणाली ।
कुचौ किमुत्तस्थतुरन्तरीपे
स्मरोष्मशुष्यत्तरबाल्यवारः ॥७३॥
ताल प्रभु स्यादनुकर्तुमेता-
वुत्थानसुस्थौ पतित न तावत् ।
परं च नाश्रित्य तरुं महान्तं
कुचौ कृशाङ्ग्याः स्वत एव तुङ्गौ ॥७४॥
एतत्कुचस्पर्धितया घटस्य
ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।

तस्माच्च शिल्पान्मणिकादिकारी
प्रसिद्धनामाजनि कुम्भकारः ॥७५॥
गुच्छालयस्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के ।
माणिक्यहारस्य विदर्भसुभ्रूपयोधरे रोहति रोहितश्रीः ॥७६॥
निःशङ्कसंकोचितपङ्कजोऽय-
मस्यामुदीतो मुखमिन्दुबिम्बः ।
चित्रं तथापि स्तनकोकयुग्मं
न स्तोकमप्यञ्चति विप्रयोगम् ॥७७॥
आभ्यां कुचाभ्यामिभकुम्भयोः श्री-
रादीयतेऽसावनयोर्न ताभ्याम् ।
भयेन गोपायितमौक्तिकौ तौ
प्रव्यक्तमुक्ताभरणाविभौ यत् ॥७८॥
कराग्रजाग्रच्छतकोटिरर्थी
ययोरिमौ तौ तुलयेत्कुचौ चेत् ।
सर्वं तदा श्रीफलमुन्मदिष्णु
जातं वटीमप्यधुना न लब्धुम् ॥७९॥
स्तनावटे चन्दनपङ्किलेऽस्या
जातस्य यावद्युवमानसानाम् ।
हारावलीरत्नमयूखधारा-
काराः स्फुरन्ति स्खलनस्य रेखाः ॥८०॥
क्षीणेन मध्येऽपि सतोदरेण
यत्प्राप्यते नाक्रमणं वलिभ्यः ।
सर्वाङ्गशुद्धौ तदनङ्गराज्यं
विजृम्भितं भीमभुवीह चित्रम् ॥८१॥
मध्यं तनूकृत्य यदीदमीयं
वेधा न दध्यात्कमनीयमंशम् ।

केन स्तनौ संप्रति यौवनेऽस्याः
सृजेदनन्यप्रतिमाङ्गयष्टेः ॥८२॥

गौरीव पत्या सुभगा कदाचित्कर्तेयमप्यर्धतनूसमस्याम् ।
इतीव मध्ये विदधे विधाता रोमावलीमेचकसूत्रमस्याः ॥८३॥

रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।
मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां बतैषा सिचयेन गुप्तिः ॥८४॥

उन्मूलितालानविलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमराजिः ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥८५॥

रोमावलिभ्रूकुसुमैः स्वमौर्वी-
चापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयै-
र्जैत्रः स चित्रं रतिजानिवीरः ॥८६॥

पुष्पाणि बाणाः कुचमण्डनानि
भ्रुवौ धनुर्भालमलंकरिष्णु ।
रोमावली मध्यविभूषणं ज्या
तथापि जेता रतिजानिरेतैः ॥८७॥

अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् ।
स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥८८॥

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ॥८९॥

रोमावलीदण्डनितम्बचक्रे
गुणं च लावण्यजलं च बाला ।
तारुण्यमूर्तेः कुचकुम्भकर्तु-
र्बिभर्ति शङ्के सहकारिचक्रम् ॥९०॥

अङ्गेन केनापि विजेतुमस्या
गवेष्यते किं चलपत्रपत्रम् ।

न चेद्विशेषाद्वितरच्छदेभ्य-
स्तस्यास्तु कम्पस्तु कुतो भयेन ॥९१॥
भ्रूश्चित्रलेखा च तिलोत्तमास्या
नासा च रम्भा च यदूरुसृष्टिः ।
दृष्टा ततः पूरयतीयमेका-
नेकाप्सरः प्रेक्षणकौतुकानि ॥९२॥
रम्भापि किं चिह्नयति प्रकाण्डं
न चात्मनः स्वेन न चैतदूरू ।
त्वस्यैव येनोपरि सा ददाना
पत्राणि जागर्त्यनयोर्भ्रमेण ॥९३॥
विधाय मूर्धानमदश्चरं चे-
न्मुञ्चेत्तपोभिः स्वमसारभावम् ।
जाड्यं च नाञ्चेत्कदली बलीय-
स्तदा यदि स्यादिदमूरुचारुः ॥९४॥
ऊरुप्रकाण्डद्वितयेन तन्व्याः
करः पराजीयत वारणीयः ।
युक्तं ह्रिया कुण्डलनच्छलेन
गोपायति स्वं मुखपुष्करं सः ॥९५॥
अस्यां मुनीनामपि मोहमूहे
भृगुर्महान्यत्कुचशैलशीली ।
नानारदाह्लादि मुखं श्रितोरु-
र्व्यासो महाभारतसर्गयोग्यः ॥९६॥
क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढं विदुषी किमस्या ।
अपि भ्रमीभङ्गिभिरावृताङ्गं वासो लतावेष्टितकप्रवीणम् ।९७।
अरुन्धतीकामपुरंध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम् ।
चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यददृश्यसिद्धिः ॥९८॥

अस्याः पदौ चारुतया महान्ता-
वपेक्ष्य सौक्ष्म्याल्लवभावभाजः ।
जाता प्रवालस्य महीरुहाणां
जानीमहे पल्लवशब्दलब्धिः ॥९९॥

जगद्वधूमूर्धसु रूपदर्पाद्यदेतयादायि पदारविन्दम् ।
तत्सान्द्रसिन्दूरपरागरागैर्ध्रुवं प्रवालप्रबलारुणं तत् ॥१००॥

रुषारुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्म विधेर्गृणीते ।
ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ॥१०१॥

यानेन तन्व्या जितदन्तिनाथौ
पादाब्जराजौ परिशुद्धपार्ष्णी ।
जाने न शुश्रूषयितुं स्वमिच्छू
नतेन मूर्ध्ना कतरस्य राज्ञः ॥१०२॥

कर्णाक्षिदन्तच्छदबाहुपाणि-
पादादिनः स्वाखिलतुल्यजेतुः ।
उद्वेगभागद्वयताभिमाना-
दिहैव वेधा व्यधित द्वितीयम् ॥१०३॥

तुषारनिःशेषितमब्जसर्गं
विधातुकामस्य पुनर्विधातुः ।
पञ्चस्विहास्याङ्घ्रिकरेष्वभिख्या-
भिक्षाधुना माधुकरीसदक्षा ॥१०४॥

एष्यन्ति यावद्गणनाद्दिगन्ता-
न्नृपाः स्मरार्ताः शरणं प्रवेष्टुम् ।
इमे पदाब्जे विधिनापि सृष्टा-
स्तावत्य एवाङ्गुलयोऽत्र लेखाः ॥१०५॥

प्रियानखीभूतवतो मुदेदं
व्यधाद्विधिः साधुदशत्वमिन्दोः ।

एतत्पदच्छद्मसरागपद्म-
सौभाग्यभाग्यं कथमन्यथा स्यात् ॥१०६॥
यशः पदाङ्गुष्ठनखौ मुखं च
बिभर्ति पूर्णेन्दुचतुष्टयं या ।
कला चतुःषष्टिरुपैतु वासं
तस्यां कथं सुभ्रु वि नाम नास्याम् ॥१०७॥
सृष्टातिविश्वा विधिनैव तावत्तस्यापि नीतोपरि यौवनेन ।
वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पथपारमेव ॥१०८॥
इति स चिकुरादारभ्यैनां नखावधि वर्णयन्
हरिणरमणीनेत्रां चित्राम्बुधौ तरदन्तरः ।
हृदयभरणोद्वेलानन्दः सखीकृतभीमजा-
नयनविषयीभावे भावं दधार धराधिपः ॥१०९॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
काव्ये चारुणि वैरसेनिचरिते सर्गोऽगमत्सप्तमः ॥११०॥

॥ इति महाकविहर्षविरचिते नैषधीयप्रकाशे
सप्तमः सर्गः समाप्तः ॥ ७ ॥

## ॥ ८ ॥ अष्टमः सर्गः ॥

अथाद्भुतेनास्तनिमेषमुद्र-
मुन्निद्रलोमानममुं युवानम् ।
दृशा पपुस्ताः सुदृशः समस्ताः
सुता च भीमस्य महीमघोनः ॥१॥
कियच्चिरं दैवतभाषितानि निह्नोतुमेनं प्रभवन्तु नाम ।
पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ॥२॥

अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ।।३।।
यदक्रमं विक्रमशक्तिसाम्यादुपाचरद्द्वावपि पञ्चबाणः ।
कथं न वैमत्यममुष्य चक्रे शरैरनर्घार्घविभागभाग्भिः ।।४।।
तस्मिन्नलोऽसाविति सान्वरज्यत् क्षणं क्षण क्वेह स इत्युदास्त ।
पुनः स्म तस्यां वलतेऽस्य चित्तं दूत्यादनेनाथ पुनर्न्यवर्ति ।।५।।
कयाचिदालोक्य नलं ललज्जे कयापि तद्भासि हृदा ममज्जे ।
तं कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ।।६।।
कस्त्वं कुतो वेति न जातुशेकु-
स्तं प्रष्टुमप्यप्रतिभातिभारात् ।
उत्तस्थुरभ्युत्थितिवाञ्छयेव
निजासनान्नैकरसाः कृशाङ्ग्यः ।।७।।
स्वाच्छन्द्यमानन्दपरंपराणां भैमी तमालोक्य किमप्यवाप ।
महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ।।८।।
तत्रैव मग्ना यदपश्यदग्रे
नास्या दृगस्याङ्गमयास्यदन्यत् ।
नादास्यदस्यै यदि बुद्धिधारां
विच्छिद्य विच्छिद्य चिरान्निमेषः ।।९।।
दृशापि सालिङ्गितमङ्गमस्य जग्राह नाग्रावगताङ्गहर्षैः ।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम् ।।१०।।
हित्वैकमस्यापघनं विशन्ती तद्दृष्टिरङ्गान्तरभुक्तिसीमाम् ।
चिरं चकारोभयलाभलोभात्स्वभावलोला गतमागतं च ।।११।।
निरीक्षितं चाङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ।।१२।।
सूक्ष्मे घने नैषधकेशपाशे
निपत्य निस्पन्दतरीभवद्भ्याम् ।

तस्यानुबन्धं न विमोच्य गन्तु-
मपारि तल्लोचनखञ्जनाभ्याम् ।।१३।।
भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य ।
दमस्वसुर्दृष्टिसरोजराजिश्चिरं न तत्याज सबन्धुबन्धम् ।।१४।।

तत्कालमानन्दमयी भवन्ती
भवत्तरानिर्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्यां
द्विस्वादमुल्लासमभुङ्क्त मिष्टम् ।।१५।।

दूते नलश्रीभृति भाविभावा
कलङ्किनीयं जनि मेति नूनम् ।
न संव्यधान्नैषधकायमायं
विधिः स्वयंदूतमिमां प्रतीन्द्रम् ।।१६।।

पुण्ये मनः कस्य मुनेरपि स्यात्
प्रमाणमास्ते यदधेऽपि धावत् ।
तच्चिन्ति चित्तं परमेश्वरस्तु
भक्तस्य हृष्यत्करुणो रुणद्धि ।।१७।।

सालीकदृष्टे मदनोन्मदिष्णु-
र्यथाप शालीनतमा न मौनम् ।
तथैव तथ्येऽपि नले न लेभे
मुग्धेषु कः सत्यमृषाविवेकः ।।१८।।

व्यर्थीभवद्भावपिधानयत्ना
स्वरेण साथ श्लथगद्गदेन ।
सखीचये साध्वसबद्धवाचि
स्वयं तमूचे नमदाननेन्दुः ।।१९।।

नत्वा शिरोरत्नरुचापि पाद्यं संपाद्यमाचारविदातिथिभ्यः ।
प्रियाक्षरालीरसधारयापि वैधी विधेया मधुपर्कतृप्तिः ।।२०।।

स्वात्मापि शीलेन तृणं विधेयं
देया विहायासनभूनिजापि ।
आनन्दबाष्पैरपि कल्प्यमम्भः
पृच्छा विधेया मधुभिर्वचोभिः ॥२१॥
पदोपहारेऽनुपनम्रतापि
संभाव्यतेऽर्षां त्वरयापराधः ।
तत्कर्तुं महाञ्जलिसञ्जनेन
स्वसंभृतिः प्राञ्जलतापि तावत् ॥२२॥
पुरा परित्यज्य मयात्यसर्जि स्वमासनं तत्किमिति क्षणं न ।
अनर्हमप्येतदलंक्रियेत प्रयातुमीहा यदि चान्यतोऽपि ॥२३॥
निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् ।
पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥२४॥
अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन सज्ञा ॥२५॥
तीर्णः किमर्णोनिधिरेव नैष
सुरक्षितेऽभूदिह यत्प्रवेशः ।
फलं किमेतस्य तु साहसस्य
न तावदद्यापि विनिश्चिनोमि ॥२६॥
तव प्रवेशे सुकृतानि हेतु-
र्मन्ये मदक्ष्णोरपि तावदत्र ।
न लक्षितो रक्षिभटैर्यदाभ्यां
पीतोऽसि तन्वा जितपुष्पधन्वा ॥२७॥
यथाकृतिः काचन ते यथा वा
दौवारिकान्धंकरणी च शक्तिः ।
रुच्यो रुचीभिर्जितकाञ्चनीभि-
स्तथासि पीयूषभुजां सनाभिः ॥२८॥

न मन्मथस्त्वं स हि नास्तिमूर्ति-
नं चाश्विनेयः स हि नाद्वितीयः ।
चिह्नैः किमन्यैरथवा तवेयं
श्रीरेव ताभ्यामधिको विशेषः ॥२९॥
आलोकतृप्तीकृतलोक ! यस्त्वा-
मसूत पीयूषमयूखमेनम् ।
कः स्पर्धितुं धावति साधु सार्ध-
मुदन्वता नन्वयमन्ववायः ॥३०॥
भूयोऽपि बाला नलसुन्दरं तं
मत्वामरं रक्षिजनाक्षिबन्धात् ।
आतिथ्यचाट्वन्यपदिश्य तत्स्थां
श्रियं प्रियस्यास्तुत वस्तुतः सा ॥३१॥
वाग्जन्मवैफल्यमसह्यशल्यं
गुणाद्भुते वस्तुनि मौनिता चेत् ।
खलत्वमल्पीयसि जल्पितेऽपि
तदस्तु बन्दिभ्रमभूमितैव ॥३२॥
कंदर्प एवेदमविन्दत त्वां
पुण्येन मन्ये पुनरन्यजन्म ।
चण्डीशचण्डाक्षिहुताशकुण्डे
जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥३३॥
शोभायशोभिर्जितशैवशैलं
करोषि लज्जागुरुमौलिमैलम् ।
दस्री हठश्रीहरणादुदस्रौ
कंदर्पमप्युज्झितरूपदर्पम् ॥३४॥
अवैमि हंसावलयो वलक्षा-
स्त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः ।

उड्डीय युक्तं पतिताः स्रवन्ती-
वेशन्तपूरं परितः प्लवन्ते ॥३५॥
भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन ।
रतीशजेतुः खलु चिह्नमस्मिन्नर्धेन्दुरास्ते नखवेषधारी ॥३६॥
राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनूं तपोभिः ।
कुहूषु दृश्येतरतां किमेत्य सायुज्यमाप्नोति भवन्मुखस्य ॥३७॥
कृत्वा दृशौ ते बहुवर्णचित्रे किं कृष्णसारस्य तयोर्मृगस्य ।
अदूरजाग्रद्विदरप्रणालीरेखामयच्छद्विधिरर्धचन्द्रम् ॥३८॥
मुग्धः स मोहात्सुभगान्न देहाद्ददद्भ्रुवद्भ्रूरचनाय चापम् ।
भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदा तदाभूत् ॥३९॥
मृगस्य नेत्रद्वितयं तवास्ये विधौ विधुत्वानुमितस्य दृश्यम् ।
तस्यैव चञ्चत्कचपाशवेषः पुच्छः स्फुरच्चामरगुच्छ एषः ॥४०॥
आस्तामनङ्गीकरणाद्भवेन
दृश्यः स्मरो नेति पुराणवाणी ।
तवैव देहं श्रितया श्रियेति
नवस्तु वस्तु प्रतिभाति वादः ॥४१॥
त्वया जगत्युच्चितकान्तिसारे
यदिन्दुनाशीलि शिलोञ्छवृत्तिः ।
आरोपि तन्माणवकोऽपि मौलौ
स यज्वराज्येऽपि महेश्वरेण ॥४२॥
आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम् ।
त्वदङ्गशिल्पात्पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥४३॥
मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि ।
कुलं त्वयालंकृतमौरगं चेन्नाधोऽपि कस्योपरि नागलोकः ॥४४॥
सेयं न धत्तेऽनुपपत्तिमुच्चै-
र्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने ।

ममौ स भद्रं चुलुके समुद्र-
स्त्वयात्तगाम्भीर्यमहत्त्वमुद्रः ॥४५॥
संसारसिन्धावनुबिम्बमत्र
जागर्ति जाने तव वैरसेनिः ।
बिम्बानुबिम्बौ हि विहाय धातु-
र्न जातु दृष्टातिसरूपसृष्टिः ॥४६॥
इयत्कृतं केन महीजगत्यामहो महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवापि पद्मारजःसु पद्मस्रजमारभेते ॥४७॥
ब्रवीति मे किं किमियं न जाने
संदेहदोलामवलम्ब्य संवित् ।
कस्यापि धन्यस्य गृहातिथिस्त्व-
मलीकसंभावनयाथवालम् ॥४८॥
प्राप्तैव तावत्तव रूपसृष्टिं
निपीय दृष्टिर्जनुषः फलं मे ।
अपि श्रुती नामृतमाद्रियेतां
तयोः प्रसादीकुरुषे गिरं चेत् ॥४९॥
इत्थं मधूत्थं रसमुद्गिरन्ती
तदोष्ठबन्धूकधनुर्विसृष्टा ।
कर्णात्प्रसूनाशुगपञ्चबाणी
वाणीमिषेणास्य मनो विवेश ॥५०॥
अमज्जदाकण्ठमसौ सुधासु
प्रियं प्रियाया वचनं निपीय ।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या
तन्मिष्टता नेष्टमुखे त्वमेया ॥५१॥
पौरस्त्यशैलं जनतोपनीतां गृह्णन् यथाह्नःपतिरर्घ्यपूजाम् ।
तथातिथेयीमथ संप्रतीच्छ प्रियार्पितामासनमाससाद ॥५२॥

अयोधि तद्धैर्यमनोभवाभ्यां
ताभेव भैमीमवलम्ब्य भूमीम् ।
आह स्म यत्र स्मरचापमन्त-
श्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम् ॥५३॥

अथ स्मराज्ञामवधीर्य धैर्यादूचे स तद्वागुपवीणितोऽपि ।
विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ॥५४॥

हरित्पतीनां सदसः प्रतीहि त्वदीयमेवातिथिमागतं माम् ।
वहन्तमन्तर्गुरुणादरेण प्राणानिव स्वःप्रभुवाचिकानि ॥५५॥

विरम्यतां भूतवती सपर्या
निविश्यतामासनमुज्झितं किम् ।
या दूतता नः फलिना विधेया
सैवातिथेयी पृथुरुद्भवित्री ॥५६॥

कल्याणि! कल्यानि तवाङ्गकानि
कच्चित्तमां चित्तमनाविलं ते ।
अलं विलम्बेन गिरं मदीया-
माकर्णयाकर्णतटायताक्षि! ॥५७॥

कौमारमारभ्य गणा गुणानां हरन्ति ते दिक्षु धृताधिपत्यान् ।
सुराधिराजं सलिलाधिपं च हुताशनं चायमनन्दनं च ॥५८॥

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खेदमेति ।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम् ॥५९॥

तेषामिदानीं किल केवलं सा
हृदि त्वदाशा विलसत्यजस्रम् ।
आशास्तु नासाद्य तनूरुदाराः
पूर्वादयः पूर्ववदात्मदाराः ॥६०॥

अनेन सार्धं तव यौवनेन
कोटिं परामच्छिदुरोऽध्यरोहत् ।

प्रेमापि-तन्वि ! त्वयि वासवस्य
गुणोऽपि चापे सुमनःशरस्य ॥६१॥

प्राचीं प्रयाते विरहादयं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापरार्धैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥६२॥

त्रिनेत्रमात्रेण रुषा कृतं यत्-
देव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे
गन्ता स कामः खलु कामवस्थाम् ॥६३॥

पिकस्य वाङ्मात्रकृताद्व्यलीका-
च्चास्त्र स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधा-
न्नाराधनं शीलति शूलिनोऽपि ॥६४॥

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशां दिशन्ति ।
कुहूगिरश्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥६५॥

शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाशनिना करोति ।
अभेद्यमस्याहह वर्म न स्यादनङ्गता चेद्गिरिशप्रसादः ॥६६॥

धृताधृतैस्तस्य भवद्वियोगादन्यान्यशय्यारचनाय लूनैः ।
अप्यन्यदारिद्र्यहराः प्रवालैर्जाता दरिद्रास्तरवोऽमराणाम् ॥६७॥

रवैर्गुणास्फालभवैः स्मरस्य स्वर्णार्थिकर्णौ बधिरावभूताम् ।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ॥६८॥

अनङ्गतापप्रशमाय तस्य
कदर्थ्यमाना मुहुरामृणालम् ।
मधौ मधौ नाकनदीनलिन्यो
वरं वहन्तां शिशिरेऽनुरागम् ॥६९॥

दमस्वसः ! सेयमुपैति तृष्णा
हरेर्जगत्यग्रिमलेख्यलक्ष्मीम् ।

दृशां यदङ्घिस्तत्र नाम दृष्टि-
त्रिभागलोभार्तिमसौ बिभर्ति ॥७०॥
अग्न्याहिता नित्यमुपासते यां
देदीप्यमानां तनुमष्टमूर्तेः ।
आशापतिस्ते दमयन्ति ! सोऽपि
स्मरेण दासीभवितुं न्यदेशि ॥७१॥
त्वद्गोचरस्तं खलु पञ्चबाणः
करोति संताप्य तथा विनीतम् ।
स्वयं यथा स्वादिततप्तभूयः
परं न संतापयिता स भूयः ॥७२॥
अदाहि यस्तेन दशार्धबाणः
पुरा पुरारेर्नयनालयेन ।
न निर्दहंस्तं भवदक्षिवासी
न वैरशुद्धेरधुनाधमर्णः ॥७३॥
सोमाय कुप्यन्निव विप्रयुक्तः
स सोममाचामति हूयमानम् ।
नामापि जागर्ति हि यत्र शत्रो-
स्तेजस्विनस्तं कतमे सहन्ते ॥७४॥
शरैरजस्रं कुसुमायुधस्य
कदर्थ्यमानस्तरुणि ! त्वदर्थे ।
अभ्यर्चयद्भिर्विनिवेद्यमाना-
दप्येष मन्ये कुसुमाद्बिभेति ॥७५॥
स्मरेन्धने वक्षसि तेन दत्ता
सवर्तिका शैवलवल्लिचित्रा ।
चकास्ति चेतोभवपावकस्य
धूमाविला कीलपरम्परेव ॥७६॥

पुत्री सुहृद्येन सरोरुहाणां
यत्प्रेयसी चन्दनवासिता दिक् ।
धैर्यं विभुः सोऽपि तवैव हेतोः
स्मरप्रतापज्वलने जुहाव ॥७७॥

तं दह्यमानैरपि मन्मथैधं
हस्तैरुपास्ते मलयः प्रवालैः ।
कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां
सदा यदाशामवलम्बते यः ॥७८॥

स्मरस्य कीर्त्येव सितीकृतानि
तद्दोःप्रतापैरिव तापितानि ।
अङ्गानि धत्ते स भवद्वियोगात्-
पाण्डूनि चण्डज्वरजर्जराणि ॥७९॥

यस्तन्वि ! भर्ता घुसृणेन सायं
दिशः समालम्भनकौतुकिन्याः ।
तदा स चेतः प्रजिघाय तुभ्यं
यदा गतो नैति निवृत्य पान्थः ॥८०॥

तथा न तापाय पयोनिधीना-
मश्वामुखोत्थः क्षुधितः शिखावान् ।
निजः पतिः संप्रति वारिपोऽपि
यथा हृदिस्थः स्मरतापदुःस्थः ॥८१॥

यत्प्रत्युत त्वन्मृदुबाहुवल्लीस्मृतिस्रजं गुम्फति दुर्विनीता ।
ततो विधत्तेऽधिकमेव तापं तेन श्रिता शैत्यगुणा मृणाली ।८२।

न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि ।
तच्चित्तमग्नैर्मदनस्य बाणैः कृतं शतच्छिद्रमिव क्षणेन ॥८३॥

इति त्रिलोकीतिलकेषु तेषु मनोभुवो विक्रमकामचारः ।
अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापलस्य ॥८४॥

सारोत्थधारेव सुधारसस्य
स्वयंवरः श्वो भविता तवेति ।
संतर्पयन्तो दमयन्ति ! तेषां
श्रुतिः श्रुती नाकजुषामयासीत् ॥८५॥
समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः ।
अनङ्गशौर्यानलतापदुःस्थैरथ प्रतस्थे हरितां मरुद्भिः ॥८६॥
अपास्तपाथेयसुधोपयोगैस्
त्वच्चुम्बिनैव स्वमनोरथेन ।
क्षुधं च निर्वापयता तृषं च
स्वादीयसाऽध्वा गमितः सुखं तैः ॥८७॥
प्रिया मनोभूशरदावदाहे देवीस्त्वदर्थेन निमज्जयद्भिः ।
सुरेषु सारैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥८८॥
अलंकृतासन्नमहीविभागैरयं जनस्तैरमरैर्भवत्याम् ।
अवापितो जङ्गमलेखलक्ष्मीं निक्षिप्य संदेशमयाक्षराणि ॥८९॥
एकैकमेते परिरभ्य पीन-
स्तनोपपीडं त्वयि संदिशन्ति ।
त्वं मूर्च्छतां नः स्मरभिल्लशल्यै-
र्मुदे विशल्यौषधिवल्लिरेधि ॥९०॥
त्वत्कान्तिमस्माभिरयं पिपास-
न्मनोरथाश्वामनयैकयेव ।
निजः कटाक्षः खलु विप्रलभ्यः
कियन्ति यावद्भ्रुण वासराणि ॥९१॥
निजे सृजास्मासु भुजे भजन्त्यावादित्यवर्गे परिवेषवेषम् ।
प्रसीद निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ॥९२॥
दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरस्पृश्यैः ।
भिन्ना वर तीक्ष्णकटाक्षबाणैः प्रेमस्तव प्रेमरसात्पवित्रैः ॥९३॥

त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः ।
विशङ्कसे कैतवर्नातितं चेदस्तश्वरः पञ्चशरः प्रमाणम् ॥९४॥
अस्माकमध्यासितमेतदन्तस्तावद्भवत्या हृदयं चिराय ।
बहिस्त्वयालंक्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ॥९५॥

दयोदयश्चेतसि चेत्तवाभू-
दलंकुरु द्यां विफलो विलम्बः ।
भुवः स्वरादेशमथाचरामो
भूमौ धृतिं यासि यदि स्वभूमौ ॥९६॥

धिनोति नास्मान्जलजेन पूजा
त्वयान्वहं तन्वि ! वितन्यमाना ।
तव प्रसादोपनते तु मौलौ
पूजास्तु नस्त्वत्पदपङ्कजाभ्याम् ॥९७॥

स्वर्णवितीर्णैः करवाम वाम-
नेत्रे ! भवत्या किमुपासनासु ।
अङ्ग ! त्वदङ्गानि निपीतपीत-
दर्पाणि पाणिः खलु याचते नः ॥९८॥

वयं कलादा इव दुर्विदग्धं त्वद्गौरिमस्पर्धि दहेम हेम ।
प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु ! बभ्रु ॥९९॥

सुधासरःसु त्वदनङ्गतापः
शान्तो न नः किं पुनरप्सरःसु ।
निर्वाति तु त्वन्ममताक्षरेण
सूनाशुगेषोर्मधुसीकरेण ॥१००॥

खण्डः किमु त्वद्गिर एव खण्डः
किं शर्करा तत्पथशर्करैव ।
कृशाङ्गि ! तद्भङ्गिरसोत्थकच्छ-
तृणं नु दिक्षु प्रथितं तदिक्षुः ॥१०१॥

ददाम किं ते सुधयाऽधरेण
त्वदास्य एव स्वयमास्यते हि ।
चन्द्रं विजित्य स्वयमेव भावि
त्वदाननं तन्मखभागभोजि ॥१०२॥
प्रिये ! वृणीष्वामरभावमस्म-
दिति श्रपाकृद्वचनं न किं नः ।
त्वत्पादपद्मे शरणं प्रविश्य
स्वयं वयं येन जिजीविषाम ॥१०३॥
नास्माकमस्मान्मदनापमृत्यो-
स्त्राणाय पीयूषरसायनानि ।
प्रसीद तस्मादधिकं निजं तु
प्रयच्छ पातुं रदनच्छदं नः ॥१०४॥
प्लुष्टः स्वैश्चापरोपैः सह स हि मकरेणात्मभूः केतुनाऽभू-
द्वर्त्तां नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन् ।
भ्रूभ्यां ते तन्वि ! धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैः स्ता-
दस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ॥१०५॥
स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः
श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेऽधरमधुनि रसज्ञा चरित्रेषु चित्तं
तन्नस्तन्वङ्गि ! कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ॥१०६॥
इति धृतसुरसार्थवाचिकस्र-
ङ्निजरसनातलपत्रहारकस्य ।
सफलय मम दूततां वृणीष्व
स्वयमवधार्य दिगीशमेकमेषु ॥१०७॥
आनन्दयेन्द्रमथ मन्मथमग्नमर्गिन
केलीभिरुद्धर तनूदरि ! नूतनाभिः ।

आसादयोदितदयं शमने मनो वा
नो वा यदीत्थमथ तद्वरुणं वृणीथाः ॥१०८॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१०९॥

॥ इति महाकविश्रीहर्षविरचिते
नैषधीयप्रकाशेऽष्टमः सर्गः समाप्तः ॥ ८ ॥

## ॥ ९ ॥ नवमः सर्गः ॥

इतीयमक्षिभ्रुवविभ्रमेङ्गित-
स्फुटामनिच्छां विवरीतुमुत्सुका ।
तदुक्तिमात्रश्रवणेच्छयाऽशृणो-
द्दिगीशसंदेशगिरं न गौरवात् ॥१॥

तदर्पितामश्रुतवद्विधाय
तां दिगीशसंदेशमयीं सरस्वतीम् ।
इदं तमुर्वीतलशीतलद्युति'
जगाद वैदर्भनरेन्द्रनन्दिनी ॥२॥

मयाङ्ग ! पृष्टः कुलनामनी भवा-
नमू विमुच्यैव किमन्यदुक्तवान् ।
न मह्यमत्रोत्तरधारयस्य किं
ह्रियेऽपि सेयं भवतोऽधमर्णता ॥३॥

अदृश्यमाना क्वचिदीक्षिता क्वचि-
न्ममानुयोगे भवतः सरस्वती ।

क्वचित्प्रकाशां क्वचिदस्फुटार्णसं
　　सरस्वतीं जेतुमनाः सरस्वतीम् ॥४॥
गिरः श्रुता एव तव श्रवःसुधाः
　　श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा ।
पिपासुता शान्तिमुपैति वारिजा
　　न जातु दुग्धान्मधुनोऽधिकादपि ॥५॥
बिभर्ति वंशः कतमस्तमोपहं
　　भवादृशं नायकरत्नमीदृशम् ।
तमन्यसामान्यधियावमानितं
　　त्वया महान्तं बहु मन्तुमुत्सहे ॥६॥
इतीरयित्वा विरतां स तां पुन-
　　र्गिरानुजग्राहतरां नराधिपः ।
विहृत्य विश्रान्तवतीं तपात्यये
　　घनाघनश्चातकमण्डलीमिव ॥७॥
अये ! ममोदासितमेव जिह्वया
　　द्वयेऽपि तस्मिन्ननतिप्रयोजने ।
गरौ गिरः पल्लवनार्थलाघवे
　　मितं च सारं च वचो हि वाग्मिता ॥८॥
वृथा कथेयं मयि वर्णपद्धतिः
　　कयानुपूर्व्या समकेति केति च ।
क्षमे समक्षव्यवहारमावयोः
　　पदे विधातुं खलु युष्मदस्मदी ॥९॥
यदि स्वभावान्मम नोज्ज्वलं कुलं
　　ततस्तदुद्भावनमौचिती कुतः ।
अथावदातं तदहो विडम्बना
　　तथा कथा प्रेष्यतयोपसेदुषः ॥१०॥

इति प्रतीत्यैव मयावधीरिते
तदापि निर्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति
श्रमो गिरां ते घटते हि संप्रति ॥११॥
तथापि निर्बध्नति ! तेऽथवा स्पृहा-
मिहानुरुन्धे मितया न किं गिरा ।
हिमांशुवंशस्य करीरमेव मां
निशम्य किं नासि फलेग्रहिग्रहा ॥१२॥
महाजनाचारपरम्परेदृशी
स्वनाम नामाददते न साधवः ।
अतोऽभिधातुं न तदुत्सहे पुन-
र्जनः किलाचारमुचं विगायति ॥१३॥
अदोऽयमालप्य शिखीव शारदो
बभूव तूष्णीमहितापकारकः ।
अथास्यरागस्य दधा पदे पदे
वचांसि हंसीव विदर्भजाददे ॥१४॥
सुधांशुवंशाभरणं भवानिति
श्रुतेऽपि नापैति विशेषसंशयः ।
कियत्सु मौनं वितता कियत्सु
वाङ्महत्यहो बञ्चनचातुरी तव ॥१५॥
मयापि देय प्रतिवाचिकं न ते
स्वनाम मत्कर्णसुधामकुर्वते ।
परेण पुंसा हि ममापि संकथा
कुलाबलाचारसहासनासहा ॥१६॥
हृदाभिनन्द्य प्रतिबन्ध्यनुत्तरः
प्रियागिरः सस्मितमाह स स्म ताम् ।

वदामि वामाक्षि ! परेषु मा क्षिप
स्वमीदृशं माक्षिकमाक्षिपद्वचः ॥१७॥
करोषि नेमं फलिनं मम श्रमं
दिशोऽनुगृह्णासि न कंचन प्रभुम् ।
त्वमित्थमर्हासि सुरानुपासितुं
रसामृतस्नानपवित्रया गिरा ॥१८॥
सुरेषु संदेशयसीदृशीं बहुं
रसस्रवेण स्तिमितां न भारतीम् ।
मदर्पिता दर्पकतापितेषु या
प्रयाति दावार्दितदाववृष्टिताम् ॥१९॥
यथा यथेह त्वदुपेक्षयानया
निमेषमप्येष जनो विलम्बते ।
रुषा शरव्यीकरणे दिवौकसां
तथा तथाद्य त्वरते रतेः पतिः ॥२०॥
इयच्चिरस्यावदधन्ति मत्पथे
किमिन्द्रनेत्राण्यशनिर्न निर्ममौ ।
धिगस्तु मां सत्वरकार्यमन्थरं
स्थितः परप्रेष्यगुणोऽपि यत्र न ॥२१॥
इदं निगद्य क्षितिभर्तरि स्थिते
तयाभ्यधायि स्वगतं विदग्धया ।
अधिस्त्रि तं दूतयतां भुवः स्मरं
मनो दधत्या नयनैपुणव्यये ॥२२॥
जलाधिपस्त्वामदिशन्मयि ध्रुवं
परेतराजः प्रजिघाय स स्फुटम् ।
मरुत्वतैव प्रहितोऽसि निश्चितं
नियोजितश्चोर्ध्वमुखेन तेजसा ॥२३॥

अथ प्रकोशं निभृतस्मिता सती
सतीकुलस्याभरणं किमप्यसौ ।
पुनस्तदाभाषणविभ्रमोन्मुखं
मुखं विदर्भाधिपसंभवा दधौ ॥२४॥
वृथापरीहास इति प्रगल्भता
न नेति च त्वादृशि वाग्विगर्हणा ।
भवत्यवज्ञा च भवत्यनुत्तरा-
दतः प्रदित्सुः प्रतिवाचमस्मि ते ॥२५॥
कथं नु तेषां कृपयापि वागसा-
वसावि मानुष्यकलाञ्छने जने ।
स्वभावभक्तिप्रवणं प्रतीश्वराः
कया न वाचा मुदमुद्गिरन्ति वा ॥२६॥
अहो महेन्द्रस्य कथं मयौचिती
सुराङ्गनासंगमशोभिताभृतः ।
ह्रदस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विडम्बना ॥२७॥
पुरः सुरीणां भण केव मानवी
न यत्र तास्तत्र तु शोभिकापि सा ।
अकाञ्चनेऽकिंचन नायिकाङ्कके
किमारकूटाभरणेन न श्रियः ॥२८॥
यथा तथा नाम गिरः किरन्तु ते
श्रुती पुनर्मे बधिरे तदक्षरे ।
पृषत्किशोरी कुरुतामसंगतां
कथं मनोवृत्तिमपि द्विपाधिपे ॥२९॥
अदो निगद्यैव नतास्यया तया
श्रुतौ लगित्वाभिहितालिरालपत् ।

प्रविश्य यन्मे हृदयं ह्रियाहि
तद्विनिर्यदाकर्णय मन्मुखाध्वना ॥३०॥
बिभेमि चिन्तामपि कर्तुमीदृशीं
चिराय चित्तार्पितनैषधेश्वरा ।
मृणालतन्तुच्छिदुरा सतीस्थिति-
र्लवादपि त्रुट्यति चापलात्किल ॥३१॥
ममाशयः स्वप्नदशाज्ञयापि वा
नलं विलङ्घ्य तरमस्पृशद्यदि
कुतः पुनस्तत्र समस्तसाक्षिणी
निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥३२॥
अपि स्वमस्वप्नमसूषुपन्नमी
परस्य दाराननवेतुमेव माम् ।
स्वयं दुरध्वार्णवनाविकाः कथं
स्पृशन्तु विज्ञाय हृदापि तादृशीम् ॥३३॥
अनुग्रहः केवलमेष मादृशे
मनुष्यजन्मन्यपि यन्मनो जने ।
स चेद्विधेयस्तदमी तमेव मे
प्रसद्य भिक्षां वितरीतुमीशताम् ॥३४॥
अपि द्रढीयः शृणु मत्प्रतिश्रुतं
स पीडयेत्पाणिमिमं न चेन्नृपः ।
हुताशनोद्बन्धनवारिकारितां
निजायुषस्तत्करवै स्ववैरिताम् ॥३५॥
निषिद्धमप्याचरणीयमापदि
क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथे हि पिच्छिले
क्वचिद्बुधैरप्यपथेन गम्यते ॥३६॥

स्त्रिया मया वाग्मिषु तेषु शक्यते
न जातु सम्यग्वितरीतुमुत्तरम् ।
तदत्र मद्भाषितसूत्रपद्धतौ
प्रबन्धृतास्तु प्रतिबन्धृता न ते ॥३७॥
निरस्य दूतः स्म तथा विसर्जितः
प्रियोक्तिरप्याह कदुष्णमक्षरम् ।
कुतूहलेनेव मुहुः कुहूरवं
विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥३८॥
अहो मनस्त्वामनु तेऽपि तन्वते
त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धनमेति किंच तं
स वाककवाट घटयन्निरस्यति ॥३९॥
सहाखिलस्त्रीषु वहेऽवहेलया
महेन्द्ररागाद्गुरुमादरं त्वयि ।
त्वमीदृशि श्रेयसि संमुखेऽपि तं
पराङ्मुखी चन्द्रमुखि ! न्यवीवृतः ॥४०॥
दिवौकसं कामयते न मानवी
नवीनमश्रावि तवाननादिदम् ।
कथं न वा दुर्ग्रहदोष एष ते
हितेन सम्यग्गुरुणापि शाम्यते ॥४१॥
अनुग्रहादेव दिवौकसां नरो
निरस्य मानुष्यकमेति दिव्यताम् ।
अयोविकारे स्वरितत्वमिष्यते
कुतोऽयसां सिद्धरसस्पृशामपि ॥४२॥
हरिं परित्यज्य नलाभिलाषुका
न लज्जसे वा विदुषिब्रवा कथम् ? ।

उपेक्षितेक्षोः करभाच्छमीरता-
दुरुं वदे त्वां करभोरु ! भोरिति ॥४३॥
विहाय हा सर्वसुपर्वनायकं
त्वया धृतः किं नरसाधिमभ्रमः ।
मुखं विमुच्य श्वसितस्य धारया
वृथैव नासापथधावनश्रमः ॥४४॥
तपोऽनले जुह्वति सूरयस्तनू-
र्दिवे फलायान्यजनुर्भविष्णवे ।
करे पुनः कर्षति सैव विह्वला
बलादिव त्वां वलसे न बालिशे ! ॥४५॥
यदि स्वमुद्बन्धुमना विना नलं
भवेर्भवन्तीं हरिरन्तरिक्षगाम् ।
दिविस्थितानां प्रथितः पतिस्ततो
हरिष्यति न्याय्यमुपेक्षते हि कः ॥४६॥
निवेक्ष्यसे यद्यनले नलोज्झिता
सुरे तदस्मिन्महती दया कृता ।
चिरादनेनार्थनयापि दुर्लभं
स्वयं त्वयैवाङ्ग ! यदङ्गमर्प्यते ॥४७॥
जितं जितं तत्खलु पाशपाणिना
विना नलं वारि यदि प्रवेक्ष्यसि ।
तदा त्वदास्यान्बहिरप्यसूनसौ
पयःपतिर्वक्षसि वक्ष्यतेतराम् ॥४८॥
करिष्यसे यद्यत एव दूषणा-
दुपायमन्यं विदुषी स्वमृत्यवे ।
प्रियातिथिः स्वेन गृहागता कथं
न धर्मराजं चरितार्थयिष्यसि ? ॥४९॥

निषेधवेषो विधिरेष तेऽथवा
तवैव युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं
विदग्धनारीवदनं तदाकरः ॥५०॥
भ्रमामि ते भैमि ! सरस्वतीरस-
प्रवाहचक्रेषु निपत्य कत्यदः ।
त्रपामपाकृत्य मनाक्कुरु स्फुटं
कृतार्थनीयः कतमः सुरोत्तमः ॥५१॥
मतः किमैरावतकुम्भकैतव-
प्रगल्भपीनस्तनदिग्धवस्तव ।
सहस्रनेत्रान्न पृथग्मते मम
त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥५२॥
प्रसीद तस्मै दमयन्ति ! संततं
त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचनतीक्ष्णकण्टकै-
स्तनुं घनामातनुतां स कण्टकैः ॥५३॥
अबोधि तत्त्वं दहनेऽनुरज्यसे
स्वयं खलु क्षत्रियगोत्रजन्मनः ।
विना तमोजस्विनमन्यतः कथं
मनोरथस्ते वलते विलासिनि ! ॥५४॥
त्वयैकसत्या तनुतापशङ्कया
ततो निवर्त्यं न मनः कथंचन ।
हिमोपमा तस्य परोक्षराक्षणे
सतीषु वृत्तिः शतशो निरूपिता ॥५५॥
स धर्मराजः खलु धर्मशीलया
त्वयास्ति चित्तातिथितामवापितः ।

ममापि साधुः प्रतिभात्ययं क्रम-
श्चकास्ति योग्येन हि योग्यसंगमः ॥५६॥
अजातविच्छेदलवैः स्मरोद्भवै-
रगस्त्यभासा दिशि निर्मलत्विषि ।
धुतावधि कालममृत्युशङ्किता
निमेषवत्तेन नयस्व केलिभिः ॥५७॥
शिरीषमृद्वी वरुणं किमीहसे
पयःप्रकृत्या मृदुवर्गवासनम् ।
विहाय सर्वान्वृणुते स्म किं न सा
निशापि शीतांशुमनेन हेतुना ॥५८॥
असेवि यस्त्यक्तदिवा दिवानिशं
श्रियः प्रियेणानणुरामणीयकः ।
सहामुना तत्र पयःपयोनिधौ
कृशोदरि ! क्रीड यथामनोरथम् ॥५९॥
इति स्फुटं तद्वचसस्तयादरा-
त्सुरस्पृहारोपविडम्बनादपि ।
कराङ्कसुप्तैककपोलकर्णया
श्रुतं च तद्भाषितमश्रुतं च तत् ॥६०॥
चिरादनध्यायमवाङ्मुखी मुखे
ततः स्म सा वासयते दमस्वसा ।
कृतायतश्वासविमोक्षणाथ तं
क्षणाद्बभाषे करुणं विचक्षणा ॥६१॥
*विभिन्दता दुष्कृतिनी मम श्रुति*
दिगिन्द्रदुर्वाचिकसूचिसंचयैः ।
प्रयातजीवामिव मां प्रति स्फुटं
कृतं त्वयाप्यन्तकदूततोचितम् ॥६२॥

त्वदास्यनिर्यन्मदलीकदुर्यशो-
मषीमयं सल्लिपिरूपभागिव ।
श्रुतिं ममाविश्य भवद्दुरक्षरं
सृजत्यदः कीटवदुत्कटा रुजः ॥६३॥
तमालिरूचेऽथ विदर्भजेरिता
प्रगाढमौनव्रतयैकया सखी ।
त्रपां समाराधयतीयमन्यया
भवन्तमाह स्वरसज्ञया मया ॥६४॥
तमर्चितुं मद्वरणस्रजा नृपं
स्वयंवरः संभविता परेद्यवि ।
ममासुभिर्गन्तुमनाः पुरःसरै-
स्तदन्तरायः पुनरेष वासरः ॥६५॥
तदद्य विश्रम्य दयालुरेधि मे
दिनं निनीषामि भवद्विलोकिनी ।
नखैः किलाख्यायि विलिख्य पक्षिणा
तवैव रूपेण समः स मत्प्रियः ॥६६॥
दृशोर्द्वयी ते विधिनास्ति वञ्चिता
मुखस्य लक्ष्मीं तव यन्न वीक्षते ।
असावपि श्वस्तदिमां नलानने
विलोक्य साफल्यमुपैतु जन्मनः ॥६७॥
ममैव पाणीकरणेऽग्निसाक्षिकं
प्रसङ्गसंपादितमङ्ग ! संगतम् ।
न हा सहाधीतिधृतः स्पृहा कथं
तवार्यपुत्रीयमजर्यमर्जितुम् ? ॥६८॥
दिगीश्वरार्थं न कथंचन त्वया
कदर्थनीयास्मि कृतोऽयमञ्जलिः ।

प्रसद्यतां नाद्य निगाद्यमीदृशं
दृशौ दधे बाष्परयास्पदे भृशम् ॥६९॥
वृणे दिगीशानिति का कथा तथा
त्वयीति नेक्षे नलभामपीहया ।
सतीव्रतेऽग्नौ तृणयामि जीवितं
स्मरस्तु किं वस्तु तदस्तु भस्म यः ॥७०॥
न्यवेशि रत्नत्रितये जिनेन यः
स धर्मचिन्तामणिरुज्झितो यया ।
कपालिकोपानलभस्मनः कृते
तदेव भस्म स्वकुले स्तृतं तया ॥७१॥
निपीय पीयूषरसौरसीरसौ
गिरः स्वकंदर्पहुताशनाहुतीः ।
कृतान्तदूतं न तथा यथोदितं
कृतान्तमेव स्वममन्यतादयम् ॥७२॥
स भिन्नमर्मापि तदार्तिकाकुभिः
स्वदूतधर्मान्न विरन्तुमैहत ।
शनैरशंसन्निभृतं विनिश्वस-
न्विचित्रवाक्चित्रशिखण्डिनन्दनः ॥७३॥
दिवोधवस्त्वां यदि कल्पशाखिनं
कदापि याचेत निजाङ्गणालयम् ।
कथं भवेरस्य न जीवितेश्वरी
न मोघयाच्ञः स हि भीरु ! भूरुहः ॥७४॥
शिखी विधाय त्वदवाप्तिकामनां
स्वयंहुतस्वांशहविः स्वमूर्तिषु ।
क्रतुं विधत्ते यदि सार्वकामिकं
कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥७५॥

सदा तदाशामधितिष्ठतः करं
वरं प्रदातुं चलितादलादपि ।
मुनेरगस्त्याद्वृणुते स धर्मरा-
ड्यदि त्वदाप्तिं भण का तदा गतिः ॥७६॥
ऋतोः कृते जाग्रति वेत्ति कः कति
प्रभोरपां वेश्मनि कामधेनवः ? ।
त्वदर्थमेकामपि याचते स चेत्
प्रचेतसः पाणिगतैव वर्तसे ॥७७॥
न संनिधात्री यदि विघ्नसिद्धये
पतिव्रता पत्युरनिच्छया शची ।
स एव राजव्रजवैशसात्कृतः
परस्परस्पर्धिवरः स्वयंवरः ? ॥७८॥
निजस्य वृत्तान्तमजानतां मिथो
मुखस्य रोषात्परुषाणि जल्पतः ।
मृधं किमच्छत्रकदण्डताण्डवं
भुजाभुजि क्षोणिभुजां दिदृक्षसे ॥७९॥
अपार्थयन्याजकफूत्कृतिश्रमं
ज्वलेद्रुषा चेद्वपुषा तु नानलः ।
अलं नलः कर्तुमनग्निसाक्षिकं
विधिं विवाहे तव सारसाक्षि ! कम् ? ॥८०॥
पतिंवरायाः कुलजं वरस्य वा
यमः कमप्याचरितातिथिं यदि ।
कथं न गन्ता विफलीभविष्णुतां
स्वयंवरः साध्वि ! समृद्धिमानपि ? ॥८१॥
अपः प्रति स्वामितयाऽपरः सुरः
स तां निषेधेद्यदि नैषधक्रुधा ।

नलाय लोभत्ततपाणयेऽपि ते
पिता कथं त्वां वद संप्रदास्यते ॥८२॥
इदं महत्तेऽभिहितं हितं मया
विहाय मोहं दमयन्ति ! चिन्तय ।
सुरेषु विघ्नैकपरेषु को नरः
करस्थमप्यर्थमवाप्तुमीश्वरः ? ॥८३॥
इमा गिरस्तस्य विचिन्त्य चेतसा
तथेति संप्रत्ययमाससाद सा ।
निवारितावग्रहनीरनिर्झरे
नभोनभस्यत्वमलम्भयद्दृशौ ॥८४॥
स्फुटोत्पलाभ्यामलिदंपतीव तद्
विलोचनाभ्यां कुचकुड्मलाशया ।
निपत्य बिन्दू हृदि कज्जलाविलौ
मणीव नीलौ तरलौ विरेजतुः ॥८५॥
धुतापतत्पुष्पशिलीमुखाशुगैः
शुचेस्तदासीत्सरसी रसस्य सा ।
रयाय बद्धादरयाश्रुधारया
सनालनीलोत्पललोललोचना ॥८६॥
अथोद्भ्रमन्ती रुदती गतक्षमा
ससंभ्रमा लुप्तरतिः स्खलन्मतिः ।
व्यधात्प्रियप्राप्तिविघातनिश्चया-
न्मृदूनि दूना परिदेवितानि सा ॥८७॥
त्वरस्व पञ्चेषुहुताशनात्मन-
स्तनुष्व मद्भस्ममयं यशश्चयम् ।
विधे ! परेहाफलभक्षणव्रती
पताद्य तृप्यन्नसुभिर्ममाफलैः ॥८८॥

भृशं वियोगानलतप्यमान ! किं
विलीयसे न त्वमयोमयं यदि ।
स्मरेषुभिर्भेद्य ! न वज्रमप्यसि
ब्रवीषि न स्वान्त ! कथं न दीर्यसे ॥८९॥
विलम्बसे जीवित ! किं द्रव द्रुतं
ज्वलत्यदस्ते हृदयं निकेतनम् ।
जहासि नाद्यापि मृषा सुखासिका-
मपूर्वमालस्यमिदं तवेदृशम् ॥९०॥
दृशौ ! मृषा पातकिनो मनोरथाः
कथं पृथू वामपि विप्रलेभिरे ।
प्रियश्रियः प्रेक्षणघाति पातकं
स्वमश्रुभिः क्षालयतं शतं समाः ॥९१॥
प्रियं न मृत्युं न लभे त्वदीप्सितं
तदेव न स्यान्मम यत्त्वमिच्छसि ।
वियोगमेवेच्छ मनः ! प्रियेण मे
तव प्रसादान्न भवत्वसौ मम ॥९२॥
न काकुवाक्यैरतिवाममङ्गजं
द्विषत्सु याचे पवनं तु दक्षिणम् ।
दिशापि मद्भस्म किरत्वयं तया
प्रियो यया वैरविधिर्वधावधिः ॥९३॥
अमूनि गच्छन्ति युगानि न क्षणः
कियत्सहिष्ये न हि मृत्युरस्ति मे ।
स मां न कान्तः स्फुटमन्तरुज्झिता
न तं मनस्तच्च न कायवायवः ॥९४॥
मदुग्रतापव्ययशक्तशीकरः
सुराः ! स वः केन पपे कृपार्णवः ।

उदेति कोटिर्न मुदे मदुत्तमा
किमाशु सकल्पकणश्रमेण वः ॥९५॥
ममैव वाहर्दिनमश्रुदुर्दिनैः
प्रसह्य वर्षासु ऋतौ प्रसञ्जिते ।
कथं नु शृण्वन्तु सुषुप्य देवता
भवत्त्वरण्येरुदितं न मे गिरः ॥९६॥
इयं न ते नैषध ! दृक्पथातिथि-
स्त्वदेकतानस्य जनस्य यातना ।
ह्रदे ह्रदे हा न कियद्गवेषितः
स वेधसाऽगोपि खगोऽपि वक्ति यः ॥९७॥
ममापि किं नो दयसे दयाघन !
त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः ।
निमज्जयन्संतमसे पराशयं
विधिस्तु वाच्यः क्व तवागसः कथा ? ॥९८॥
कथावशेषं तव सा कृते गते-
त्युपैष्यति श्रोत्रपथं कथं न ते ? ।
दयाणुना मां समनुग्रहीष्यसे
तदापि तावद्यदि नाथ ! नाधुना ॥९९॥
ममादरीदं विदरीतुमान्तरं
तदर्थिकल्पद्रुम ! किंचिदर्थये ।
भिदां हृदि द्वारमवाप्य मा स मे
हतासुभिः प्राणसमः समं गमः ॥१००॥
इति प्रियाकाकुभिरुन्मिषन्भृशं
दिगीशदूत्येन हृदि स्थिरीकृतः ।
नृपं स योगेऽपि वियोगमन्मथः
क्षणं तमुद्भ्रान्तमजीजनत्पुनः ॥१०१॥

महेन्द्रदूत्यादि समस्तमात्मन-
स्ततः स विस्मृत्य मनोरथस्थितैः।
क्रियाः प्रियाया ललितैः करम्बिता
वितर्कयन्नित्थमलीकमालपत् ॥१०२॥
अयि प्रिये ! कस्य कृते विलप्यते
विलिप्यते हा मुखमश्रुबिन्दुभिः।
पुरस्त्वयालोकि नमन्नयं न किं
तिरश्चलल्लोचनलीलया नलः ॥१०३॥
त्वकास्ति बिन्दुच्युतकातिचातुरी
घनाश्रुबिन्दुस्रुतिकैतवात्तव ।
मसारताराक्षि ! ससारमात्मना
तनोषि संसारमसंशयं यतः ॥१०४॥
अपास्तपाथोरुहि शायितं करे
करोषि लीलाकमलं किमाननम् ।
तनोषि हारं कियदश्रुणः स्रवै-
रदोषनिर्वासितभूषणे हृदि ॥१०५॥
दृशोरमङ्गल्यमिदं मिलज्जलं
करेण तावत्परिमार्जयामि ते ।
अथापराधं भवदङ्घ्रिपङ्कज-
द्वयीरजोभिः सममात्ममौलिना ॥१०६॥
मम त्वदच्छाङ्घ्रिनखामृतद्युतेः
किरीटमाणिक्यमयूखमञ्जरी ।
उपासनामस्य करोतु रोहिणी
त्यज त्यजाकारणरोषणे ! रुषम् ॥१०७॥
तनोषि मानं मयि चेन्मनागपि
त्वयि श्रये तद्बहुमानमानतः ।

विनम्य वक्त्रं यदि वर्तसे किय-
न्नमामि ते चण्डि ! तदा पदावधि ॥१०८॥
प्रभुत्वभूम्नानुगृहाण वा न वा
प्रणाममात्राधिगमेऽपि कः श्रमः ? ।
क्व याचतां कल्पलतासि मां प्रति
क्व दृष्टिदाने तव बद्धमुष्टिता ? ॥१०९॥
स्मरेषुमाथं सहसे मृदुः कथं
हृदि द्रढीयः कुचसंवृते तव ।
निपत्य वैसारिणकेतनस्य वा
व्रजन्ति बाणा विमुखोत्पतिष्णुताम् ॥११०॥
स्मितस्य संभावय सृक्वणा कणा-
न्विधेहि लीलाचलमञ्चलं भ्रुवः ।
अपाङ्गरथ्यापथिकीं च हेलया
प्रसद्य संवेहि दृशं ममोपरि ॥१११॥
समापय प्रावृषमस्रुविप्रुषां
स्मितेन विश्राणय कौमुदीमुदः ।
दृशावितः खेलतु खञ्जनद्वयी
विकासि पङ्केरुहमस्तु ते मुखम् ॥११२॥
सुधारसोद्वेलनकेलिमक्षर-
स्रजा सृजान्तर्मम कर्णकूपयोः ।
दृशौ मदीये मदिराक्षि ! कारय
स्मितश्रिया पायसपारणाविधिम् ॥११३॥
ममासनार्धे भव मण्डनं न न
प्रिये ! मदुत्सङ्गविभूषणं भव ।
अहं भ्रमादालपमङ्ग ! मृष्यतां
विना ममोरः कतमत्तवासनम् ॥११४॥

अधीतपञ्चाशुगबाणवञ्चने !
स्थिता मदन्तर्बहिरेषि चेदुरः ।
स्मराशुगेभ्यो हृदय बिभेतु न
प्रविश्य तत्त्वन्मयसंपुटे मम ॥११५॥
परिष्वजस्वानवकाशबाणता
स्मरस्य लग्ने हृदयेद्वयेऽस्तु नौ ।
दृढा मम त्वत्कुचयोः कठोरयो-
रुरस्तटीयं परिचारिकार्चिता ॥११६॥
तवाधराय स्पृहयामि यन्मधु-
स्रवैः श्रवःसाक्षिकमाक्षिका गिरः ।
अधित्यकासु स्तनयोस्तनोतु ते
ममेन्दुलेखाभ्युदयाद्भुतं नखः ॥११७॥
न वर्तसे मन्मथनाटिका कथं
प्रकाशरोमावलिसूत्रधारिणी ।
तवाङ्गहारे रुचिमेति नायकः
शिखामणिश्च द्विजराड्विदूषकः ॥११८॥
शुभाष्टवर्गस्त्वदनङ्गजन्मन-
स्तवाधरेऽलिख्यत यत्र लेखया ।
मदीयदन्तक्षतराजिरञ्जनैः
स भूर्जतामर्जतु बिम्बपाटलः ॥११९॥
गिरानुकम्पस्व दयस्व चुम्बनैः
प्रसीद शुश्रूषयितुं मया कुचौ ।
निशेव चान्द्रस्य करोत्करस्य यन्
मम त्वमेकासि नलस्य जीवितम् ॥१२०॥
मुनिर्यथात्मानमथ प्रबोधवान्
प्रकाशयन्तं स्वमसावबुध्यत ।

अपि प्रपन्नां प्रकृतिं विलोक्य ता-
मवाप्तसंस्कारतयासृजद्गिरः ॥१२१॥
अये ! मयात्मा किमनिह्नुतीकृतः
किमत्र मन्ता स तु मां शतक्रतुः ।
पुरः स्वभक्त्याथ नमन्ह्रियाविलो
विलोकिताहे न तदिङ्गितान्यपि ॥१२२॥
स्वनाम यन्नाम मुधाभ्यधामहो
महेन्द्रकार्यं महदेतदुज्झितम् ।
हनूमदाद्यैर्यशसा मया पुन-
र्द्विषां हसैर्दूत्यपथः सितीकृतः ॥१२३॥
धियात्मनस्तावदचारु नाचरं
परस्तु तद्वेद स यद्वदिष्यति ।
जनावनायोद्यमिनं जनार्दनं
क्षये जगज्जीवपिबं शिवं वदन् ॥१२४॥
स्फुटत्यदः किं हृदयं त्रपाभरा-
द्यदस्य शुद्धिर्विबुधैर्विबुध्यताम् ।
विदन्तु ते तत्त्वमिदं तु दन्तुरं
जनानने कः करमर्पयिष्यति ॥१२५॥
मम श्रमश्चेतनयानया फली
बलीयसालोपि च सैव वेधसा ।
न वस्तु दैवस्वरसाद्विनश्वरं
सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः ॥१२६॥
इति स्वयं मोहमहोर्मिनिर्मितं
प्रकाशनं शोचति नैषधे निजम् ।
तथाव्यथामग्नतदुद्दिधीर्षया
दयालुरागाल्लघु हेमहंसराट् ॥१२७॥

नलं स तत्पक्षरवोर्ध्ववीक्षिणं
स एष पक्षीति भणन्तमभ्यधात् ।
नयादयैनामति मा निराशता-
मसून्विहातेयमतः परं परम् ॥१२८॥
सुरेषु पश्यन्निजसापराधता-
मियत्प्रयस्यापि तदर्थसिद्धये ।
न कूटसाक्षीभवनोचितो भवान्
सतां हि चेतःशुचितात्मसाक्षिका ॥१२९॥
इतीरिणापृच्छय नलं विदर्भजा-
मपि प्रयातेन खगेन सान्त्वितः ।
मृदुर्बभाषे भगिनीं दमस्य स
प्रणम्य चित्तेन हरित्पतीन्नृपः ॥१३०॥
ददेऽपि तुभ्यं कियतीः कदर्थनाः
सुरेषु रागप्रसवावकेशिनीः ।
अदम्भदूत्येन भजन्तु वा दयां
दिशन्तु वा दण्डममी ममागसा ॥१३१॥
अयोगजामन्वभवं न वेदनां
हिताय मेऽभूदियमुन्मदिष्णुता ।
उदेति दोषादपि दोषलाघवं
कृशत्वमज्ञानवशादिवैनसः ॥१३२॥
तवेत्ययोगस्मरपावकोऽपि मे
कदर्थनात्यर्थतयाऽगमद्दयाम् ।
प्रकाशमुन्माद्य यदद्य कारयन्
मयात्मनस्त्वामनुकम्पते स्म सः ॥१३३॥
अमी समीहैकपरास्तवामराः
स्वकिंकरं मामपि कर्तुमीशिषे ।

विचार्य कार्यं सृज मा विधान्मुधा
कृतानुतापस्त्वयि पार्ष्णिविग्रहम् ॥१३४॥
उदासितेनैव मयेदमुद्यसे
भिया न तेभ्यः स्मरतानवान्न वा ।
हितं यदि स्यान्मदसुव्ययेन ते
तदा तव प्रेमणि शुद्धिलब्धये ॥१३५॥
इतोरितैर्नैषधसूनृतामृतै-
र्विदर्भजन्मा भृशमुल्ललास सा ।
ऋतोरधिश्रीः शिशिरानुजन्मनः
पिकस्वरैर्दूरविकस्वरैर्यथा ॥१३६॥
नलं तदावेत्य तमाशये निजे
घृणां विगानं च मुमोच भीमजा ।
जुगुप्समाना हि मनो धृतं तदा
सतीधिया दैवतदूतधावि सा ॥१३७॥
मनोभुवस्ते भविनां मनः पिता
निमज्जयन्नेनसि तन्न लज्जसे ।
अमुद्रि सत्पुत्रकथा त्वयेति सा
स्थिता सती मन्मथनिन्दिनी धिया ॥१३८॥
प्रसूनमित्येव तदङ्गवर्णना
न सा विशेषात्कतमत्तदित्यभूत् ।
तदा कदम्बं तदवर्णि लोमभि-
र्मुदस्रुणा प्रावृषि हर्षमागतैः ॥१३९॥
मयैव संबोध्य नलं व्यलापि
यत्स्वमाह मद्बुद्धमिदं विमृश्य तत् ।
असाविति भ्रान्तिभसाद्दमस्वसुः
स्वभाषितस्वोद्भ्रमविभ्रमक्रमः ॥१४०॥

विदर्भराजप्रभवा ततः परं
त्रपासखी वक्तुमलं न सा नलम् ।
पुरस्तमूचेऽभिमुखं यदत्रपा
ममज्ज तेनैव महाह्रदे ह्रियः ॥१४१॥
यदापवार्यापि न दातुमुत्तरं
शशाक सख्याः श्रवसि प्रियस्य सा ।
विहस्य सख्येव तमब्रवीत्तदा
ह्रियाऽधुना मौनधना भवत्प्रिया ॥१४२॥
पदातिथेयाँल्लिखितस्य ते स्वयं
वितन्वती लोचननिर्झरानियम् ।
जगाद यां सैव मुखान्मम त्वया
प्रसूनबाणोपनिषन्निशम्यताम् ॥१४३॥
असंशयं स त्वयि हंस एव मां
शशंस न त्वद्विरहाप्तसंशयाम् ।
क्व चन्द्रवंशस्य वतंस ! मद्वधा-
न्नृशंसता संभविनी भवादृशे ॥१४४॥
जितस्त्वयास्येन विधुः स्मरः श्रिया
कृतप्रतिज्ञौ मम तौ वधे कुतः ।
तवेति कृत्वा यदि तज्जितं मया
न मोघसङ्कल्पधराः किलामराः ॥१४५॥
निजांशुनिर्दग्धमदङ्गभस्मभि-
र्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम् ।
त्वदास्यतां यास्यति तावतापि किं
वधूवधेनैव पुनः कलङ्कितः ॥१४६॥
प्रसीद यच्छ स्वशरान्मनोभुवे
स हन्तु मां तद्धृतकौसुमाशुगः ।

त्वदेकचित्ताहमसून्विमुञ्चती
त्वमेव भूत्वा तृणवज्जयामि तम् ॥१४७॥
श्रुति: सुराणां गुणगायनी यदि
त्वदङ्घ्रिमग्नस्य जनस्य किं तत: ।
स्तवे रवेरप्सु कृताप्लवै: कृते
न मुद्वती जातु भवेत्कुमुद्वती ॥१४८॥
कथासु शिष्यं वरमद्य न ध्रिये
ममावगन्तासि न भावमन्यथा ।
त्वदर्थमुक्तासुतया सुनाथ ! मां
प्रतीहि जीवाभ्यधिक ! त्वदेकिकाम् ॥१४९॥
महेन्द्रहेतेरपि रक्षणं भयाद्यदर्थिसाधारणमस्त्रभृद्व्रतम् ।
प्रसूनबाणादपि मामरक्षत: क्षतं तदुच्चैरवकीर्णिनस्तव ॥१५०॥
तवास्मि मां घातुकमप्युपेक्षसे
मृषामरं हाऽमरगौरवात्स्मरम् ।
अवेहि चण्डालमनङ्गमङ्ग ! तं
स्वकाण्डकारस्य मधो: सखा हि स: ॥१५१॥
लघौ लघावेव पुर: परे बुधै-
र्विधेयमुत्तेजनमात्मतेजस: ।
तृणे तृणेढि ज्वलन: खलु ज्वलन्
क्रमात्करीषद्रुमकाण्डमण्डलम् ॥१५२॥
सुरापराधस्तव वा कियानयं
स्वयंवरायामनुकम्प्रता मयि ।
गिरापि वक्ष्यन्ति मखेषु तर्पणा-
दिदं न देवा मुखलज्जयैव ते ॥१५३॥
व्रजन्तु ते तेऽपि वरं स्वयंवरं
प्रसाद्य तानेव मया वरिष्यसे ।

न सर्वथा तानपि न स्पृशेद्दया
न तेऽपि तावन्मदनस्त्वमेव वा ॥१५४॥
इतीयमालेख्यगतेऽपि वीक्षिते
त्वयि स्मरव्रीडसमस्यथानया ।
पदे पदे मौनमयान्तरीपिणी
प्रवर्तिता सारघसारसारणी ॥१५५॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किंनु कृताङ्गुलीकः ।
कृत्वा मित्रं मधुमधिवनस्थानमन्तश्चरित्वा
सख्याः प्राणान्हरति हरितस्त्वद्यशस्तज्जुषन्ताम् ॥१५६॥

अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् ।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥१५७॥

ध्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्या रया-
न्न स्रोतस्रकपोलपालिपुलकैर्व्रतस्वतोरस्त्रुणः ।
चत्वारः प्रहराः स्मरार्तिभिरभूत्सापि क्षपा दुःक्षया
तत्तस्यां कृपयाखिलैव विधिना रात्रिस्त्रियामा कृता ॥१५८॥

तदखिलमिह भूतं भूतगत्या जगत्याः
पतिरभिलपति स्म स्वात्मदूतत्वतत्त्वम् ।
त्रिभुवनजनयावद्वृत्तवृत्तान्तसाक्षा-
त्कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥१५९॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
संदब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१६०॥

॥ इति महाकवि हर्षविरचिते नैषधीयप्रकाशे
नवमः सर्गः समाप्तः ॥ ९ ॥

## ॥ १० ॥ दशमः सर्गः ॥

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः ।
स्वयंवरं शंबरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥ १ ॥
नाभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्थादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥२॥
योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् ।
द्रष्टुं परैस्तान्परिकर्तुमन्यैः स्वमात्रशेषाः ककुभो बभूवुः ॥३॥
लोकैरशेषैरवनिश्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्तितत्तज्जनयन्त्रणार्तिविश्रान्तिमापुः ककुभां विभागाः ॥४॥

तलं यथेयुर्न तिला विकीर्णाः
सैन्यैस्तथा राजपथा बभूवुः ।
भैमीं स लब्धामिव तत्र मेने
यः प्राप भूभृद्भवितुं पुरस्तात् ॥५॥
नृपः पुरःस्थैः प्रतिबद्धवर्त्मा
पश्चात्तनैः कश्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं
लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥६॥
राज्ञां पथि स्त्यानतयानुपूर्व्या
विलङ्घनाशक्तिविलम्बभाजाम् ।
आह्वानसंज्ञानमिवाग्रकम्पै-
र्दधुर्विदर्भेन्द्रपुरीपताकाः ॥७॥
प्राग्भूय कर्कोटक आचकर्ष
सकम्बलं नागबलं यदुच्चैः ।
भुवस्तले कुण्डिनगाभि राज्ञां
तद्वासुकेश्चाश्वतरोऽन्वगच्छत् ॥८॥

आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः ।
विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम् ॥९॥

आखण्डलो दण्डधरः कृशानुः
पाशीति नाथैः ककुभां चतुर्भिः ।
भैम्येव बद्ध्वा स्वगुणेन कृष्टैः
स्वयंवरे तत्र गतं न शेषैः ॥१०॥
मन्त्रैः पुरं भीमपुरोहितस्य
तद्वद्धरक्षं विशति क्व रक्षः ।
तत्रोद्यमं दिक्पतिराततान
यातुं ततो जातु न यातुधानः ॥११॥
कर्तुं शशाकाभिमुखं न भैम्या
मृगं दृगम्भोरुहतर्जितं यत् ।
अस्या विवाहाय ययौ विदर्भा-
स्तद्वाहनस्तेन न गन्धवाहः ॥१२॥
जातौ न वित्ते न गुणे न कामः
सौन्दर्य एव प्रवणः स वामः ।
स्वच्छस्वशैलेक्षितकुत्सवेरस्-
तांप्रत्यगान्न स्त्रितमां कुबेरः ॥१३॥
भैमीविवाहं सहते स्म कस्मा-
दर्धं तनुर्या गिरिजात्मभर्तुः ।
तेनाव्रजन्त्या विदधे विदर्भा-
नीशानयानाय तयान्तरायः ॥१४॥
स्वयंवरं भीमनरेन्द्रजाया
दिशः पतिर्न प्रविवेश शेषः ।
प्रयातु भारं स निवेश्य कस्मिन्
नहिर्महीगौरवसासहिर्यः ॥१५॥

ययौ विमृश्योर्ध्वदिशः पतिर्न
स्वयंवरं वीक्षितधर्मशास्त्रः ।
व्यलोकि लोके श्रुतिषु स्मृतौ वा
समं विवाहः क्व पितामहेन ॥१६॥
भैमीनिरस्तं स्वमवेत्य दूती-
मुखात्किलेन्द्रप्रमुखा दिगीशाः ।
स्वदे मुखेन्दौ च वितत्य मान्द्यं
चित्तस्य ते राजसमाजमीयुः ॥१७॥
नलभ्रमेणापि भजेत भैमी
कदाचिदस्मानिति शेषिताशा ।
अभून्महेन्द्रादिचतुष्टयी सा
चतुर्नली काचिदलीकरूपा ॥१८॥
प्रयस्यतां तद्भवितुं सुराणां दृष्टेन पृष्टेन परस्परेण ।
नैवानुमेने नलसाम्यसिद्धिः स्वाभाविकात्कृत्रिममन्यदेव ॥१९॥
पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीचक्रुरनिद्रमब्जम् ।
स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथातिमञ्जु ॥२०॥
तेषां तदा लब्धुमनीश्वराणां श्रियं निजास्येन नलाननस्य ।
नालं तरीतुं पुनरुक्तिदोषं बहिर्मुखानामनलाननत्वम् ॥२१॥
प्रियावियोगव्यथितादिवैला-
च्चन्द्राच्च राहुग्रहपीडितात्ते ।
ध्माताद्भवेन स्मरतोऽपि सारैः
स्वं कल्पयन्ति स्म नलानुकल्पम् ॥२२॥
नलस्य पश्यत्वियदन्तरं तं-
भैमीति भूपान्विधिराहूतास्ये ।
स्पर्धां दिगीशानपि कारयित्वा
तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥२३॥

सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः ।
भासाङ्गणप्राघुणिके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते ॥२४॥
तत्रागमद्वासुकिरीशभूषाभस्मोपदेहस्फुटगौरदेहः ।
फणीन्द्रवृन्दप्रणिगद्यमानप्रसीदजीवाद्यनुजीविवादः ॥२५॥
द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिभूपैः ।
तत्कालमालम्बि न केन यूना स्मरेषुपक्षानिलतूललीला ॥२६॥
रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः ।
प्रियोक्तिदानादरनम्रताद्यैरुपाचरच्चारु स राजचक्रम् ॥२७॥
चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे ।
दानं दया सूनृतमातिथेयी चतुष्टयीरक्षणसौविदल्ला ॥२८॥
अभ्यागतैः कुण्डिनवासवस्य
परोक्षवृत्तेष्वपि तेषु तेषु ।
जिज्ञासितस्त्वेप्सितलाभलिङ्गं
स्वल्पोऽपि नावापि नृपैर्विशेषः ॥२९॥
अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः ।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥
पुरे पथि द्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयेव ।
नभोऽपि किर्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥३१॥
विलासवैदग्ध्यविभूषणश्री-
स्तेषां यथासीत्परिचारकेऽपि ।
अज्ञासिषुः स्त्रीशिशुबालिशास्तं
तथागतं नायकमेव कंचित् ॥३२॥
न स्वेदिनश्चामरमारुतैर्न निमेषनेत्राः प्रतिवस्तुचित्रैः ।
म्लानस्रजो नातपवारणेन देवा नृदेवा बिभिदुर्न तत्र ॥३३॥
अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेष नरेषु वाग्भिः सौवर्गवर्गो न जनैरचिह्नि ॥३४॥

ते तत्र भैम्याश्चरितानि चित्रे
चित्राणि पौरैः पुरि लेखितानि ।
निरीक्ष्य निन्युर्दिवसं निशां च
तत्स्वप्नसंभोगकलाविलासैः ॥३५॥

सा विभ्रमं स्वप्नगतापि तस्यां
निशि स्वलाभस्य ददे यदेभ्यः ।
तदर्थिनां भूमिभुजां वदान्या
सती सती पूरयति स्म कामम् ॥३६॥

वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः ।
स्वयंवरस्थानजनाश्रयस्तैर्दिने परत्रालमकारि वीरैः ॥३७॥

भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याकृत प्राकृतबुद्धिमेव ।
प्रसूनबाणे विबुधाधिनाथस्तेनाथ साऽशोभि सभा नलेन ॥३८॥

धृताङ्गरागे कलितद्युशोभां तस्मिन्सभां चुम्बति राजचन्द्रे ।
गता बताक्ष्णोर्विषयं विहाय क्व क्षत्रनक्षत्रकुलस्य कान्तिः ॥३९॥

द्राग्दृष्टयः क्षोणिभुजाममुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दगन्ताः ॥४०॥

सुधांशुरेष प्रथमो भुवीति
स्मरो द्वितीयः किमसावितीमम् ।
दस्रस्तृतीयोऽयमिति क्षितीशाः
स्तुतिच्छलान्मत्सरिणो निनिन्दुः ॥४१॥

आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवासौ रतिवल्लभस्य ।
नासत्ययोर्मूर्तितृतीयतायमिति स्तुतस्तैः कृतमत्सरैः सः ॥४२॥

मायानलोदाहरणान्मिथस्तै-
रूचे समाः सन्त्यमुना कियन्तः ।
आत्मापकर्षे सति मत्सराणां
द्विषः परस्पर्धनया समाधिः ॥४३॥

गुणेन केनापि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम् ।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥४४॥

नलानसत्यानवदत्स सत्यः
कृतोपवेशान्सविधे सुवेषान् ।
नोभाविलाभूः किमु दर्पकश्च
भवन्ति नासत्ययुतौ भवन्तः ॥४५॥

अमी तमोऽब्जजगुरत्र मध्ये
कस्यापि नोत्पत्तिरभूदिलायाम् ।
अदर्पकाः स्मः सविधे स्थितास्ते
नासत्यतां नात्र बिभर्ति कश्चित् ॥४६॥

तेभ्यः परान्नः परिकल्पयस्व
श्रिया विदूरीकृतकामदेवान् ।
अस्मिन्समाजे बहुषु भ्रमन्ती
भैमी किलास्मासु घटिष्यतेऽसौ ॥४७॥

असाम यन्नाम तवेह रूप
स्वेनाधिगत्य श्रितमुग्धभावाः ।
तन्नो धिगाशापतितान्नरेन्द्र !
धिक्चेदमस्मद्विबुधत्वमस्तु ॥४८॥

सा वागवाज्ञायितमां नलेन
तेषामनाशङ्कितवाक्छलेन ।
स्त्रीरत्नलाभोचितयत्नमग्न-
मेनं हि न स्म प्रतिभाति किंचित् ॥४९॥

य स्पर्धया येन निजप्रतिष्ठां
लिप्सुः स एवाह तदुन्नतत्वम् ।
कः स्पर्धितुः स्वाभिहितस्वहानेः
स्थानेऽवहेलां बहुलां न कुर्यात् ॥५०॥

गीर्देवतागीतयशःप्रशस्तिः श्रिया तडित्त्वल्ललिताभिनेता ।
मुदा तदाऽवैक्षत केशवस्तं स्वयंवराडम्बरमम्बरस्थः ॥५१॥

अष्टौ तदाष्टासु हरित्सु दृष्टीः
सदो दिदृक्षुर्निदिदेश देवः ।
लैङ्गीमदृष्ट्वापि शिरःश्रियं यो
दृष्टो मृषावादितकेतकीकः ॥५२॥

एकेन पर्यक्षिपदात्मनाद्रि
चक्षुर्मुरारेरभवत्परेण ।
तैर्द्वादशात्मा दशभिस्तु शेषै-
र्दिशो दशालोकत लोकपूर्णाः ॥५३॥

प्रदक्षिणं देवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः ।
द्रष्टा महेन्द्रानुजदृष्टिमूर्त्या न प्राप तद्दर्शनविघ्नतापम् ॥५४॥

आलोकमाना वरलोकलक्ष्मीं तात्कालिकीमप्सरसो रसोत्काः ।
जनाम्बुधौ यत्र निजाननानि वितेनुरम्भोरुहकाननानि ॥५५॥

न यक्षलक्षैः किमलक्षि नो सा
सिद्धैः किमध्यासि सभाप्तशोभा ।
सा किंनरैः किं न रसादसेवि
नादर्शि हर्षेण महर्षिभिर्वा ॥५६॥

वाल्मीकिरश्लाघत तामनेक-
शास्त्रत्रयीभूरुहराजिभाजा ।
क्लेशं विना कण्ठपथेन यस्य
दैवी दिवः प्रागभुवमागमद्वाक् ॥५७॥

प्राशंसि संसद्गुरुणापि चार्वी
चार्वाकतासर्वविदूषकेण ।
आस्थानपट्टं रसनां यदीयां
जानामि वाचामधिदेवतायाः ॥५८॥

नाकेऽपि दीव्यत्तमदिव्यवाचि
वचःस्रगाचार्यकवित्कविर्यः ।
दैतेयनीतेः पथि सार्थवाहः
काव्यः स काव्येन सभामभाणीत् ॥५९॥
अमेलयद्भीमनृपः परं न
नाकर्षदेतान्दमनस्वसैव ।
इदं विधातापि विचिन्त्य यूनः
स्वशिल्पसर्वस्वमदर्शयन्नः ॥६०॥
एकाकिभावेन पुरा पुरारि-
र्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य काय-
निकायलीलाः किममी युवानः ॥६१॥
पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत्क्वापि निधाय वेधाः ।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥६२॥
मुधार्पित मूर्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव ।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥६३॥
प्रवेक्ष्यतः सुन्दरवृन्दमुच्चै-
रिदं मुदा चेदितरेतरं तत् ।
न शक्ष्यतो लक्षयितुं विमिश्रं
दस्रौ सहस्रैरपि वत्सराणाम् ॥६४॥
स्थितैरियद्भिर्युवभिर्विदग्धै-
र्दग्धेऽपि कामे जगतः क्षतिः का ।
एकाम्बुबिन्दुव्ययमम्बुराशेः
पूर्णस्य कः शंसति शोषदोषम् ॥६५॥
इति स्तुवन्हुंकृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतैव ।
ओंकारभूम्ना पठतैव वेदान्महर्षिवृन्देन तथाऽन्वमानि ॥६६॥

न्यवीविशत्तानथ राजसिंहान्सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ॥६७॥
विचिन्त्य नानाभुवनागतांस्ता-
नमर्त्यसंकीर्त्यचरित्रगोत्रान् ।
कथ्याः कथंकारममी सुताया-
मिति व्यषादि क्षितिपेन तेन ॥६८॥
श्रद्धालुसंकल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः ।
तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः ॥६९॥
तच्चिन्तनानन्तरमेव देवः
सरस्वतीं सस्मितमाह स स्म ।
स्वयंवरे राजकगोत्रवृत्त-
वक्त्रीमिह त्वां करवाणि वाणि ! ॥७०॥
कुलं च शीलं च बलं च यूनां
जानासि नानाभुवनागतानाम् ।
एषामतस्त्वं भव वावदूका
मूकायितुं कः समयस्तवायम् ॥७१॥
जगत्त्रयीपण्डितमण्डितैषा सभा न भूता न च भाविनी च ।
राज्ञां गुणज्ञापनकैतवेन संख्यावतः श्रावय वाङ्मुखानि ॥७२॥
इतीरिता तच्चरणात्परागं गीर्वाणचूडामणिमृष्टशेषम् ।
तस्य प्रसादेन सहाज्ञयासावादाय मूर्ध्नादरिणी बभार ॥७३॥
मध्येसभं सावततार बाला गन्धर्वविद्याधरकण्ठनाला ।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितवक्त्ररङ्गा ॥७४॥
आसीदथर्वा त्रिवलित्रिवेदीमूलाद्विनिर्गत्य वितायमाना ।
नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदररोमरेखा ॥७५॥
शिक्षैव साक्षाच्चरितं यदीयं
कल्पश्रियाकल्पविधिर्यदीयः ।

यस्याः समस्तार्थनिरुक्तिरूपै-
र्निरुक्तिविद्या खलु पर्यणंसीत् ।।७६।।
जात्या च वृत्तेन च भिद्यमानं
छन्दो भुजद्वन्द्वमभूद्यदीयम् ।
श्लोकार्धविश्रान्तिमयीभविष्णु-
पर्वद्वयीसन्धिसुचिह्नमध्यम् ।।७७।।

असंशयं सा गुणदीर्घभाव-
कृतां दधाना विततिं यदीया ।
विधायिका शब्दपरम्पराणां
किं चारचि व्याकरणेन काञ्ची ।।७८।।
स्थितैव कण्ठे परिणम्य हार-
लता बभूवोदिततारवृत्ता ।
ज्योतिर्मयी यद्भुजनाय विद्या
मध्येऽङ्गमङ्केन भृता विशङ्के ।।७९।।
अवैमि वादिप्रतिवादिगाढस्वपक्षरागेण विराजमाने ।
ते पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ।।८०।।

ब्रह्मार्थकर्मार्थकवेदभेदा-
द्द्विधा विधाय स्थितयात्मदेहम् ।
चक्रे पराच्छादनचारु यस्या
मीमांसया मांसलमूरुयुग्मम् ।।८१।।
उद्देशपर्वण्यपि लक्षणेऽपि
द्विधोदितैः षोडशभिः पदार्थैः ।
आन्वीक्षिकीं यद्दशनद्विमालीं
तां मुक्तिकामाकलितां प्रतीमः ।।८२।।
तर्का रदा यद्वदनस्य तर्क्या
वादेऽस्य शक्तिः क्व तथाऽन्यथा तैः ।

पत्रं क्व दातुं गुणशालिपूगं
क्व वादतः खण्डयितुं प्रभुत्वम् ॥८३॥
सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु ।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं ववृते पुराणम् ॥८४॥
आकल्पविच्छेदविवर्जितो यः
स धर्मशास्त्रव्रज एव यस्याः ।
पश्यामि मूर्धा श्रुतिमूलशाली
कण्ठस्थितः कस्य मुदे न वृत्तः ॥८५॥
भ्रुवौ दलाभ्यां प्रणवस्य यस्या-
स्तद्बिन्दुना भालतमालपत्रम् ।
तदर्धचन्द्रेण विधिर्विपञ्ची-
निक्वाणनाकोणधनुः प्रणिन्ये ॥८६॥
द्विकुण्डली वृत्तसमाप्तिलिप्याः
कराङ्गुली काञ्चनलेखनीनाम् ।
कैश्यं मषीणां स्मितभा कठिन्याः
काये यदीये निरमायि सारैः ॥८७॥
या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव ।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव ॥८८॥
भीमस्तयागद्यत मोदितुं ते वेला किलेयं तदलं विषद्य ।
मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम् ॥८९॥
अविन्दतासौ मकरन्दलीलां
मन्दाकिनी यच्चरणारविन्दे ।
अत्रावतीर्णा गुणवर्णनाय
राज्ञां तदाज्ञावशगास्मि कापि ॥९०॥
तत्कालवेद्यैः शकुनस्वराद्यै-
राप्तामवाप्तां नृपतिः प्रतीत्य ।

तां लोकपालैकधुरीण एष
तस्यै सपर्यामुचितां दिदेश ॥९१॥
दिगन्तरेभ्यः पृथिवीपतीना-
माकर्षकौतूहलसिद्धविद्याम् ।
ततः क्षितीशः स निजां तनूजां
मध्येमहाराजकमाजुहाव ॥९२॥
दासीषु नासीरचरीषु जातं
स्फीतं क्रमेणालिषु वीक्षितासु ।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धि-
मुद्धेलयन्तीमवलोककानाम् ॥९३॥
स्निग्धत्वमायाजललेपलोप-
सयत्नरत्नांशुमृजांशुकाभाम् ।
नेपथ्यहारद्युतिवारिवर्ति-
स्वच्छायसच्छायनिजालिजालाम् ॥९४॥
विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च ।
रतीशदूतेन मधुव्रतेन कर्णे रहः किंचिदिवोच्यमानाम् ॥९५॥
विरोधिवर्णाभरणाश्मभासां
भल्लाजिकौतूहलमीक्षमाणाम् ।
स्मरस्वचापभ्रमचालिते नु
भ्रुवौ विलासाद्वलिते वहन्तीम् ॥९६॥
सामोदपुष्पाशुगवासिताङ्गीं
किशोरशाखाग्रशयालिमालाम् ।
वसन्तलक्ष्मीमिव राजभिस्तैः
कल्पद्रुमैरप्यभिलष्यमाणाम् ॥९७॥
तावदातारुणनीलभासां देहोपदेहात्किरणैर्मणीनाम् ।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान्पुनरुक्तयन्तीम् ॥९८॥

स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषाद्वशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीम् ॥९९॥

विभूषणेभ्योऽवरमंशुकेषु
ततोऽवरं सान्द्रमणिप्रभासु ।
सम्यग्वपुः क्वापि न राजकस्य
पातुं दृशा धातृधृतावकाशाम् ॥१००॥

प्रावपुष्पवर्षैर्वियतः पतद्भि-
र्द्रष्टुं न दत्तामथ तद्द्विरेफैः ।
तद्भीतिभुग्नेन ततो मुखेन
विधेरहो वाञ्छितविघ्नयत्नः ॥१०१॥

एतद्वरं स्यामिति राजकेन
मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गा-
त्कर्पूरकस्तूरिकयोः प्रवाहम् ॥१०२॥

स्मितेच्छुदन्तच्छदकम्पकिंचि-
द्दिगम्बरीभूतरदांशुवृन्दैः ।
आनन्दितोर्वीन्द्रमुखारविन्दै-
र्मंदं नुदन्तीं हृदि कौमुदीनाम् ॥१०३॥

प्रत्यङ्गभूषाच्छमणिच्छलेन
यल्लग्नतन्निश्चललोकनेत्राम् ।
हाराग्रजाग्रद्गरुडाश्मरश्मि-
पीनाभनाभीकुहरान्धकाराम् ॥१०४॥

तद्गौरसारस्मितविस्मितेन्दु-
प्रभाशिरःकम्परुचोऽभिनेतुम् ।
विपाण्डुतामण्डितचामराली-
नानामरालीकृतलास्यलीलाम् ॥१०५॥

तदङ्गभोगावलिगायनीनां
मध्ये निरुक्तिक्रमकुण्ठितानाम् ।
स्वयं धृतामप्सरसां प्रसादं
ह्रियं हृदो मण्डनमर्पयन्तीम् ॥१०६॥
तारा रदानां वदनस्य चन्द्रं
रुचा कचानां च नभो जयन्तीम् ।
आकण्ठमक्ष्णोर्द्वितयं मधूनि
महीभुजः कस्य न भोजयन्तीम् ॥१०७॥
अलंकृताङ्गाद्भुतकेवलाङ्गीं
स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम् ।
इमां विमानेन सभां विशन्तीं
पपावपाङ्गैरथ राजराजिः ॥१०८॥
आसीदसौ तत्र न कोऽपि भूप-
स्तन्मूर्तिरूपोद्भवदद्भुतस्य ।
उल्लेसुरङ्गानि मुदा न यस्य
विनिद्ररोमाङ्कुरदन्तुराणि ॥१०९॥
अङ्गुष्ठमूर्ध्ना विनिपीडिताग्रा
मध्येन भागेन च मध्यमायाः ।
आस्फोटि भैमीमवलोक्य तत्र
न तर्जनी केन जनेन नाम ॥११०॥
अस्मिन्समाजे मनुजेश्वरेण
तां खञ्जनाक्षीमवलोक्य केन ।
पुनःपुनर्लोलितमौलिना न
भ्रुवोरुदक्षेपितरां द्वयी वा ॥१११॥
स्वयंवरस्याजिरमाजिहानां
विभाव्य भैमीमथ भूमिनाथैः ।

इदं मुदा विह्वलचित्तभावा-
दवादि खण्डाक्षरजिह्मजिह्मम् ॥११२॥
रम्भादिलोभात्कृतकर्मभिर्मा
शून्यैव भूर्भूत्सुरभूमिपान्थैः ।
इत्येतयालोपि दिवोऽपि पुंसां
वैमत्यमत्यप्सरसा रसायाम् ॥११३॥
रूपं यदाकर्ण्य जनाननेभ्य-
स्तत्तद्दिगन्ताद्वयमागमाम ।
सौन्दर्यसारादनुभूयमाना-
दस्यास्तदस्माद्बहु नाकनीयः ॥११४॥
रसस्य शृङ्गार इति श्रुतस्य
क्व नाम जागर्ति महानुदन्वान् ।
कस्मादुदस्थादियमन्यथा श्री-
र्लावण्यवैदग्ध्यनिधिः पयोधेः ॥११५॥
साक्षात्सुधांशुर्मुखमेव भैम्या
दिवः स्फुटं लाक्षणिकः शशाङ्कः ।
एतद्भ्रुवौ मुख्यमनङ्गचापं
पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥११६॥
लक्ष्ये धृतं कुण्डलिके सुदत्या
ताटङ्कयुग्मं स्मरधन्विने किम् ।
सव्यापसव्यं विशिखा विसृष्टा-
स्तेनानयोर्यान्ति किमन्तरेव ॥११७॥
तनोत्यकीर्तिः कुसुमाशुगस्य
सैषा बतेन्दीवरकर्णपूरौ ।
यतः श्रवःकुण्डलिकापराद्ध-
शरं खलः ख्यापयिता तमाभ्याम् ॥११८॥

रजःपदं षट्पदकीटजुष्टं
हित्वात्मनः पुष्पमयं पुराणम् ।
अद्यात्मभूराद्रियतां स भैम्या
भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥११९॥

पद्मान्हिमे प्रावृषि खञ्जरीटा-
न्क्षिप्नुर्यमादाय विधिः क्वचित्तान् ।
सारेण तेन प्रतिवर्षमुच्चैः
पुष्णाति दृष्टिद्वयमेतदीयम् ॥१२०॥

एतद्दृशोरम्बुरुहैर्विशेषं
भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ ।
इतीव धाताकृत तारकालि-
स्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥१२१॥

व्यधत्त सौधे रतिकामयोस्त-
द्भूक्त वयोऽस्या हृदि वासभाजोः ।
तदग्रजाग्रत्पृथुशातकुम्भ-
कुम्भौ न संभावयति स्तनौ कः ॥१२२॥

अस्या भुजाभ्यां विजिताद्बिसात्
किं पृथक्करोऽगृह्यत तत्प्रसूनम् ।
इहेष्यते तन्न गृहाः श्रियः, कै-
र्न गीयते वा कर एव लोकैः ॥१२३॥

छद्मैव तच्छम्बरजं बिसिन्या-
स्तत्पद्ममस्यास्तु भुजाग्रसद्म ।
उत्कण्टकादुद्गमनेन नाला-
दुत्कण्टकं शातशिखैर्नखैर्यत् ॥१२४॥

जागर्ति मर्त्येषु तुलार्थमस्या
योग्येति योग्यानुपलम्भनं नः ।

यद्यस्ति नाके भुवनेऽथवाध-
स्तदा न कौतस्कुतलोकबाधः ॥१२५॥
नमः करेभ्योऽस्तु विधेर्न वास्तु
स्पृष्टं धियाप्यस्य न किं पुनस्तैः ।
स्पर्शादिदं स्याल्लुलितं हि शिल्पं
मनोभुवोऽनङ्गतयानुरूपम् ॥१२६॥
इमां न मृद्वीमसृजत्कराभ्यां
वेधाः कुशाद्यासनकर्कशाभ्याम् ।
शृङ्गारधारां मनसा न शान्ति-
विश्रान्तिधन्वाध्वमहीरुहेण ॥१२७॥
उल्लास्य धातुस्तुलिता करेण
श्रोणी किमेषा स्तनयोर्गुरुर्वा ।
तेनान्तरालैस्त्रिभिरङ्गुलीना-
मुदीतमध्यत्रिवलीविलासा ॥१२८॥
निजामृतोद्यन्नवनीतजाङ्गी-
मेतां क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाभू-
न्निद्रालुना दुर्घटमम्बुजेन ॥१२९॥
अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि सूत्रैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥१३०॥
कृतिः स्मरस्यैव न धातुरेषा
नास्या हि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसाऽपि वेधा
निर्जीयते स स्मरकिङ्करेण ॥१३१॥
गुरोरपीमां भणदोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् ।
श्रमः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥१३२॥

आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदक्षु ।
गाथासुधाश्लेषकलाविलासैरलंचकाराननचन्द्रमिन्द्रः ॥१३३॥

स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा ।
हेमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मेनकापि ॥१३४॥

इति स्तुवानः सविधे नलेन
विलोकितः शङ्कितमानसेन ।
व्याकृत्य मर्त्योचितमर्थमुक्ते-
राखण्डलस्तस्य नुनोद शङ्काम् ॥१३५॥

स्वं नैषधादेशमहो विधाय
कार्यस्य हेतोरपि नानलः सन् ।
किं स्थानिवद्भावमधत्त दुष्टं
तादृक्कृतव्याकरणः पुनः सः ॥१३६॥

इयमियमधिरथ्यं याति नेपथ्यमञ्जु-
र्विशति विशति वेदीमुर्वशी सेयमुर्व्याः ।
इति जनजनितैः सानन्दनादैर्विजघ्ने
नलहृदि परभैमीवर्णनाकर्णनाप्तिः ॥१३७॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुत
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥

॥ इति महाकवि हर्षविरचिते नैषधीयप्रकाशे
दशमः सर्गः समाप्तः ॥१०॥

## ॥११॥ एकादशः सर्गः ॥

तां देवतामिव मुखेन्दुवसत्प्रसादा-
मक्ष्णा रसादनिमिषेण निभालयन्तीम् ।
लाभाय चेतसि धृतस्य वरस्य भीम-
भूमीन्द्रजा तदनु राजसभां बभाज ॥१॥
तन्निर्मलावयवभित्तिषु तद्विभूषा-
रत्नेषु च प्रतिफलन्निजदेहदम्भात् ।
दृष्ट्या परं न हृदयेन न केवलं तैः
सर्वात्मनैव सुतनौ युवभिर्ममज्जे ॥२॥
द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकम् ।
चारुः स यादृगभविष्यदभूद्विमानै-
स्तादृक्तदभ्रमवलोकितुमागतानाम् ॥३॥
कुर्वद्भिरात्मभवसौरभसंप्रदानं
भूपालचक्रचलचामरमारुतौघम् ।
आलोकनाय दिवि संचरतां सुराणां
तत्रार्चनाविधिरभूदधिवासधूपैः ॥४॥
तत्रावनीन्द्रचयचन्दनचन्द्रलेप-
नेपथ्यगन्धवहगन्धवहप्रवाहम् ।
आलीभिरापतदनङ्गशरानुसारी
संरुध्य सौरभमगाहत भृङ्गवर्गः ॥५॥
उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी-
सर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्लुतपताकतयाभिनिन्युर्-
मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥६॥

संभाषणं भगवती सदृशं विधाय
वाग्देवता विनयबन्धुरकन्धरायाः ।
ऊचे चतुर्दशजगज्जनतानमस्या
तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥७॥
अभ्यागमन्मखभुजामिह कोटिरेषा
येषां पृथक्कथनमब्दशतातिपाति ।
अस्यां वृणीष्व मनसा परिभाव्य कंचि-
द्यं चित्तवृत्तिरनुधावति तावकीना ॥८॥
एषां त्वदीक्षणरसादनिमेषतैषा
स्वाभाविकानिमिषतामिलिता यथाभूत् ।
आस्ये तथैव तव नन्वधरोपभोगै-
र्मुग्धे ! विधावमृतपानमपि द्विधास्तु ॥९॥
एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्व-
न्नाभाति बिन्दुभिरिव च्छुरितः पयोधेः ॥१०॥
वक्त्रेन्दुसंनिधिनिमीलदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिमात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥११॥
तत्तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्याः ।
आसन्ननायकविषण्णमुखानुमेय-
भैमीविरक्तचरितानुमया तु जज्ञुः ॥१२॥
रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तौ
विद्याधरेष्वधरतां वपुषैव भैम्याः ।

गन्धर्वसंसदि न गन्धमपि स्वरस्य
तस्या विमृश्य विमुखोऽजनि यानवर्गः ॥१३॥
दीनेषु सत्स्वपि कृताफलवित्तरक्षै-
र्यक्षैरदर्शि न मुखं त्रपयैव भैम्याम् ।
ते जानते स्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमविक्षिति नावतीर्णाम् ॥१४॥
जन्यास्ततः फणभृतामधिपं सुरौघा-
न्माञ्जिष्ठमञ्जिमवगाहिपदोष्ठलक्ष्मीम् ।
तां मानसं निखिलवारिचयान्नवीना
हंसावलीमिव घना गमयांबभूवुः ॥१५॥
यस्या विभोरखिलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्मुनिभिः पुनः सा ।
उद्गत्वरामृतकरार्धपरार्ध्यभालां
बालामभाषत सभासततप्रगल्भा ॥१६॥
आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः ।
यज्ञोपवीतपदवीं भजते स शंभोः
सेवासु वासुकिरयं प्रसितः सितश्रीः ॥१७॥
पाणौ फणी भजति कङ्कणभूयमेशे
सोऽयं मनोहरमणीरमणीयमुच्चैः ।
कोटीरबन्धनधनुर्गुणयोगपट्ट-
व्यापारपारगममुं भज भूतभर्तुः ॥१८॥
धृत्वैकया रसनयामृतमीश्वरेन्दो-
रप्यन्यया त्वदधरस्य रसं द्विजिह्वः ।
आस्वादयन्युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥१९॥

आशीविषेण रदनच्छददंशदान-
मेतेन ते पुनरनर्थतया न गण्यम् ।
बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ॥२०॥
तद्विस्फुरत्फणविलोकनभूतभीतेः
कम्पं च वीक्ष्य पुलकं च ततोऽनु तस्याः ।
संजातसात्विकविकारधियः स्वभृत्या-
न्नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः ॥२१॥
तद्दर्शिभिः स्ववरणे फणिभिर्निराशै-
र्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम् ।
यत्तान्प्रयातुमनसोऽपि विमानवाहा
हा हा प्रतीपपवनाशकुनान्न जग्मुः ॥२२॥
ह्रीसंकुचत्फणगणादुरगप्रधाना-
त्तां राजसङ्घमनयन्त विमानवाहाः ।
संध्यानमद्दलकुलात्कमलाद्विनीय
कह्लारमिन्दुकिरणा इव हासभासम् ॥२३॥
देव्याभ्यधायि भव भीरु! धृतावधाना
भूमीभुजो! भजत भीमभुवो निरीक्षाम् ।
आलोकितामपि पुनः पिबतां दृशेना-
मिच्छापि गच्छति न वत्सरकोटिभिर्वः ॥२४॥
लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
संक्षोभयन्वितनुतां वितनुर्मुदं वः ॥२५॥
पुष्पेषुणा ध्रुवममूनिषुवर्षजल्पि-
हुंकारमन्त्रबलभस्मितशान्तशक्तीन् ।

शृङ्गारसर्गरसिकद्वयणुकोदरि ! त्वं
द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥२६॥
स्वादूदके जलनिधौ सवनेन सार्धं
भव्या भवन्तु तव वारिविहारलीलाः ।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ! ॥२७॥
सावर्तभावभवदद्भुतनाभिकूपे !
स्वभौममेतदुपवर्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
मेतद्गृहे परिगृहाण शचीविलासम् ॥२८॥
देवः स्वयं वसति तत्र किल स्वयंभू-
र्न्यग्रोधमण्डलतले हिमशीतले यः ।
स त्वां विलोक्य निजशिल्पमनन्यकल्पं
सर्वेषु कारुषु करोतु करेण दर्पम् ॥२९॥
न्यग्रोधनादिव दिवः पतदातपादे-
र्न्यग्रोधमात्मभरधारमिवावरोहैः ।
तं तस्य पाकिफलनीलदलद्युतिभ्यां
द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ॥३०॥
न श्वेततां चरतु वा भुवनेषु राज-
हंसस्य न प्रियतमा कथमस्य कीर्तिः ।
चित्रं तु यद्विशदिमाद्वयमादिशन्ती
क्षीरं च नाम्बु च मिथः पृथगातनोति ॥३१॥
शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि
शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं न किल तस्य नलेति नाम ॥३२॥

भ्रूवल्लिवेल्लितमथाकृतिभङ्गिमेषा
लिङ्गं चकार तदनादरणस्य विज्ञा ।
राज्ञोऽपि तस्य तदलाभजतापवह्नि-
श्चिह्नीबभूव मलिनच्छविभूमधूमः ॥३३॥
राजान्तराभिमुखमिन्दुमुखीमथैनां
जन्या जनीं हृदयवेदितयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधान-
वाचां भवत्यवसरः सति भव्यभृत्ये ॥३४॥
ऊचे पुनर्भगवती नृपमन्यमस्यै
निर्दिश्य दृश्यतमतावमताश्विनेयम् ।
आलोक्यतामयमये ! कुलशीलशाली
शालीनतानतमुदस्य निजास्यबिम्बम् ॥३५॥
एतत्पुरःपठदपश्रमबन्दिवृन्द-
वाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदाना-
मर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ॥३६॥
नन्वत्र हव्य इति विश्रुतनाम्नि शाक-
द्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाबिरुदबन्दिजयानयापि'
किं रागि राजनि गिराजनि नान्तरं ते ॥३७॥
शाकः शुकच्छदसमच्छविपत्रमाल-
भारी हरिष्यति तरुस्तव तत्र चित्तम् ।
यत्पल्लवौघपरिरम्भविजृम्भितेन
ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥
स्पर्शेन तत्र किल तत्तरुपत्रजन्मा
यन्मारुतः कमपि संमदमादधाति ।

कौतूहलं तदनुभूय विधेहि भूयः
श्रद्धां पराशरपुराणकथान्तरेऽपि ॥३९॥
क्षीरार्णवस्तव कटाक्षरुचिच्छटाना-
मन्वेतु तत्र विकटायितमायताक्षि ! ।
वेलावनीवनततिप्रतिबिम्बचुम्बी
किर्मीरितोर्मिचयचारिमचापलाभ्याम् ॥४०॥
कल्लोलजालचलनोपनतेन पीवा
जीवातुनानवरतेन पयोरसेन ।
अस्मिन्नखण्डपरिमण्डलितोरुमूर्ति-
रध्यास्यते मधुभिदा भुजगाधिराजः ॥४१॥
त्वद्रूपसपदवलोकनजातशङ्का
पादाब्जयोरिह कराङ्गुलिलालनेन ।
भूयाच्चिराय कमला कलितावधाना
निद्रानुबन्धमनुरोधयितुं धवस्य ॥४२॥
बालातपैः कृतकगैरिकतां क्रतां द्वि-
स्तत्रोदयाचलशिलाः परिशीलयन्तु ।
त्वद्विभ्रमभ्रमणजश्रमवारिधारि-
पादाङ्गुलीगलितया नखलाक्षयापि ॥४३॥
नृणां करम्बितमुदामुदयन्मृगाङ्क-
शङ्कां सृजत्वनघजङ्घि ! परिभ्रमन्त्याः ।
तत्रोदयाद्रिशिखरे तव दृश्यमास्यं
कश्मीरसंभवसमारचनाभिरामम् ॥४४॥
एतेन ते विरहपावकमेत्य ताव-
त्कामं स्वनाम कलितान्वयमन्वभावि ।
अङ्गीकरोषि यदि तत्तव नन्दनाद्यै-
र्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥४५॥

लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि
वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि ।
सामुत्र दूषणमजीगणदेकमेव
नार्थी बभूव मघवा यदमुष्य देवः ।।४६।।
लक्ष्मीविलासवसतेः सुमनःसु मुख्या-
दस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम् ।
स्थानान्तरं तदनु निन्युरिमां विमान-
वाहाः पुनः सुरभितामिव गन्धवाहाः ।।४७।।
भूयस्ततो निखिलवाङ्मयदेवता सा
हेमोपमेयतनुभासमभाषतैनाम् ।
एन स्वबाहुबहुवारनिवारितारि
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ! ।।४८।।
द्वीपस्य पश्य दयितं द्युतिमन्तमेतं
क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण ।
यन्मण्डले स खलु मण्डलसंनिवेशः
पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः ।।४९।।
तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची
क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान् ।
हंसावलीकलकलप्रतिनादवाग्भिः
स्कन्देषुवृन्दविवरैर्विवरीतुकामः ।।५०।।
वैदर्भि ! दर्भदलपूजनयापि यस्य
गर्भे जनः पुनरुदेति न जातु मातुः ।
तस्यार्चनां रचय तत्र मृगाङ्कमौले-
स्तन्मात्रदैवतजनाभिजनः स देशः ।।५१।।
चूडाग्रचुम्बिमिहिरोदयशैलशील-
स्तेनाः स्तनंधयसुधाकरशेखरस्य ।

तस्मिन्सुवर्णरसभूषणरम्यहर्म्य-
भूभृद्धटा घटय हेमघटावतंसाः ॥५२॥
तस्मिन्मलिम्लुच इव स्मरकेलिजन्म-
घर्मोदबिन्दुमयमौक्तिकमण्डनं ते ।
जालैर्मिलन्दधिमहोदधिपूरलोल-
कल्लोलचामरमरुत्तरुणि ! च्छिनत्तु ॥५३॥
एतद्यशो नवनवं खलु हंसवेष
वेशन्तसंतरणदूरगमक्रमेण ।
अभ्यासमर्जयति संतरितुं समुद्रा-
न्गन्तुं च निःश्रममितः सकलान्दिगन्तान् ॥५४॥
तस्मिन्गुणैरपि भृते गणनादरिद्रै-
स्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे निरुन्धति निबन्धनतां वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ॥५५॥
ते निन्यिरे नृपतिमन्यमिमाममुष्मा-
दंसावतंसशिबिकांशभृतः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखां
लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ॥५६॥
एकैकमद्भुतगुणं धुतदूषणं च
हित्वान्यमन्यमुपगत्य परित्यजन्तीम् ।
एनां जगाद जगदञ्चितपादपद्मा
पद्मामिवाच्युतभुजान्तरविच्युतां सा ॥५७॥
ईशः कुशेशयसनाभिशये ! कुशेन
द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ।
ज्योतिष्मता सममनेन वनीघनासु
तत्त्वं विनोदय घृतोदतटीषु चेतः ॥५८॥

वातोर्मिदोलनचलद्दलमण्डलाग्र-
भिन्नाभ्रमण्डलगलज्जलजातसेकः ।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूड-
श्चित्राय तत्र तव नेत्रनिपीयमानः ॥५६॥
पाथोधिमाथसमयोत्थितसिन्धुपुत्री-
पत्पङ्कजार्पणपवित्रशिलासु तत्र ।
पत्या सहावह विहारमयैर्विलासै-
रानन्दमिन्दुमुखि ! मन्दरकन्दरासु ॥६०॥
आरोहणाय तव सज्ज इवास्ति तत्र
सोपानशोभिवपुरश्मवलिच्छटाभिः ।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-
क्षुब्धाचलः कनककेतकगोत्रगात्रि ! ॥६१॥
मन्था नगः स भुजगप्रभुवेष्टघृष्टि-
लेखावलद्धवलनिर्झरवारिधारः ।
त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेष-
शेषाङ्गवेष्टिततनुभ्रममातनोतु ॥६२॥
एतेन ते स्तनयुगेन सुरेभकुम्भौ
पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं
स्वच्छन्दमिन्दुमपि सुन्दरि ! मन्दराद्रिः ।६३।
वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने-
हेतुं विनैव धृतनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ
तस्मिन्महीभुजि तयानुमतिर्न भेजे ॥६४॥
तस्मादिमां नरपतेरपनीय तन्वीं
राजन्यमन्यमथ जन्यजनः स निन्ये ।

स्त्रीभावभावितपदामविमृश्य याञ्चा-
मर्थी निवर्त्य विधनादिव वित्तवित्तम् ॥६५॥
देवी पवित्रितचतुर्भुजवामभागा
वागालपत्पुनरिमां गरिमाभिरामाम् ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः
पाणिग्रहादनुगृहाण गणं गुणानाम् ॥६६॥
द्वीपस्य शाल्मल इति प्रथितस्य नाथः
पाथोधिना वलयितस्य सुराम्बुनायम् ।
अस्मिन्वपुष्मति न विस्मयसे गुणाब्धौ
रक्ता तिलप्रसवनासिकि ! नासि किं वा ।६७।
विप्रे धयत्युदधिमेकतमं असत्सु
यस्तेषु पञ्चसु विभाय न सीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं
सार्धं विधेहि मधुरा मधुपानकेलीः ॥६८॥
द्रोणः स तत्र वितरिष्यति भाग्यलभ्य-
सौभाग्यकार्मणमयीमुपदां गिरिस्ते ।
तद्द्वीपदीप इव दीप्तिभिरोषधीनां
चूडामिलज्जलदकज्जलदर्शनीयः ॥६९॥
तद्द्वीपलक्ष्मपृथुशाल्मलितूलजालैः
क्षोणीतले मृदुनि मारुतचारुकीर्णैः ।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरससारसकोशमृद्वि ! ॥७०॥
एतद्गुणश्रवणकालविजृम्भमाण-
तल्लोचनाञ्चलनिकोचनसूचितस्य ।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते
तामेकतः क्षितिपतेरपरं नयन्तः ॥७१॥

तां भारती पुनरभाषत नन्वमुष्मि-
न्काश्मीरपङ्कनिभलग्नजनानुरागे ।
श्रीखण्डलेपमयदिग्जयकीर्तिराजि-
राजद्भुजे भज महीभुजि भैमि ! भावम् ।७२।
द्वीपं द्विपाधिपतिमन्दपदे ! प्रशास्ति
प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या
साक्षाद्यथैव कमला यमलार्जुनारेः ॥७३॥
प्लक्षे महीयसि महीवलयातपत्रे
तत्रेक्षिते खलु तवापि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोला-
लोलाखिलाङ्गजनताजनितानुरागे ॥७४॥
पीत्वा तवाधरसुधां वसुधासुधांशु-
र्न श्रद्दधातु रसमिक्षुरसोदवाराम् ।
द्वीपस्य तस्य दधतां परिवेषवेष
सोऽयं चमत्कृतचकोरचलाचलाक्षि ! ॥७५॥
सूरं न सौर इव नेन्दुमवीक्ष्य तस्मि-
न्नाश्नाति यस्तदितरत्रिदशानभिज्ञः ।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव
दर्शेऽश्नतोऽपि न भवत्यवकीर्णिभावः ॥७६॥
उत्सर्पिणी न किल तस्य तरङ्गिणी या
त्वन्नेत्रयोरहह तत्र विपाशि जाता ।
नीराजनाय नवनीरजराजिरास्ता-
मत्राब्जसानुरज राजनि राजमाने ॥७७॥
एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा
दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।

क्षीरे पयस्यपि पदे द्वयवाचिभूयं
नानार्थकोषविषयोऽद्य मृषोद्यमस्तु ॥७८॥
ब्रूमः किमस्य नलमप्यलमाजुहूषोः
कीर्ति स चैष च समादिशतः स्म कर्तुम् ।
स्वद्वीपसीमसरिदीश्वरपूरपार-
वेलाचलाक्रमणविक्रममक्रमेण ॥७९॥
अम्भोजगर्भरुचिराथ विदर्भसुभ्रू-
स्तं गर्भरूपमपि रूपजितत्रिलोकम् ।
वैराग्यरूक्षमवलोकयति स्म भूपं
दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥८०॥
ते तां ततोऽपि चकृषुर्जगदेकदीपा-
दंसस्थलस्थितसमानविमानदण्डाः ।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां
सोत्कण्ठकैरववनीसुकृतप्ररोहाः ॥८१॥
भूपेषु तेषु न मनागपि दत्तचित्ता
विस्मेरया वचनदेवतया तयाथ ।
वाणीगुणोदयतृणीकृतपाणिवीणा-
निक्वाणया पुनरभाणि मृगेक्षणा सा ॥८२॥
यन्मौलिरत्नमुदितासि स एष जम्बू-
द्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति ।
दोलायितेन बहुना भवभीतिकम्प्रः
कंदर्पलोक इव खात्पतितस्त्रुटित्वा ॥८३॥
विष्वग्वृतः परिजनैरयमन्तरीपै-
स्तेषामधीश इव राजति राजपुत्रि ! ।
हेमाद्रिणा कनकदण्डमहातपत्रः
कैलासरश्मिचयचामरचक्रचिह्नः ॥८४॥

एतत्तरुस्तरुणि ! राजति राजजम्बूः
स्थूलोपलानिव फलानि विमृश्य यस्याः ।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-
यूथानि केन तरुमारुरुहुः पथेति ॥८५॥
जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना
कृत्स्नापि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बु-
र्जम्बूसरिद्वहति सीमनि कम्बुकण्ठि ! ॥८६॥
अस्मिञ्जयन्ति जगतीपतयः सहस्र-
मस्रास्रसार्द्ररिपुतद्वनितेषु तेषु ।
रम्भोरु ! चारु कतिचित्तव चित्तबन्धि-
रूपान्निरूप्य मुदाहमुदाहरामि ॥८७॥
प्रत्यर्थियौवतवतंसतमालमालो-
न्मीलत्तमःप्रकरतस्करशौर्यसूर्ये ।
अस्मिन्नवन्तिनृपतौ गुणसंततीनां
विश्रान्तिधामनि मनो दमयन्ति ! किं ते ॥८८॥
तत्रानुतीरवनवासितपस्विविप्रा
शिप्रा तवोर्मिभुजया जलकेलिकाले ।
आलिङ्गनानि ददती भविता वयस्या
हास्यानुबन्धरमणीयसरोरुहास्या ॥८९॥
अस्याधिशय्य पुरमुज्जयिनीं भवानी
जागर्ति या सुभगयौवतमौलिमाला ।
पत्याऽर्धकायघटनाय मृगाक्षि ! तस्याः
शिष्या भविष्यसि चिरं वरिवस्ययापि ॥९०॥
निःशङ्कमङ्कुरितता रतिवल्लभस्य
देवः स्वचन्द्रकिरणामृतसेचनेन ।

तत्रावलोक्य सुदृशां हृदयेषु रुद्र-
स्तद्देहदाहफलमाह स किं न विद्मः ॥६१॥
आगःशतं विदधतोऽपि समिद्धकामा
नाधीयते परुषमक्षरमस्य वामाः ।
चान्द्री न तत्र हरमौलिशयालुरेका-
ऽनध्यायहेतुतिथिकेतुरपैति लेखा ॥६२॥
भूपं व्यलोकत न दूरतरानुरक्तं
सा कुण्डिनावनिपुरंदरनन्दिनी तम् ।
अन्यानुरागविरसेन विलोकनाद्वा
जानामि सम्यगविलोकनमेव रम्यम् ॥६३॥
भैमीङ्गितानि शिबिकामधरे वहन्तः
साक्षान्न यद्यपि कथंचन जानते स्म ।
जज्ञुस्तथापि सविधस्थितसंमुखीन-
भूपालभूषणमणिप्रतिबिम्बितेन ॥६४॥
भैमीमवापयत जन्यजनस्तदन्य
गङ्गामिव क्षितितलं रघुवंशदीपः ।
गाङ्गेयपीतकुचकुम्भयुगां च हार-
चूडासमागमवशेन विभूषितां च ॥६५॥
तां मत्स्यलाञ्छनदराञ्छितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा ।
व्रीडाजडे ! किमपि सूचय चेतसा चेत्
क्रीडारसं वहसि गौडबिडौजसीह ॥६६॥
एतद्यशोभिरमलानि कुलानि भासां
तथ्यं तुषारकिरणस्य तृणीकृतानि ।
स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ
रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ॥६७॥

आलिङ्गितः कमलवत्करकस्त्वयाऽयं
श्यामः सुमेरुशिखयेव नवः पयोदः ।
कंदर्पमूर्धरुहमण्डनचम्पकस्र-
ग्दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु ॥९८॥
एतेन संमुखमिलत्करिकुम्भमुक्ताः
कौक्षेयकाभिहृतिभिर्विबभुर्विमुक्ताः ।
एतद्भुजोष्मभृशनिःसहया विकीर्णाः
प्रस्वेदबिन्दव इवारिनरेन्द्रलक्ष्म्या ॥९९॥
आश्चर्यमस्य ककुभामवधीनवाप-
दाजानुगाद्भुजयुगादुदितः प्रतापः ।
व्यापत्सदाशयविसारितसप्ततन्तु-
जन्मा चतुर्दश जगन्ति यशःपटश्च ॥१००॥
औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन्दृशोर्निपतितामवगम्य भैम्याः ।
स्वेनैव जन्यजनतान्यमजीगमत्तां
सुज्ञं प्रतीङ्गितविभावनमेव वाचः ॥१०१॥
एतां कुमारनिपुणां पुनरप्यभाणी-
द्वाणी सरोजमुखि ! निर्भरमारभस्व ।
अस्मिन्नसंकुचितपङ्कजसख्यशिक्षा-
निष्णातदृष्टिपरिरम्भविजृम्भितानि ॥१०२॥
प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थ-
पृथ्वीधरः पृथुरयं मथुराधिनाथः ।
अश्मश्रुजातमनुयाति न शर्वरीशः
श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥१०३॥
बालेऽधराधरितनैकविधप्रवाले !
पाणौ जगद्विजयकार्मणमस्य पश्य ।

ज्याघातजेन रिपुराजकधूमकेतु-
तारायमाणमुपरज्य मणिं किणेन ॥१०४॥
एतद्भुजारणिसमुद्भवविक्रमाग्नि-
चिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययारिपरिषन्मशकार्थयाश्रु-
विश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥१०५॥
श्यामीकृतां मृगमदैरिव माथुरीणां
धौतैः कलिन्दतनयामधिमध्यदेशम् ।
तत्राप्तकालियमहाह्रदनाभिशोभां
रोमावलीमिव विलोकयितासि भूमेः ॥१०६॥
गोवर्धनाचलकलापिचयप्रचार-
निर्वासिताहिनि घने सुरभिप्रसूने ।
तस्मिन्ननेन सह निर्विश निर्विशङ्क
वृन्दावने वनविहारकुतूहलानि ॥१०७॥
भावी करः कररुहाङ्कुरकोरकोऽपि
तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः ।
अन्तस्त्वदास्यहृतसारतुषारभानु-
शोकानुकारिकरिदन्तजकङ्कणाङ्कः ॥१०८॥
तज्जः श्रमाम्बु सुरतान्तमुदा नितान्त-
मुत्कण्टके स्तनतटे तव संचरिष्णुः ।
खञ्जनप्रभञ्जनजनः पथिकः पिपासुः
पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥१०९॥
पूजाविधौ मखभुजामुपयोगिनो ये
विद्रुतकराः कमलनिर्मलकान्तिभाजः ।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णा-
स्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥११०॥

वैरिश्रियं प्रति नियुद्धमनाप्नुवन्यः
किंचिन्न तृप्यति धरावलयैकवीरः ।
स त्वामवाप्य निपतन्मदनेषुवृन्द-
स्यन्दीनि तृप्यतु मधूनि पिबन्निवायम् ॥१११॥
तस्मादियं क्षितिपतिक्रमगम्यमान-
मध्वानमैक्षत नृपादवतारिताक्षी ।
तद्भावबोधबुधतां निजचेष्टयैव
व्याचक्षते स्म शिबिकानयने नियुक्ताः ॥११२॥
भूयोऽपि भूपमपरं प्रति भारती तां
अस्यच्चमूरुचलचक्षुषमाचचक्षे ।
एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मी-
मक्ष्णोः सुखं जनय खञ्जनमञ्जुनेत्रे! ॥११३॥
एतस्य सावनिभुजः कुलराजधानी
काशी भवोत्तरणधर्मतरिः स्मरारेः ।
यामागता दुरितपूरितचेतसोऽपि
पापं निरस्य चिरजं विरजीभवन्ति ॥११४॥
आलोक्य भाविविधिकर्तृकलोकसृष्टि-
कष्टानि रोदिति पुरा कृपयैव रुद्रः ।
नामेच्छयेति मिषमात्रमधत्त यत्तां
संसारतारणतरीमसृजत्पुरीं सः ॥११५॥
वाराणसी निविशते न वसुंधरायां
तत्र स्थितिर्मखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ॥११६॥
सायुज्यमृच्छति भवस्य भवाब्धियाद-
स्तां पत्युरेत्य नगरीं नगराजपुत्र्याः ।

भूताभिधानपटुमद्यतनीमवाप्य
भीमोद्भवे! भवतिभावमितास्तिधातुः ॥११७॥
निर्विश्य निर्विरति काशिनिवासि भोगा-
न्निर्माय नर्म च मिथो मिथुनं यथेच्छम् ।
गौरीगिरीशघटनाधिकमेकभावं
शर्मोर्मिकञ्चुकितमञ्चति पञ्चतायाम् ॥११८॥
न श्रद्दधासि यदि तन्मम मौनमस्तु
कथ्या निजाप्ततमयैव तवानुभूत्या ।
न स्यात्कनीयसितरा यदि नाम काश्या
राजन्वती मुदिरमण्डनधन्वना भूः ॥११९॥
ज्ञानाधिकासि सुकृतान्यधिकाशि कुर्याः
कार्यं किमन्यकथनैरपि यत्र मृत्योः ।
एकं जनाय सतताभयदानमन्य-
द्धन्ये! वहत्यमृतसत्रमवारितार्थि ॥१२०॥
भूभर्तुरस्य रतिरेधि मृगाक्षि! मूर्ता
सोऽयं तवास्तु कुसुमायुध एव मूर्तः ।
भातं च ताविव पुरा गिरिश विराद्ध-
मारादध्रुमाशु पुरि तत्र कृतावतारौ ॥१२१॥
कामानुशासनशते सुतरामधीती
सोऽयं रहो नखपदैर्महतु स्तनौ ते ।
रुष्टाद्रिजाचरणकुङ्कुमपङ्कराग-
संकीर्णशंकरशशाङ्ककलाङ्ककारैः ॥१२२॥
पृथ्वीश एष नुदतु त्वदनङ्गताप-
मालिङ्ग्य कीर्तिचयचामरचारुचापः ।
सङ्ग्रामसंगतविरोधिशिरोधिदण्ड-
खण्डिक्षुरप्रशरसंप्रसरत्प्रतापः ॥१२३॥

वक्षस्त्वदुग्रविरहादपि नास्य दीर्णं
वज्रायते पतनकुण्ठितशत्रुशस्त्रम् ।
तत्कन्दकन्दलतया भुजयोर्न तेजो
वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥१२४॥
किं न द्रुमा जगति जाग्रति लक्षसंख्या-
स्तुल्योपनीतपिककाकफलोपभोगाः ।
स्तुत्यस्तु कल्पविटपी फलसंप्रदानं
कुर्वन्स एष विबुधानमृतैकवृत्तीन् ॥१२५॥
अस्मै करं प्रवितरन्तु नृपा न कस्मा-
दस्यैव तत्र यदभूत्प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव
नेदंकृपा निजकृपाणकरग्रहाय ॥१२६॥
एतद्बलैः क्षणिकतामपि भूखुराग्र-
स्पर्शायुषां रयरसादसमापयद्भिः ।
दर्पेयकेवलनभःक्रमणप्रवाहै-
र्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥१२७॥
तद्वर्णनासमय एव समेतलोक-
शोभावलोकनपरा तमसो निरासे ।
मानी तया गुणविदा यदनादृतोऽसौ
वद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥१२८॥
सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज-
श्चित्तेनाशाजुषस्तान्सममसमगुणान् मुञ्चती गूढभावा ।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ॥१२९॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।

शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।१३०।

।। इति महाकविश्रीहर्षविरचितेनैषधीयप्रकाश
एकादशः सर्गः समाप्तः ।। ११ ।।

## ।। १२ ।। द्वादशः सर्गः ।।

प्रियाह्रियालम्ब्य विलम्बमाविला
विलासिनः कुण्डिनमण्डनायितम् ।
समाजमाजग्मुरथो रथोत्तमा-
स्तमासमुद्रादपरेऽपरे नृपाः ।।१।।

ततः स भैम्या वृते वृते नृपै-
र्विनिःश्वसद्भिः सदसि स्वयंवरः ।
चिरागतैस्तर्कितताद्विरागितैः
स्फुरद्भिरानन्दमहार्णवैर्नवैः ।।२।।

चलत्पदस्तत्पदयन्त्रणेङ्गित-
स्फुटाशयामासयति स्म राजके ।
श्रमं गता यानगतावपीयमि-
त्युदीर्य धुर्यः कपटाज्जनी जनः ।।३।।

नृपानुपक्रम्य विभूषितासना-
न्सनातनी सा सुषुवे सरस्वती ।
विहारमारभ्य सरस्वतीः सुधा-
सरःस्वतीषार्द्रतनूरनूत्थिताः ।।४।।

वृणीष्व वर्णेन सुवर्णकेतकी-
प्रसूनवर्णाद्दितुपर्णमारुतम् ।

निजामयोध्यामपि पावनीमयं
भवन्मयो ध्यायति नावनीपतिः ॥५॥
न पीयतां नाम चकोरजिह्वया
कथंचिदेतन्मुखचन्द्रचन्द्रिका ।
इमां किमाचामयसे न चक्षुषी
चिरं चकोरस्य भवन्मुखस्पृशी ॥६॥
प्रपां विहारे तव हारविभ्रमं
करोतु नीरे पृषदुत्करस्तरन् ।
कठोरपीनोच्चकुचद्वयीतट-
त्रुटत्तरः सारवसारवोर्मिजः ॥७॥
अखानि सिन्धुः समपूरि गङ्गया
कुले किलास्य प्रसभं स भन्त्स्यते ।
विलङ्घ्यते चास्य यशःशतैरहो
सतां महत्संमुखधावि पौरुषम् ॥८॥
एतद्यशःक्षीरधिपूरगाहि
पतत्यगाधे वचनं कवीनाम् ।
एतद्गुणानां गणनाङ्कपातः
प्रत्यर्थिकीर्तीः खटिकाः क्षिणोति ॥९॥
भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यता-
मध्युग्रापि हि कोटिरस्य समरे रोमाणि सत्त्वाङ्कुराः ।
नीतः संयति बन्दिभिः श्रुतिपथं यन्नामवर्णावली-
मन्त्रः स्तम्भयति प्रतिक्षितिभृतां दोस्तम्भकुम्भीनसान् १०
तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः ।
व्योमव्यापिविपक्षराजकयशस्ताराः पराभावुकः
कासामस्य न स प्रतापतपनः पारं गिरां गाहते ।११।

द्वेष्याकीर्तिकलिन्दशैलसुतया नद्यास्य यद्दोर्द्वयी-
कीर्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे ।
तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥१२॥

इति श्रुतिस्वादिततद्गुणस्तुतिः
सरस्वतीवाङ्मयविस्मयोत्थया ।
शिरस्तिरःकम्पनयैव भीमजा
न तं मनोरन्वयमन्वमन्यत ॥१३॥

युवान्तरं सा वचसामधीश्वरी
स्वरामृतन्यक्कृतमत्तकोकिला ।
शशंस संसक्तकरैव तद्दिशा
निशाकरज्ञातिमुखीमिमां प्रति ॥१४॥

न पाण्ड्यभूमण्डनमेणलोचने !
विलोचनेनापि नृपं पिपाससि ।
शशिप्रकाशाननमेतमीक्षितुं
तरङ्गयापाङ्गदिशा दृशोस्त्विषः ॥१५॥

भुवि भ्रमित्वाऽनवलम्बमम्बरे
विहर्तुमभ्यासपरम्परापरा ।
अहो महावंशममुं समाश्रिता
सकौतुकं नृत्यति कीर्तिनर्तकी ॥१६॥

इतो भिया भूपतिभिर्वनं वना-
दटद्भिरुच्चैरटवीत्वमीयुषी ।
निजापि सावापि चिरात्पुनः पुरी
पुनः स्वमध्यासि विलासमन्दिरम् ॥१७॥

आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः ।

वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः १८
भङ्गाकीर्तिमषीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।
तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः १९
एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुव
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ।२०।
शशंस दासीङ्गितविद्विदर्भजा-
मितो ननु स्वामिनि ! पश्य कौतुकम् ।
यदेष सौधाग्रनटे पटाञ्चले
चलेऽपि काकस्य पदार्पणग्रहः ।।२१।।
ततस्तदप्रस्तुतभाषितोत्थितैः
सदस्तदश्वेति हसैः सदःसदाम् ।
स्फुटाजनि म्लानिरतोऽस्य भूपतेः
सिते हि जायेत शितेः सुलक्ष्यता ।।२२।।
ततोऽनु देव्या जगदे महेन्द्रभूं-
पुरंदरं सा जगदेकवन्द्यया ।
तदार्जवावर्जिततर्जनीकया
जनी कयाचित्परचित्स्वरूपया ।।२३।।
स्वयंवरोद्वाहमहे वृणीष्व हे !
महेन्द्रशैलस्य महेन्द्रमागतम् ।
कलिङ्गजानां स्वकुचद्वयश्रिया
कलिं गजानां शृणु तत्र कुम्भयोः ।।२४।।

अयं किलायात इतीरिपौरवा-
भयादयादस्य रिपुर्वृथा वनम् ।
श्रुतास्तदुत्स्वापगिरस्तदक्षराः
पठद्भिरत्रासि शुकैर्वनेऽपि सः ।।२५।।
इतस्त्रसद्विद्रुतभूभृदुज्झिता
प्रियाथ दृष्टा वनमानवीजनैः ।
शशंस पृष्टाद्भुतमात्मदेशजं
शशित्विषः शीतलशीलतां किल ।।२६।।
इतोऽपि किं वीरयसे न कुर्वतो
नृपान्धनुर्बाणगुणैर्वशंवदान् ।
गुणेन शुद्धेन विधाय निर्भरं
तमेनमुर्वीवलयोर्वशी वशम् ।।२७।।
एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती
स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा ।
आक्रन्ददभूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्न्यश्वसीच्च ।२८।
अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायिनी
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा ।
अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्ध्वं निजः
पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पार्थिवैः ।।२९।।
विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्तते यदि भटः कीर्त्या जगत्युद्भटः ।
आगच्छन्नपि संमुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण ठणिति च्छिन्नापसर्पच्छिराः ।।३०।।
ततस्तदुर्वीन्द्रगुणाद्भुतादिव
स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी ।

विधीयतामाननमुद्रणेति सा
जगाद वैदग्ध्यमयेङ्गितेव ताम् ॥३१॥
अनन्तरं तामवदन्नृपान्तरं तदध्वदृक्कारतरङ्गरङ्गणा ।
तृणीभवत्पुष्पशरं सरस्वती स्वतीव्रतेजः परिभूतभूतलम् ॥३२॥
तदेव किं नु ! क्रियते न का क्षति-
र्यदेष तद्दूतमुखेन काङ्क्षति ।
प्रसीद काञ्चीमयमाच्छिनत्तु ते
प्रसह्य काञ्चीपुरभूपुरंदरः ॥३३॥
मयि स्थितिर्नम्रतयैव लभ्यते
दिगेव तु स्तब्धतया विलङ्घ्यते ।
इतीव चापं दधदाशुगं क्षिप-
न्नयं नयं सम्यगुपादिशद्द्विषाम् ॥३४॥
अदःसमित्संमुखवीरयौवतत्रुटद्भुजाकम्बुमृणालहारिणी ।
द्विषद्गणस्त्रैणदृगम्बुनिर्झरे यशोमरालावलिरस्य खेलति ।३५।
सिन्दूरद्युतिमुग्धमूर्धनि धृतस्कन्धावधिश्यामिके
व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति ।
जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसंध्याधिये-
वास्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः ॥३६॥
हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्रीभवत्कौस्तुभम् ।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति ॥३७॥
सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्तिपूर्तादभुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः ।
यद्बिन्दुश्रियमिन्दुरञ्चति जलं चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूजागर्ति यागेश्वरः ॥३८॥

अन्तःसंतोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गेनानस्तिरोमा रचयति पुलकश्रेणिमानन्दकन्दाम् ।
न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तत्र विज्ञः
शृण्वन्नेतस्य कीर्तीः कथमुरगपतिः प्रीतिमाविष्करोति ॥३९॥
आचूडाग्रममज्जयज्जयपटुर्यच्छल्यदण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् ।
सा सेवास्य पृथुः प्रसीदसि तथा नास्मै कुतस्त्वत्कुच-
स्पर्धागर्धिषु तेषु तान्धृतवते दण्डान्प्रचण्डानपि ॥४०॥

स्मितश्रिया सृक्वणि लीयमानया
वितीर्णया तद्गुणशर्मणेव सा ।
उपाहसत्कीर्त्यमहत्त्वमेव तं
गिरां हि पारे निषधेन्द्रवैभवम् ॥४१॥

निजाक्षिलक्ष्मीहसितैणशावका-
मसावभाणीदपरं परन्तपम् ।
पुरेव तद्दिग्वलनश्रिया भुवा
भ्रुवा विनिर्दिश्य सभासभाजितम् ॥४२॥

कृपा नृपाणामुपरि क्वचिन्न ते
नतेन हा हा शिरसा रसादृशाम् ।
भवन्तु तावत्तव लोचनाञ्चला
निपेयनेपालनृपालपाल्यः ॥४३॥

ऋजुत्वमौनश्रुतिपारगामिता
यदीयमेतत्परमेव हिंसितुम् ।
प्रतीव विश्वासविधायि चेष्टितं
बहुर्महानस्य स दाम्भिकः शरः ॥४४॥

रिपूनवाप्यापि गतोऽवकीर्णिता-
मयं न यावज्जनरञ्जनव्रती ।

भृशं विरक्तानपि रक्तवत्तरा-
न्निकृत्य यत्तानसृजासृजद्युधि ॥४५॥

पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।
यशोऽमुष्येवोपार्जयितुमसमर्थेन विधिना
कथंचित्क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥४६॥

यावत्पौलस्त्यवास्तुभवदुभयहरिल्लोमलेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्तिः ।
यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रा-
बद्रौ संध्यापताकारुचिरचितशिखाशोणशोभावुभौ च ॥४७॥

युद्ध्वा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्ध्वाऽन्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः ।
छिन्नं बावनतीभवन्निजभियः खिन्नं भरेणाथ वा
राज्ञानेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥४८॥

न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि ।
नृणां पश्यत्यस्य क्वचन विशिखान्किं तु पतित-
द्विषद्वक्षःश्वभ्रैरनुमितिरमून्गोचरयति ॥४९॥

दमस्वसुश्चित्तमवेत्य हासिका
जगाद देवीं कियदस्य वक्ष्यसि ।
भण प्रभूते जगति स्थिते गुणं-
रिहाप्यते संकटवासयातना ॥५०॥

ब्रवीति दासीह किमप्यसंगतं
ततोऽपि नीचेयमतिप्रगल्भते ।
अहो सभा साधुरितीरिणः क्रुधा
न्यषेधदेतत्क्षितिपानुगाञ्जनः ॥५१॥

अथान्यमुद्दिश्य नृपं कृपामयी
मुखेन तद्दिङ्मुखसंमुखेन सा ।
दमस्वसारं वदति स्म देवता
गिरामिलाभूवदतिस्मरश्रियम् ॥५२॥
विलोचनेन्दीवरवासवासितैः
सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः ।
त्रपामपाकृत्य'निभान्निभालय
क्षितिक्षितं मालयमालयं रुचः ॥५३॥
इमं परित्यज्य परं रणादरिः
स्वमेव भग्नः शरणं मुधाविशत् ।
न वेत्ति यत्त्रातुमितः कृतस्मयो
न दुर्गया शैलभुवापि शक्यते ॥५४॥
अनेन राज्ञाऽर्थिषु दुर्भगीकृतो
भवन्घनध्वानजरत्नमेतुरः ।
तथा विदूराद्रिरदूरतां गमी
यथा स गामी तव केलिशैलताम् ॥५५॥
नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताभृङ्गजात-
च्छायान्तःपातचन्द्रायितचरणनखश्रेणिरैणेयनेत्रे ! ।
दृप्तारिप्राणवातामृतरसलहरीभूरिपानेन पीनं
भूलोकस्यैष भर्ता भुजभुजगयुगं सांयुगीनं बिभर्ति ॥५६॥
अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयःफणसमुचितः काययष्टीनिकायः ।
दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्यदः कीर्तिपूरः ॥५७॥
राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं कृतं
लक्षैर्लक्षभिदो दशैव जयतः पद्मानि पद्मैरलम् ।

कर्तुं सर्वपरच्छिदः किमपि नो शक्यं परार्धेन वा
तत्संख्यापगमं विनाऽस्ति न गतिः काचिद्वतैतद्द्विषाम् ।५८।

वयस्ययाकूतविदा दमस्वसुः
स्मितं वितत्याभिदधेऽथ भारती ।
इतः परेषामपि पश्य याचतां
भवन्मुखेन स्वनिवेदनत्वराम् ॥५९॥

कृताश्च देवी वचनाधिकारिणी
त्वमुत्तरं दासि ! ददासि का सती ।
इतीरिणस्तन्नृपपारिपार्श्विका-
न्स्वभर्तुरेव भ्रुकुटिर्न्यवर्तयत् ॥६०॥

धराधिराजं निजगाद भारती
तदुन्मुखेष्वद्बलिताङ्गसूचितम् ।
दमस्वसारं प्रति सारवत्तरं
कुलेन शीलेन च राजसूचितम् ॥६१॥

कुतः कृतैवं वरलोकमागतं
प्रति प्रतिज्ञाऽनवलोकनाय ते ।
अपीयमेनं मिथिलापुरंदरं
निपीय दृष्टिः शिथिलाऽस्तु ते वरम् ॥६२॥

न पाहि पाहीति यदब्रवीरमुं
ममोष्ठ ! तेनैवमभूदिति क्रुधा ।
रणक्षितावस्य विरोधिमूर्धभि-
र्विदश्य दन्तैर्निजमोष्ठमास्यते ॥६३॥

भुजेऽपसर्पत्यपि दक्षिणे गुणं
सहेषुणादाय पुरःप्रसर्पिणे ।
धनुः परीरम्भमिवास्य संमदा-
न्महाहवे दित्सति वामबाहवे ॥६४॥

अस्योर्वीरमणस्य पार्वणविधुद्वैराज्यसज्जं यशः
सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् ।
तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्यायः किमु दुग्धसिन्धुपयसां सत्रानुवादः किमु ।।६५।।
निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटावट-
स्थानस्थायुकमौक्तिकोत्करकिरः करस्य नायं करः ।
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तरंगक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीजबीजव्रजम् ।।६६।।
अर्थिभ्रंशबहूभवत्फलभरव्याजेन कुब्जायितः
सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।
आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्यशोनिबिडितव्रीडस्तु रत्नाचलः ।।६७।।
सृजामि किं विघ्नमिदं नृपस्तुता-
वितीङ्गितैः पृच्छति तां सखीजने ।
स्मिताय वक्त्रं यदवक्रयद्वधू-
स्तदेव वैमुख्यमलक्षि तन्नृपे ।।६८।।
दृशाथ निर्दिश्य नरेश्वरान्तरं
मधुस्वरा वक्तुमधीश्वरा गिराम् ।
अनूपयामास विदर्भजाश्रुती
निजास्यचन्द्रस्य सुधाभिरुक्तिभिः ।।६९।।
स कामरूपाधिप एष हा त्वया
न कामरूपाधिक ईक्ष्यतेऽपि यः ।
त्वमस्य सा योग्यतमासि वल्लभा
सुदुर्लभा यत्प्रतिमल्लभा परा ।।७०।।
अकर्णधाराशुगसंभृताङ्कतां
गतैररित्रेण विनास्य वैरिभिः ।

विधाय यावत्तरणेर्भिदामहो
निमज्ज्य तीर्णः समरे भवार्णवः ।।७१।।

यदस्य भूलोकभुजो भुजोष्मभि-
स्तपत्युरेव क्रियतेऽरिवेश्मनि ।
प्रपां न तत्रारिवधूस्तपस्विनी
ददातु नेत्रोत्पलवासिभिर्जलैः ।।७२।।

एतद्दत्तासिघातस्रवदसृगसुहृद्वंशसार्द्रेन्धनैत-
द्दोरुद्दामप्रतापज्वलदनलमिलद्धूमधूमभ्रमाय ।
एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासी-
देतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ।।७३।।

क्षीरोदन्वदपाः प्रमथ्य मथितादेशेऽमरैर्निर्मिते
स्वाकम्यं सृजतस्तदस्य यशसः क्षीरोदसिंहासनम् ।
केषां नाजनि वा जनेन जगतामेतत्कवित्वामृत-
स्रोतः प्रोतपिपासुकर्णकलसीभाजाभिषेकोत्सवः ।।७४।।

समिति पतिनिपाताकर्णनद्रागदीर्ण-
प्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु ।
रचितलिपिरिवोरस्ताडनव्यस्तहस्त-
प्रखरनखरटङ्कैरस्य कीर्तिप्रशस्तिः ।।७५।।

विधाय ताम्बूलपुटीं कराङ्कगां
बभाण ताम्बूलकरङ्कवाहिनी ।
दमस्वसुर्भावमवेत्य भारतीं
नयानया वक्त्रपरिश्रमं शमम् ।।७६।।

समुन्मुखीकृत्य बभार भारती
रतीशकल्पेऽन्यनृपे निजं भुजम् ।
ततस्त्रसद्बालपृषद्विलोचनां
शशंस संसज्जनरञ्जनीं जनीम् ।।७७।।

अयं गुणौघैरनुरज्यदुत्कलो
भवन्मुखालोकरसोत्कलोचनः ।
स्पृशन्तु रूपामृतवापि ! नन्वमु
तवापि दृक्तारतरङ्गभङ्गयः ॥७८॥
अनेन सर्वार्थिकृतार्थताकृता
हृतार्थिनौ कामगवीसुरद्रुमौ ।
मिथःपयःसेचनपल्लवाशने
प्रदाय दानव्यसनं समाप्नुतः ॥७९॥
नृपः कराभ्यामुदतोलयन्निजे
नृपानयं यान्पततः पदद्वये ।
तदीयचूडाकुरुविन्दरश्मिभिः
स्फुटेयमेतत्करपादरञ्जना ॥८०॥
यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना ।
एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
धिक्तं वाडवमम्भसि द्विषि भिया येन प्रविष्टं पुनः ॥८१॥
अमुष्योर्वीभर्तुः प्रसृमरचमूसिन्धुरभवै-
रवैमि प्रारब्धे वमथुभिरवश्यायसमये ।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न त-
द्वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः ॥८२॥
आत्मन्यस्य समुच्छ्रितीकृतगुणस्याहोतरामौचिती
यद्गात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषाम् ।
भूयोऽहं क्रियते स्म येन च हृदा स्कन्धो न यश्चानम-
त्तन्मर्माणि दलं दलं समिदलंकर्मीणबाणव्रजः ॥८३॥
दूरं गौरगुणैरहङ्कृतिभृतां जैत्राङ्ककारे चर-
त्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि ।

धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते
पीयूषस्रवकैतवाद्द्रुतदरः शीतद्युतिः स्विद्यति ॥८४॥
एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशः स्पर्धिभिः ।
दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥८५॥

अथैतदुर्वीपतिवर्णनाद्भुतं
न्यमीलदास्वादयितुं हृदीव सा ।
मधुस्रजा नैषधनामजापिनी
स्फुटीभवद्ध्यानपुरः स्फुरन्नला ॥८६॥

प्रशंसितुं संसदुपान्तरञ्जिनं
श्रिया जयन्तं जगतीश्वरं जिनम् ।
गिरः प्रतस्तार पुरावदेव ता
दिनान्तसंध्यासमयस्य देवता ॥८७॥

तथाधिकुर्या रुचिरे ! चिरेप्सिता
यथोत्सुकः संप्रति संप्रतीच्छति ।
अपाङ्गरङ्गस्थललास्यलम्पटाः
कटाक्षधारास्तव कीकटाधिपः ॥८८॥

इदंयशांसि द्विषतः सुधारुचः
किमङ्कमेतद्द्विषतः किमाननम् ।
यशोभिरस्याखिललोकधाविभि-
र्विभीषिता धावति तामसीमसी ॥८९॥

इदंनृपप्रार्थिभिरुज्झितोऽर्थिभि-
र्मणिप्ररोहेण विवृध्य रोहणः ।
कियद्दिनैरम्बरमावरिष्यते
मुधा मुनिर्विन्ध्यमरुन्ध भूधरम् ॥९०॥

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभदशनस्पर्धीनि कैरक्षरैः ।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ॥९१॥
यद्भर्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं
देग्दाहैरिव भस्मभिर्मघवता वृष्टैर्धूलोद्धलना ।
शंभोर्मा बत सांधिवेलनटनं भाजि व्रतं द्रागिति
क्षोणी नृत्यति मूर्तिरष्टवपुषोऽसृग्वृष्टिसंध्याधिया ॥९२॥
प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समस्तस्त्विषां
कोषः शोषमगादगाधजगतोशिल्पेऽप्यनल्पायितः ।
निःशेषद्युतिमण्डलव्ययवशादोषल्लभैरेष वा
शेषः केशमयः किमन्धतमसस्तोमैस्ततो निर्मितः ॥९३॥
तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः ।
भूगोलच्छायमायामयगणितविदुन्नेयकायो भियाभू-
देतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः ॥९४॥
आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
संमातुं शक्नुवन्ति प्रथिमभरवशादत्र नैतद्यशांसि ।
तामेतां पूरयित्वा निरगुरिव मधुध्वसिनः पाण्डुपद्म-
च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन ।९५।
अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदरालरलोलवलनस्तेषां भिये भूभुजाम् ।
सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः
पर्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥९६॥
यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्ति यश्च किरति क्रूरध्वनिं निष्ठुरः ।

दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम् ।।९७।।
अस्यारिप्रकरः शरश्च नृपतेः संख्ये पतन्तावुभौ
सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः ।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ।।९८।।
धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयञ्जवजवैः स्तोतॄन्गुणैर्मूकयन् ।
धर्माराधनसंनियुक्तजगता राज्ञामुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति पदा स्प्रष्टुं तुरंगोऽपि गाम् ।।९९।।
एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि ।
अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धकरणरणधुरारेणुधारान्धकारात् ।।१००।।
उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः ।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदशां दत्तरागस्तडागः ।।१०१।।
वृद्धो वार्द्धिरसौ तरङ्गवलिभं बिभ्रद्वपुः पाण्डुरं
हंसालीपलितेन यष्टिकलितस्तावद्वयोर्बहिमा ।
बिभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्संगतं
स्थाने स्नानविधायिधार्मिकशिरोनत्यापि नित्यादृतः ।।१०२।।
तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले !
नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानाम् ।
तत्पाथो देवतानां विशतु तव तनुच्छायमेवाधिकारे
तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः ।।१०३।।

एतत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि ।
जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तेः पुनः
सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिम् ॥१०४॥

अथावदद्भीमसुतेङ्गितात्सखी
जनैरकीर्तिर्यदि वास्य नेष्यते ।
मयापि सा तत्खलु नेष्यते परं
सभाश्रवःपूरतमालवल्लिताम् ॥१०५॥

अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥१०६॥

तदक्षरैः सस्मितविस्मिताननां
निपीय तामीक्षणभङ्गिभिः सभाम् ।
इहास्य हास्यं किमभून्न वेति तं
विदर्भजा भूपमपि न्यभालयत् ॥१०७॥

नलान्यवीक्षां विदधे दमस्वसुः
कनीनिकाग्रः खलु नीलिमालयः ।
चकार सेवां शुचिरक्ततोचितां
मिलन्नपाङ्गः सविधे तु नैषधे ॥१०८॥

दृशा नलस्य श्रुतिचुम्बिनेषुणा
करेऽपि चक्रच्छलनम्रकार्मुकः ।
स्मरः पराङ्गैरनुकल्प्य धन्वितां
जनीमनङ्गः स्वयमादयत्ततः ॥१०९॥

उत्कण्टका विलसदुज्ज्वलपत्रराजि-
रामोदभागनपरागतराऽतिगौरी ।

रुद्रक्षुघस्तदरिकामधिया नले सा
वासार्थितामधृत काञ्चनकेतकीव ॥११०॥
तत्रालोकनले चलेतरमनाः साम्यान्मनागप्यभू-
दप्यग्रे चतुरः स्थिताश्च चतुरा पातुं दृशा नैषधान् ।
आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तत्तला-
लंकारीभवनाज्ज्नाय ददती पातालकन्याभ्रमम् ॥१११॥
सर्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय ।
प्रापत्तद्दृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गाम् ।
आनन्दान्ध्येन वन्ध्यानकृत तदपराकूतपातान्स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥११२॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११३॥

॥ इति महाकवि श्री हर्षविरचिते नैषधीयप्रकाशे
द्वादशः सर्गः समाप्तः ॥ १२ ॥

## ॥ १३ ॥ त्रयोदशः सर्गः ॥

कल्पद्रुमान्परिमला इव भृङ्गमाला-
मात्माश्रयामखिलनन्दनशाखिवृन्दात् ।
तां राजकादपगमय्य विमानधुर्या
निन्युर्नलाकृतिधरानथ पञ्च वीरान् ॥१॥
साक्षात्कृताखिलजगज्जनताचरित्रा
तत्राधिनाथमधिकृत्य दिवस्तथा सा ।

ऊचे यथा स च शचीपतिरभ्यधायि
प्राकाशि तस्य न च नैषधकायमाया ॥२॥
ब्रूमः किमस्य वरवर्णिनि ! वीरसेनोद्-
भूतिं द्विषद्बलविजित्वरपौरुषस्य ।
सेनाचरीभवदिभाननदानवारि-
वासेन यस्य जनितासुरभीरणश्रीः ॥३॥
शुभ्रांशुहारगणहारिपयोधराङ्क-
चुम्बीन्द्रचापखचितद्युमणिप्रभाभिः ।
अन्वास्यते समिति चामरवाहिनीभि-
र्यात्रासु चैष बहुलाभरणाचिताभिः ॥४॥
क्षोणीभृतामतुलकर्कशविग्रहाणा-
मुद्दामदर्पहरिकुञ्जरकोटिभाजाम् ।
पक्षच्छिदामयमुदग्रबलो विधाय
मग्नं विपज्जलनिधौ जगदुज्जहार ॥५॥
भूमीभृतः समिति जिष्णुमपथ्यपाय
जानीहि न त्वमघवन्तममुं कथंचित् ।
गुप्तं घटप्रतिभटस्तनि ! बाहुनेत्रं
नालोकसेऽतिशयमद्भुतमेतदीयम् ॥६॥
लेखा नितम्बिनि ! बलादिसमृद्धराज्य-
प्राज्योपभोगपिशुना दधते सरागम् ।
एतस्य पाणिचरणं तददेन पत्या
सार्धं शचीव हरिणा मुदमुद्वहस्व ॥७॥
आकर्ण्य तुल्यमखिलां सुदती लगन्ती-
माखण्डलेऽपि च नलेऽमि च वाचमेताम् ।
रूपं समानमुभयत्र विगाहमाना
श्रोत्रान्न निर्णयमवापदसौ न नेत्रात् ॥८॥

शक्रः किमेष निषधाधिपतिः स वेति
दोलायमानमनसं परिभाव्य भैमीम् ।
निर्दिश्य तत्र पवनस्य सखायमस्यां
भूयोऽसृजद्भगवती वचसः स्रजं सा ॥९॥
एष प्रतापनिधिरुद्गतिमान्सदाऽयं
किं नाम नाजितमनेन धनंजयेन ।
हेम प्रभूतमधिगच्छ शुचेरमुष्मा-
न्नास्येव कस्यचन भास्वररूपसंपत् ॥१०॥
अत्यर्थहेतिपटुताकवलीभवत्त-
त्तत्पार्थिवाधिकरणप्रभवाऽस्य भूतिः ।
अप्यङ्गरागजननाय महेश्वरस्य
संजायते रुचिरकर्णि ! तपस्विनोऽपि ॥११॥
एतन्मुखा विबुधसंसदसावशेषा
माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि ।
एन महस्विनमुपेहि सदारुणोच्चै-
र्येनामुना पितृमुखि ! ध्रियते करश्रीः ॥१२॥
नैवाल्पमेधसि पटो रुचिमत्त्वमस्य
मध्येसमिन्निवसतो रिपवस्तृणानि ।
उत्थानवानिह पराभवितुं तरस्वी
शक्यः पुनर्भवति केन विरोधिनायम् ॥१३॥
साधारणीं गिरमुषर्बुधनैषधाभ्या-
मेतां निपीय न विशेषमवाप्तवत्याः ।
ऊचे नलोऽयमिति तं प्रति चित्तमेकं
ब्रूते स्म चान्यदनलोऽयमितीदमीयम् ॥१४॥
एतादृशीमथ विलोक्य सरस्वती तां
संदेहचित्रभयचित्रितचित्तवृत्तिम् ।

देवस्य सूनुमरविन्दविकासिरश्मे-
रुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥१५॥
दण्डं बिभर्त्ययमहो जगतस्ततः स्या-
त्कम्पाकुलस्य सकलस्य न पक्षपातः ।
स्वर्वैद्ययोरपि मदव्ययदायिनीभि-
रेतस्य रुग्भिरमरः किमु कश्चिदस्ति ॥१६॥

मित्रप्रियोपजननं प्रति हेतुरस्य
संज्ञा श्रुतासुहृदय न जनस्य कस्य ।
छायेदृगस्य च न कुत्रचिदध्यगायि
तप्तं यमेन नियमेन तपोऽमुनैव ॥१७॥
किं च प्रभावनमिताखिलराजतेजा
देवः पिताम्बरमणी रमणीयमूर्तिः ।
उत्क्रान्तिदा कमनु न प्रतिभाति शक्तिः
कृष्णत्वमस्य च परेषु गदान्नियोक्तुः ॥१८॥
एकः प्रभावमयमेति परेतराजो
तज्जीवितेशधियमत्र निधत्स्व मुग्धे ! ।
भूतेषु यस्य खलु भूरियमस्य वश्य-
भावं समाश्रयति दस्रसहोदरस्य ॥१९॥
गुम्फो गिरां शमननैषधयोः समानः
शङ्कामनेकनलदर्शनजातशङ्के ।
चित्ते विदर्भवसुधाधिपतेः सुताया
यन्निर्ममे खलु तदेष पिपेष पिष्टम् ॥२०॥
तत्रापि तत्रभवती भृशसंशयालो-
रालोक्य सा विधिनिषेधनिवृत्तिमस्याः ।
पाथःपतिं प्रति धृताभिमुखाङ्गुलीक-
पाणिः क्रमोचितमुपाक्रमताभिधातुम् ॥२१॥

या सर्वतोमुखतया व्यवतिष्ठमाना
यादोरणैर्जयति नैकविदाश्वकाया ।
एतस्य भूरितरवारिनिधिश्चमूः सा
यस्याः प्रतीतिविषयः परतो न रोधः ॥२२॥
नासीरसीमनि घनध्वनिरस्य भूया-
न्कुम्भीरवान्समकरः सहदानवारिः ।
उत्पद्मकाननसखः सुखमातनोति
रत्नैरलंकरणभावमितैर्नदीनः ॥२३॥
सस्यन्दनैः प्रवहणैः प्रतिकूलपातं
का वाहिनी न तनुते पुनरस्य नाम ।
तस्या विलासवति ! कर्कशताश्रिता या
ब्रूमः कथं बहुतयासिकता वयं ताः ॥२४॥
शोणं पदप्रणयिनं गुणमस्य पश्य
किंचास्य सेवनपरैव सरस्वती सा ।
एनं भजस्व सुभगे ! भुवनाधिनाथं
के वा भजन्ति तमिमं कमलाशया न ॥२५॥
शङ्कालताततिमनेकनलावलम्बां
वाणी नवर्धयतु तावदभेदिकेयम् ।
भीमोद्भवां प्रति नले च जलेश्वरे च
तुल्यं तथापि यदवर्धयदत्र चित्रम् ॥२६॥
बालां विलोक्य विबुधैरपि मायिभिस्तै-
रच्छद्मितामियमलीकनलीकृतस्वैः ।
आह स्म तां भगवती निषधाधिनाथं
निर्दिश्य राजपरिषत्परिवेषभाजम् ॥२७॥
अत्याजिलब्धविजयप्रसरस्त्वया किं
विज्ञायते रुचिपदं न महीमहेन्द्रः ।

प्रत्यर्थिदानवशताहितचेष्टयासौ
जीमूतवाहनधियं न करोति कस्य ॥२८॥
येनामुना बहुविगाढसुरेश्वराघ्व-
राज्याभिषेकविकसन्महसा बभूवे ।
आवर्जनं तमनु ते ननु ! साधु नाम-
ग्राहं मया नलमुदीरितमेवमत्र ॥२९॥
यच्चण्डिमारणविधिव्यसनं च तत्त्वं
बुद्ध्वाशयाश्रितममुष्य च दक्षिणत्वम् ।
सैषा नले सहजरागभरादमुष्मि-
न्नात्मानमर्पयितुमर्हसि धर्मराजे ॥३०॥
किं ते तथा मतिरमुष्य यथाशयः स्या-
त्वत्पाणिपीडनविनिर्मितयेऽनपाशः ।
कान्मानवानवति नो भुवनं चरिष्णू-
न्नासावमुत्र नरता भवतीति युक्तम् ॥३१॥
श्लोकादिह प्रथमतो हरिणा द्वितीया-
द्धूमध्वजेन शमनेन समं तृतीयात् ।
तुर्याच्च तस्य वरुणेन समानभावं
सा जानती पुनरवादि तया विमुग्धा ॥३२॥
त्वं याऽर्थिनी किल नले न शुभाय तस्याः
क्व स्यान्निजार्पणममुत्र चतुष्टये ते ।
इन्द्रानलार्यमतनूजपयःपतीनां
प्राप्यैकरूप्यमिह संसदि दीप्यमाने ॥३३॥
देवः पतिर्विदुषि ! नैष धराजगत्या
निर्णीयते न किमु न व्रियते भवत्या ।
नायं नलः खलु तवातिमहानलाभो
यद्येनमुज्झसि वरः कतरः परस्ते ॥३४॥

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां
वाचं नले तरलिताथ समां प्रमाय ।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं
लावण्यभूः कमपि भीमसुताप तापम् ॥३५॥

साप्तुं प्रयच्छति न पक्षचतुष्टये तां
तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।
श्रद्धां दधे निषधराड्विमतौ मताना-
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥३६॥

कारिष्यते परिभवः कलिना नलस्य
तां द्वापरस्तु सुतनूमदुनोत्पुरस्तात् ।
भैमीनलोपयमनं पिशुनौ सहेते
न द्वापरः किल कलिश्च युगे जगत्याम् ॥३७॥

उत्कण्ठयन्पृथगिमां युगपच्छलेषु
प्रत्येकमेषु परिमोहयमाणबाणः ।
जानीमहे निजशिलीमुखशीलिसंख्या-
साफल्यमाप स तदा यदि पञ्चबाणः ॥३८॥

देवानियं निषधराजरुचस्त्यजन्ती
रूपादरज्यत नले न विदर्भसुभ्रूः ।
जन्मान्तराधिगतकर्मविपाकजन्मे-
वोन्मीलति क्वचन कस्यचनानुरागः ॥३९॥

क्व प्राप्यते स पतगः परिपृच्छ्यते यः
प्रत्येमि तस्य हि पुरेव नलं गिरेति ।
सस्मार सस्मरमतिः प्रति नैषधीयं
तत्रामरालयमरालमरालकेशी ॥४०॥

एकैकमैक्षत मुहुर्महतादरेण
भेदं विवेद न च पञ्चसु कश्चिदेषा ।

शङ्काशतं वितरता हरता पुनस्त-
दुन्मादिनेव मनसेयमिदं तदाह ॥४१॥

अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र
भ्रान्तौ दृगन्तचिपिटीकरणादिरादि: ।
स्वच्छोपसर्पणमपि प्रतिमाभिमाने
भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥४२॥

किं वा तनोति मयि नैषध एव काय-
व्यूहं विधाय परिहासमसौ विलासी ।
विज्ञानवैभवभृत: किमु तस्य विद्या
सा विद्यते न तुरगाशयवेदितेव ॥४३॥

एको नल: किमयमन्यतम: किमेल
कामोऽपर: किमु किमु द्वयमाश्विनेयौ ।
किं रूपधेयभरसीमतया समेषु
तेष्वेव नेह नलमोहमहं वहे वा ॥४४॥

पूर्वं मया विरहनि:सहयापि दृष्ट:
सोऽयं प्रियस्तत इतो निषधाधिराज: ।
भूय: किमागतवती मम सा दशेयं
पश्यामि यद्विलसितेन नलानलोकान् ॥४५॥

मुग्धा दधामि कथमित्थमथापशङ्कां
संक्रन्दनादिकपट: स्फुटमीदृशोऽयम् ।
देव्यानयैव रचिता हि तथा तथैषां
गाथा यथा दिगधिपानपि ता: स्पृशन्ति ॥४६॥

एतन्मदीयमतिवञ्चकपञ्चकस्थे
नाथे कथं नु मनुजस्य चकास्तु चिह्नम् ।
लक्ष्माणि तानि किममी न वहन्ति हन्त
बर्हिर्मुखा धुतरजस्तनुतामुखानि ॥४७॥

याचे नलं किममरानथवा तदर्थं
नित्यार्चनादपि ममाफलितैरलं तैः ।
कंदर्पशोषणशिलीमुखपातपीत-
कारुण्यनीरनिधिगह्वरघोरचित्तैः ॥४८॥

ईशा ! दिशां नलभुवं प्रतिपद्य लेखा
वर्णश्रियं गुणवतामपि वः कथं वा ।
मूर्खान्धकूपपतनादिव पुस्तकाना-
मस्तङ्गतं बत परोपकृतिव्रतत्वम् ॥४९॥

यस्येश्वरेण यदलेखि ललाटपट्टे
तत्स्यादयोग्यमपि योग्यमपास्य तस्य ।
का वासनास्तु बिभृयामिह यां हृदाहं
नार्कातपैर्जलजमेति हिमैस्तु दाहम् ॥५०॥

इत्थं यथेह मदभाग्यमनेन मन्ये
कल्पद्रुमाऽपि स मया खलु याच्यमानः ।
संकोचसंज्वरदलाङ्गुलिपल्लवाग्र-
पाणीभवन्भवति मां प्रति बद्धमुष्टिः ॥५१॥

देव्याः करे वरणमाल्यमथार्पये वा
यो वैरसेनिरिह तत्र निवेशयेति ।
सैषा मया मखभुजां द्विषती कृता स्या-
त्स्वस्मै तृणाय तु विहन्मि न बन्धुरत्नम् ।५२।

यः स्यादमीषु परमार्थनलः स माला-
मङ्गीकरोतु वरणाय ममेति चैनाम् ।
तं प्रापयामि यदि तत्तु विसृज्य लज्जां
कुर्वे कथं जगति शृण्वति हा विडम्बः ॥५३॥

इतरनलतुलाभागेष शेषः सुधाभिः
स्नपयति मम चेतो नैषधः कस्य हेतोः ।

प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये
विलसति चरमेऽनुप्रासभासां विलासः ॥५४॥
इति मनसि विकल्पानुद्यतः संत्यजन्ती
क्वचिदपि दमयन्ती निर्णयं नाससाद ।
मुखमथ परितापास्कन्दितानन्दमस्या
मिहिरविरचितावस्कन्दमिन्दुं निनिन्द ॥५५॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
स्वादूत्पादभृति त्रयोदशतयादेश्यस्तदीये महा-
काव्येऽयं व्यरमन्नलस्य चरिते सर्गो रसाम्भोनिधिः ॥५६॥

॥ इति महाकवि श्री हर्षप्रणीते नैषधीयप्रकाशे
त्रयोदशः सर्गः समाप्तः ॥१३॥

## ॥१४॥ चतुर्दशः सर्गः ।

अथाधिगन्तुं निषधेश्वरं सा
प्रसादनामाद्रियतामराणाम् ।
यतः सुराणां सुरभिर्नृणां तु
सा वेधसासृज्यत कामधेनुः ॥ १ ॥
प्रदक्षिणप्रक्रमणालवाल-
विलेपधूपाचरणाम्बुसेकैः ।
इष्टं च मृष्टं च फलं सुवाना
देवा हि कल्पद्रुमकाननं नः ॥ २ ॥
श्रद्धामयीभूय सुपर्वणस्ता-
ननाम नामग्रहणाग्रकं सा ।

सुरेषु हि श्रद्दधतां नमस्या
सर्वार्थसिद्धयङ्गमिथः समस्या ॥ ३ ॥

यत्तान्निजे सा हृदि भावनाया
बलेन साक्षादकृताखिलस्थान् ।
अभूदभीष्टप्रतिभूः स तस्या
वरं हि दृष्टा ददते परं ते ॥ ४ ॥

सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा ।
आमुद्यते यत्सुमनोभिरेवं फलस्य सिद्धयै सुमनोभिरेव ॥ ५ ॥

वंशद्यहृद्यैर्म्रदिमाभिरामैरामोदिभिस्तानथ जातिजातैः ।
आनर्च गीत्यन्वितषट्पदैः सा स्तवप्रसूनस्तबकैर्नवीनैः ॥ ६ ॥

हृत्पद्मसद्मन्यधिवास्य बुद्धया
दध्यावथैतानियमेकताना ।
सुपर्वणां हि स्फुटभावना या
सा पूर्वरूपं फलभावनायाः ॥ ७ ॥

भक्त्या तयैव प्रससाद तस्या-
स्तुष्टं स्वयं देवचतुष्टयं तत् ।
स्वेनानलस्य स्फुटतां यियासोः
फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ ८ ॥

प्रसादमासाद्य सुरैः कृतं सा
सस्मार सारस्वतसूक्तिसृष्टेः ।
देवा हि नान्यद्वितरन्ति किंतु
प्रसद्य ते साधुधियं ददन्ते ॥ ९ ॥

शेषं नलं प्रत्यमरेण गाथा
या या समर्था खलु येन येन ।
तां तां तदन्येन सहालगन्तीं
तदा विशेषं प्रतिसंदधे सा ॥१०॥

एकैकवृत्तेः प्रतिलोकपालं
पतिव्रतात्वं जगृहुर्दिशां याः ।
वेद स्म गाथा मिलितास्तदासा-
वाशा इवैकस्य नलस्य वश्याः ॥११॥

या पाशिनैवाशनिपाणिनेव
गाथा यमेनैव समाग्निनेव ।
तामेव मेने मिलितां नलस्य
सैषा विशेषाय तदा नलस्य ॥१२॥

निश्चित्य शेषं तमसौ नरेशं
प्रमोदमेदस्वितरान्तराभूत् ।
देव्या गिरां भावितभङ्गिराख्य-
च्चित्तेन चिन्तार्णवयादसेयम् ॥१३॥

सा भङ्गिरस्याः खलु वाचि कापि
यद्भारती मूर्तिमतीयमेव ।
श्लिष्टं निगद्यादित वासवादी-
न्विशिष्य मे नैषधमप्यवादीत् ॥१४॥

जग्रन्थ सेयं मदनुग्रहेण
वचःस्रजः स्पष्टयितुं चतस्रः ।
द्वे ते नलं लक्षयितुं क्षमेते
ममैव मोहोऽयमहो महीयान् ॥१५॥

श्लिष्यन्ति वाचो यदमूरमुष्याः
कवित्वशक्तेः खलु ते विलासाः ।
भूपाललीलाः किल लोकपालाः
समाविशन्ति व्यक्तिभेदिनोऽपि ॥१६॥

त्यागं महेन्द्रादिचतुष्टयस्य
किमभ्यनन्दत्क्रमसूचितस्य ।

किं प्रेरयामास नले च तन्मां
सा सूक्तिरस्या मम कः प्रमोहः ॥१७॥

परस्य दारान्खलु मन्यमानै-
रस्पृश्यमानाममरैर्धरित्रीम् ।
भक्त्येव भर्तुश्चरणौ दधानां
नलस्य तत्कालमपश्यदेषा ॥१८॥

सुरेषु नापश्यदवेक्षताक्ष्णो-
र्निमेषमुर्वीभृति संमुखी सा ।
इह त्वमागत्य नले मिलेति
संज्ञानदानादिव भाषमाणम् ॥१९॥

नाबुद्ध बाला विबुधेषु तेषु
क्षोदं क्षितेरैक्षत नैषधे तु ।
पत्ये सृजन्त्याः परिरम्भमुर्व्याः
संभूतसंभेदमसंशयं सा ॥२०॥

स्वेदः स्वदेहस्य वियोगतापं
निर्वापयिष्यन्निव संसिसृक्षोः ।
हीराङ्कुरश्चारुणि हेमनीव
नले तयालोकि न दैवतेषु ॥२१॥

सुरेषु मालाममलामपश्य-
न्नले तु बाला मलिनीभवन्तीम् ।
इमां किमासाद्य नलोऽद्य मूर्ध्नीं
श्रद्धास्यते मामिति चिन्तयेव ॥२२॥

श्रियं भजन्तां कियदस्य देवा-
श्छाया नलस्यास्ति तथापि नैषाम् ।
इतीरयन्तीव तया निरैक्षि
सा नैषधे न त्रिदशेषु तेषु ॥२३॥

चिह्नै रमीभिर्नलसंविदस्याः संवादमाप प्रथमोपजाता ।
सा लक्षणव्यक्तिभिरेव देवप्रसादमासादितमप्यबोधि ।।२४।।

नले निधातुं वरणस्रजं तां स्मरः स्म रामां त्वरयत्यथैनाम् ।
अपत्रपा तां निषिषेध तेन द्वयानुरोधं तुलितं दधौ सा ।।२५।।

स्रजा समालिङ्गयितुं प्रियं सा
रसाद्दधत्तैव बहुप्रयत्नम् ।
स्तम्भत्रपाभ्यामभवत्तदीये
स्पन्दस्तु मन्दोऽपि न पाणिपद्मे ।।२६।।

तस्या हृदि व्रीडमनोभवाभ्यां दोलाविलासं समवाप्यमाने ।
स्थितं वृतैणाङ्ककुलातपत्रे शृङ्गारमालिङ्गदधीश्वरश्रीः ।२७।

करः स्रजा सज्जतरस्तदीयः
प्रियोन्मुखः सन्विरराम भूयः ।
प्रियाननस्यर्धपथं ययौ च
प्रत्याययौ चातिचलः कटाक्षः ।।२८।।

तस्याः प्रियं चित्तमुपेतमेव
प्रभूबभूवाक्षि न तु प्रयातुम् ।
सत्यः कृतः स्पष्टमभूत्तदानीं
तयाक्षिण लज्जेति जनप्रवादः ।।२९।।

कथं कथंचिन्निषधेश्वरस्य
कृत्वास्यपद्मं दरवीक्षितश्रि ।
वाग्देवताया वदनेन्दुबिम्बं
अपावृतो साकूत सामिदष्टम् ।।३०।।

अजानतीवेदमवोचदेनामाकूतमस्यास्तदवेत्य देवी ।
भावस्त्रपोर्मिप्रतिसीरया ते न दीयते लक्षयितुं ममापि ।।३१।।

देव्याः श्रुतौ नेति नलार्धनाम्नि गृहीत एव त्रपया निपीता ।
अथाङ्गुलीरङ्गुलिभिर्मृशन्ती दूरं शिरः सा नमयांचकार ।३२।

करे विधृत्येश्वरया गिरां सा
पान्था पथीन्द्रस्य कृता विहस्य ।
वामेति नामैव बभाज सार्धं
पुरन्ध्रिसाधारणसंविभागम् ॥ ३३ ॥

विहस्य हस्तेऽथ विकृष्य देवी
नेतुं प्रयाताऽभि महेन्द्रमेताम् ।
भ्रमादियं दत्तमिवाहिदेहे
ततश्चमत्कृत्य करं चकर्ष ॥ ३४ ॥

भैमीं निरीक्ष्याभिमुखीं मघोनः
स्वाराज्यलक्ष्मीरभृताभ्यसूयाम् ।
दृष्ट्वा ततस्तत्परिहारिणीं तां
व्रीडं बिडौजःप्रवणाभ्यपादि ॥ ३५ ॥

त्वत्तः श्रुतं नेति नले मयातः परं वदस्वेत्युदिताथ देव्या ।
ह्रीमन्मथद्वैरथरङ्गभूमी भैमी दशां भावितनैषधाभूत् ॥३६॥

हसत्सु भैमीं दिविषत्सु पाणौ
पाणिं प्रणीयाप्सरसां रसात्सा ।
आलिङ्ग्य नीत्वाकृत पान्थदुर्गां
भूपालदिक्पालकुलाध्वमध्यम् ॥ ३७ ॥

आदेशितामप्यवलोक्य मन्दं
मन्दं नलस्यैव दिशा चलन्तीम् ।
भूयः सुरानर्वपथादथासौ
तानेव तां नेतुमना नुनोद ॥ ३८ ॥

मुखाब्जमावर्तनलोलनालं
कृत्वालिहुंहुंरवलक्ष्यलक्ष्यम् ।
भीमोद्भवां तां नुनुदेऽङ्कपालीं
देव्या नवोढेव दृढां विवोढुः ॥ ३९ ॥

देवी कथंचित्खलु तामदेव-
द्रीचीं भवन्तीं स्मितसिक्तसृक्का ।
आह स्म मां प्रत्यपि ते पुनः का
शङ्का शशाङ्कादधिकास्यबिम्बे ! ॥ ४० ॥

एषामकृत्वा चरणप्रणाममेषामनुज्ञामनवाप्य सम्यक् ।
सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम् ॥४१॥

इतीरिते विश्वसितां पुनस्ता-
मादाय पाणौ दिविषत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान्
भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४२ ॥

युष्मान्वृणीते न बहून्सतीयं शेषावमानाच्च भवत्सु नैकम् ।
तद्वः समेतान्नृपमेनमंशान्वरीतुमन्विष्यति लोकपालाः ! ॥४३॥

भैम्या स्रजः सञ्जनया पथि प्रवक्स्वयंवरं संजनयांबभूव ।
संभोगमालिङ्गनयास्य वेधाः शेषं तु कं हन्तुमियं यतध्वे ॥४४॥

वर्णाश्रमाचारपथात्प्रजाभिः स्वाभिः सहैवास्खलते नलाय ।
प्रसेदुषो वेदशवृत्तभङ्ग्या दित्सैव कीर्तेर्भुवमानयद्वः ॥४५॥

इति श्रुतेऽस्या वचसैव हास्या-
त्कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञे-
ष्वेतेषु तां साथ नलाय निन्ये ॥ ४६ ॥

मन्दाक्षनिःस्पन्दतनोर्मनोभू-
र्दुष्प्रेरमप्यानयति स्म तस्याः ।
मधूकमालामधुरं करं सा
कण्ठोपकण्ठं वसुधासुधांशोः ॥ ४७ ॥

अथाभिलिख्येव समर्प्यमाणां राजिं निजस्वीकरणाक्षराणाम् ।
दूर्वाङ्कुराढ्यां नलकण्ठनाले वधूर्मधूकस्रजमुत्ससर्ज ॥४८॥

तां दूर्वया श्यामलयातिवेलं शृङ्गारभासंनिभया सुशोभाम् ।
मालां प्रसूनायुधपाशभासं कण्ठेन भूभृद्बिभरांबभूव ॥४९॥

दूर्वाग्रजाग्रत्पुलकावलिं तां
नलाङ्गसङ्गाद्भृशमुल्लसन्तीम् ।
मानेन मन्ये नमितानना सा
सासूयमालोकत पुष्पमालाम् ॥ ५० ॥

कापि प्रमोदास्फुटनिर्जिहानवर्णेव या मङ्गलगीतिरासाम् ।
सैवाननेभ्यः पुरसुन्दरीणामुच्चैरुलूलुध्वनिरुच्चचार ॥५१॥

सा निर्मले तस्य मधूकमाला
हृदि स्थिता च प्रतिबिम्बिता च ।
कियत्यमग्ना कियती च मग्ना
पुष्पेषुबाणालिरिव व्यलोकि ॥ ५२ ॥

रोमाणि सर्वाण्यपि बालभावाद्वरश्रियं वीक्षितुमुत्सुकानि ।
तस्यास्तदा कण्टकिताङ्गयष्टेरुद्ग्रीविकादानमिवान्वभूवन् ५३

रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी
रम्याधरा सा सुतरां विरेजे ।
शरव्यदण्डैः श्रितमण्डनश्री
स्मारी शरोपासनवेदिकेव ॥ ५४ ॥

चेष्टा व्यनेशन्निखिलास्तदास्याः
स्मरेषुवातैरिव ता विधूताः ।
अभ्यर्थ्य नीताः कलिना मुहूर्तं
लाभाय तस्या बहु चेष्टितुं वा ॥५५॥

तन्न्यस्तमाल्यस्पृशि यन्नलस्य स्वेदं करे पञ्चशरश्चकार ।
भविष्यदुद्वाहमहोत्सवस्य हस्तोदकं तज्जनयांबभूव ॥५६॥

तूलेन तस्यास्तुलना मृदोस्तत्कम्प्राऽस्तु सा मन्मथबाणवातैः ।
चित्रीयितं तत्तु नलो यदुच्चैरभूत्स भूभृत्पृथुवेपथुस्तैः ॥५७॥

दृशोरपि न्यस्तमिवास्त राज्ञां
रागादृगम्बुप्रतिबिम्ब मालयम् ।
नृपस्य तत्पीतवतोरिवाक्ष्णोः
प्रालम्ब्यमालम्बनयुक्तमन्तः ॥ ५८ ॥
स्तम्भस्तथालम्भितमां नलेन
भैमीकरस्पर्शमुदः प्रसादः ।
कंदर्पलक्ष्योकरणार्पितस्य
स्तम्भस्य दम्भं स चिरं यथापत् ॥ ५९ ॥
उत्सृज्य साम्राज्यमिवाथ भिक्षां
तारुण्यमुल्लङ्घ्य जरामिवारात् ।
तं चारुमाकारमुपेक्ष्य यान्तं
निजां तनूमाददिरे दिगीशाः ॥ ६० ॥
मायानलत्वं त्यजतो निलीनैः
पूर्वैरहर्पूर्विकया मघोनः ।
भीमोद्भवासात्त्विकभावशोभा-
दिदृक्षयेवाविरभावि नेत्रैः ॥ ६१ ॥

गोत्रानुकूलत्वभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः ।
पुरश्चकार प्रवरं वरं यमायन्सखायं ददृशे तया सः ॥ ६२ ॥
स्वकामसंमोहमहान्धकारनिर्वापमिच्छन्निव दीपिकाभिः ।
उद्गत्वरीभिश्छुरितं वितेने निजं वपुर्वायुसखः शिखाभिः ॥६३॥
पत्यौ वृते भीमजया न वह्नावह्ना स्वमह्नाय निजुह्नुवे यः ।
जनादपत्रप्य स हा सहायस्तस्य प्रकाशोऽभवदप्रकाशः ॥६४॥
सदण्डमालक्तकनेत्रचण्डं तमःकिरं कायमधत्त कालः ।
तत्कालमन्तःकरणं नृपाणामध्यासितुं कोप इवोपनम्रः ॥६५॥
दृग्गोचरोऽभूदथ चित्रगुप्तः कायस्थ उच्चैर्गुण एतदीयः ।
ऊर्ध्वं तु पत्रस्य मषीद एको मषेर्ददच्चोपरि पत्रमन्यः ॥६६॥

तस्यां मनोबन्धविमोचनस्य कृतस्य तत्कालमिव प्रचेताः ।
पाशं दधानः करबद्धवासं विभुर्बभावाप्यमवाप्य देहम् ।।६७।।
सहद्वितीयः स्त्रियमभ्युपेयादेवं स दुर्बुध्य नयोपदेशम् ।
अन्यां सभार्यः कथमृच्छतीति जलाधिपोऽभूदसहाय एव ।६८।

देव्यापि दिव्याऽनु तनुः प्रकाशी-
कृता मुदश्चक्रभृतः सृजन्ती ।
अनिह्नुतैस्तामवधार्य चिह्नै-
स्तद्वाचि बाला शिथिलादभुताभूत् ।। ६९ ।।

विलोकके नायकमेलकेऽस्मिन्-
रुपान्यताकौतुकदर्शिभिस्तैः ।
बाधा बतेन्द्रादिभिरिन्द्रजाल-
विद्याविदो वृत्तिवधाद्व्यधायि ।।७०।।

विलोक्य तावाप्तदुरापकामौ परस्परप्रेमरसाभिरामौ ।
अथ प्रभुः प्रीतमना बभाषे जाम्बूनदोर्वीधरसार्वभौमः ।।७१।।

वैदर्भि ! दत्तस्तव तावदेष
वरो दुरापः पृथिवीश एव ।
दूत्यं तु यत्त्वं कृतवानमायं
नल ! प्रसादस्त्वयि तन्ममायम् ।।७२।।

प्रत्यक्षलक्ष्यामवलम्ब्य मूर्तिं हुतानि यज्ञेषु तवोपभोक्ष्ये ।
संशेरतेऽस्माभिरवीक्ष्य भुक्तं मखं हि मन्त्राधिकदेवभावे ।७३।

भवानपि त्वद्दयितापि शैषे
सायुज्यमासादयतं शिवाभ्याम् ।
प्रेत्यास्मि कीदृग्भवितेति चिन्ता
संतापमन्तस्तनुते हि जन्तोः ।।७४।।

तवोपवाराणसि नामचिह्नं
वासाय पारेसि पुरं पुरास्ति ।

निर्वातुमिच्छोरपि तत्र भैमी-
संभोगसंकोचभियाधिकाशि ॥ ७५ ॥

धूमावलिश्मश्रु ततः सुपर्वा मुखं मखास्वादविदां तमूचे ।
कामं मदीक्षामयकामधेनोः पयायतामभ्युदयस्त्वदीयः ॥७६॥
या दाहपाकौपयिकी तनुर्मे भूयात्त्वदिच्छावशवर्तिनी सा ।
तया पराभूततनोरनङ्गात्तस्याः प्रभुः सन्निधिकस्त्वमेधि ॥७७॥
अस्तु त्वया साधितमन्नमीनरसादि पीयूषरसातिशायि ।
यद्भूप ! विज्ञस्तव सूपकारक्रियासु कौतूहलशालि शीलम् ॥७८॥
वैवस्वतोऽपि स्वत एव देवस्तुष्टस्तमाचष्ट धराधिराजम् ।
वरप्रदानाय तवावदानैश्चिरं मदीया रसनोद्धुरेयम् ॥७९॥

सर्वाणि शस्त्राणि तवाङ्गचक्रे-
राविर्भवन्तु त्वयि शत्रुजैत्रे ।
अवाप्यमस्मादधिकं न किंचि-
ज्जागर्ति वीरव्रतदीक्षितानाम् ॥ ८० ॥

कृच्छ्रं गतस्यापि दशाविपाक
धर्मान्न चेतः स्खलतु त्वदीयम् ।
अमुञ्चतः पुण्यमनन्यभक्तेः
स्वहस्तवास्तव्य इव त्रिवर्गः ॥ ८१ ॥

स्मिताञ्चितां वाचमवोचदेनं प्रसन्नचेता नृपतिं प्रचेताः ।
प्रदाय भैमीमधुना वरौ तु ददामि तद्यौतककौतुकेन ॥८२॥

यत्राभिलाषस्तव तत्र देशे
नन्वस्तु धन्वन्यपि तूर्णमर्णः ।
आपो वहन्तीह हि लोकयात्रां
यथा न भूतानि तथाऽपराणि ॥ ८३ ॥

प्रसारितापः शुचिभानुनास्तु मरुः समुद्रस्त्वमपि प्रपद्य ।
भवन्मनस्कारलवोद्गमेन क्रमेलकानां निलयः पुरेव ॥८४॥

अम्लानिरामोदभरश्च दिव्यः पुष्पेषु भूयाद्भवदङ्गसङ्गात् ।
दृष्टं प्रसूनोपमया मयान्यन्न धर्मशर्मोभयकर्मठं यत् ॥८५॥

वाग्देवतापि स्मितपूर्वमुर्वी-
सुपर्वराजं रभसाद्बभाषे ।
त्वत्प्रेयसीसंमदमाचरन्त्या
मत्कि न किंचिद्ग्रहणोचितं ते ॥ ८६ ॥

अर्थो विनैवार्थनयोपसीद-
न्नाल्पोऽपि धीरैरवधीरणीयः ।
मान्येन मन्ये विधिना वितीर्णः
स प्रीतिदायो बहु मन्तुमर्हः ॥ ८७ ॥

अवामावामार्धे सकलमुभयाकारघटना-
द्द्विधाभूतं रूपं भगवदभिधेयं भवति यत् ।
तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते ! सिध्यतु सते ॥८८॥

सर्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते ।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये स्थितः सुकृतिना मन्मन्त्रचिन्तामणिः ॥८९॥

पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः ।
तत्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकानकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्याः ॥९०॥

गुणानामास्थानीं नृपतिलकनारीतिविदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः ।
भवित्री वैदर्भीमधिकमधिकण्ठं रचयितु
परीरम्भक्रीडाचरणशरणामन्वहमहम् ॥ ९१ ॥

भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितुः
मुखात्पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे ।
ततः पुण्यश्लोकः क्षितिभुवनलोकस्य भविता
भवानाख्यातः सन्कलिकलुषहारी हरिरिव ॥ ९२ ॥
देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम् ।
किंचित्त्वया न हि पतिव्रतया दुरापं
भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥ ९३ ॥
कूटकायमपहाय नो वपु-
र्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता ।
आप्तुमाकृतिमतो मनीषितां
विद्यया हृदि तवाप्युदीयताम् ॥ ९४ ॥
इत्थं वितीर्य वरमम्बरमाश्रयत्सु
तेषु क्षणादुदलसद्विपुलः प्रणादः ।
उत्तिष्ठतां परिजनालपनैर्नृपाणां
स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ ९५ ॥
न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्त्रे न समरसमारम्भसदृशम् ।
जगुः पुण्यश्लोकं प्रतिनृपतयः किंतु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम् ॥९६॥
भूभृद्भिर्लम्भिताऽसौ करुणरसनदीमूर्तिमद्देवतात्वं
तातेनाभ्यर्थ्य योग्याः सपदि निजसखीर्दापयामास तेभ्यः ।
वैदर्भ्यास्तेऽप्यलाभात्कृतगमनमनःप्राणवाञ्छां बिजध्नुः
सख्याः संशिक्ष्य विद्याः सततधृतवयस्यानुकाराभिराभिः ९७
अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नलेऽथ स्वं प्रतिष्ठासमाने ।

अपतदमरभर्तुर्मूर्तिबद्धेव कीर्ति-
गलदलिमधुबाष्पा पुष्पवृष्टिर्नभस्तः ॥९८॥
स्वस्थामरैर्नृपतिमंशममुं त्यजद्भि-
रंशच्छिदाकदनमेव तदाध्यगामि ।
उत्का स्म पश्यति निवृत्य निवृत्य यान्ती
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥९९॥

सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधेश्वरौ नृपजनानिष्टोक्तिनिर्मृष्टये ।
स्वानि स्वानि धराधिपाश्च शिबिराण्युद्दिश्य यान्तः क्रमा-
देको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलम् ॥१००॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१०१॥

॥ इति महाकविहर्षप्रणीते नैषधीयप्रकाशे
चतुर्दशः सर्गः समाप्तः ॥ १४ ॥

## ॥ १५ ॥ पञ्चदशः सर्गः ॥

अथोपकार्यां निषधावनीपति-
र्निजामयासीद्वरणस्रजाञ्चितः ।
वसूनि वर्षन्सुबहूनि बन्दिनां
विशिष्य भैमीगुणकीर्तनाकृताम् ॥ १ ॥
तथा पथि त्यागमयं वितीर्णवा-
न्यथातिभाराधिगमेन मागधैः ।

तृणीकृतं रत्ननिकायमुच्चकै-
श्चिकाय लोकश्चिरमुञ्छमुत्सुकः ॥ २ ॥
अपास्य न स्यात्सदसि स्त्रियान्वया-
त्कुतोऽतिरूपः सुखभाजनं जनः ।
अमूदृशी तत्कविबन्दिवर्णने-
रवाक्कृता राजकरञ्जिलोकवाक् ॥ ३ ॥
अदोषतामेव सतां विवृण्वते
द्विषां मृषादोषकणाधिरोषणाः ।
न जातु सत्ये सति दूषणे भवे-
दलीकमाधातुमवद्यमुद्यमः ॥ ४ ॥
विदर्भराजोऽपि समं तनूजया
प्रविश्य हृष्यन्नवरोधमात्मनः ।
शशंस देवीमनुजातसंशयां
प्रतीच्छ जामातरमुत्सुके ! नलम् ॥ ५ ॥
तनुत्विषा यस्य तृणं स मन्मथः
कुलश्रिया यः पवितास्मदन्वयम् ।
जगत्त्रयीनायकमेलके वरं
सुता परं वेद विवेक्तुमीदृशम् ॥ ६ ॥
सृजन्तु पाणिग्रहमङ्गलोचिता
मृगीदृशः ! स्त्रीसमयस्पृशः क्रियाः ।
श्रुतिस्मृतीनां तु वयं विदध्महे
विधीनिति स्माह च निर्ययौ च सः ॥ ७ ॥
निरीय भूपेन निरीक्षिताननाः
शशंस मौहूर्तिकसंसदंशकम् ।
गुणैररीणैरुदयास्तनिस्तुषं
तदा स दातुं तनयां प्रचक्रमे ॥ ८ ॥

अथावदद्दूतमुख: स नैषधं
कुलं च बाला च ममानुकम्प्यताम् ।
स पल्लवत्वद्य मनोरथाङ्कुर-
श्चिरेण नस्त्वच्चरणोदकैरिति ॥ ९ ॥
तथोत्थितं भीमवच:प्रतिध्वनिं
निपीय दूतस्य स वक्त्रगह्वरात् ।
व्रजामि वन्दे चरणौ गुरोरिति
ब्रुवन्प्रदाय प्रजिघाय तं बहु ॥ १० ॥
निपीतदूतालपितस्ततो नलं विदर्भभर्तागमयांबभूव स: ।
निशावसाने श्रुतताम्रचूडवाग्यथा रथाङ्गस्तपनं धृतादर: ॥११॥
क्वचित्तदालेपनदानपण्डिता कमप्यहंकारमगात्पुरस्कृता ।
अलम्भि तुङ्गासनसंनिवेशनादपूर्वनिर्माणविदग्धयादर: ॥१२॥
मुखानि मुक्तामणितोरणोद्गतै-
र्मरीचिभि: पान्थविलासमाश्रितै: ।
पुरस्य तस्याखिलवेश्मनामपि
प्रमोदहासच्छुरितानि रेजिरे ॥१३॥
पथामनीयन्त तथाधिवासना-
न्मधुव्रतानामपि दत्तविभ्रमा: ।
वितानतामातपनिर्भयास्तदा
पटच्छिदाकालिकपुष्पजा: स्रज: ॥१४॥
विभूषणै: कञ्चुकिता बभु: प्रजा,
विचित्रचित्रै: स्नपितत्विषो गृहा: ।
बभूव तस्मिन्मणिकुट्टिमै: पुरे
वपु: स्वमुर्व्या परिवर्तितोपमम् ॥ १५ ॥
तदा निसस्वानतमां घनं घनं
ननाद तस्मिन्नितरां ततं ततम् ।

अवापुरुच्चैः सुषिराणि राणिता-
ममानमानद्धमियत्तयाध्वनीत् ॥ १६ ॥
विपञ्चिराच्छादि न वेणुभिर्न ते
प्रणीतगीतैर्न च तेऽपि झर्झरैः ।
न ते हुडुक्केन न सोऽपि ढक्कया
न मर्दलैः सापि न तेऽपि ढक्कया ॥ १७ ॥
विचित्रवादित्रनिनादमूर्च्छितः सुदूरचारी जनतामुखारवः ।
ममौ न कर्णेषु दिगन्तदन्तिनां पयोधिपूरप्रतिनादमेदुरः ॥१८॥
उदस्य कुम्भीरथ शातकुम्भजा-
श्चतुष्कचारुत्विषि वेदिकोदरे ।
यथाकुलाचारमथावनीन्द्रजां
पुरन्ध्रिवर्गः स्नपयांबभूव ताम् ॥ १९ ॥
विजित्य दास्यादिव वारिहारिता-
मवापितास्तत्कुचयोर्द्वयेन ताः ।
शिखामवाक्षुः सहकारशाखिन-
स्त्रपाभरम्लानिमिवानतैर्मुखैः ॥ २० ॥
असौ मुहुर्जातजलाभिषेचना
क्रमाद्दुकूलेन सितांशुनोज्ज्वला ।
द्वयस्य वर्षाशरदां तदातनीं
सनाभितां साधु बबन्ध संध्यया ॥ २१ ॥
पुरा प्रभिन्नाम्बुददुर्दिनीकृतां
निनिन्द चन्द्रद्युतिसुन्दरीं दिवम् ।
शिरोरुहौघेण घनेन वर्षता
क्वचिद्दुकूलेन सितांशुनोज्ज्वला ॥ २२ ॥
विरेजिरे तच्चिकुरोत्कराः किराः
क्षणं गलन्निर्मलवारिविप्रुषाम् ।

तमःसुहृच्चामरनिर्जयार्जिताः
सिता वमन्तः खलु कीर्तिमुक्तिकाः ॥ २३ ॥
अदीयसा स्नानजलस्य वाससा
प्रमार्जनेनाधिकमुज्ज्वलीकृताः ।
अदभ्रमभ्राजत साश्मशाणना-
त्प्रकाशरोचिःप्रतिमेव हेमजा ॥ २४ ॥
तदा तदङ्गस्य बिभर्ति विभ्रमं
विलेपनामोदमुचः स्फुरद्रुचः ।
दरस्फुरत्काञ्चनकेतकीदला-
त्सुवर्णमभ्यस्यति सौरभं यदि ॥ २५ ॥
अवापितायाः शुचिवेदिकान्तरं
कलासु तस्याः सकलासु पण्डिताः ।
क्षणेन सख्यश्चिरशिक्षणैः स्फुटं
प्रतिप्रतीकं प्रतिकर्म निर्ममुः ॥ २६ ॥
विनापि भूषामवधिः श्रियामियं
व्यभूषि विज्ञाभिरदर्शि चाधिका ।
न भूषयैषाधिचकास्ति किं तु
सानयेति कस्यास्तु विचारचातुरी ॥ २७ ॥
विधाय बन्धूकपयोजपूजने
कृतां विधोर्गन्धफलीबलिश्रियम् ।
निनिन्द लब्धाधरलोचनार्चनं
मनःशिलाचित्रकमेत्य तन्मुखम् ॥ २८ ॥
महीमघोनां मदनान्धतातमीतमःपटारम्भणतन्तुसंततिः ।
अबन्धि तन्मूर्धजपाशमञ्जरी कयापि धूपग्रहधूमकोमला ।२९।
पुनःपुनः काचन कुर्वती कच-
च्छटाधिया धूपजधूमसंयमम् ।

सखी स्मितैस्तर्कितत‌न्निजभ्रमा
बबन्ध तन्मूर्धजचामरं चिरात् ॥ ३० ॥

बलस्य कृष्टेव हलेन भाति या
कलिन्दकन्या घनभङ्गभङ्गुरा ।
तदार्पितैस्तां करुणस्य कुड्मलै-
र्जहास तस्याः कुटिला कचच्छटा ॥ ३१ ॥

धृतैतया हाटकपट्टिकालिके
बभूव केशाम्बुदविद्युदेव सा ।
मुखेन्दुसंबन्धवशात्सुधाजुषः
स्थिरत्वमूहे नियतं तदायुषः ॥ ३२ ॥

ललाटिकासीमनि चूर्णकुन्तला
बभुः स्फुटं भीमनरेन्द्रजन्मनः ।
मनःशिलाचित्रकदीपसंभवा
भ्रमीभृतः कज्जलधूमवल्लयः ॥ ३३ ॥

अपाङ्गमालिङ्ग्य तदीयमुच्चकै-
रदीपि रेखा जनिताञ्जनेन या ।
अपाति सूत्रं तदिव द्वितीयया
वयःश्रिया वर्धयितुं विलोचने ॥ ३४ ॥

अनङ्गलीलाभिरपाङ्गधाविनः
कनीनिकानीलमणेः पुनः पुनः ।
तमिस्रवंशप्रभवेन रश्मिना
स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥३५॥

असेविषातां सुषमां विदर्भजा-
दृशाववाप्याञ्जनरेखयाऽन्वयम् ।
भुजद्वयज्याकिणपद्धतिस्पृशोः
स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥

तदक्षितत्कालतुलागसा नखं
निखाय कृष्णस्य मृगस्य चक्षुषी ।
वेधिर्यदुद्धर्तुमियेष तत्तयो-
रदूरवर्तिक्षतता स्म शंसति ॥ ३७ ॥
विलोचनाभ्यामतिमात्रपीडिते
वतंसनीलाम्बुरुहद्वयीं खलु ।
तयोः प्रतिद्वन्द्विधियाधिरोपयां-
बभूवतुर्भीमसुताश्रुती ततः ॥ ३८ ॥
धृतं वतंसोत्पलयुग्ममेतया
व्यराजदस्यां पतिते दृशाविव ।
मनोभुवान्ध्यं गमितस्य पश्यतः
स्थिते लगित्वा रसिकस्य कस्यचित् ॥ ३९ ॥

विदर्भपुत्रीश्रवणावतंसिकामणोमहःकिंशुककार्मुकोदरे ।
उदीतनेत्रोत्पलबाणसंभृतिर्नलं परं लक्ष्यमवैक्षत स्मरः ॥४०॥

अनाचरत्तथ्यमृषाविचारणां
तदाननं कर्णलतायुगेन किम् ।
बबन्ध जित्वा मणिकुण्डले विधू
द्विचन्द्रबुद्ध्या कथितावसूयकौ ॥ ४१ ॥
अवादि भैमी परिधाप्य कुण्डले
वयस्ययाभ्यामभितः समन्वयः ।
त्वदाननेन्दोः प्रियकामजन्मनि
श्रयत्ययं दौरुधरीं धुरं ध्रुवम् ॥ ४२ ॥
निवेशितं यावकरागदीप्तये
लगत्तदीयाधरसीम्नि सिक्थकम् ।
रराज तत्रैव निवस्तुमुत्सुकं
मधूनि निर्धूय सुधासधर्मणि ॥ ४३ ॥

स्वरेण वीणेत्यविशेषणं पुरा
स्फुरत्तदीया खलु कण्ठकन्दली ।
अवाप्य तन्त्रीरथ सप्त मुक्तिका-
सरानराजत्परिवादिनी स्फुटम् ॥ ४४ ॥
उपास्यमानाविव शिक्षितुं ततो
मृदुत्वमप्रौढमृणालनालया ।
रराजतुर्माङ्गलिकेन संगतौ
भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥
पदद्वयेऽस्या नवयावरञ्जना
जनैस्तदानीमुदनीयतापिता ।
चिराय पद्मौ परिरभ्य जाग्रती
निशीव विश्लिष्य नवा रविद्युतिः ॥ ४६ ॥

कृतापराधः सुतनोरनन्तरं विचिन्त्य कान्तेन समं समागमम् ।
स्फुटं सिषेवे कुसुमेषुपावकः स रागचिह्नश्चरणौ न यावकः ४७

स्वयं तदङ्गेषु गतेषु चारुतां
परस्परेणैव विभूषितेषु च ।
किमूचिरेऽलंकरणानि तानि तद्-
वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥
क्रमाधिकामुत्तरमुत्तरं श्रियं
पुपोष यां भूषणचुम्बनैरियम् ।
पुरः पुरस्तस्थुषि रामणीयके
तथा बबाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥
मणीसनाभौ मुकुरस्य मण्डले
बभौ निजास्यप्रतिबिम्बदर्शिनी ।
विधोरदूरं स्वमुखं विधाय सा
निरूपयन्तीव विशेषमेतयोः ॥ ५० ॥

जितस्तदास्येन कलानिधिर्दधे
द्विचन्द्रधीसाक्षिकमायकायताम् ।
तथापि जिग्ये युगपत्सखीयुग-
प्रदर्शितादर्शबहूभविष्णुना ॥ ५१ ॥

किमालियुग्मार्पितदर्पणद्वये
तदास्यमेकं बहु चान्यदम्बुजम् ।
हिमेषु निर्वाप्य निशासमाधिभि-
स्तदीयसालोक्यमितं व्यलोक्यत ॥ ५२ ॥

पलाशदामेति मिलच्छिलीमुखै-
र्वृता विभूषामणिरश्मिकार्मुकैः ।
अलक्षि लक्ष्यैर्धनुषामसौ तदा
रतीशसर्वस्वतयाऽभिरक्षिता ॥ ५३ ॥

विशेषतीर्थैरिव जह्नुनन्दिनी
गुणैरिवाजानिकरागभूमिता ।
जगाम भाग्यैरिव नीतिरुज्ज्वलै-
र्विभूषणैस्तत्सुषमा महार्घताम् ॥ ५४ ॥

नलात्स्ववैश्वस्त्यमनाप्तुमानता
नृपस्त्रियो भीममहोत्सवागताः ।
तदङ्घ्रिलाक्षामदधन्त मङ्गलं
शिरःसु सिन्दूरमिव प्रियायुषे ॥ ५५ ॥

अमोघभावेन सनाभितां गताः
प्रसन्नगीर्वाणवराक्षरस्रजाम् ।
ततः प्रणम्राधिजगाम सा ह्रिया
गुरुर्गुरुब्रह्मपतिव्रताशिषः ॥ ५६ ॥

तथैव तत्कालमथानुजीविभिः
प्रसाधनासञ्जनशिल्पपारगैः ।

निजस्य पाणिग्रहणक्षणोचिता
कृता नलस्यापि विभोर्विभूषणा ॥ ५७ ॥
नृपस्य तत्राधिकृताः पुनः पुन-
र्विचार्य तान्बन्धमबाधिपन्कचान् ।
कलापलीलोपनिधिर्गरुत्त्यजः
स यैरपालापि कलापिसंसदः ॥ ५८ ॥
पतत्रिणां द्राधिमशालिना धनु-
र्गुणेन संयोगजुषां मनोभुवः ।
कचेन तस्यार्जितमार्जनश्रिया
समेत्य सौभाग्यमलम्भि कुड्मलैः ॥ ५९ ॥
अनर्घ्यरत्नौघमयेन मण्डितो
रराज राजा मुकुटेन मूर्धनि ।
वनीपकानां स हि कल्पभूरुह-
स्ततो विमुञ्चन्निव मञ्जुमञ्जरीम् ॥ ६० ॥
नलस्य भाले मणिवीरपट्टिका-
निभेन लग्नः परिधिर्विधोर्बभौ ।
तदा शशाङ्काधिकरूपतां गते
तदानने मातुमशक्नुवन्निव ॥ ६१ ॥
बभूव भैम्याः खलु मानसौकसं जिघांसतो धैर्यभरं मनोभुवः ।
उपभ्रु तद्वर्तुलचित्ररूपिणी धनुःसमीपे गुलिकेव संभृता ॥६२॥
अचुम्बि या चन्दनबिन्दुमण्डली
नलीयवक्त्रेण सरोजतर्जिना ।
श्रियं श्रिता काचन तारकासखी
कृता शशाङ्कस्य तयाङ्कवर्तिनी ॥ ६३ ॥
न यावदग्निभ्रममेत्युदूढतां
नलस्य भैमीति हरेर्दुराशया ।

स बिन्दुरिन्दुः प्रहितः किमस्य सा
न वेति भाले पठितुं लिपीमिव ।। ६४ ।।
कपोलपालीजनिजानुबिम्बयोः
समागमात्कुण्डलमण्डलद्वयी ।
नलस्य तत्कालमवाप चित्तभू-
रथस्फुरच्चक्रचतुष्कचारुताम् ।। ६५ ।।
श्रितास्य कण्ठं गुरुविप्रवन्दना-
द्विनम्रमौलेश्चिबुकाग्रचुम्बिनी ।
अवाप मुक्तावलिरास्यचन्द्रमः-
स्रवत्सुधातुन्दिलबिन्दुवृन्दताम् ।। ६६ ।।
यतोऽजनि श्रीर्बलवान्बलं द्विष-
न्बभूव यस्याजिषु वारणेन सः ।
अपूपुरत्साञ्कमलार्थिनो घना-
न्समुद्रभावं स बभार तद्भुजः ।। ६७ ।।
कृतार्थयन्नर्थिजनाननारतं बभूव तस्यामरभूरुहः करः ।
तदीयमूले निहितं द्वितीयवद्ध्रुवं दधे कङ्कणमालवालताम् ६८
रराज दोर्मण्डनमण्डलीजुषोः
स वज्रमाणिक्यसितारुणत्विषोः ।
मिषेण वर्षन्दशदिङ्मुखोन्मुखौ
यशःप्रतापाववनीजयार्जितौ ।। ६९ ।।
घने समस्तापघनावलम्बिनां
विभूषणानां मणिमण्डले नलः ।
स्वरूपरेखामवलोक्य निष्कली-
चकार सेवाचणदर्पणार्पणाम् ।। ७० ।।
व्यलोकि लोकेन न केवलं चलन्मुदा तदीयाभरणार्पणाद्युतिः ।
अदर्शि विस्फारितरत्नलोचनैः परस्परेणेव विभूषणैरपि ।७१।

ततोऽनु वार्ष्णेयनियन्तृकं रथं
युधि क्षितारिक्षितिभृज्जयद्रथः ।
नृपः पृथासूनुरिवाधिरूढवा-
न्स जन्ययात्रामुदितः किरीटवान् ॥ ७२ ॥
विदर्भनाम्नस्त्रिदिवस्य वीक्षितुं
रसोदयादप्सरसस्तमुज्ज्वलम् ।
गृहाद्गृहादेत्य धृतप्रसाधना
व्यराजयन्राजपथानथाधिकम् ॥ ७३ ॥
अजानती कापि विलोकनोत्सुका
समीरधूतार्धमपि स्तनांशुकम् ।
कुचेन तस्मै चलतेऽकरोत्पुरः
पुराङ्गना मङ्गलकुम्भसंभृतिम् ॥ ७४ ॥
सखीं नलं दर्शयमानयाङ्गुलौ
जवादुदस्तस्य करस्य कङ्कणे ।
विषज्य हारैस्त्रुटितैरतर्कितैः
कृतं कयापि क्षणलाजमोक्षणम् ॥ ७५ ॥
लसन्नखादर्शमुखाम्बुजस्मित-
प्रसूनवाणीमधुपाणिपल्लवम् ।
यियासतस्तस्य नृपस्य जज्ञिरे
प्रशस्तवस्तूनि तदेव यौवतम् ॥ ७६ ॥
करस्थताम्बूलजिघत्सुरेकिका
विलोकनैकाग्रविलोचनोत्पला ।
मुखे निचिक्षेप मुखद्विराजता-
रुषेव लीलाकमलं विलासिनी ॥ ७७ ॥
कयापि वीक्षाविमनस्कलोचने समाज एवोपपतेः समीयुषः ।
घनं सविघ्नं परिरम्भसाहसैस्तदा तदालोकनमन्वभूयत ॥७८॥

दिदृक्षुरन्या विनिमेषवीक्षणां
नृणामयोग्यां दधती तनुश्रियम् ।
पदाग्रमात्रेण यदस्पृशन्महीं
न तावता केवलमप्सरोऽभवत् ॥ ७९ ॥
विभूषणस्रंसनशंसनार्पितैः
करप्रहारैरपि धूननैरपि ।
भ्रमान्तमन्तः प्रसभं पुराऽपरा
सखीषु संमापयतीव संमदम् ॥ ८० ॥
वतंसनीलाम्बुरुहेण किं दृशा
विलोकमाने विमनीबभूवतुः ।
अपि श्रुती दर्शनसक्तचेतसां
न तेन ते शुश्रुवतुर्मृगीदृशाम् ॥ ८१ ॥
काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनाम् ।
साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं
ज्योतिष्टोमादियज्ञश्रुतिफलजगतीसार्वभौमभ्रमेण ॥ ८२ ॥
भवन्सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमुर्वश्याः प्राणानपि विजयमानस्तनुरुचा ।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्मीणश्रीरुदभवदलंकर्तुमधुना ॥ ८३ ॥
अर्थी सर्वसुपर्वणां पतिरसावेतस्य यूनः कृते
पर्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया ।
अस्मिन्नाम तया वृते सुमनसः सन्तोऽपि यन्निर्जरा
जाता दुर्मनसो न सोढुमुचिता तेषां तु साऽनौचिती ॥ ८४ ॥
अस्योत्कण्ठितकण्ठलोठिवरणस्रक्साक्षिभिर्दिग्भटैः
स्वं वक्षः स्वयमस्फुटन्न किमदः शस्त्रादपि स्फोटितम् ।

व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं
भैम्यां व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥८५॥
मा जानीत विदर्भजामविदुषीं कीर्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम् ।
कः शच्या रचयांचकार चरिते काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कः ॥ ८६ ॥
वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीत्रासः प्रसूनायुधः ।
गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम् ॥८७॥
स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभू-
दभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसंपत्तये ।
आसंसारपुरन्ध्रिपूरुषमिथःप्रेमार्पणक्रीडया-
प्येतज्जम्पतिगाढरागरचनात्प्राकर्षि चेतोभुवः ॥ ८८ ॥
ताभिर्दृश्यत एष यान्पथि महाज्यैष्ठीमहे मन्महे
यद्दृग्भिः पुरुषोत्तमः परिचितः प्राग्मञ्चमञ्चन्कृतः ।
सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य दृक्चामरैः
सस्ने माघमघातिघातियमुनागङ्गौघयोगे यया ॥ ८९ ॥
वैदर्भीविपुलानुरागकलनात्सौभाग्यमत्राखिल-
क्षोणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः ।
किंचास्माकनरेन्द्रभूसुभगतासंभूतये लग्नक
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीर्वचः ॥ ९० ॥
आसुत्राममपासनान्मखभुजां भैम्यैव राजन्नजे
तादर्थ्यागमनानुरोधपरया युक्ताजि लज्जामृजा ।
आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
ह्रीरोषापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

इत्यालेपुरनुप्रतीकनिलयालंकारसारश्रिया-
हकुर्वत्तनुरामणीयकममूरालोक्य पौरप्रियाः ।
सानन्दाः कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दन
तस्याध्यास्य यतः शतक्रतुहरित्क्रीडाद्रिमिन्दोरिव ।। ९२ ।।
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातः पञ्चदशः कृशेतररसस्वादाविहाय महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ।।९३।।

।। इति महाकविहर्षविरचिते नैषधीयप्रकाशे
पञ्चदशः सर्गः समाप्तः ।। १५ ।।

## ।। १६ ।। षोडशः सर्गः ।।

वृतः प्रतस्थे स रथैरथो रथी गृहान्विदर्भाधिपतेर्धराधिपः ।
पुरोधसं गौतममात्मवित्तमं द्विधा पुरस्कृत्य गृहीतमङ्गलः ।।१।।

विभूषणांशुप्रतिबिम्बितैः स्फुटं
भृशावदातैः स्वविवासिभिर्गुणैः ।
मृगेक्षणानां समुपासि चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ।। २ ।।
परार्ध्यवेषाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।
दधे सुनासीरपदाभिधेयतां
स रूढिमात्राद्यदि वृत्रशात्रवः ।। ३ ।।
नलस्य नासीरसृजां महीभुजां
किरीटरत्नैः पुनरुक्तदीपया ।

अदीपि रात्रौ वरयात्रया तया
चमूरजोमिश्रतमिस्रसंपदा ॥ ४ ॥
विदर्भराजः क्षितिपाननुक्षण
शुभक्षणासन्नतरत्वसत्वरः ।
दिदेश दूतान्पथि यान्यथोत्तरं
चमूममुष्योपचिकाय तच्चयः ॥ ५ ॥
हरिद्विपद्वीपिभिरांशुकैर्नभो
नभस्वदाध्मापनपीनितैरभूत् ।
तरस्वदश्वध्वजिनीध्वजैर्वनं
विचित्रचीनाम्बरवल्लिवेल्लितम् ॥ ६ ॥
भ्रुवाह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।
ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥
श्लथैर्दलैः स्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा ।
प्रियासखीवास्य मनःस्थितिस्फुर-
त्सुखागतप्रश्नितत्तूर्यनिःस्वना ॥ ८ ॥
विनेतृभर्तृद्वयभीतिदान्तयोः
परस्परस्मादनवाप्तवैशसः ।
अजायत द्वारि नरेन्द्रसेनयोः
समागमः स्फारमुखारवोद्गमः ॥ ९ ॥
निर्दिश्य बन्धूनित इत्युदीरितं
दमेन गत्वार्धपथे कृतार्हणम् ।
विनीतमा द्वारत एव पद्गतं
गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ १० ॥

अथायमुत्थाय विसार्य दोर्युगं
मुदा प्रतीयेष क्षमात्मजन्मनः ।
सुरस्रवन्त्या इव पात्रमागतं
भृताभितोवीचिगतिः सरित्पतिः ॥ ११ ॥
यथावदस्मै पुरुषोत्तमाय तां
स साधुलक्ष्मीं बहुवाहिनीश्वरः ।
शिवामथ स्वस्य शिवाय नन्दनां
ददे पतिः सर्वविदे महीभृताम् ॥ १२ ॥
असिस्वदद्यन्मधुपर्कमर्पितं
स तद्व्याघ्रात्तकंमुदर्कदर्शिने ।
यदेष पास्यन्मधु भीमजाधरं
मिषेण पुण्याहविधिं तदाकृत ॥ १३ ॥
वरस्य पाणिः परघातकौतुकी
वधूकरः पङ्कजकान्तितस्करः ।
सुराज्ञि तौ तत्र विदर्भमण्डले
ततो निबद्धौ किमु कर्कशैः कुशैः ॥ १४ ॥
विदर्भजायाः करवारिजेन
यन्नलस्य पाणेरुपरि स्थितं किल ।
विशङ्क्य सूत्रं पुरुषायितस्य
तदङ्गविष्वतोऽस्मायि तदा तदालिभिः ॥ १५ ॥
सखा यदस्मै किल भीमसंज्ञया
स यक्षसख्याधिगतं ददौ भवः ।
ददौ तदेष श्वशुरः सुरोचितं
नलाय चिन्तामणिदाम कामदम् ॥ १६ ॥
बहोर्दुरापस्य वराय वस्तुन-
श्चितस्य दातुं प्रतिबिम्बकैतवात् ।

बभीतरामन्तरवस्थितं दध-
द्यदर्थमभ्यर्थितदेयमर्थिने ॥ १७ ॥
असिं भवान्याः क्षतकासरासुरं
वराय भीमः स्म ददाति भासुरम् ।
ददे हि तस्मै धवनामधारिणे
स शंभुसंभोगनिमग्नयानया ॥ १८ ॥
अधारि यः प्राङ्महिषासुरद्विषा
कृपाणमस्मै तमदत्त कूकुदः ।
अहायि तस्या हि धवार्धमज्जिना
स दक्षिणार्धेन पराङ्गदारणः ॥ १९ ॥
उवाह यः सान्द्रतराङ्गकाननः
स्वशौर्यसूर्योदयपर्वतव्रतम् ।
सनिर्झरः शाणनघोलधारया
समूढसंध्यः क्षतशत्रुजासृजा ॥ २० ॥
यमेन जिह्वा प्रहितेव या निजा
तमात्मजां याचितुमर्थिना भृशम् ।
स तां ददेऽस्मै परिवारशोभिनीं
करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥
यदङ्गभूमौ बभतुः स्वयोषिता-
मुरोजपत्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायिताव्रतै-
र्गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥
पुरैव तस्मिन्समदेशि तत्सुता-
भिकेन यः सौहृदनाटिनाग्निना ।
नलाय विश्राणयति स्म तं रथं
नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २३ ॥

प्रसूतवत्ता नलकूबरान्वयप्रकाशितास्यापि महारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पकप्रकृष्टतैतस्य ततोऽनुमीयते ॥२४॥

महेन्द्रमुच्चैःश्रवसा प्रतार्य यन्नि-
जेन पत्याऽकृत सिन्धुरन्वितम् ।
स तद्ददेऽस्मै हयरत्नमर्पितं
पुराऽनुबन्धुं वरुणेन बन्धुताम् ॥ २५ ॥

जवादवारीकृतदूरदृक्पथ-
स्तथाक्षियुग्माय ददे मुदं न यः ।
ददद्दिदृक्षादरदासतां यथा
तथैव तस्यांसुलकण्ठनालताम् ॥ २६ ॥

दिवस्पतेरादरदर्शितादरा-
दढौकि यस्तं प्रति विश्वकर्मणा ।
तमेकमाणिक्यमयं महोन्नतं
पतद्ग्रहं ग्राहितवान्नलेन सः ॥ २७ ॥

नलेन ताम्बूलविलासिनोज्झितै-
र्मुखस्य यः पूगकणैर्भृतो न वा ।
इति व्यवेचि स्वमयूखमण्डला-
दुदञ्चदुच्चारुणचारुणश्रिरात् ॥ २८ ॥

मयेन भीमं भगवन्तमर्चता
नृपेऽपि पूजा प्रभुनाम्नि या कृता ।
अदत्त भीमोऽपि स नैषधाय तां
हरिन्मणेर्भोजनभाजनं महत् ॥ २९ ॥

ह्रदे सदैव च्छविमस्य बिभ्रतां
न केकिनां सर्पविषं विसर्पति ।
न नीलकण्ठत्वमधास्यदत्र चेत्
स कालकूटं भगवानभोक्ष्यत ॥ ३० ॥

विराध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः ।
अदत्त तस्मै स मदच्छलात्सदा
यमभ्रमातङ्गतयैव वर्षुकम् ॥ ३१ ॥
मदान्मदग्रे भवताथवा भिया
परं दिगन्तादपि यात जीवत ।
इति स्म यो दिक्करिणः स्वकर्णयो-
र्विनैव वर्णस्रजमागतैर्गतैः ॥ ३२ ॥
बभार बीजं निजकीर्तये रदौ
द्विषामकीर्त्यै खलु दानविप्लुषः ।
श्रवःश्रमैः कुम्भकुचां शिरःश्रियं
मुदे मदस्वेदवतीमुपास्त यः ॥ ३३ ॥
न तेन वाहेषु विवाहदक्षिणी-
कृतेषु संख्यानुभवेऽभवत्क्षमः ।
न शातकुम्भेषु न मत्तकुम्भिषु
प्रयत्नवान्कोऽपि न रत्नराशिषु ॥ ३४ ॥
करग्रहे वाम्यमधत्त यस्तयोः
प्रसाद्य भैम्यानु च दक्षिणीकृतः ।
कृतः पुरस्कृत्य ततो नलेन स
प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः ॥ ३५ ॥
स्थिरा त्वमश्मेव भवेति मन्त्रवा-
गनेशदाशास्य किमाशु तां ह्रिया ।
शिला चलेत्प्रेरणया नृणामपि
स्थितेस्तु नाचालि बिडौजसापि सा ॥ ३६ ॥
प्रियांशुकग्रन्थिनिबद्धवाससं
तदा पुरोधा विदधे विदर्भजाम् ।

जगाद विच्छिद्य पटं प्रयास्यतो
नलादविश्वासमिवैष विश्ववित् ॥ ३७ ॥
ध्रुवावलोकाय तदुन्मुखभ्रुवा
निर्दिश्य पत्याभिदधे विदर्भजा ।
किमस्य न स्यादणिमाक्षिसाक्षिक-
स्तथापि तथ्यो महिमागमोदितः ॥३८॥
धवेन सादर्शि वधूररुन्धतीं सतीमिमां पश्य गतामिवाणुताम् ।
कृतस्य पूर्वं हृदि भूपतेः कृते तृणीकृतस्वर्गपतेर्जनादिति ।३९।
प्रसूनता तत्करपल्लवस्थितै-
रुडुच्छविव्योमविहारिभिः पथि ।
मुखेऽमराणामनले रदावले-
रभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥
तया प्रतीष्टाहुतिधूमपद्धति-
र्गता कपोले मृगनाभिशोभिताम् ।
ययौ दृशोरञ्जनतां श्रुतौ श्रिता
तमाललीलामलिकेऽलकायिता ॥ ४१ ॥
अपह्नुतः स्वेदभरः करे तयो-
स्त्रपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमस्तु सात्त्विकं
घनैः समाधीयत धूमलञ्छनैः ॥ ४२ ॥
बहूनि भीमस्य वसूनि दक्षिणां
प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणम् ।
जनेषु रोमाञ्चमितेषु मिश्रतां
ययुस्तयोः कण्टककुड्मलश्रियः ॥ ४३ ॥
बभूव न स्तम्भविजित्वरी तयोः
श्रुतिक्रियारम्भपरम्परात्वरा ।

न कम्पसंपत्तिमलुम्पदग्रतः
　　स्थितोऽपि वह्निः समिधा समेधितः ॥४४॥
दमस्वसुः पाणिममुष्य गृह्णतः
　　पुरोधसा संविदधेतरां विधेः ।
महर्षिणेवाङ्गिरसेन साङ्गता
　　पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥
स कौतुकागारमगात्पुरंध्रिभिः
　　सहस्ररन्ध्रीकृतमीक्षितुं ततः ।
अधात्सहस्राक्षतनुत्रमिश्रता-
　　मधिष्ठितं यत्खलु जिष्णुनामुना ॥ ४६ ॥
तथाशनाया निरशेषि नो ह्रिया
　　न सम्यगालोकि परस्परक्रिया ।
विमुक्तसंभोगमशायि सस्पृहं
　　वरेण बध्वा च यथाविधि त्र्यहम् ॥ ४७ ॥
कटाक्षणाज्जन्यजनैर्निजप्रजाः
　　क्वचित्परीहासमचीकरत्तराम् ।
धराप्सरोभिर्वरयात्रयागता-
　　नभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥
स कंचिदूचे रचयन्तु तेमनो-
　　पहारमत्राङ्ग ! रुचेर्यथोचितम् ।
पिपासतः काश्चन सर्वतोमुख
　　तवार्पयन्तामपि काममोदनम् ॥ ४९ ॥
मुखेन तेऽत्रोपविशत्वसाविति
　　प्रयाच्य सृष्टानुमतिं खलाहसत् ।
वराङ्गभागः स्वमुखं मतोऽधुना
　　स हि स्फुटं येन किलोपविश्यते ॥ ५० ॥

युवामिमे मे स्त्रितमे इतीरिणी
गले तथोक्ता निजगुच्छमेकिका ।
न भास्यदस्तुच्छगलो वदन्निति
न्यधत्त जन्यस्य ततः पराक्रुषत् ॥ ५१ ॥
नलाय वालव्यजनं विधुन्वती
दमस्य दास्या निभृतं पदेऽर्पितात् ।
अहासि लोकैः सरटात्पटोज्झिनी
भयेन जङ्घायतिलङ्घिरंहसः ॥ ५२ ॥
पुरःस्थलाङ्गूलमदात्खला वृसी-
मुपाविशत्तत्र ऋजुर्वरद्विजः ।
पुनस्तदुत्थाप्य निजामतेर्वदा-
ऽहसच्च पश्चात्कृतपुच्छतत्प्रदा ॥ ५३ ॥
स्वयं कथाभिर्वरपक्षसुभ्रुवः
स्थिरीकृतायाः पदयुग्ममन्तरा ।
परेण पश्चान्निभृतं न्यधापय-
द्दर्श चादर्शतलं हसन्खलु ॥ ५४ ॥
अथोपचारोद्धुरचारुलोचना
विलासनिर्वासितधैर्यसंपदः ।
स्मरस्य शिल्पं वरवर्गविक्रिया
विलोककं लोकमहासयन्मुहुः ॥ ५५ ॥
तिरोवलद्वक्त्रसरोजनालया
स्मिते स्मितं यत्खलु यूनि बालया ।
तया तदीये हृदये निखाय तद्
व्यधीयतासंमुखलक्ष्यवेधिता ॥ ५६ ॥
कृतं यदन्यत्करणोचितत्यजा
दिदृक्षु चक्षुर्यदवारि बालया ।

हृदस्तदीयस्य तदेव कार्मुके
जगाद वार्तामखिलां खलं खलु ॥ ५७ ॥
जलं ददत्याः कलितानतेर्मुखं
व्यवस्यता साहसिकेन चुम्बितम् ।
पदे पतद्वारिणि मन्दपाणिना
प्रतीक्षितोऽन्येक्षणवञ्चनक्षणः ॥ ५८ ॥
युवानमालोक्य विदग्धशीलया
स्वपाणिपाथोरुहनालनिर्मितः ।
श्लथोऽपि सख्यां परिधिः कलानिधौ
दधावहो तं प्रति गाढबन्धताम् ॥ ५९ ॥
नतभ्रुवः स्वच्छनखानुबिम्बन-
च्छलेन कोऽपि स्फुटकम्पकण्टकः ।
पयो ददत्याश्चरणे भृशं क्षतः
स्मरस्य बाणैः शरणं न्यविक्षत ॥ ६० ॥
मुखं यदस्मायि विभुज्य सुभ्रुवा
ह्रियं यदालम्ब्य नतास्यमासितम् ।
अवादि वा यन्मृदु गद्गदं युवा
तदेव जग्राह तदाप्तिलग्नकम् ॥ ६१ ॥
विलोक्य यूना व्यजनं विधुन्वतो-
मवाप्तसत्त्वेन भृशं प्रसिष्विदे ।
उदस्तकण्ठेन मृषोष्मनाटिना
विजित्य लज्जां ददृशे तदाननम् ॥ ६२ ॥
स तत्कुचस्पृष्टकचेष्टिदोलता-
चलद्दलाभव्यजनानिलाकुलः ।
अवाप नानानलजालशृङ्खला-
निबद्धनीडोद्भवविभ्रमं युवा ॥ ६३ ॥

अवच्छटा कापि कटाक्षणस्य सा
तथैव भङ्गी वचनस्य काचन ।
यया युवभ्यामनुनाथने मिथः
कृशोऽपि दूतस्य न शेषितः श्रमः ॥ ६४ ॥
पपौ न कोऽपि क्षणमास्यमेलितं
जलस्य गण्डूषमुदीतसंमदः ।
चुचुम्ब तत्र प्रतिबिम्बितं मुखं
पुरः स्फुरन्त्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥
हरिन्मणेर्भोजनभाजनेऽर्पिते
गताः प्रकोपं किल वारयान्त्रिकाः ।
भृतं न शाकैः प्रवितीर्णमस्ति
वस्त्विषेदमेवं हरितेति बोधिताः ॥ ६६ ॥
ध्रुवं विनीतः स्मितपूर्ववाग्युवा
किमप्यपृच्छन्न विलोकयन्मुखम् ।
स्थितां पुरः स्फाटिककुट्टिमे वधूं
तदङ्घ्रियुग्मावनिमध्यबद्धदृक् ॥ ६७ ॥
अमी लसद्बाष्पमखण्डिताखिलं
वियुक्तमन्योन्यममुक्तमार्दवम् ।
रसोत्तरं गौरमपीवरं रसा-
दभुञ्जतामोदनमोदनं जनाः ॥ ६८ ॥
वयोवशस्तोकविकस्वरस्तनी
तिरस्तिरश्चुम्बति सुन्दरे दृशा ।
स्वयं किल स्रस्तमुरःस्थमम्बरं
गुरुस्तनी ह्रीणतराऽपराददे ॥ ६९ ॥
यदादिहेतुः सुरभिः समुद्भवे
भवेद्यदाज्यं सुरभिर्ध्रुवं ततः ।

वधूभिरेभ्यः प्रवितीर्य पायसं
तदोघकुल्यातटसैकतं कृतम् ॥ ७० ॥
यदप्यपीता वसुधालयैः सुधा
तदप्यदः स्वादु ततोऽनुमीयते ।
अपि क्रतुषर्बुधदग्धगन्धिने
स्पृहां यदस्मै दधते सुधान्धसः ॥ ७१ ॥
अबोधि नो ह्रीनिभृतं मदिङ्गितं
प्रतीत्य वा नास्तवत्यसाविति ।
लुनाति यूनः स्म धियं कियद्गता
निवृत्य बालादरदर्शनेषुणा ॥ ७२ ॥
न राजिकाराद्धमभोजि तत्रकै-
र्मुखेन सीत्कारकृता दधद्दधि ।
धुतोत्तमाङ्गैः कटुभावपाटवा-
दकाण्डकण्डूयितमूर्धतालुभिः ॥ ७३ ॥
वियोगिदाहाय कटूभवत्त्विष-
स्तुषारभानोरिव खण्डमाहृतम् ।
सितं मृदु प्रागथ दाहदायि तत्
खलः सुहृत्पूर्वमिवाहितस्ततः ॥ ७४ ॥
नवौ युवानौ निजभावगोपिना-
वभूमिषु प्राग्विहितभ्रमिक्रमः ।
दृशोर्विधत्तः स्म यदृच्छया किल
त्रिभागमन्योन्यमुखे पुनः पुनः ॥ ७५ ॥
व्यधुस्तमां ते मृगमांससाधितं
रसादशित्वा मृदु तेमनं मनः ।
निशाधवोत्सङ्गकुरङ्गजैरदः
पलैः सपीयूषजलैः किमश्रपि ॥ ७६ ॥

परस्पराकूतजदूतकृत्ययोरनङ्गमाराद्घुमपि क्षणं प्रति ।
निमेषणेनैव कियच्चिरायुषा जनेषु यूनोरुदपादि निर्णयः ।७७।

अहर्निशा वेति रताय पृच्छति
क्रमोष्णशीतान्नकरार्पणाद्विटे ।
ह्रिया विदग्धा किल तन्निषेधिनी
न्यधत्त संध्यामधुरेऽधरेऽङ्गुलिम् ॥ ७८ ॥

क्रमेण कूरं स्पृशतोष्मणः पदं
सितां च शीतां चतुरेण वीक्षिता ।
दधौ विदग्धारुणितेऽधरेऽङ्गुली-
मनौचितीचिन्तनविस्मिता किल ॥ ७९ ॥

कियत्यजस्रोदनमानयन्किय-
त्करस्य 'पप्रच्छ गतागतेन याम् ।
अहं किमेष्यामि किमेष्यसीति सा
व्यधत्त नम्रं किल लज्जयाननम् ॥८०॥

यथामिषे जग्मुरनामिषभ्रमं
निरामिषे चामिषमोहमूहिरे ।
तथा विदग्धैः परिकर्मनिर्मितं
विचित्रमेते परिहस्य भोजिताः ॥ ८१ ॥

नखेन कृत्वाधरसन्निभां निभा-
द्युवा मृदुव्यञ्जनमांसफालिकाम् ।
ददंश दन्तैः प्रशशंस तद्रसं
विहस्य पश्यन्परिवेषिकाधरम् ॥ ८२ ॥

अनेकसंयोजनया तथाकृते-
र्निकृत्य निष्पिष्य च तादृगर्जनात् ।
अमी कृताकालिकवस्तुविस्मयं
जना बहु व्यञ्जनमभ्यवाहरन् ॥ ८३ ॥

पिपासुरस्मीति विबोधिता मुखं
निरीक्ष्य बाला सुहितेन वारिणः ।
पुनः करे कर्तुमना गलन्तिकां
हसात्सखीनां सहसा न्यवर्तत ॥ ८४ ॥
युवा समादित्सुरमत्रगं घृतं
विलोक्य तत्रैणदृशोऽनुबिम्बनम् ।
चकार तन्नीविनिवेशिनं करं
बभूव तत्र स्फुटकण्टकोत्करम् ॥ ८५ ॥
प्रलेह्यजस्नेहघृतानुबिम्बनां
चुचुम्ब कोऽपि श्रितभोजनच्छलः ।
मुहुः परिस्पृश्य कराङ्गुलीमुखै-
स्ततो नु रक्तैः स्वमवापितैर्मुखम् ॥ ८६ ॥
अराधि यन्मीनमृगाजपत्त्रिजैः
पलैर्मृदु स्वादु सुगन्धि तेमनम् ।
अशाकि लोकैः कुत एव जेमितुं
न तत्तु संख्यातुमपि स्म शक्यते ॥ ८७ ॥
कृतार्थनश्चाटुभिरिङ्गितैः पुरा
परासि यः किञ्चनकुञ्चितभ्रुवा ।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः
पुनः प्रसन्नाननयान्वकम्पि सः ॥ ८८ ॥
अकारि नीहारनिभं प्रभञ्जना-
दधूपि यक्षागुरुसारदारुभिः ।
निपीय भृङ्गारकसङ्गि तत्र तै-
स्तर्णि वारि प्रतिवारमीदृशम् ॥ ८९ ॥
त्वया विधातर्यदकारि चामृतं
कृतं च यज्जीवनमम्बु साधु तत् ।

वृथेदमारम्भि तु सर्वतोमुख-
स्तथोचितः कर्तुमिदंपिबस्तव ॥ ६० ॥
सरोजकोशाभिनयेन पाणिना
स्थितेऽपि कूरे मुहुरेव याचते ।
सखि ! त्वमस्मै वितर त्वमित्युभे
मिथो न वादाद्ददतुः किलौदनम् ॥ ६१ ॥
इयं कियच्चारुकुचेति पश्यते पयःप्रदाया हृदयं समावृतम् ।
ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं मिषेण भृङ्गारधृतेः करद्वयी ।६२।
अमीभिराकण्ठमभोजि तद्गृहे तुषारधारामृदितेव शर्करा ।
हयद्विषद्दुष्कयणोपयःसुतं सुधाह्रदात्पङ्कमिवोद्धृतं दधि ।६३।
तदन्तरन्तः सुषिरस्य बिन्दुभि
करम्बितं कल्पयता जगत्कृता ।
इतस्ततः स्पष्टमचोरि मायिना
निरीक्ष्य तृष्णाचलजिह्वताभृता ॥ ६४ ॥
ददासि मे तन्न रुचेर्यदास्पदं
न यत्र रागः सितयापि किं तया ।
इतीरिणे बिम्बफलं पलच्छला-
ददायि बिम्बाधरयारुचञ्च तत् ॥ ६५ ॥
समं ययोरिङ्गितवान्वयस्ययो-
स्तयोर्विहायोपहृतप्रतीङ्गिताम् ।
अकारि नाकूतमवारि सा यया
विदग्धयाऽरञ्जि तयैव भाववित् ॥ ६६ ॥
सखीं प्रति स्माह युवेङ्गितेक्षिणी
क्रमेण तेऽयं क्षमते न दित्सुताम् ।
विलोम तद्व्यञ्जनमर्प्यते त्वया
वरं किमस्मै न नितान्तमर्थिने ॥ ६७ ॥

समाप्तिलिप्येव भुजिक्रियाविधेर्दलोदरं वतुं लयालयीकृतम् ।
अलंकृतं क्षीरवटैस्तदश्नतां रराज पाकार्पितगैरिकश्रिया ।९८।

चुचुम्ब नोर्वीवलयोर्वशीं परं
पुरोऽधिपारि प्रतिबिम्बितां विटः ।
पुनःपुनः पानकपानकैतवा-
च्चकार तच्चुम्बनचुंकृतान्यपि ॥ ९९ ॥

घनैरमीषां परिवेषकैर्जनै-
रवर्षि वर्षोपलगोलकावली ।
चलद्भुजाभूषणरत्नरोचिषा
धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥१००॥

कियद्बहु व्यञ्जनमेतदर्प्यते
ममेति तृप्तेर्वदतां पुनःपुनः ।
अमूनि संख्यातुमसावढौकि तै-
श्छलेन तेषां कठिनीव भूयसी ॥१०१॥

विदग्धबालेङ्गितगुप्तिचातुरी-
प्रवह्लिकोत्पाटनपाटवे हृदः ।
निजस्य टीकां प्रबबन्ध कामुकः
स्पृशद्भिराकूतशतैस्तदौचितीम् ॥१०२।

घृतप्लुते भोजनभाजने पुरः
स्फुरत्पुरंध्रिप्रतिबिम्बिताकृतेः ।
युवा निधायोरसि लड्डुकद्वयं
नखैर्लिलेखाथ ममर्द निर्दयम् ॥१०३॥

विलोकिते रागितरेण सस्मितं
ह्रियाथ वैमुख्यमिते-सखीजने ।
तदालिरानीय कुतोऽपि शार्करीं
करे ददौ तस्य विहस्य पुत्रिकाम् ॥१०४॥

निरीक्ष्य रम्याः परिवेषिका ध्रुवं
न भुक्तमेवैभिरवाप्ततृप्तिभिः ।
अशक्नवद्भिर्बहुभुक्तवत्तया
यदुज्झिता व्यञ्जनपुञ्जराशयः ॥१०५॥
पृथक्प्रकारेङ्गितशंसिताशयो
युवा ययोदासि तयापि तापितः ।
ततो निराशः परिभावयन्परा-
मये तयातोषि सरोषयेव सः ॥१०६॥
पयःस्मिता मण्डकमण्डनाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी ।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्ज्वलकूरहारिणी ॥१०७॥
चिरं युवाकूतशतैः कृतार्थन-
श्चिरं सरोषेङ्गितया च निर्धुतः ।
सृजन्करक्षालनलीलयाञ्जली-
नसेचि किंचिद्विधुताम्बुधारया ॥१०८॥
न षड्विधः षिङ्गजनस्य भोजने
तथा यथा यौवतविभ्रमोद्भवः ।
अपारशृङ्गारमयः समुन्मिष-
न्भृशं रसस्तोषमधत्त सप्तमः ॥१०९॥
मुखे निधाय क्रमुकं नलानुगै-
रथोज्झि पर्णालिरवेक्ष्य वृश्चिकम् ।
दमार्पितान्तर्मुखवासनिर्मितं
भयाविलैः स्वभ्रमहासिताखिलैः ॥११०॥
अमीषु तथ्यानृतरत्नजातयो-
र्वराटराट्चारुनितान्तचारुणोः ।

स्वयं गृहाणैकमिहेत्युदीर्य तद्-
द्वयं ददौ शेषजिघृक्षवे हसन् ॥१११॥
इति द्विकृत्वः शुचिमृष्टभोजिनां
दिनानि तेषां कतिचिन्मुदा ययुः।
द्विरष्टसंवत्सरवारसुन्दरी
परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥११२॥
उवास वैदर्भगृहेषु पञ्चषा
निशाः कृशाङ्गीं परिणीय तां नलः।
अथ प्रतस्थे निषधान्सहानया
रथेन वार्ष्णेयगृहीतरश्मिना ॥११३॥
परस्य न स्प्रष्टुमिमामधिक्रिया
प्रिया शिशुः प्रांशुरसाविति ब्रुवन्।
रथे स भैमीं स्वयमध्यरूरुहन्न
तरिकलाश्लिक्षदिमां जनेक्षितः ॥११४॥
इति स्मरः शीघ्रमतिश्चकार तं
वधूं च रोमाञ्चभरेण कर्कशौ।
स्खलिष्यति स्निग्धतनुः प्रियादियं
म्रदीयसी पीडनभीरुदोर्युगात् ॥११५॥
तथा किमाजन्मनिजाङ्कवर्धितां
प्रहित्य पुत्रीं पितरौ विषेदतुः।
विसृज्य तौ तं दुहितुः पतिं यथा
विनीततालक्षगुणोभवद्गुणम् ॥११६॥
निजादनुव्रज्य स मण्डलावधे-
र्नलं निवृत्तौ चटुलापतां गतः।
तडागकल्लोल इवानिलं तटा-
द्धतानतिर्व्याववृते वराटराट् ॥११७॥

पितात्मनः पुण्यमनापदः क्षमा
धनं मनस्तुष्टिरथाखिलं नलः ।
अतः परं पुत्रि ! न कोऽपि तेऽहमि-
त्युदस्रुरेष व्यसृजन्निजौरसीम् ॥११८॥
प्रियः प्रियैकाचरणाश्चिरेण तां
पितुः स्मरन्तीमचिकित्सदाधिषु ।
तथास्त तन्मातृवियोगवाडवः
स तु प्रियप्रेममहाम्बुधावपि ॥११९॥
असौ महीभृद्बहुधातुमण्डित-
स्तया निजोपत्यकयेव कामपि ।
भुवा कुरङ्गेक्षणदन्तिचारयो-
र्बभार शोभां कृतपादसेवया ॥१२०॥
तदेकतानस्य नृपस्य रक्षितुं
चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा
समग्रतद्वाञ्छितपूर्तिवृत्तिभिः ॥१२१॥
मसारमालावलितोरणां पुरं
निजाद्वियोगादिव लम्बितालकाम् ।
ददर्श पश्यामिव नैषधः प्रिया-
मथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः ॥१२२॥
पुरीनिरीक्षान्यमना मनागिति
प्रियाय भैम्या निभृतं विसर्जितः ।
ययौ कटाक्षः सहसा निवर्तिना
तदीक्षणेनार्धपथे समागमम् ॥१२३॥
अथ नगरधृतैरमात्यरत्नैः पथि
समियाय स जाययाभिरामः ।

मधुरिव कुसुमश्रिया सनाथः
क्रमभिजितैरलिभिः कुतूहलोत्कैः ॥१२४॥
कियदपि कथयन्स्ववृत्तजातं
श्रवणकुतूहलचञ्चलेषु तेषु ।
कियदपि निजदेशवृत्तमेभ्यः
श्रवणपथं स नयन्पुरीं विवेश ॥१२५॥
अथ पथि पथि लाजैरात्मनो बाहुवल्ली-
मुकुलकुलसकुल्यैः पूजयन्त्यो जयेति ।
क्षितिपतिमुपनेमुस्तं दधाना जनाना-
ममृतजलमृणालीसौकुमार्यं कुमार्यः ॥१२६॥
अभिनवदमयन्तीकान्तिजालावलोक-
प्रवणपुरपुरन्ध्रीवक्त्रचन्द्रान्वयेन ।
निखिलनगरसौधाट्टावलीचन्द्रशालाः
क्षणमिव निजसंज्ञां सान्वयामन्वभूवन् ॥१२७॥
निषधनृपमुखेन्दुश्रीसुधां सौधवाता-
यनविवरगरश्मिश्रेणिनालोपनीताम् ।
पपुरसमपिपासापांसुलत्वोत्परागा-
ण्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि ॥१२८॥
अवनिपतिपथाट्टस्त्रैणपाणिप्रवाल-
स्खलितसुरभिलाजव्याजभाजः प्रतीच्छन् ।
उपरि कुसुमवृष्टीरेष वैमानिकाना-
मभिनवकृतभैमीसौधभूमिं विवेश ॥१२९॥
इति परिणयमित्थं यानमेकत्र याने
दरचकितकटाक्षप्रेक्षणं चानयोस्तत् ।
दिवि दिविषदधीशाः कौतुकेनावलोक्य
प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः ॥१३०॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत्षोडशः ।।१३१।।

।। इति महाकविहर्षविरचिते नैषधीयप्रकाशे
षोडशः सर्गः समाप्तः ।। १६ ।।

## ।। १७ ।। सप्तदशः सर्गः ।।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमम् ।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम् ।। १ ।।

भैमीं पत्ये भुवस्तस्मै चिरं चित्ते धृतामपि ।
विद्यामिव विनीताय न विषेदुः प्रदाय ते ।। २ ।।

कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः ।
स्फटिकाद्रेस्तटानीव प्रतिबिम्बा विवस्वतः ।। ३ ।।

जवाज्जातेन वातेन बलाकृष्टबलाहकैः ।
श्वसनात्स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ।। ४ ।।

क्रमाद्दवीयसां तेषां तदानीं समदृश्यत ।
स्पष्टमष्टगुणैश्वर्यात्पर्यवस्यन्निवाणिमा ।। ५ ।।

ततान विद्युता तेषां रथे पीतपताकताम् ।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ।। ६ ।।

पुनःपुनर्मिलन्तीषु पथि पाथोदपङ्क्तिषु ।
नाकनाथरथालम्बि बभूवाभरणं धनुः ।। ७ ।।

जले जलदजालानां वज्रिवज्रानुबिम्बनैः ।
जाने तत्कालजैस्तेषां जाताशनिसनाथता ।। ८ ।।

स्फुटं सावर्णिवंश्यानां कुलच्छत्रं महीभुजाम् ।
चक्रे दण्डभृतश्चुम्बन्दण्डश्चण्डरुचि क्वचित् ॥ ९ ॥
नलभीमभुवोः प्रेम्णि विस्मितायां दधौ दिवः ।
पाशिपाशः शिरःकम्पस्रस्तभूषश्रवःश्रियम् ॥ १० ॥
पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी ।
अनेन प्रापि भैमीति भ्रमं चक्रे नभःसदाम् ॥ ११ ॥
तत्कर्णौ भारती दूनौ विरहाद्भीमजागिराम् ।
अध्वनि ध्वनिभिर्वर्णैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥
अथायान्तमवैक्षन्त ते जनौघमसित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्तिमत् ॥ १३ ॥
अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाविनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥
अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः ।
शम्भलीभुक्तसर्वस्वा जना यत्पारिपार्श्विकाः ॥ १५ ॥
बिभर्ति लोकजिद्भावं बुद्धस्य स्पर्धयेव यः ।
यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः ॥ १६ ॥
ईश्वरस्य जगत्कृत्स्नं सृष्टिमाकुलयन्निमाम् ।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरं स्मरन्निव ॥ १७ ॥
चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम् ।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम् ॥ १८ ॥
यत्तत्क्षिपन्तमुत्कम्पमुत्थायुकमथारुणम् ।
बुबुधुर्विबुधाः क्रोधमाक्रोशाक्रोशघोषणम् ॥ १९ ॥
यमुपासन्त दन्तौष्ठक्षतासृक्शिष्यचक्षुषः ।
भ्रुकुटीफणिनीनादनिभनिःश्वासफूत्कृतः ॥ २० ॥
दुर्गं कामाशुगेनापि दुर्लङ्घ्यमवलम्ब्य यः ।
दुर्वासोहृदयं लोकान्सेन्द्रानपि दिधक्षति ॥ २१ ॥

वैराग्यं यः करोत्युच्चै रञ्जनं जनयन्नपि ।
सूते सर्वेन्द्रियाच्छादि प्रज्वलन्नपि यस्तमः ॥ २२ ॥
पञ्चेषुविजयाशक्तो भवस्य क्रुध्यतो जयात् ।
येनान्यविगृहीतारिजयकालनयः श्रितः ॥ २३ ॥
हस्तौ विस्तारयन्निभ्ये बिभ्यदर्धपथस्थवाक् ।
सूचयन् काकुमाकूतैर्लोभस्तत्र व्यलोकि तैः ॥ २४ ॥
दैन्यस्तैन्यमया नित्यमत्याहारामयाविनः ।
भुञ्जानजनसाकूतपश्या यस्यानुजीविनः ॥ २५ ॥
धनिदानाम्बुवृष्टेर्यः पात्रपाणाववग्रहः ।
स्वान्दासानिव हा निःस्वान्विक्रीणीतेऽर्थवत्सु यः ॥ २६ ॥
एकद्विकरणे हेतू महापातकपञ्चके ।
न तृणे मन्यते कोपकामौ यः पञ्च कारयन् ॥ २७ ॥
यः सर्वेन्द्रियसम्रापि जिह्वां बह्ववलम्बते ।
तस्यामाचार्यकं याच्ञावटवे पाटवेऽर्जितुम् ॥ २८ ॥
पथ्यां तथ्यामगृह्णन्तमन्धं बन्धुप्रबोधनाम् ।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते ॥ २९ ॥
श्वः श्वः प्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषः ।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः ॥ ३० ॥
पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम् ।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥ ३१ ॥
ब्रह्मचारिवनस्थायियतयो गृहिणं यथा ।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः ॥ ३२ ॥
जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता ।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः ॥ ३३ ॥
कुरुसैन्यं हरेणेव प्रागलज्जत नार्जुनः ।
हतं येन जयन्कामस्तमोगुणजुषा जगत् ॥ ३४ ॥

चिह्निताः कतिचिद्देवैः प्राचः परिचयादमी ।
अन्ये न केचनाचूडमेनःकञ्चुकमेचकाः ।। ३५ ।।
तत्रोद्गूर्ण इवार्णोधौ मैत्र्येऽभ्यर्णमुपेयुषि ।
कस्याप्याकर्णयामासुस्ते वर्णान्कर्णकर्कशान् ।। ३६ ।।
ग्रावोन्मज्जनवद्यज्ञफलेऽपि श्रुतिसत्यता ।
का श्रद्धा तत्र धीवृद्धाः ! कामान्धा यत्खिलीकृताः ।। ३७ ।।
केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना ।
यद्वेदमर्मभेदाय जगदे जगदस्थिरम् ।। ३८ ।।
अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकम् ।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका ।। ३९ ।।
शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः ।
तदानन्तकुलादोषाददोषा जातिरस्ति का ।। ४० ।।
कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः ।
नाश्नाति स्नाति हा मोहात्कामक्षाममव्रतं जगत् ।। ४१ ।।
ईर्ष्यया रक्षतो नारीर्धिक्कुलस्थितिदाम्भिकान् ।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः ।। ४२ ।।
परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः ।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना ।। ४३ ।।
गुरुतल्पगतो पापकल्पनां त्यजत द्विजाः ! ।
येषां वः पत्युरस्त्युच्चैर्गुरुदारग्रहे ग्रहः ।। ४४ ।।
पापात्तापा मुदः पुण्यात्परासोः स्युरिति श्रुतिः ।
वैपरीत्यं द्रुतं साक्षात्तदाख्यात बलाबले ।। ४५ ।।
संदेहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि ।
त्यजत श्रोत्रियाः ! सत्रं हिंसादूषणसंशयात् ।। ४६ ।।
यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः ।
रामाया जातकामायाः प्रशस्ता हस्तधारणा ।। ४७ ।।

सुकृते वः कथं श्रद्धा सुरते च कथं न सा ।
तत्कर्म पुरुषः कुर्याद्येनान्ते सुखमेधते ॥ ४८ ॥
बलात्कुरुत पापानि सन्तु तान्यकृतानि वः ।
सर्वान्बलकृतान्दोषानकृतान्मनुरब्रवीत् ॥ ४९ ॥
स्वागमार्थेऽपि मा स्थास्मिस्तीर्थिका ! विचिकित्सवः ।
तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ ॥ ५० ॥

श्रुतिस्मृत्यर्थबोधेषु क्वैकमत्यं महाधियाम् ।
व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी ॥ ५१ ॥
यस्मिन्नस्मीति धीर्देहे तद्दाहे वः किमेनसा ।
क्वापि तत्किं फलं न स्यादात्मेति परसाक्षिके ॥ ५२ ॥
मृतः स्मरति जन्मानि मृते कर्मफलोर्मयः ।
अन्यभुक्तैर्मृते तृप्तिरित्यलं धूर्तवार्तया ॥ ५३ ॥
अनेन जानतास्मीति कायं नायं त्वमित्यसौ ।
त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्तया ॥ ५४ ॥
एकं संदिग्धयोस्तावद्भावि तत्रेष्टजन्मनि ।
हेतुमाहुः स्वमन्त्रादीनसङ्गानन्यथा विटाः ॥ ५५ ॥
एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः ।
कः श्रौतस्यात्मनो भीरो ! भारः स्याद्दुरितेन ते ॥ ५६ ॥
किं ते वृन्तहृतात्पुष्पात्तन्मात्रे हि फलत्यदः ।
न्यस्य तन्मूर्ध्न्यनन्यस्य न्यास्यमेवाश्मनो यदि ॥ ५७ ॥
तृणानीव घृणावादान्विधूनय वधूरनु ।
तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५८ ॥
कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम् ।
वेदोऽपि देवकीयाज्ञा तन्नाज्ञाः ! काधिकार्हणा ॥ ५९ ॥
प्रलापमपि वेदस्य भागं मन्यध्व एव चेत् ।
केनाभाग्येन दुःखान्न विधीनपि तथेच्छथ ॥ ६० ॥

श्रुतिं श्रद्धत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयम् ।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ॥ ६१ ॥
को हि वेदास्त्यमुष्मिन्वा लोक इत्याह या श्रुतिः ।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम् ॥ ६२ ॥
धर्माधर्मौ मनुर्जल्पन्नशक्यार्जनवर्जनौ ।
व्याजान्मण्डलदण्डार्थी श्रद्धायि मुधा बुधैः ॥ ६३ ॥
व्यासस्यैव गिरा तस्मिन्श्रद्धेत्यद्धा स्थ नास्तिकाः ।
मत्स्यस्याप्युपदेश्यान्वः को मत्स्यानपि भाषताम् ॥ ६४ ॥
पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥ ६५ ॥
न भ्रातुः किल देव्यां स व्यासः कामात्समासजत् ।
दासीरतस्तदासीद्यन्मात्रा तत्राप्यदेशि किम् ॥ ६६ ॥
देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ ।
गां नतैः किं न तैर्व्यक्तं वृतोऽप्यात्माधरीकृतः ॥ ६७ ॥
साधुकामुकतामुक्ता शान्तस्वान्तैर्मखोन्मुखैः ।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः ॥ ६८ ॥
कः शमः क्रियतां प्राज्ञाः ! प्रियाप्रीतौ परिश्रमः ।
भस्मीभूतस्य भूतस्य पुनरागमनं कुतः ॥ ६९ ॥
उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ ७० ॥
बिभ्रत्युपरियानाय जना जनितमज्जनाः ।
विग्रहायाग्रतः पश्चाद्गत्वरीरभ्रविभ्रमम् ॥ ७१ ॥
एनसानेन तिर्यक्स्यादित्यादिः का विभीषिका ।
राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥ ७२ ॥
हताश्चेद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे ।
तत्रापि तेन युध्यन्तां हता अपि तथैव ते ॥ ७३ ॥

त्वं च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम् ।
इति स्वोच्छित्तिमुक्त्युक्तिवैदग्धी वेदवादिनाम् ॥ ७४ ॥
मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः ॥ ७५ ॥
दारा हरिहरादीनां तन्मग्नमनसो भृशम् ।
किं न मुक्ताः कुतः सन्ति कारागारे मनोभुवः ॥ ७६ ॥
देवश्चेदस्ति सर्वज्ञः करुणाभागवन्ध्यवाक् ।
तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः ॥ ७७ ॥
भविनां भावयन्दुःखं स्वकर्मजमपीश्वरः ।
स्यादकारणवैरी नः कारणादपरे परे ॥ ७८ ॥
तर्काप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम् ।
नाप्रामाण्यं मतानां स्यात्केषां सत्प्रतिपक्षवत् ॥ ७९ ॥
अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः ।
निर्धनास्ते धनायैव धातुवादोपदेशिनः ॥ ८० ॥
किं वित्तं दत्त तुष्टेयमदातरि हरिप्रिया ।
दत्त्वा सर्वं धनं मुग्धो बन्धनं लब्धवान्बलिः ॥ ८१ ॥
दोग्धा द्रोग्धा च सर्वोऽयं धनिनश्चेतसा जनः ।
विसृज्य लोभसंक्षोभमेकद्वा यद्युदासते ॥ ८२ ॥
दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना ।
स्वाच्छन्द्यमृच्छतानन्दकन्दलीकन्दमेककम् ॥ ८३ ॥
इत्थमाकर्ण्य दुर्वर्णं शक्रः सक्रोधतां दधे ।
अवोचदुच्चैः कस्कोऽयं धर्ममर्माणि कृन्तति ॥ ८४ ॥
लोकत्रयीं त्रयीनेत्रां वज्रवीर्यस्फुरत्करे ।
क इत्थं भाषते पाकशासने मयि शासति ॥ ८५ ॥
वर्णसंकीर्णतायां वा जात्यलोपेऽन्यथापि वा ।
ब्रह्महादेः परीक्षासु भङ्गमङ्ग ! प्रमाणय ॥ ८६ ॥

ब्राह्मण्यादिप्रसिद्धाया गन्ता यन्नेक्षते जयम् ।
तद्विशुद्धिमशेषस्य वर्णवंशस्य शंसति ॥ ८७ ॥
जलानलपरीक्षादौ संवादो वेदवेदिते ।
गलहस्तितनास्तिक्यां धिग्धियं कुरुतेऽनते ॥ ८८ ॥
सत्येव पतियोगादौ गर्भादिरध्रुवोदयात् ।
आक्षिप्तं नास्तिकाः कर्म न किं मर्म भिनत्ति वः ॥ ८९ ॥
याचतः स्वगयाश्राद्धं प्रेतस्याविश्य कंचन ।
नानादेशजनोपज्ञाः प्रत्येषि न कथाः कथम् ॥ ९० ॥
नीतानां यमदूतेन नामभ्रान्तेरुपागतौ ।
श्रद्धत्से संवदन्तीं न परलोककथां कथम् ॥ ९१ ॥
जज्वाल ज्वलनः क्रोधादाचख्यौ चाक्षिपन्नमुम् ।
किमात्थ रे ! किमात्थेदमस्मदग्रे निरर्गलम् ॥ ९२ ॥
महापराकिणः श्रौतधर्मकम्बलजीविनः ।
क्षणाभक्षणमूर्च्छाल ! स्मरन्विस्मयसे न किम् ॥ ९३ ॥
पुत्रेष्टिश्येनकारीरीमुखा दृष्टफला मखाः ।
न वः किं धर्मसंदेहमन्देहजयभानवः ॥ ९४ ॥
दण्डताण्डवनैः कुर्वन्स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्मीभिन्नमर्मेव धर्मराट् ॥ ९५ ॥
तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादयम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥
वेदैस्तद्द्वेषिभिस्तद्वत्स्थिरं मतशतैः कृतम् ।
परं कस्ते परं वाचा लोकं लोकायत ! त्यजेत् ॥ ९७ ॥
समज्ञानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम् ।
लोके प्रयासि पन्थानं परलोके न तं कुतः ॥ ९८ ॥
स्वकन्यामन्यसात्कर्तुं बिभ्रानुमतिदश्वनः ।
लोके परत्र लोकस्य कस्य न स्याद्दृढं मनः ॥ ९९ ॥

कस्मिन्नपि मते सत्ये हृताः सर्वमतत्यजः ।
तद्दृष्ट्या व्यर्थतामात्रमनर्थस्तु न धर्मजः ॥१००॥
क्वापि सर्वैरवैमत्यात्पातित्यादन्यथा क्वचित् ।
स्थातव्यं श्रौत एव स्याद्धर्मे शेषेऽपि तत्कृते: ॥ १०१ ॥
बभाण वरुणः क्रोधादरुणः करुणोज्झितम् ।
किं न प्रचण्डात्पाखण्डपाश ! पाशाद्बिभेषि नः ॥ १०२ ॥
मानवाशक्यनिर्माणा कूर्माद्यङ्कबिला शिला ।
न श्रद्धापयते मुग्धास्तीर्थिकाध्वनि वः कथम् ॥ १०३ ॥
शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः कथम् ।
श्रुतिवृत्तान्तसंवादैर्न यश्चमदचीकरत् ॥ १०४ ॥
तत्तज्जनकृतावेशान्गयाश्राद्धादियाचिनः ।
भूताननुभवन्तोऽपि कथं श्रद्धत्थ न श्रुतीः ॥ १०५ ॥
नामभ्रमाद्यमं नीतानथ स्वतनुमागतान् ।
संवादवादिनो जीवान्वीक्ष्य मा त्यजत श्रुतीः ॥१०६॥
संरम्भैर्जम्भजैत्रादेस्तभ्यमानाद्वलाद्वलन् ।
मूर्धबद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान् ॥१०७॥
नापराधी पराधीनो जनोऽयं नाकनायकाः ! ।
कालस्याहं कलेर्बन्दी तच्चाटुचटुलाननः ॥१०८॥
इति तस्मिन्वदत्येव देवाः स्यन्दनमन्दिरम् ।
कलिमाकलयांचक्रुर्द्वापरं चापरं पुरः ॥१०९॥
संददर्शोन्नमद्ग्रीवः श्रीबहुत्वकृताद्भुतान् ।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥११०॥
गुरुरीढावलीढः प्रागभून्नमितमस्तकः ।
स त्रिशङ्कुरिवाक्रान्तस्तेजसेव बिडौजसः ॥१११॥
विमुखान्द्रष्टुमप्येनं जनंगम इव द्विजान् ।
एष मत्तः सहेलं तानुपेत्य समभाषत ॥११२॥

स्वस्ति वास्तोष्पते ! तुभ्यं शिखिन्नग्नि न खिन्नता ।
सखे काल ! सुखेनासि पाशहस्त ! मुदस्तव ॥११३॥
स्वयंवरमहे भैमीवरणाय त्वरामहे ।
तदस्माननुमन्यध्वमध्वने तत्र धाविने ॥११४॥
तेऽवज्ञाय तमस्योच्चैरहंकारमकारणम् ।
ऊचिरेऽतिचिरेणैनं स्मित्वा दृष्टमुखा मिथः ॥११५॥
पुनर्वक्ष्यसि मा मैव कथमुद्वक्ष्यसे तु मः ।
सृष्टवान्परमेष्ठी यं नैष्ठिकब्रह्मचारिणम् ॥११६॥
द्रौहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम् ।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम् ॥११७॥
अतिवृत्तः स वृत्तान्तस्त्रिजगद्युवगर्वनुत् ।
आगच्छतामपादानं स स्वयंवर एव नः ॥११८॥
नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च ।
भूमिपालं नरं भैमी वरं साऽवरद्वरम् ॥११९॥
भुजगेशानसद्देशान्वानरानितरान्नरान् ।
अमरान्पामरान्भैमी नलं वेद गुणोज्ज्वलम् ॥१२०॥
इति श्रुत्वा स रोषान्धः परमश्चरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥१२१॥
कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम् ।
कलिस्तु चरतु ब्रह्म प्रैतु वातिप्रियाय वः ॥१२२॥
चर्यैव कतमेयं वः परस्मै धर्मदेशिनाम् ।
स्वयं तत्कुर्वतां सर्वं श्रोतुं यद्बिभितः श्रुतौ ॥१२३॥
तत्र स्वयंवरेऽलम्भि भुवः श्रीर्नैषधेन सा ।
जगतो ह्रीस्तु युष्माभिर्लम्भिस्तुल्याभ एव वः ॥१२४॥
दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्त्रवक्रणा ।
लज्जयैवासमर्थानां मुखमास्माकमीक्षितुम् ॥१२५॥

स्थितं भवद्भिः पश्यद्भिः कथं भोस्तदसांप्रतम् ।
निर्दग्धा दुर्विदग्धा किं सा दशा न ज्वलत्क्रुधा ॥१२६॥
महावशाननादस्य महान्तमभिलापुका ।
स्वीचकार कथंकारमहो सा तरलं नलम् ॥१२७॥
भवादृशैर्दिशामीशैर्मृग्यमाणां मृगेक्षणाम् ।
स्वीकुर्वाणः कथं सोढः कृतरीढस्तृणं नलः ॥१२८॥
दारुणः कूटमाश्रित्य शिखी साक्षीभवन्नपि ।
नावहत्किं तदुद्वाहे कूटसाक्षिक्रियामयम् ॥१२९॥
अहो महःसहायानां संभूता भवतामपि ।
क्षमवासमं कलङ्काय देवस्येवामृतद्युतेः ॥१३०॥
सा वव्रे यं तमुत्सृज्य मह्यमीर्ष्याजुषः स्थ किम् ।
कृतागःसद्मनस्तस्माच्छद्मनाद्याच्छिनद्मि ताम् ॥१३१॥
यतध्वं सहकर्तुं मां पाञ्चाली पाण्डवैरिव ।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम् ॥१३२॥
अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम् ।
चक्रे गिरा शराघातं भारती सारतीव्रया ॥१३३॥
कीर्तिं भैमीं वरं चास्मै दातुमेवागमन्नमी ।
न लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी ॥१३४॥
वाग्मिनीं जडजिह्वस्तां प्रतिवक्तुमशक्तिमान् ।
लीलावहेलितां कृत्वा देवानेवावदत्कलिः ॥१३५॥
प्रौञ्छि वाञ्छितमस्माभिरपि तां प्रति संप्रति ।
तस्मिन्नले न लेशोऽपि कारुण्यस्यास्ति नः पुनः ॥१३६॥
वृत्ते कर्मणि कुर्मः किं तदा नाभूम तत्र यत् ।
कालोचितमिदानीं नः शृणुतालोचितं पुनः ॥१३७॥
प्रतिज्ञेयं नले विज्ञाः ! कलेर्विज्ञायतां मम ।
तेन भैमीं च भूमिं च त्याजयामि जयामि तम् ॥१३८॥

नैषधेन विरोधं मे चण्डतामण्डितौजसः ।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत् ॥१३९॥
द्वापरः साधुकारेण तद्विकारमदीदिपत् ।
प्रणीय श्रवणे पाणिमवोचन्नमुत्रे रिपुः ॥१४०॥
विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे ।
यद्दत्तेऽल्पमनल्पाय तद्दत्ते ह्रियमात्मनः ॥१४१॥
फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति ।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनो ॥ १४२ ॥
भव्यो न व्यवसायस्ते नले साधुमतौ कले ! ।
लोकपालविशालोऽयं निषधानां सुधाकरः ॥१४३॥
न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति ।
निचिताखिलधर्मे च द्वापरस्योदयं वयम् ॥१४४॥
सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो ।
कथं भवद्विधैर्बाध्या प्रमितिर्विभ्रमैरिव ॥१४५॥
तं नासत्ययुगं तां वा त्रेता स्पर्धितुमर्हति ।
एकप्रकाशधर्माणं न कलिद्वापरौ युवाम् ॥१४६॥
करिष्येऽवश्यमित्युक्तिः करिष्यन्नपि दुष्यसि ।
दृष्टादृष्टा हि नायत्ताः कार्यौया हेतवस्तव ॥१४७॥
द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः ।
तत्पापसंभवं तापमाप्नुयादनयात्ततः ॥१४८॥
युगशेष तव द्वेषस्तस्मिन्नेष न सांप्रतम् ।
भविता न हितायैतद्वैरं ते वैरसेनिना ॥१४९॥
तत्र यामीत्यसज्ज्ञानं राजसं सदिहास्यताम् ।
इति तत्र गतो मा गा राजसंसदि हास्यताम् ॥१५०॥
गत्वान्तरा नलं भैमीं माकस्मात्त्वं प्रवेक्ष्यसि ।
षण्णां चक्रमसंयुक्तं पठ्यमानं डकारवत् ॥१५१॥

अपरेऽपि दिशामीशा वाचमेतां शचीपते: ।
अन्वमन्यन्त किंत्वेनां नादत्त युगयोर्युगम् ॥१५२॥
कलिं प्रति कलिं देवा देवान्प्रत्येकश: कलि: ।
सोपहासं समैर्वर्णैरित्थं व्यरचयन्मिथ: ॥१५३॥
तवाऽगमनमेवार्हं वैरसेनौ तया वृते ।
उद्वेगेन विमानेन किमनेनापि धावता ॥१५४॥
पुरा यासि वरीतुं यामग्र एव तया वृते ।
अन्यस्मिन्भवतो हास्यं वृत्तमेतत्त्रपाकरम् ॥१५५॥
पत्यौ तया वृतेऽन्यस्मिन्यदर्थं गतवानसि ।
भवत: कोपरोध: स्तादक्षमस्य वृथारुष: ॥१५६॥
यासि स्मरञ्जयन्कान्त्या योजनौघं महार्वता ।
समूढस्तं वृतेऽन्यस्मिन्किं न ह्रीस्तेऽत्र पामर ! ॥१५७॥
नलं प्रत्यनपेतार्ति तार्तीयीकतुरीययो: ।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधु: ॥१५८॥
द्वापरैकपरीवार: कलिर्मत्सरमूर्च्छित: ।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिल: किल ॥१५९॥
नलेष्टापूर्तसंपूर्तेर्दूरं दुर्गानिमं प्रति ।
निषेधन्निषधान्गन्तुं विघ्न: संजघटे घन: ॥१६०॥
मण्डलं निषधेन्द्रस्य चन्द्रस्येवामलं कलि: ।
प्राप म्लापयितुं पाप: स्वर्भानुरिव संग्रहात् ॥१६१॥
कियतापि च कालेन काल: कलिरुपेयिवान् ।
भैमीभर्तुरहंमानी राजधानीं महीभुज: ॥१६२॥
वेदानुद्धरतां तत्र मुखादाकर्णयन्पदम् ।
न प्रसारयितुं काल: कलि: पदमपारयत् ॥१६३॥
श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्णयत: क्रमम् ।
क्रम: संकुचितस्तस्य पुरे दूरमवर्तत ॥१६४॥

तावद्गतिर्धृताटोपा पादयोस्तेन मंहिता ।
न वेदपाठिकण्ठेभ्यो यावद्‌यात्रि मंहिता ॥१६५॥
तस्य होमाज्यगन्धेन नासा नाशमिवागमत् ।
तथाऽत्तन दशौ नासौ क्रतुधूमकदर्थितः ॥१६६॥
अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले ।
अङ्गणे गृहिणां तत्र खलेनानेन चस्वले ॥१६७॥
पुटपाकमसौ प्राप क्रतुशुष्ममहोष्मभिः ।
तत्प्रत्यङ्गमिवाकर्तिं पूर्तामिव्यजनानिलैः ॥१६८॥
पितॄणां तर्पणे वर्णैः कीर्णाद्विश्मनि वेश्मनि ।
कालादिव तिलात्कालाद्दूरमत्रसदत्र सः ॥१६९॥
स्नातॄणां तिलकर्मने स्वमन्तर्दीर्णमेव सः ।
कृपाणीभूय हृदयं प्रविष्टैरिव तत्र तैः ॥१७०॥
पुमांसं मुमुदे तत्र विदन्मिथ्यावदावदम् ।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयम् ॥१७१॥
यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसंकुलाम् ।
जनैर्वर्मधनैः कीर्णां व्यालक्रोडीकृतां च ताम् ॥१७२॥
स पार्श्वमशकद्गन्तुं न वराकः पराकिणाम् ।
मासोपवासिनां छायालङ्घने घनमस्खलत् ॥१७३॥
आत्माह्निनां द्विजैस्तत्र गायत्रीमर्कमण्डलात् ।
स संनिदधतीं पश्यन्दृष्टनष्टोऽभवद्ध्रिया ॥१७४॥
स गृहे गृहिभिः पूर्णे वने वैखानसैर्घने ।
यत्याद्याऽरेमरागारे क्वापि न स्थानमानशे ॥१७५॥
क्वापि नापश्यदन्विष्यन्हिंसामात्मप्रियामसौ ।
स्वमित्रं तत्र न प्राप्नोदपि मूर्खमुखे कलिम् ॥१७६॥
हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः ।
सा तु सौम्यवृषासक्ता खरं दूरान्निरास तम् ॥१७७॥

मौनेन व्रतनिष्ठानां स्वाक्रोशं मन्यते स्म सः ।
वन्द्यवन्दारुभिर्जज्ञौ स्वशिरश्च पदाहतम् ॥१७८॥
ऋषीणां स बृसीः पाणौ पश्यन्नाचामतामपः ।
मेने घनैरमी हन्तुं शप्तुं मामद्भिरुद्यताः ॥१७९॥
मौञ्जीधृतो धृताषाढानाशशङ्के स वर्णिनः ।
रज्ज्वामी बन्द्धुमायान्ति हन्तुं दण्डेन मां ततः ॥१८०॥
दृष्ट्वा पुरः पुरोडाशमासीदुत्त्रासदुर्मनाः ।
मन्वानः फणिनीस्तत्र स मुमोचास्रु च स्रुचः ॥१८१॥
मुमुदे मदिरादानं विदन्नेष द्विजन्मनः ।
दृष्ट्वा सौत्रामणीमिष्टिं तं कुर्वन्तमदूयत ॥१८२॥
अपश्यद्यावतो वेदविदां ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्राञ्जलयो हृदः ॥१८३॥
स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्यैव यमस्येव बिभाय सः ॥१८४॥
स पाखण्डजनान्वेषी प्राप्नुवन्वेदपण्डितान् ।
जलार्थीवानलं प्राप्य पापस्तापादपासरत् ॥१८५॥
तत्र ब्रह्महणं पश्यन्नतिसंतोषमानशे ।
निर्वर्ण्य सर्वमेवस्य यज्वानं ज्वरति स्म सः ॥१८६॥
यतिहस्तस्थितैस्तस्य राम्भैरारम्भि तर्जना ।
दुर्जनस्याजनि क्लिष्टिर्गृहिणां वेदयष्टिभिः ॥१८७॥
मण्डलत्यागमेवैक्षद्वीक्ष्य स्थण्डिलशायिनः ।
पवित्रालोकनादेष पवित्रासमविन्दत ॥१८८॥
अपश्यञ्जिनमन्विष्यन्नजिनं ब्रह्मचारिणा ।
क्षपणार्थी सदीक्षस्य स चाक्षपणमैक्षत ॥१८९॥
जपतामक्षमालासु बीजाकर्षणदर्शनात् ।
स जीवाकृष्टिकष्टानि विपरीतदृगन्वभूत् ॥१९०॥

त्रिसंध्यं तत्र विप्राणां स पश्यन्नघमर्षणम् ।
वरमैच्छद्दृशोरेव निजयोरपकर्षणम् ॥१९१॥
अद्राक्षीत्तत्र किंचिन्न कलिः परिचितं क्वचित् ।
भैमीनलव्यलीकाग्रप्रश्नकामः परिभ्रमन् ॥१९२॥
तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः ।
स्वत्रिद्विषां श्रियं तस्मिन्पश्यन्नुपतताप सः ॥१९३॥
कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान् ।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकम् ॥१९४॥
वैरिणो शुचिता तस्मै न प्रवेशं ददौ भुवि ।
न वेदध्वनिरालम्बमम्बरे विततार वा ॥१९५॥
दर्शस्य दर्शनात्कष्टमग्निष्टोमस्य चानशे ।
जुघूर्णे पौर्णमासेक्षी सोमं सोऽमन्यतान्तकम् ॥१९६॥
तेनादृश्यन्त वीरघ्ना न तु वीरहणो जनाः ।
नापश्यत्सोऽभिनिर्मुक्ताञ्जीवन्मुक्तानवैक्षत ॥१९७॥
स तुतोषाशनतो विप्रान्दृष्ट्वा स्पृष्टपरस्परान् ।
होमशेषोभवत्सोमभुजस्तान्वीक्ष्य दूनवान् ॥१९८॥
श्रुत्वा जनं रजोजुष्टं तुष्टिं प्राप्नोज्झटित्यसौ ।
तं पश्यन्पावनस्नानावस्थं दुःस्थस्ततोऽभवत् ॥१९९॥
अधावत्क्वापि गां वीक्ष्य हन्यमानामयं मुदा ।
अतिथिभ्यस्तथा बुद्ध्वा मन्दो मन्दं न्यवर्तत ॥२००॥
हृष्टवान्स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजम् ।
यजमानं निरूप्यैनं दूरं दीनमुखोऽद्रवत् ॥२०१॥
आननन्द निरीक्ष्यायं पुरे तत्रात्मघातिनम् ।
सर्वस्वारस्य यज्वानमेनं दृष्ट्वाथ विव्यथे ॥२०२॥
क्रतौ महाव्रते पश्यन्ब्रह्मचारीत्वरीरतम् ।
जज्ञे यज्ञक्रियामज्ञः स भण्डाकाण्डताण्डवम् ॥२०३॥

यज्वभार्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गताम् ।
दृष्ट्वाचष्ट स कर्तारं श्रुतेर्भण्डमपण्डितः ॥२०४॥
अथ भीमजया जुष्टं व्यलोकत कलिर्नलम् ।
दुष्टदृग्भिदुरालोकं प्रभयेव प्रभाप्रभुम् ॥२०५॥
तयोः सौहार्दसान्द्रत्वं पश्यन् शल्यमिवानशे ।
मर्मच्छेदमिवानर्च्छ स तन्नर्मोर्मिभिर्मिथः ॥२०६॥
अमर्षादात्मनो दोषात्तयोस्तेजस्वितागुणात् ।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत्कलिः ॥२०७॥
अगच्छदाश्रयान्वेषी नलद्वेषी स निःश्वसन् ।
अभिरामं गृहारामं तस्य रामसमश्रियः ॥२०८॥
रक्षिलक्षवृतत्वेन बाधनं न तपोधनैः ।
मेने मानो मनाक्तत्र स्वानुकूलं कलिः किल ॥२०९॥
दलपुष्पफलैर्देवद्विजपूजाभिसंधिना ।
स नलेनार्जितान्प्राप तत्र नाक्रमितुं द्रुमान् ॥२१०॥
अथ सर्वोद्भिदासक्तिपूरणाय स रोपितम् ।
बिभीतकं ददर्शैकं कुटं धर्मेऽप्यकर्मठम् ॥२११॥
स तं नैषधसौधस्य निकटं निष्कुटध्वजम् ।
बहु मेने निजं तस्मिन्कलिरालम्बनं वने ॥२१२॥
निष्पदस्य कलेस्तत्र स्थानदानाद्बिभीतकम् ।
कलिद्रुमः परं नासीदासीत्कल्पद्रुमोऽपि सः ॥२१३॥
ददौ पदेन धर्मस्य स्थातुमेकेन यत्कलिः ।
एकः सोऽपि तदा तस्य पदं मन्येऽमिलत्ततः ॥२१४॥
उद्भिद्भिरचितावासः कपोतादिव तत्र सः ।
राज्ञः साग्नेर्द्विजादस्मात्संत्रासं प्राप दीक्षितात् ॥२१५॥
बिभीतकमधिष्ठाय तथाभूतेन तिष्ठता ।
तेन भीमभुवोऽभीकः स राजर्षिरधर्षि न ॥२१६॥

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः ।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान्बहून् ॥२१७॥
यथासीत्कानने तत्र विनिद्रकलिका लता ।
तथा नलच्छलासक्तिविनिद्रकलिकालता ॥२१८॥
दोषं नलस्य जिज्ञासुर्बभ्राम द्वापरः क्षितौ ।
अदोषः कोऽपि लोकस्य मुखेऽस्तीति दुराशया ॥२१९॥
अमुष्मिन्नारामे सततनिपतद्दोहदतया
प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
असौ बद्धालम्बः कलिरजनि कादम्बविहग-
च्छदच्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥२२०॥
स्फारे तादृशि वीरसेनिनगरे पुण्यैः प्रजानां घनं
विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन्किलाभूत्कलेः ।
एतस्मिन्पुनरन्तरेऽन्तरमिलानन्दः स भैमीनला-
वाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥२२१॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातः सप्तदशः स्वसुः सुसदृशि छिन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥२२२॥

॥ इति महाकविहर्षविरचिते नैषधीयप्रकाशे
सप्तदशः सर्गः समाप्तः ॥ १७ ॥

## ॥ १८ ॥ अष्टादशः सर्गः ॥

सोऽयमित्थमथ भीमनन्दिनीं दारसारमधिगम्य नैषधः ।
तां तृतीयपुरुषार्थवारिधेः पारलम्भनतरीमरीरमत् ॥ १ ॥
आत्मवित्सह तया दिवानिशं भोगभागपि न पापमाप सः ।
आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति ॥२॥

न्यस्य मन्त्रिषु स राज्यमादरादारराध मदनं प्रियासखः ।
नैकवर्णमणिकोटिकुट्टिमे हेमभूमिभृति सौधभूधरे ॥ ३ ॥
वीरसेनसुतकण्ठभूषणीभूतदिव्यमणिपङ्क्तिशक्तिभिः ।
कामनोपनमदर्थतागुणाद्यस्तृणीकृतसुपर्वपर्वतः ॥ ४ ॥
धूपितं यदुदरान्तरं चिरं मेचकागरुसारदारुभिः ।
जालजालधृतचन्द्रचन्दनक्षोदमेदुरसमीरशीतलम् ॥ ५ ॥
क्वापि कामशरवृत्तवर्तयो यं महासुरभितैलदीपिकाः ।
तेनिरे वितिमिरं स्मरस्फुरद्दोःप्रतापनिकराङ्कुरश्रियः ॥६॥
कुङ्कुमैणमदपङ्कलेपिताः क्षालिताश्च हिमवालुकाम्बुभिः ।
रेजुरध्वततशैलजस्रजो यस्य मुग्धमणिकुट्टिमा भुवः ॥ ७ ॥
नैषधाङ्गपरिमर्दमेदुरामोदमार्दवमनोज्ञवर्णया ।
यद्भुवः क्वचन सूनशय्ययाभाजि भालतिलकप्रगल्भता ॥८॥
क्वापि यन्निकटनिष्कुटस्फुटत्कोरकप्रकरसौरभोर्मिभिः ।
सान्द्रमाद्रियत भीमनन्दनानासिकापुटकुटीकुटुम्बिता ॥ ९ ॥
ऋद्धसर्वऋतुवृक्षवाटिकाकीरकृत्तसहकारशीकरैः ।
यज्जुषः स्म कुलमुख्यमाशुगः प्राणवालमुपदाभिरञ्चति ॥१०॥

कुत्रचित्कनकनिर्मिताखिलः
क्वापि यो विमलरत्नजः किल ।
कुत्रचिद्रचितचित्रशालिकः
क्वापि चास्थिरविधेन्द्रजालिकः ॥ ११ ॥
चित्रतत्तदनुकार्यविभ्रमा-
धाय्यनेकविधरूपरूपकम् ।
वीक्ष्य यं बहु धुवन् शिरो जरा-
वातकी विधिरकल्पि शिल्पिराट् ॥ १२ ॥
भित्तिगर्भगृहगोपितैर्जनै-
र्यः कृताद्भुतकथादिकौतुकः ।

सूत्रयन्त्रजविशिष्टचेष्टया-
श्चर्यसञ्जिबहुशालभञ्जिकः ॥ १३ ॥
तामसीष्वपि तमीषु मित्तिगै-
रत्नरश्मिभिरमन्दचन्द्रिकः ।
यस्तपेऽपि जलयन्त्रधातुका-
सारदूरधुततापतन्द्रिकः ॥ १४ ॥

यत्र पुष्पशरशास्त्रकारिकासारिकाध्युषितनागदन्तिका ।
भीमजानिषधसार्वभौमयोः प्रत्यवैक्षत रते कृताकृते ॥ १५ ॥

यत्र मत्तकलविङ्कशीलिता-
श्लीलकेलिपुनरुक्तवत्तयोः ।
क्वापि दृष्टिभिरवापि वापिको-
त्तंसहंसमिथुनस्मरोत्सवः ॥ १६ ॥
यत्र वैणरववैणवस्वरै-
र्हुंकृतैरुपवनीपिकालिनाम् ।
कङ्कणालिकलहैश्च नृत्यतां
कुब्जितं सुरतकूजितं तयोः ॥ १७ ॥
सीत्कृतान्यशृणुतां विशङ्कयो-
र्यत्प्रतिष्ठितरतिस्मरार्चयोः ।
जालकैरपवरान्तरेऽपि तौ
त्याजितैः कपटकुड्यतां निशि ॥ १८ ॥
कृष्णसारमृगशृङ्गभङ्गुरा
स्वादुरुज्ज्वलरसैकसारिणी ।
नानिशं त्रुटति यन्मुखे पुरा
किन्नरीविकटगीतिझंकृतिः ॥ १९ ॥

भित्तिचित्रलिखिताखिलक्रमा यत्र तस्थुरितिहाससंकथाः ।
पद्मनन्दनसुतारिरंसुतामन्दसाहसहसन्मनोभुवः ॥ २० ॥

पुष्पकाण्डजयडिण्डिमायितं यत्र गौतमकलत्रकामिनः ।
पारदारिकविलाससाहसं देवभर्तुरुदटङ्कि भित्तिषु ॥ २१ ॥

उच्चलत्कलरवालिकैतवा-
द्वैजयन्तविजयाजिता जगत् ।
यस्य कीर्तिरवदायति स्म सा
कार्तिकीतिथिनिशीथिनीस्वसा ॥ २२ ॥

गौरभानुगुरुगेहिनीस्मरो-
द्वृत्तभावमितिद्वृत्तमाश्रिताः ।
रेजिरे यदजिरेऽभिनीतिभि-
र्नाटिका भरतभारतीसुधा ॥ २३ ॥

शंभुदारुवतसंभुजिक्रियामाधरव्रजवधूविलासयोः ।
गुम्फितैरुशनसा सुभाषितैर्यस्य हाटकविटङ्कमङ्कितम् ॥२४॥

अह्नि भानुभुवि दाशदारिकां
यच्चरः परिचरन्तमुज्जगौ ।
कालदेशविषयासहात्स्मरा-
दुत्सुकं शुकपितामहं शुकः ॥ २५ ॥

नीतमेव करलभ्यपारता-
मप्रतीर्य मुनयस्तपोर्णवम् ।
अप्सरःकुचघटावलम्बनात्
स्थायिनः क्वचन यत्र चित्रगाः ॥ २६ ॥

स्वामिना च वहता च तं मया
स स्मरः सुरतवर्जनाज्जितः ।
योऽयमीदृगिति नृत्यते स्म यत्
केकिना मुरजनिस्वनैर्घनैः ॥ २७ ॥

यत्र वीक्ष्य नलभीमसंभवे मुह्यतो रतिरतीशयोरपि ।
स्पर्धयेव जयतोर्जयाय ते कामकामरमणीबभूवतुः ॥ २८ ॥

तत्र सौधसुरभूधरे ययो-
राबिरासुरथ कामकेलय: ।
ये महाकविभिरप्यवीक्षिता:
पांसुलाभिरपि ये न शिक्षिता: ॥ २९ ॥

पौरुषं दधति योषिता नले
स्वामिनि श्रिततदीयभावया ।
यूनि शैशवमतीर्णया कियत्
प्रापिभीममुतया न साध्वसम् ॥ ३० ॥

दूत्यसंगतिगतं यदात्मन:
प्रागशिश्रवदियं प्रियं गिर: ।
तं विचिन्त्य विनयव्ययं ह्रिया
न स्म वेद करवाणि कीदृशम् ॥ ३१ ॥

यत्तया सदसि नैषध: स्वयं
प्राग्वृत: सपदि वीतलज्जया ।
तन्निजं मनसिकृत्य चापलं
सा शशाक न विलोकितुं नलम् ॥ ३२ ॥

आसने मणिमरीचिमांसले
यां दिशं स परिरभ्य तस्थिवान् ।
तामसूयितवतीव मानिनी
न व्यलोकयदियं मनागपि ॥३३॥

ह्रीसरिन्निजनिमज्जनोचितं
मौलिदूरनमनं दधानया ।
द्वारि चित्रयुवतिश्रिया
तया भर्तृहूतिशतमश्रुतीकृतम् ॥३४॥

वेश्म पत्युरविशन्न साध्वसा-
द्वेशितापि शयनं न साऽभजत् ।

भाजितापि सविधं न सास्वपत्
स्वापितापि न च संमुखाभवत् ॥३५॥
केवलं न खलु भीमनन्दिनी
दूरमत्रपत नैषधं प्रति ।
भीमजाहृदि जितः स्त्रिया ह्रिया
मन्मथोऽपि नियतं स लज्जितः ॥३६॥
आत्मनापि हरदारसुन्दरी
यत्किमप्यभिललाष चेष्टितुम् ।
स्वामिना यदि तदर्थमर्थिता
मुद्रितस्तदनया तदुद्यमः ॥३७॥
ह्रीभराद्विमुखया तया भियं
सञ्जितामननुरागशङ्किनि ।
स स्वचेतसि लुलोप संस्मर-
न्दूत्यकालकलितं तदाशयम् ॥३८॥
पार्श्वमागमि निजं सहालिभि-
स्तेन पूर्वमथ सा तयैकया ।
क्वापि तामपि नियुज्य मायिना
स्वात्ममात्रसचिवावशेषिता ॥३९॥
संनिधावपि निजे निवेशिता-
मालिभिः कुसुमशस्त्रशास्त्रवित् ।
आनयद्द्व्यवधिमानिव प्रिया-
मङ्कपालिवलयेन संनिधिम् ॥४०॥
प्रागचुम्बदलिके ह्रियानतां
तां क्रमाद्रहनतां कपोलयोः ।
तेन विश्वसितमानसां झटि-
त्यानने स परिचुम्ब्य सिष्मिये ॥४१॥

लज्जया प्रथममेत्य हुंकृतः
साध्वसेन बलिनाथ तर्जितः ।
किंचिदुच्छ्वसित एव तद्धृदि
न्यग्बभूव पुनरर्भकः स्मरः ॥४२॥
वल्लभस्य भुजयोः स्मरोत्सवे
दित्सतोः प्रसभमङ्कपालिकाम् ।
एककश्चिरमरोधि बालया
तल्पयन्त्रणनिरन्तरालया ॥ ४३ ॥
हारचारिमविलोकने मृषाकौतुकं किमपि नाटयन्नयम् ।
कण्ठमूलमदसीयमस्पृशत्पाणिनोपकुचधाविना धवः ॥ ४४ ॥
यत्त्वयास्मि सदसि स्रजाञ्चितस्तन्मयापि भवदर्हणार्हति ।
इत्युदीर्य निजहारमर्पयन्नस्पृशत्स तदुरोजकोरकौ ॥ ४५ ॥
नीविसीम्नि निहितं स निद्रया सुभ्रुवो निशि निषिद्धसंविदः ।
कम्पितं शयमपास यन्नयं दोलनैर्जनितबोधयाऽनया ॥ ४६ ॥
स प्रियोरुयुगकञ्चुकांशुके न्यस्य दृष्टिमथ सिष्मिये नृपः ।
आववार तदथाम्बराञ्चलैः सा निरावृतिरिव त्रपावृता ॥४७॥
बुद्धिमान्व्यधित तां क्रमादयं
किंचिदित्थमपनीतसाध्वसाम् ।
किंच तन्मनसि चित्तजन्मना
ह्रीरनामि धनुषा समं मनाक् ॥ ४८ ॥
सिष्मिये हसति न स्म तेन सा
प्रीणितापि परिहासभाषणैः ।
स्वे हि दर्शयति ते परेण का-
नध्यंदन्तकुरुविन्दमालिके ॥ ४९ ॥
वीक्ष्य भीमतनयास्तनद्वयं
मग्नहारमणिमुद्रयाङ्कितम् ।

सोढकान्तपरिरम्भगाढता
सान्वमायि सुमुखी सखीजनैः ॥ ५० ॥
याचते स्म परिधापिका सखीः
सा स्वनीविनिबिडक्रियां यदा ।
अन्वमिन्वत तदा विहस्य ता
वृत्तमत्र पतिपाणिचापलम् ॥ ५१ ॥
कुर्वती निचुलितं ह्रिया कियत्
सौहृदाद्विवृतसौरभं कियत् ।
कुड्मलोन्मिषितसूनसेविनीं
पद्मिनीं जयति सा स्म पद्मिनी ॥ ५२ ॥
नाविलोक्य नलमासितुं स्मरो
ह्रीर्न वीक्षितुमदत्त सुभ्रुवः ।
तद्दृशः पतिदिशाचलन्नथ
व्रीडिताः समकुचन्मुहुः पथः ॥ ५३ ॥
नानया पतिरनायि नेत्रयोर्लक्ष्यतामपि परोक्षतामपि ।
वीक्ष्यते स खलु यद्विलोकने तत्र तत्र नयने ददानया ॥ ५४ ॥
वासरे विरहनिःसहा निशां
कान्तसङ्गसमयं समैहत ।
सा ह्रिया निशि पुनर्दिनोदयं
वाञ्छति स्म पतिकेलिलज्जिता ॥ ५५ ॥
तत्करोमि परमभ्युपैषि यन्मा ह्रियं व्रज भियं परित्यज ।
आलिवर्ग इव तेऽहमित्यमूं शश्वदाश्वसनमूचिवान्नलः ॥ ५६ ॥
येन तन्मदनवह्निना स्थितं ह्रीमहौषधिनिरुद्धशक्तिना ।
सिद्धिमद्भिरुदतेजि तैः पुनः स प्रियप्रियवचोभिमन्त्रणैः ॥५७॥
यद्विधूय दयितार्पितं करं
दोर्द्वयेन पिदधे कुचौ दृढम् ।

पार्श्वगं प्रियमपास्य सा ह्रिया
　　तं हृदिस्थितमिवालिलिङ्ग तत् ॥ ५८ ॥
अन्यदस्मि भवतीं न याचिता वारमेकमधरं धयामि ते ।
इत्यसिस्वददुपांशुकाकुवाक्सोपमर्दहठवृत्तिरेव तम् ॥ ५९ ॥
पीततावकमुखासवोऽधुना भृत्य एव निजकृत्यमर्हति ।
तत्करोमि भवदूरुमित्यसौ तत्र संन्यधित पाणिपल्लवम् ॥६०॥
चुम्बनादिषु बभूव नाम किं तद्वृथा भियमिहापि मा कृथाः ।
इत्युदीर्य रसनावलिव्ययं निर्ममे मृगदृशोऽयमादिमम् ॥६१॥
अस्तिवाम्यभरमस्तिकौतुकं
　　सास्तिघर्मजलमस्तिवेपथु ।
अस्तिभीति रतमस्तिवाञ्छितं
　　प्रापदस्तिसुखमस्तिपीडनम् ॥ ६२ ॥
ह्रीस्तवेयमुचितैव यन्नवस्तावके मनसि मत्समागमः ।
तत्तु निस्त्रपमजस्रसंगमाद्व्रीडमावहति मामकं मनः ॥६३॥
इत्युपालभत संभुजिक्रिया-
　　रम्भविघ्नघनलज्जितर्जिताम् ।
तां तथा स चतुरोऽथ सा यथा
　　त्रप्तुमेव तमनु त्रपामयात् ॥ ६४ ॥
बाहुवक्षजघनस्तनाङ्घ्रितद्व-
　　न्धगन्धरतसंगतानतीः ।
इच्छुरुत्सुकजने दिनेऽस्मि ते
　　वीक्षितेति समकेति तेन सा ॥ ६५ ॥
प्रातरात्मशयनाद्विनिर्यतीं
　　संनिरुध्य यदसाध्यमन्यदा ।
तन्मुखार्पणमुखं सुखं भुवो
　　जम्भजिद्दिक्षतिशचीमचीकरत् ॥ ६६ ॥

नायकस्य शयनादहमुखे
निर्गता मुदमुदीक्ष्य सुभ्रुवाम् ।
आत्मना निजनवस्मरोत्सव-
स्मारिणीयमह्णीयत स्वयम् ॥ ६७ ॥

तां मिथोऽभिदधतीं सखीं प्रिय-
स्यात्मनश्च स निशाविचेष्टितम् ।
पार्श्वग: सुरवरातिपिधां दधद्
दृश्यतां श्रुतकथो हसन्गत: ॥ ६८ ॥

चक्रदारविरहेक्षणक्षणे बिभ्यती धवहसाय साभवत् ।
क्वापि वस्तुनि वदत्यनागतं चित्तमुद्यदनिमित्तवैकृतम् ॥६९॥

चुम्बितं न मुखमाचकर्ष यत्
पत्युरन्तरमृतं ववर्ष तत् ।
सा नुनोद न भुजं तदर्पितं
तेन तस्य किमभून्न तर्पितम् ॥ ७० ॥

नीतयो: स्तनपिधानतां तथा दातुमाप भुजयो: करं परम् ।
वीतबाहुनि ततो हृदंशुके केवलेऽप्यथ स तत्कुचद्वये ॥ ७१ ॥
याचनान्न ददतीं नखक्षतं तां विधाय कथयाऽन्यचेतसम् ।
वक्षसि न्यसितुमात्ततत्कर: स्वं विभिद्य मुमुदे स तन्नखै: ॥७२॥
स प्रसह्य हृदयापवारकं हर्तुमक्षमत सुभ्रुवो बहि: ।
ह्रीमयं तु न तदीयमान्तरं तद्विनेतुमभवत्प्रभु: प्रभु: ॥ ७३ ॥
सा स्मरेण बलिनाऽप्यहापिता ह्रीक्षमे भृशमशोभताबला ।
भाति चापि वसनं विना ननु व्रीडधैर्यपरिवर्जनैर्जन: ॥ ७४ ॥
आत्थ नेति रतयाचिनं न यन्मामतोऽनुमतवत्यसि स्फुटम् ।
इत्यमुं तदभिलापनोत्सुकं धूनितेन शिरसा निरास सा ॥७५॥

या शिरोविधुतिराह नेति ते
सा मया न किमियं समाकलि ।

तन्निषेधसमसंख्यता विधि
व्यक्तमेव तव वक्ति वाञ्छितम् ॥ ७६ ॥
नात्थ नात्थ शृणवानि ते न कि
तेन वाचमिति तां निगद्य सः ।
सा स्म दूत्यगतमाह तं यथा
तज्जगाद मृदुभिस्तदुक्तिभिः ॥ ७७ ॥
नीविसीम्नि निबिडं पुराऽरुणत्
पाणिनाऽथ शिथिलेन तत्करम् ।
सा क्रमेण न-न-नेतिवादिनी
विघ्नमाचरदमुष्य केवलम् ॥ ७८ ॥
रूपवेषवसनाङ्गवासनाभूषणादिषु पृथग्विदग्धताम् ।
सान्यदिव्ययुवतिभ्रमक्षमां नित्यमेत्य तमगान्नवा नवा ॥७९॥
इङ्गितेन निजरागनीरधि
संविभाव्य चटुभिर्गुणज्ञताम् ।
भक्ततां च परिचर्ययानिशं
साधिकाधिकवशं व्यधत्त तम् ॥ ८० ॥
स्वाङ्गमर्पयितुमेत्य वामतां रोषितं प्रियमथानुनीय सा ।
आतदीयहठसंबुभुक्षुतां नान्वमन्यत पुनस्तमर्थिनम् ॥ ८१ ॥
आद्यसंगमसमादराण्यघाद्वल्लभाय ददती कथंचन ।
अङ्गकानि घनमानवामताव्रीडलम्भितदुरापतानि सा ॥८२॥
पत्युरागिरिशमातरु क्रमात्
स्वस्य चागिरिजमालतं वपुः ।
तस्य चाहमखिलं पतिव्रता
क्रीडति स्म तपसा विधाय सा ॥ ८३ ॥
न स्थली न जलधिर्न काननं
नाद्रिभूर्न विषयो न विष्टपम् ।

क्रीडिता न सह यत्र तेन सा
सा विधैव न यया यया न वा ॥ ८४ ॥
नम्रयांशुकविकर्षिणि प्रिये
वक्त्रवातहृतदीप्तदीपया ।
भर्तृमौलिमणिदीपितास्तया
विस्मयेन ककुभो निभालिताः ॥ ८५ ॥
कान्तमूर्ध्नि दधती पिधित्सया तन्मणेः श्रवणपूरमुत्पलम् ।
रन्तुमर्चनमिवाचरत्पुरः सा स्ववल्लभतनोर्मनोभुवः ॥ ८६ ॥
तं पिधाय मुदिताथ पार्श्वयोर्वीक्ष्य दीपमुभयत्र सा स्वयोः ।
चित्तमाप कुतुकाद्भुतत्रपातङ्कसंकटनिवेशितस्मरम् ॥ ८७ ॥
एककस्य शमने परं पुन-
र्जाग्रतं शमितमप्यवेक्ष्य तम् ।
जातवह्निवरसंस्मृतिः शिरः
सा विधूय निमिमील केवलम् ॥ ८८ ॥
पश्य भीरु ! न मयापि दृश्यसे
यन्निमीलितवती दृशावसि ।
इत्यनेन परिहस्य सा तमः
संविधाय समभोजि लज्जिता ॥ ८९ ॥
चुम्ब्यसेऽयमयमङ्क्ष्यसे नखैः
श्लिष्यसेऽयमयमर्प्यसे हृदि ।
नो पुनर्न करवाणि ते गिरं
हुं त्यज त्यज इवास्मि किंकरा ॥ ९० ॥
इत्यलीकरतकातरा प्रियं
विप्रलभ्य सुरते ह्रियं च सा ।
चुम्बनादि विततार मायिनी
किं विदग्धमनसामगोचरः ॥ ९१ ॥ युग्मम्

स्वेप्सितोद्गमितमात्रलुप्तया दीपिकाचपलया तमोघने ।
निर्विशङ्करतजन्मतन्मुखाकूतदनसुर्शखान्यभुङ्क्त सः ॥ ९२ ॥

यद्भ्रुवौ कुटिलिते तया रते
मन्मथेन तदनामि कामुकम् ।
यत्तु हुंहुमिति सा तदा व्यधात्
तत्स्मरस्य शरमुक्तिहुंकृतम् ॥ ९३ ॥

ईक्षितीपदिशतीव नर्मितुं तत्क्षणोदितमुदं मनोभुवम् ।
कान्तदन्तपरिपीडिताधरा पाणिधूननमियं वितन्वती ॥९४॥
सा शशाक परिरम्भदायिनी गाहितुं बृहदुरः प्रियस्य न ।
चक्षमे च स न भङ्गुरभ्रुवस्तुङ्गपीनकुचदूरतां गतम् ॥९५॥
बाहुवल्लिपरिरम्भमण्डली या परस्परमपीड्यत्तयोः ।
आस्त हेमनलिनीमृणालजः पाश एव हृदयेशयस्य सः ॥९६॥
वल्लभेन परिरम्भपीडितौ प्रेयसीहृदि कुचाववापतुः ।
केलतोमदनयोरुपाश्रये तत्र वृत्तमिलितोपधाननाम् ॥ ९७ ॥
भीमजोरुयुगलं नलार्पितैः पाणिजस्य मृदुभिः पदैर्बभौ ।
तत्प्रशस्ति रतिकामयोर्जयस्तम्भयुग्ममिव शातकुम्भजम् ॥९८॥
बह्वमानि विधिनापि तावकं नाभिमूरुयुगमन्तराङ्कम् ।
स व्यधादधिकवर्णकैरिदं काञ्चनैर्यदिति तां पुराह सः ॥९९॥
पीडनाय मृदुनी विगाह्य तौ कान्तपाणिनलिने स्पृहावती ।
तत्कुचौ कलशपीननिष्ठुरौ हारहासविहते वितेनतुः ॥१००॥

यौ कुरङ्गमदकुङ्कुमाञ्चितौ
नीललोहितरुचौ वधूकुचौ ।
स प्रियोरसि तयोः स्वयंभुवो-
राचचार नखकिंशुकार्चनम् ॥१०१॥

अम्बुधेः कियदनुत्थितं विधुं स्वान्तबिम्बमिलितं व्यडम्बयत् ।

पूगभागबहुताकषायितैर्वासितैरुदयभास्करेण तौ ।
चक्रतुर्निभुवनेऽधरामृतैस्तत्र साधु मधुपानविभ्रमम् ॥१०३॥
आह नाथवदनस्य चुम्बतः सा स्म शीतकरतामनक्षरम् ।
सीत्कृतानि सुदती वितन्वती सत्त्वदत्तपृथुवेपथुस्तदा ॥१०४॥

चुम्बनाय कलितप्रियाकुचं
वीरसेनसुतवक्त्रमण्डलम् ।
प्राप भर्तुममृतैः सुधांशुना
सक्तहाटकघटेन मित्रताम् ॥१०५॥
वीक्ष्य वीक्ष्य पुनरैक्षि सा मुदा
पर्यरम्भि परिरभ्य चासकृत् ।
चुम्बिता पुनरचुम्बि चादरा
त्तृप्तिरापि न कथंचनापि च ॥१०६॥
छिन्नमप्यतनु हारमण्डलं
मुग्धया सुरतलास्यकेलिभिः ।
न व्यतर्कि सुदृशा चिरादपि
स्वेदबिन्दुकितवक्षसा हृदि ॥१०७॥
यत्तदीयहृदि हारमौक्तिकै-
रासि तत्र गुण एव कारणम् ।
अन्यथा कथममुत्र वर्तितुं
तैरशाकि न तदा गुणच्युतैः ॥१०८॥
एकवृत्तिरपि मौक्तिकावलि-
श्छिन्नहारवितती तदा तयोः ।
छाययाऽन्यहृदये विभूषणं
भ्रान्तिवारिभरभावितेऽभवत् ॥१०९॥
वामपादतललुप्तमन्मथ-
श्रीमदेन मुखवीक्षणानिशम् ।

भुज्यमाननवयौवनामुना
पारसीमनि चचार सा मुदाम् ॥११०॥
आन्तरानपि तदङ्गसंगमैस्तर्पितानवयवानमन्यत ।
नेत्रयोरमृतसारपारणां तद्विलोकनमचिन्तयन्नलः ॥१११॥
भूषणैरतुषदाश्रितैः प्रियां प्रागथ व्यषददेष भावयन् ।
तैरभावि कियदङ्गदर्शने यत्पिधानमयविघ्नकारिभिः ॥११२॥
योजनानि परिरम्भणेऽन्तरं
रोमहर्षजमपि स्म बोधतः ।
तौ निमेषमपि वीक्षणे मिथो
वत्सरव्यवधिमध्यगच्छताम् ॥११३॥
वीक्ष्य भावमधिगन्तुमुत्सुकां
पूर्वमच्छमणिकुट्टिमे मृदुम् ।
कोऽयमित्युदितसंभ्रमीकृतां
स्वानुबिम्बमददर्शतैष ताम् ॥११४॥
तत्क्षणावहितभावभावित-
द्वादशात्मसितदीधितिस्थितिः ।
स्वां प्रियामभिमतक्षणोदयां
भावलाभलघुतां नुनोद सः ॥११५॥
स्वेन भावजनने स तु प्रियां बाहुमूलकुचनाभिचुम्बनैः ।
निर्ममे रतरहःसमापनाशर्मसारसमसंविभागिनीम् ॥११६॥
विश्लथैरवयवैर्निमीलया
लोमभिर्द्रुतमितैर्विनिद्रताम् ।
सूचितं श्वसितसीत्कृतैश्च तौ
भावमक्रमकमध्यगच्छताम् ॥११७॥
आस्त भावमधिगच्छतोस्तयोः
संमदेषु करजक्षतार्पणा ।

फाणितेषु मरिचावचूर्णना
सा स्फुटं कटुरपि स्पृहावहा ॥११८॥
अर्धमीलितविलोलतारके सा दृशौ निधुवनक्लमालसा ।
यन्मुहूर्तमवहन्न तत्पुनस्तृप्तिरास्त दयितस्य पश्यतः ॥११९॥
तत्क्लमस्तमदिदीक्षत क्षणं
तालवृन्तचलनाय नायकम् ।
तद्विधा हि भवदैवतं प्रिया
वेधसोऽपि विदधाति चापलम् ॥१२०॥
स्वेदबिन्दुकितनासिकाशिखं तन्मुखं सुखयति स्म नैषधम् ।
प्रोषिताधरशयालुयावकं सामिलुप्तपुलकं कपोलयोः ॥१२१॥
ह्रीणमेव पृथु सस्मरं कियत्क्लान्तमेव बहु निर्वृतं मनाक् ।
कान्तचेतसि तदीयमाननं तत्तदालभत लक्ष्मादरात् ॥१२२॥
स्वेदवारिपरिपूरितं प्रियारोमकूपनिवहं यथा यथा ।
नैषधस्य दृगपात्तथा तथा चित्रमापदपतृष्णतां न सा ॥१२३॥
वीतमाल्यकचहस्तसंयम-
व्यस्तहस्तयुगया स्फुटीकृतम् ।
बाहुमूलमनया तदुज्ज्वलं
वीक्ष्य सौख्यजलधौ ममज्ज सः ॥१२४॥
वीक्ष्य पत्युरधरं कृशोदरी
बन्धुजीवमिव भृङ्गसंगतम् ।
मञ्जुलं नयनकज्जलैर्निजैः
संवरीतुमशकत्स्मित न सा ॥१२५॥
तां विलोक्य विमुखश्रितस्मितां पृच्छतो हसितहेतुमीशितुः ।
ह्रीमती व्यतरदुत्तरं वधूः पाणिपङ्करुहि दर्पणार्पणाम् ।१२६।
लाक्षयात्मचरणस्य चुम्बना-
चारुभालमवलोक्य तन्मुखम् ।

सा ह्रिया नतनताननाऽस्मर-
च्छेषरागमुदितं पतिं निशः ॥१२७॥
स्वेदभाजि हृदयेऽनुबिम्बितं वीक्ष्य मूर्तमिव हृद्गतं प्रियम् ।
निर्ममे धुतरतश्रमं निजैर्ह्लीनतातिमृदुनासिकानिलैः ॥१२८॥
सूतनायकनिदेशविभ्रमै-
रप्रतीतचरवेदनोदयम् ।
दन्तदंशमधरेऽधिगामुका
साऽस्पृशन्मृदु चमच्चकार च ॥१२९॥
वीक्ष्य वीक्ष्य करजस्य विभ्रमं
प्रेयसार्जितमुरोजयोरियम् ।
कान्तमैक्षत हसस्पृशं कियत्
कोप कुञ्चितविलोचनाञ्चला ॥१३०॥
रोषरूषितमुखीमिव प्रियां
वीक्ष्य भीतिदरकम्पिताक्षराम् ।
तां जगाद स न वेद्मि तन्वि !
तं कश्चकार तव कोपरोपणाम् ॥१३१॥
रोपकुङ्कुमविलेपनान्मनाङ्नन्ववाचि कृशतन्ववाचि ते ।
भूदयुक्तसमयैव रञ्जना मानने विधुविधेयमानने ॥१३२॥
क्षिप्रमस्य तु रुजा नखादिजास्तावकीरमृतसीकरं किरत् ।
एतदर्थमिदमर्थितं मया कण्ठचुम्बि मणिदाम कामदम् ॥१३३॥
स्वापराधमलुपत्पयोधरे मत्करः सुरधनुष्करस्तत्र ।
सेवया व्यजनचालनाभुवा भूय एव चरणौ करोतु वा ॥१३४॥
आननस्य मम चेदनौचिती
निर्दयं दशनदंशदायिनः ।
शोध्यते सुदति ! वैरमस्य तत्
किं त्वया वद विदश्य नाधरम् ॥१३५॥

दीपलोपमफलं व्यधत्त यस्त्वत्पटाहृतिषु मच्छिखामणिः ।
नो तदागसि परं समर्थना सोऽयमस्तु पदपातुकस्तव ॥१३६॥
इत्थमुक्तिमुपहृत्य कोमलां
तल्पचुम्बिचिकुरश्चकार सः ।
आत्ममौलिमणिकान्तिभङ्गिनीं
तत्पदारुणसरोजसङ्गिनीम् ॥१३७॥
तत्पदाखिलनखानुबिम्बनैः स्वैः समेत्य समतामियाय सः ।
रुद्रभूमविजिगीषया रतिस्वामिनोपदशमूर्तिताभृता ॥१३८॥
आख्यतैष कुरु कोपलोपनं पश्य नश्यति कृशा मधोर्निशा ।
एतमेव तु निशान्तरे वरं रोषशेषमनुरोत्स्यसि क्षणम् ।१३९।
साथ नाथमनयत्कृतार्थतां पाणिगोपितनिजाङ्घ्रिपङ्कजा ।
तत्प्रणामधुतमानमाननं स्मेरमेव सुदती वितन्वती ॥१४०॥
तौ मिथो रतिरसायनात्पुनः संबुभुक्षुमनसौ बभूवतुः ।
चक्षमे नतु तयोर्मनोरथं दुर्जनी रजनिरल्पजीवना ॥१४१॥
स्वप्तुमाप्तशयनीययोस्तयोः स्वैरमाख्यत वचः प्रियां प्रियः ।
उत्सवैरधरदानपानजैः सान्तरायपदमन्तरान्तरा ॥१४२॥
देवदूत्यमुपगम्य निर्दयं
धर्मभीतिकृततादृशागसः ।
अस्तु सेयमपराधमार्जना
जीवितावधि नलस्य वश्यता ॥१४३॥
स क्षणः सुमुखि ! यत्त्वदीक्षणं तच्च राज्यमुरु येन रज्यसि ।
तन्नलस्य सुधयाभिषेचनं यत्त्वदङ्गपरिरम्भविभ्रमः ॥१४४॥
शर्म किं हृदि हरेः प्रियार्पणं
किं शिवार्धघटनं शिवस्य वा ।
कामये तव महेषु तन्वि ! तं
नन्वयं सरिदुदन्वदन्वयम् ॥१४५॥

धीयतां मयि दृढा ममेति धीर्वक्तुमेवमवकाश एव कः ।
यद्विधूय तृणवद्दिवस्पतिं क्रीतवत्यसि दयापणेन माम् ।१४६।

शृण्वता निभृतमालिभिर्भव-
द्वाग्विलासमसकृन्मया किल ।
मोघराघवविवर्ज्यजानकी-
श्राविणी भयचलासि वीक्षिता ॥१४७॥

छुप्तपत्त्रविनिमीलितात्क्षुपात्
कच्छपस्य धृतचापलात्पलात् ।
त्वत्सखीषु सरटाच्छिरोधुतः
स्वं भियोऽभिदधतीषु वैभवम् ॥१४८॥

त्वं मदीयविरहान्मया निजां
भीतिमीरितवती रहःश्रुता ।
नोज्झितास्मि भवतीं तदित्ययं
व्याहरद्वरमसत्यकातरः ॥१४९॥

संगमय्य विरहेऽस्मि जीविका यैव वामथ रताय तत्क्षणम् ।
हन्त दत्थ इति रुष्टयावयोर्निद्रयाऽद्य किमु नापसद्यते ।१५०।

ईदृशं निगदति प्रिये दृशं
संमदात्क्रियदियं न्यमीलयत् ।
प्रातरालपति कोकिले कलं
जागरादिव निशः कुमुद्वती ॥१५१॥

मिश्रितोरु मिलिताधरं मिथः स्वप्नवीक्षितपरस्परक्रियम् ।
तौ ततोऽनु परिरम्भसंपुटे पीडनां विदधतौ निदद्रतुः ॥१५२॥

तद्यातायातरंहश्छलकलितरतश्रान्तिनिःश्वासधारा-
जस्रव्यामिश्रभावस्फुटकथितमिथःप्राणभेदव्युदासम् ।
बालावक्षोजपत्त्राङ्कुरकरिमकरीमुद्रितोर्वीन्द्रवक्ष-
श्चिह्नाख्यातैकभावोभयहृदयमयाद्द्वन्द्वमानन्दनिद्राम् ।१५३।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातोऽस्मिञ्शिवशक्तिसिद्धिभगिनीसौभ्रात्रभव्ये महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमष्टादशः ॥१५४॥

॥ इति महाकविहर्षविरचिते नैषधोयप्रकाशे-
ऽष्टादशः सर्गः समाप्तः ॥ १८ ॥

## ॥ १९ ॥ एकोनविंशः सर्गः ॥

निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभि-
र्निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेयुषः ।
श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविक-
स्फुटरसभृशाभ्यक्ता वैतालिकैर्जगिरे गिरः ॥ १ ॥

जय जय महाराज ! प्राभातिकीं सुषमामिमां
सफलयतमां दानादक्ष्णोर्दरालसपक्ष्मणोः ।
प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा
प्रियजनमुखाम्भोजात्तुङ्गं यदङ्ग ! न मङ्गलम् ॥ २ ॥

वरुणगृहिणीमाशामासादयन्तममुं रुची-
निचयसिचयांशांशभ्रंशक्रमेण निरंशुकम् ।
तुहिनमहसं पश्यन्तीव प्रसादमिषादसौ
निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित् ॥ ३ ॥

अमहतितरास्ताद्दक्तारा न लोचनगोचरा-
स्तरणिकिरणा द्यामञ्चन्ति क्रमादपरस्पराः ।
कथयति परिश्रान्ति रात्रीतमस्सहयुध्वना-
मयमपि दरिद्राणप्राणस्तमीदयितस्त्विषाम् ॥ ४ ॥

स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चञ्चच्चञ्चूपुटस्फुटचुम्बितः ।
अपि मधुकरी कालिमन्या विराजति धूमल-
च्छविरिव रवेलक्षालक्ष्मीं करैरतिपातुकैः ॥ ५ ॥
रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिसलयस्याच्छैरग्रेशयैरुदबिन्दुभिः ।
सुषिरकुशलेनायःसूचीशिखाङ्कुरसंकरं
किमपि गमितान्यन्तर्मुक्ताफलान्यत्रमेनिरे ॥ ६ ॥
रविरुचिकृचामोंकारेषु स्फुटामलबिन्दुतां
गमयितुममूरुच्चोयन्ते विहायसि तारकाः ।
स्वरविरचनायासामुच्चैरुदात्ततया हृताः
शिशिरमहसो बिम्बादस्मादसंशयमंशवः ॥ ७ ॥
व्रजति कुमुदे दृष्ट्वा मोहं दशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि ।
लघु रघुपतेर्जायां मायामयोमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥ ८ ॥
त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुलत्स्रग्भागश्रीभरं ग्रहसंग्रहः ।
मृदुतरकराकारैस्तूलोत्करैरुदरंभरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः ॥ ९ ॥
दशशतचतुर्वेदीशाखाविवर्तनमूर्तयः
सविधमधुनाऽलंकुर्वन्ति ध्रुवं रविरश्मयः ।
वदनकुहरेष्वध्येतॄणामयं तदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥ १० ॥
नयति भगवानम्भोजस्यानिबन्धनबान्धवः
किमपि मघवप्रासादस्य प्रघाणमुपघ्नताम् ।

अपसरदरिध्वान्तप्रत्यग्वियत्पथमण्डली-
लगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः ।। ११ ।।
नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपक्षिणा-
मिह विहरणैः श्येनंपाता रवेरवधारयन् ।
शशविशसनत्रासादाशामयाच्चरमां शशी
तदधिगमनात्तारापारापतैरुदडीयत ।। १२ ।।
भृशमबिभरुस्तारा हाराच्च्युता इव मौक्तिकाः
सुरसुरतजक्रीडालूनाद्द्युसद्वियदङ्गणम् ।
बहुकरकृतात्प्रातःसंमार्जनादधुना पुन-
र्निरुपधिनिजावस्थालक्ष्मीविलक्षणमीक्ष्यते ।। १३ ।।
प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशबलीकृतैः ।
अथ रविरुचां ग्रासातिथ्यं नभः स्वविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ।। १४ ।।
असुरहितमप्यादित्योत्थां विपत्तिमुपागतं
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः ।
पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं
यदि न वहते संध्यामौनव्रतव्ययभीरुताम् ।। १५ ।।
उदयशिखरिप्रस्थान्यह्ना रणेऽत्र निशः क्षणे
दधति विहरत्पूषाण्यूष्मद्रुताश्मजतुस्रवान् ।
उदयदरुणप्रह्वीभावादरादरुणानुजे
मिलति किमु तत्सङ्गाच्छङ्कुधा नवेष्टकवेष्टना ।।१६।।
रविरथहयानश्वस्यन्ति ध्रुवं वडवा बल-
प्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान् ।
निजपरिवृढं गाढप्रेमा रथाङ्गविहंगमी
स्मरशरपराधीनस्वान्ता वृषस्यति संप्रति ।। १७ ।।

निशि निरशनाः क्षीरस्यन्तः क्षुधाऽश्वकिशोरका
मधुरमधुरं हेषन्ते ते विलोलितवालधि ।
तुरगसमजः स्थानोत्थायं क्वणन्मणिमन्थभू-
धरभवशिलालेहायेहाचणो लवणस्यति ।। १८ ।।
उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती
पतिरिह न यद्दृष्टस्ताभ्यां गणेयरुचीगणः ।
स्फुटमुडुपतेराश्मं वक्षः स्फुरन्मलिनाश्मन-
श्छवि यदनयोर्विच्छेदेऽपि द्रुतं बत न द्रुतम् ।। १९ ।।
अरुणकिरणे वह्नौ लाजानुडूनि जुहोति या
परिणयति तां संध्यामेतामवैमि मणिदिवः ।
इयमिव स एवाग्निभ्रान्तिं करोति पुरा यतः
करमपि न कस्तस्यैवोत्कः सकौतुकमोक्षितुम् ।। २० ।।
रतिरतिपतिद्वैतश्रीकौ धुरं बिभृमस्तरां
प्रियवचसि यन्नग्नाचार्या वदामतमां ततः ।
अपि विरचितो विद्यः पुण्यद्रुहः खलु नर्मणः
परुषमरुषे नैकस्यै वामुदेति मुदेऽपि तत् ।। २१ ।।
भव लघुयुताकान्तः संध्यामुपास्स्व तपोमल !
त्वरयति कथं संध्येयं त्वां न नाम निशानुजा ।
द्युतिपतिरथावश्यंकारी दिनोदयमासिता
हरिपतिहरित्पूर्णभ्रूणायिता कियतः क्षणान् ।। २२ ।।
मुषितमनसश्चित्रं भैमि ! त्वयाद्य कलागृहै-
र्निषधवसुधानाथस्यापि श्लथश्लथता विधौ ।
अजगणदयं सन्ध्यां वन्ध्यां विधाय न दूषणं
नमसितुमना यन्नाम स्यान्न संप्रति पूषणम् ।। २३ ।।
न विदुषितरा कापि त्वत्तस्ततो नियतक्रिया-
पतनदुरिते हेतुर्भर्तुर्मनस्विनि ! मा स्म भूः ।

अनिशभवदस्यागादेनं जनः खलु कामुकी-
सुभगमभिधास्यत्युद्दामा पराङ्कवदावदः ॥ २४ ॥
रह सहचरीमेतां राजन्नपि स्त्रितमां क्षणं
तरणिकिरणैः स्तोकान्मुक्तैः समालभते नभः ।
उदधिनिरयद्भास्वत्स्वर्णोदकुम्भदिदृक्षुतां
दधति नलिनं प्रस्थायिन्यः श्रियः कुमुदान्मुदा ॥२५॥
प्रथमककुभः पान्थत्वेन स्फुटेक्षितवृत्रहा-
व्यनुपदमिह द्रक्ष्यन्ति त्वां महांसि महस्पतेः ।
पटिमवहनादूहापोहक्षमाणि वितन्वता-
महह युवयोस्तावल्लक्ष्मीविवेचनचातुरीम् ॥ २६ ॥
अनतिशिथिले पुंभावेन प्रगल्भबलाः खलु
प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः ।
किमपि मुखतःकृत्वानीतं वितीर्य सरोजिनी-
मधुरसमुषोयोगे जायां नवाम्नमचीकरन् ॥ २७ ॥
मिहिरकिरणाभोगं भोक्तुं प्रवृत्ततया पुरः
कलितचुलुकापोशानस्य ग्रहार्थमियं किमु ।
इति विकसितेनैकेन प्राग्दलेन सरोजिनी
जनयति मतिं साक्षात्कर्तुं जनस्य दिनोदये ॥ २८ ॥
तटतरुखगश्रेणीसांराविणैरिव सांप्रतं
सरसि विगलन्निद्रामुद्राजनिष्ट सरोजिनी ।
अधरसुधया मध्ये मध्ये वधूमुखलब्धया
धयति मधुपः स्वादुंकारं मधूनि सरोरुहाम् ॥ २९ ॥
गतचरदिनस्यायुर्भ्रंशे दयोदयसंकुच-
त्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां
सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ॥ ३० ॥

तिमिरविरहात्पाण्डूयन्ते दिशः कृशतारकाः
कमलहसितैः श्येनीवोन्नीयते सरसी न का ।
शरणमिलितध्वान्तध्वंसिप्रभादरधारणाद्
गगनशिखरं नोलत्येकं निजैरयशोभरैः ॥ ३१ ॥
सरसिजवनान्युद्यत्पक्षार्यमाणि हसन्तु न
क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम् ।
हिमगिरिदषद्द्यायाद्दश्वि प्रतीतमदः स्मितं
कुमुदविपिनस्याथो पाथोरुहैर्निजनिद्रया ॥ ३२ ॥
धयतु नलिने माध्वीकं वा न वाभिनवागतः
कुमुदमकरन्दौघैः कुक्षिंभरिर्भ्रमरोत्करः ।
इह तु लिहते रात्रीतर्षं रथाङ्गविहंगमा
मधु निजवधूवक्त्राम्भोजेऽधुनाधरनामकम् ॥ ३३ ॥
जगति मिथुने चक्रावेव स्मरागमपारगौ
नवमिव मिथः संभुञ्जाते वियुज्य वियुज्य यौ ।
सततममृतादेवाहाराद्यदापदरोचकं
तदमृतभुजां भर्ता शंभुर्विषं बुभुजे विभुः ॥ ३४ ॥
विशति युवतित्यागे रात्रीमुचं मिहिकारुचं
दिनमणिमणिं तापे चित्ताग्निजाच्च यियासति ।
विरहतरलज्जिह्वा बह्वाह्वयन्त्यतिविह्वला-
मिह सहचरीं नामग्राहं रथाङ्गविहंगमाः ॥ ३५ ॥
स्वमुकुलमयैर्नेत्रैरन्धंभविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे स्वैरनवेक्षिकाम् ।
लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
शृणुत शृणुतासूर्यंपश्या न सा किल भाविनी ॥३६॥
चुलुकिततमःसिन्धोर्भृङ्गैः करादिव शुम्यते
नभसि बिसिनीबन्धो रन्ध्रच्युतैरुदबिन्दुभिः ।

शतदलमधुस्रोतःकच्छद्वयीपरिरम्भणा-
दनुपदमदःपङ्काशङ्काममी मम तन्वते ॥ ३७ ॥
घुसृणसुमनःश्रेणीश्रोणामनादरिभिः सरः-
परिसरचरैर्भासां भर्तुः कुमारतरैः करैः ।
अजनि जलजामोदानन्दोत्पतिष्णुमधुव्रता-
वलिशबलनाद्गुञ्जापुञ्जश्रियं गृहयालुभिः ॥ ३८ ॥
रचयति रुचिः शोणीमेतां कुमारितरा रवे-
र्यदलिपटली नीलीकर्तुं व्यवस्यति पातुका ।
अजनि सरसी कल्माषी तद्ध्रुव धवलस्फुट-
त्कमलकलिकाषण्डैः पाण्डूकृतोदरमण्डला ॥ ३९ ॥
कमलकुशलाधाने भानोरहो पुरुषव्रतं
यदुपकुरुते नेत्राणि श्रीगृहत्वविवक्षुभिः ।
कविभिरुपमानादप्यम्भोजतां गमितान्यसा-
वपि यदतथाभावान्मुञ्चत्युलूकविलोचने ॥ ४० ॥
यदतिमहती भक्तिर्भानौ तदेनमुदित्वरं
त्वरितमुपतिष्ठस्वाध्वन्य ! त्वमध्वरपद्धतेः ।
इह हि समये मन्देहेषु व्रजन्त्युदवज्रता-
मभि रविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल ॥४१॥
उदयशिखरिप्रस्थावस्थायिनी खनिरक्षया
शिशुतरमहोमाणिक्यानामहर्मणिमण्डली ।
रजनिदृषद ध्वान्तश्यामां विधूय पिधायिकां
न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥ ४२ ॥
सुरपरिवृढः कर्णात्प्रत्यग्रहीत्किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः ।
विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ ४३ ॥

दहनमविशद्दीप्तिर्यास्तं गते गतवासर-
प्रशमसमयप्राप्ते पत्यौ विवस्वति रागिणी ।
अघरभुवनात्सोद्‌धृत्यैषा हठात्तरणेः कृता-
मरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्तिताम् ॥ ४४ ॥
बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा ।
शमनयमुनाक्रोडैः कालैरितस्तमसां पिबा-
दपि यदमलच्छायात्कायादभूयत भास्वतः ॥ ४५ ॥
अभजत चिराभ्यासं देवः प्रतिक्षणदात्यये
दिनमयमयं कालं भूयः प्रसूय तथा रविः ।
न खलु शकिता शीलं कालप्रसूतिरसौ पुराः ।
यमयमुनयोर्जन्माधानेऽप्यनेन यथोज्झितुम् ॥ ४६ ॥
रुचिरचरणः सूतोरुश्रीसनाथरथः शनिं
शमनमपि स त्रातुं लोकानसूत सुताविति ।
रथपदकृपासिन्धुर्बन्धुर्दशामपि दुर्जनै-
र्यदुपहसितो भास्वान्नास्मान् हसिष्यति कः खलः ॥४७॥
शिशिरजरुजां घर्मं शर्मोदयाय तनूभृता-
मथ खरकरश्यानास्यानां प्रयच्छति यः पयः ।
जलभयजुषां तापं तापस्पृशां हिममित्ययं
परहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ॥ ४८ ॥
इह न कतमश्चित्रं धत्ते तमिस्रततीर्दिशा-
मपि चतसृणामुत्सङ्गेषु श्रिता धयतां क्षणात् ।
तरुशरणतामेत्य च्छायामयं निवसत्तमः
शमयितुमभूदानैश्वर्यं यदर्यमरोचिषाम् ॥ ४९ ॥
जगति तिमिरं मूर्च्छामब्जव्रजेऽपि चिकित्सतः
पितुरिव निजाद्‌दस्रावस्मादधीत्य भिषज्यतः ।

अपि च शमनस्यासौ तातस्तत: किमु नौचिती
यदयमदय: कह्लाराणामुदेत्यपमृत्यवे ॥ ५० ॥
उडुपरिवृढ: पत्या मुक्तामयं यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।
तदुभयमत: शङ्के सङ्कोचितं निजशङ्कया
प्रसरति नवार्के कर्कन्धूफलारुणरोचिषि ॥ ५१ ॥
श्रुतिमयतनोर्भानोर्जानेऽवनेरधराध्वना
विरहणकृत: शाखा: साक्षाच्छतानि दश त्विषाम् ।
निशि निशि सहस्राभ्यां दृग्भि: शृणोति सहस्वरा:
पृथगहिपति: पश्यत्यस्याक्रमेण च भास्वरा: ॥ ५२ ॥
बहुनखरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानो: प्रवालरुच: करा: ।
उचितमुचितं जालेष्वन्त:प्रवेशिभिरायतै:
कियदवयवैरेषामालिङ्गिताङ्गुलिलङ्गिमा ॥ ५३ ॥
नय नयनयोर्द्राक्पेयत्वं प्रविष्टवतीरमू-
र्भवनवलभीजालान्नाला इवार्ककराङ्गुली: ।
भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाशु या:
पुनरपि धृता कुन्दे किंवा न वर्धकिना दिव: ॥ ५४ ॥
दिनमिव दिवाकीर्तिस्तीक्ष्णै: क्षुरै: सवितु: करै-
स्तिमिरकबरीलूनां कृत्वा निशां निरदीधरत् ।
स्फुरति परित: केशस्तोमैस्तत: पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥ ५५ ॥
ब्रूम: शङ्खं तव नल ! यश: श्रेयसे सृष्टशब्दं
यत्सोदर्यं स दिवि लिखित: स्पष्टमस्ति द्विजेन्द्र: ।
अद्धा श्रद्धाकरमिह करच्छेदमभ्यस्य पश्य
म्लानिस्थानं तदपि नितरां हारिणो य: कलङ्क: ॥५६॥

ताराशङ्कविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः
सारम्भं चलता करेण निबिडां निष्पीडनां लम्भितः ।
छेदार्थोपहृताम्बुकम्बुजरजोजम्बालपाण्डूभव-
च्छङ्कच्छित्करपत्रतामिह वहन्नस्तंगतार्धो विधुः ॥५७॥
जलजभिदूरीभावं प्रेप्सुः करेण निपीडय-
त्यशिशिरकरस्ताराशङ्कप्रपञ्चविलोपकृत् ।
रजनिरमणस्यास्तक्षोणीधरार्धपिधावशा-
द्व्रतमधुना बिम्बं कम्बुच्छिदः करपत्रताम् ॥
यत्पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमा-
न्दृष्टीः पूर्णयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः ।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाद्रियतेतरां कविनृभिः पद्मोपमा चक्षुषः ॥५८॥
अवैमि कमलाकरे निखिलयामिनीयामिक-
श्रियं श्रयति यत्पुरा विततपत्रनेत्रोदरम् ।
तदेव कुमुदं पुनर्दिनमवाप्य गर्भभ्रमद्
द्विरेफरवघोरणाघनमुपैति निद्रामुदम् ॥ ५९ ॥
इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः ।
भण फणिभवशास्त्रे तातङः स्थानिनौ का-
विति विहिततुहीवागुत्तरः कोकिलोऽभूत् ॥ ६० ॥
दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत्कोऽप्यधीती कपोतः
कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः ।
सर्वं विस्मृत्य दैवात्स्मृतिमुषसि गतां घोषयन्घो घुसंज्ञां
प्राक्संस्कारेण संप्रत्यपि धुवति शिरः पट्टिकापाठजेन ॥६१॥
पौरस्त्यायां घुसृणमसृणश्रीजुषो वैजयन्त्याः
स्तोमैश्चित्तं हरिरिति हरति क्षीरकण्ठैर्मयूखैः ।

भानुर्जाम्बूनदतनुरसौ शक्रसौधस्य कुम्भः
स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ।। ६२ ।।

द्वित्रैरेव तमस्तमालगहनग्रासे दवीभावुकै-
रुस्रैरस्य सहस्रपत्रसदृशि व्यश्राणि घस्रोत्सवः ।
घर्माणां रयचुम्बितं वितनुते तत्पिष्टपिष्टीकृत-
क्ष्मादिग्व्योमतमोघमोघमधुना मोघं निदाघद्युतिः ।६३।

दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानु-
र्भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयम् ।
न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानं
धामद्यापि द्युमणिकिरणश्रेणयः शोणयन्ति ।। ६४ ।।

प्रातर्वर्णनयानया निजवपुर्भूषाप्रसादानदा-
द्देवी वः परितोषितेति निहितामान्तःपुरीभिः पुरः ।
सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीम् ।। ६५ ।।

आगच्छन्भणतामुषः क्षणमथातिथ्यं दृशोरानशे
स्वर्गङ्गाम्बुनि बन्दिनां कृतदिनारम्भाप्लुतिर्भूपतिः ।
आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतके
प्राप्तं तैरवरागतैरविदितप्रासादतो निर्गमः ।। ६६ ।।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
एकामत्यजतो नवार्थघटनामेकान्नविंशो महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमस्मिन्नगात् ।। ६७ ।।

।। इति महाकविहर्षविरचिते नैषधीयप्रकाशे
एकोनविंशः सर्गः समाप्तः ।। १९ ।।

## ॥ २० ॥ विंशः सर्गः ॥

सौधाद्रिकुट्टिमानेकधातुकाधित्यकातटम् ।
स प्राप रथपाथोभृद्वातजातजवो दिवः ॥ १ ॥
ततः प्रत्युदगाद्भैमी कान्तमायान्तमन्तिकम् ।
प्रतीचीसिन्धुवीचीव दिनाकारे सुधाकरम् ॥ २ ॥
स दूरमादरं तस्या वदने मदनैकदृक् ।
दृष्टमन्दाकिनीहेमारविन्दश्रीरविन्दत ॥ ३ ॥
तेन स्वर्देशसंदेशमर्पितं सा करोदरे ।
बभ्राजे बिभ्रती पद्मं पद्मेवोन्निद्रपद्मदृक् ॥ ४ ॥
प्रियेणाल्पमपि प्रत्तं बहु मेनेतरामसौ ।
एकलक्षतया दध्यौ यत्तमेकवराटकम् ॥ ५ ॥
प्रेयसाऽवादि सा तन्वि ! त्वदालिङ्गनविघ्नकृत् ।
समाप्यतां विधिः शेषः क्लेशश्चेतसि चेन्न ते ॥ ६ ॥
श्वेतावाप्नमंममर्माविद्विधते विधिरद्य ते ।
इति तं मनसा रोषादवोचद्वचसा न सा ॥ ७ ॥
क्षणविच्छेदकादेव विधेर्मुग्धे ! विरज्यसि ।
विच्छेत्ता न चिरं त्वेति हृदाह स्म तदा कलिः ॥ ८ ॥
सावज्ञेवाथ सा राज्ञः सखीं पद्ममुखीमगात् ।
लक्ष्मीः कुमुदकेदारादारादम्भोजिनीमिव ॥ ९ ॥
ममासावपि मा संभूत्कलिद्वापरवत्परः ।
इतीव नित्यसत्रे तां स श्वेतां पर्यतूतुषत् ॥ १० ॥
श्रियं प्राह्वेतनीं कृत्वा निषेधन्पाणिना सखीम् ।
कराभ्यां पृष्ठगस्तस्या न्यमिमीलदसौ दृशौ ॥ ११ ॥
दमयन्त्या वयस्याभिः सहास्याभिः समीक्षितः ।
प्रसृतिभ्यामिवायामं मापयन्प्रेयसीदृशोः ॥ १२ ॥

तर्कितालि ! त्वमित्यर्धवाणीका पाणिमोचनात् ।
ज्ञातस्पर्शान्तरा मौनमानशे मानसेविनी ॥ १३ ॥
सावादि सुतनुस्तेन कोपस्ते नायमौचिती ।
त्वां प्राप यत्प्रसादेन प्रिये ! तन्नाद्रिये तपः ॥ १४ ॥
निशि दास्यं गतोऽपि त्वां स्नात्वा यन्नाभ्यवीवदम् ।
तं प्रवृत्तासि मन्तुं चेन्मन्तुं तद्वद वन्द्यसे ॥ १५ ॥
इत्येतस्याः पदासत्त्यै पत्यैष प्रेरितौ करौ ।
रुद्ध्वा सकोपं सातङ्कं तं कटाक्षैरमूमुहत् ॥ १६ ॥
अवोचत ततस्तन्वीं निषधानामधीश्वरः ।
तदपाङ्गचलत्तारझलत्कारवशीकृतः ॥ १७ ॥
कटाक्षकपटारब्धदूरलङ्घनरंहसा ।
दृशा भीत्या निवृत्तं ते कर्णकूपं निरूप्य किम् ॥ १८ ॥
सरोषापि सरोजाक्षि ! त्वमुदेषि मुदे मम ।
तप्तापि शतपत्रस्य सौरभायैव सौरभा ॥ १९ ॥
छेत्तुमिन्दौ भवद्वक्त्रबिम्बविभ्रमविभ्रमम् ।
शङ्के शशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः ॥ २० ॥
ताम्रपर्णीतटोत्पन्नैर्मौक्तिकैरिन्दुकुक्षिजैः ।
बद्धस्पर्धतरा वर्णाः प्रसन्नाः स्वादवस्तव ॥ २१ ॥
त्वद्गिरः क्षीरपाथोधेः सुधयैव सहोत्थिताः ।
अद्ययावदहो धावद्दुग्धलेपलवस्मिताः ॥ २२ ॥
पूर्वपर्वतभाश्लिष्टचन्द्रिकश्चन्द्रमा इव ।
अलंचक्रे स पर्यङ्कमङ्कसंक्रमिताप्रियः ॥ २३ ॥
प्रावृडारम्भणाम्भोदः स्निग्धां द्यामिव स प्रियाम् ।
परिरभ्य चिरायास विश्लेषायासमुक्तये ॥ २४ ॥
चुचुम्बास्यमसौ तस्या रसमग्नः श्रितस्मितम् ।
नभोमणिरिवाम्भोजं मधुमध्यानुबिम्बितः ॥ २५ ॥

अथाहूय कलां नाम पाणिना स प्रियासखीम् ।
पुरस्ताद्दर्शितामूचे कर्तुं नर्मणि साक्षिणीम् ॥ २६ ॥
कस्मादस्माकमब्जास्या वयस्या दयते न ते ।
आसक्ता भवतीष्वन्यं मन्ये न बहु मन्यते ॥ २७ ॥
अन्वग्राहि मया प्रेयान्निशि स्वोऽनयादिति ।
न विप्रलभते तावदालीरियमलीकवाक् ॥ २८ ॥
आह स्मैषा नलादन्यं न जुषे मनसेति यत् ।
यौवनानुमितेनास्यास्तन्मृषाभून्मनोभुवा ॥ २९ ॥
आस्यसौन्दर्यमेतस्याः शृणुमो यदि भाषसे ।
तद्धि लज्जानमन्मौलेः परोक्षमधुनापि नः ॥ ३० ॥
पूर्णयैव द्विलोचन्या मैषालीरवलोकते ।
द्राग्दृगन्ताणुना मां तु मन्तुमन्तमिवेक्षते ॥ ३१ ॥
न लोकते यथेदानीं मामियं तेन कल्पये ।
योऽहं दूत्येऽनया दृष्टः सोऽपि व्यस्मारिषीदृशा ॥ ३२ ॥
रागं दर्शयते सैषा वयस्याः सूनृतामृतैः ।
मम त्वमिति वक्तुं मां मौनिनी मानिनी पुनः ॥ ३३ ॥
कां नामन्त्रयते नाम नामग्राहमियं सखीम् ।
कले ! नलेति नास्माकीं स्पृशत्याह्वां न जिह्वया ॥ ३४ ॥
अस्याः पीनस्तनव्याप्ते हृदयेऽस्मासु निर्दये ।
अवकाशलवोऽप्यस्ति नात्र कुत्र बिभर्तु नः ॥ ३५ ॥
अधिगत्येदृगेतस्या हृदयं मृदुतामुचोः ।
प्रतीम एव वैमुख्यं कुचयोर्युक्तवृत्तयोः ॥ ३६ ॥
इति मुद्रितकण्ठेऽस्मिन्सोल्लुण्ठमभिधाय ताम् ।
दमयन्तीमुखाधीतस्मितयाऽसौ तया जगे ॥ ३७ ॥
भावितेयं त्वया साधु नवरागा खलु त्वयि ।
चिरंतनानुरागार्हं वर्तते नः सखीः प्रति ॥ ३८ ॥

स्मरशास्त्रविदा सेयं नवोढा नस्त्वया सखी ।
कथं संभुज्यते बाला कथमस्मासु भाषताम् ॥ ३९ ॥
नासत्यवदनं देव ! त्वां गायन्ति जगन्ति यम् ।
प्रिया तस्य सरूपा स्यादन्यथालपना न ते ॥ ४० ॥
मनोभूरस्ति चित्तेऽस्याः किंतु देव ! त्वमेव सः ।
त्वदत्रस्थितिभूयंस्मान्मनः सख्या दिवानिशम् ॥ ४१ ॥
सतस्तेऽथ सखीचित्त प्रतिच्छाया स मन्मथः ।
त्वयास्य समरूपत्वमतनोरन्यथा कथम् ॥ ४२ ॥
कः स्मरः कस्त्वमत्रेति संदेहे शोभयोभयोः ।
त्वय्येवार्थितया सेयं धत्ते चित्तेऽथवा युवाम् ॥ ४३ ॥
त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात् ।
शङ्कया पङ्कजाक्षी त्वां दृगंशेन स्पृशत्यसौ ॥ ४४ ॥
विलोकनात्प्रभृत्यस्या लग्न एवासि चक्षुषो ।
स्वेनालोकय शङ्का चेत्प्रत्ययः परवाचि कः ॥ ४५ ॥
परीरम्भेऽनयारभ्य कुचकुङ्कुमसंक्रमम् ।
त्वयि मे हृदयस्यैवं राग इत्युदितैव वाक् ॥ ४६ ॥
मनसायं भवन्नामकामसूक्तजपव्रती ।
अक्षसूत्रं सखीकण्ठश्चुम्बत्येकावलिच्छलात् ॥ ४७ ॥
अध्यासिते वयस्याया भवता महता हृदि ।
स्तनावन्तरसंमान्तौ निष्क्रान्तौ ब्रूमहे बहिः ॥ ४८ ॥
कुचौ दोषोज्झितावस्याः पीडितौ व्रणितौ त्वया ।
कथं दर्शयतामास्यं बृहन्तावावृतौ ह्रिया ॥ ४९ ॥
इत्यसौ कलया सूक्तैः सिक्तः पीयूषवर्षिभिः
ईदृगेवेति पप्रच्छ प्रियामुन्नमिताननाम् ॥ ५० ॥
बभौ च प्रेयसीवक्त्रं पत्युरुन्नमयन्करः ।
चिरेण लब्धसंधानमरविन्दमिवेन्दुना ॥ ५१ ॥

ह्रीणा च स्मयमाना च नमयन्ती पुनर्मुखम् ।
दमयन्ती मुदे पत्युरुच्चैरप्यभवत्तदा ॥ ५२ ॥
भूयोऽपि भूपतिस्तस्याः सखीमाह स्म सस्मितम् ।
परिहासविलासाय स्पृहयालुः सहृप्रियः ॥ ५३ ॥
क्षन्तुं मन्तुं दिनस्यास्य वयस्येयं व्यवस्यतात् ।
निशीव निशि-धात्वर्थं यदाचरति नात्र नः ॥ ५४ ॥
दिनेनास्या मुखस्येन्दुः सखा यदि तिरस्कृतः ।
तत्कृता शतपत्राणां तन्मित्राणामपि श्रियः ॥ ५५ ॥
लज्जितानि जितान्येव मयि क्रीडितयाऽनया ।
प्रत्यावृत्तानि तत्तानि पृच्छ संप्रति कं प्रति ॥ ५६ ॥
निशि दष्टाधरायापि सैषा मह्यं न रुष्यति ।
क्व फलं दशते बिम्बीलता कीराय कुप्यतु ॥ ५७ ॥
सृणीपदसुचिह्ना श्रीश्चोरिता कुम्भिकुम्भयोः ।
पश्यैतस्याः कुचाभ्यां तन्नृपस्तौ पीडयानि न ॥ ५८ ॥
अधरामृतपानेन ममास्यमपराध्यतु ।
मूर्ध्ना किमपराद्धं यः पादौ नाप्नोति चुम्बितुम् ॥ ५९ ॥
अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया ।
वीणाह परुषं यन्मां कलकण्ठी च निष्ठुरम् ॥ ६० ॥
सेयमालिजने स्वस्य त्वयि विश्वस्य भाषताम् ।
ममताऽनुमताऽस्मासु पुनः प्रस्मर्यते कुतः ॥ ६१ ॥
अथोपवदने भैम्याः स्वकर्णोपनयच्छलात् ।
संनिधाप्य श्रुतौ तस्या निजास्यं सा जगाद ताम् ॥ ६२ ॥
अहो मयि रहोवृत्तं धूर्ते ! किमपि नाभ्यधाः ।
आस्स्व सभ्यमिमं तत्ते भूपमेवाभिधापये ॥ ६३ ॥
स्मरशास्त्रमधीयाना शिक्षितासि मयैव यम् ।
अगोपि सोऽपि कृत्वा किं दाम्पत्यव्यत्ययस्त्वया ॥ ६४ ॥

मौनिन्यामेव सा तस्यां तदुक्तीरिव शृण्वती ।
वादं वादं मुहुश्चक्रे हुं हुमित्यन्तरान्तरा ॥ ६५ ॥
अथासावभिसृत्यास्या रतिप्रागल्भ्यशंसिनी ।
सख्या लीलाम्बुजाघातमनुभूयालपन्नृपम् ॥ ६६ ॥
दृष्टं दृष्टं महाराज ! त्वदर्थाभ्यर्थनक्रुधा ।
यत्ताडयति मामेवं यद्वा तर्जयति भ्रुवा ॥ ६७ ॥
वदत्यचिह्नि चिह्नेन त्वया केनैष नैषधः ।
शङ्के शक्रः स्वयं कृत्वा मायामायातवानियम् ॥ ६८ ॥
स्वर्णदीस्वर्णपद्मिन्याः पद्मदानं निदानताम् ।
नयतीयं त्वदिन्द्रत्वे दिवश्चागमनं च ते ॥ ६९ ॥
भाषते नैषधच्छायामायामायि मया हरेः ।
आह चाहमहल्यायां तस्याकर्णितदुर्नया ॥ ७० ॥
संभावयति वैदर्भी दर्भाग्राभमतिस्तव ।
जम्भारित्वं कराम्भोजाद्दम्भोलिपरिरम्भिणः ॥ ७१ ॥
अनन्यसाक्षिकाः साक्षात्तदाख्याय रहःक्रियाः ।
शङ्कातङ्कं तुदैतस्या यदि त्वं तत्त्वनैषधः ॥ ७२ ॥
इति तत्सुप्रयुक्तत्वनिह्नुतीकृतकैतवाम् ।
वाचमाकर्ण्य तद्भावे संशयालुः शशंस सः ॥ ७३ ॥
स्मरसि च्छद्मनिद्रालुर्मया नाभौ शयार्पणात् ।
यदानन्दोल्लसल्लोमा पद्मनाभीभविष्यसि ॥ ७४ ॥
जानासि ह्रीभयव्यग्रा यन्नवे मन्मथोत्सवे ।
सामिभुक्तेव भुक्तासि मृद्वि ! खेदभयान्मया ॥ ७५ ॥
स्मर जित्वाजिमेतस्त्वां करे मत्पदधाविनि ।
अङ्गुलीयुगयोगेन यदाविलक्षं जने घने ॥ ७६ ॥
वेत्थ मानेऽपि मत्याग्रदूना स्वं मां च यन्मिथः ।
मद्दृष्टालिख्य पश्यन्ती व्यधाधा रेखयाऽन्तरा ॥ ७७ ॥

प्रस्मृतं न त्वया तावद्यन्मोहनविमोहितः ।
अतृप्तोऽधरपानेषु रसनामपिबं तव ॥ ७८ ॥
त्वत्कुचार्द्रनखाङ्कस्य मुद्रामालिङ्गनोत्थिताम् ।
स्मरेः स्वहृदि यत्स्मेरसखीः शिल्पं तवाब्रवम् ॥ ७९ ॥
त्वयान्याः क्रीडयन्मध्येमधुगोष्ठि रुषेक्षितः ।
वेत्सि तासां पुरो मूर्ध्ना त्वत्पादे यत्किलास्खलम् ॥ ८० ॥
वेत्थ मय्यागते प्रोष्य यत्त्वां पश्यन्ति हार्दिनि ।
अचुम्बीरालिमालिङ्ग्य तस्यां केलिमुदा किल ॥ ८१ ॥
जागर्ति तत्र संस्कारः स्वमुखाब्जवदानने ।
निक्षिप्यायाचिषं यत्ता न्यायात्ताम्बूलफालिकाः ॥ ८२ ॥
चित्ते तदस्ति कच्चित्ते नखजं यत्कुचा क्षतम् ।
प्राग्भावाविगमागःस्थे त्वया शम्बाकृतं क्षतम् ॥ ८३ ॥
स्वदिग्विनिमयेनैव निशि पार्श्वविवर्तिनोः ।
स्वप्नेष्वप्यस्तवैमुख्ये सख्ये सौख्यं स्मरावयोः ॥ ८४ ॥
क्षणं प्राप्य सदस्येव नृणां विमनितेक्षणम् ।
दर्शिताधरमद्दंशा ध्याय यन्मामतर्जयः ॥ ८५ ॥
तथावलोक्य लीलाब्जनालभ्रमणविभ्रमात् ।
करौ योजयताध्ये(धी)हि यन्मयासि प्रसादिता ॥ ८६ ॥
ताम्बूलदानमभ्यस्तकरजं करपङ्कजे ।
मम न स्मरसि प्रायस्तव नैव स्मरामि ननु ॥ ८७ ॥
तदध्ये(धी)हि मृषोद्यं मां हित्वा यत्त्वं गता सखीः ।
तत्रापि मे गतस्याग्रे लीलयैवाच्छिनस्तृणम् ॥ ८८ ॥
स्मरसि प्रेयसि ! प्रायो यद्विवृत्तायरतासहा ।
शुचिरात्रीत्युपालब्धा त्वं मया पिकनादिनी ॥ ८९ ॥
भुञ्जानस्य नवं निम्बं परिवेविषती मधौ ।
सपत्नीष्वपि मे रागं संभाव्य स्वरुषः स्मरेः ॥ ९० ॥

स्मर शाकरमास्वाद्य त्वया राद्धमिति स्तुवन् ।
स्वनिन्दारोषरक्तात्तु यदभैषं तवाधरात् ॥ ९१ ॥
मुखादारभ्य नाभ्यन्तं चुम्बं चुम्बमतृप्तवान् ।
न प्राप चुम्बितुं यत्ते धन्या तच्चुम्बतु स्मृतिः ॥ ९२ ॥
कमपि स्मरकेलिं तं स्मर यत्र भवन्निति ।
मया विहितसंबुद्धिर्व्रीडिता स्मितवत्यसि ॥ ९३ ॥
नीलदाच्चिबुकं यत्र मदाक्तेन श्रमाम्बुना ।
स्मर हारमणौ दृष्टं स्वमास्यं तत्क्षणोचितम् ॥ ९४ ॥
स्मर तन्नखमत्रोरौ कस्तेऽधादिति ते मृषा ।
ह्रीदैवतमलुम्पं यद्व्रतं रतपरीक्षणम् ॥ ९५ ॥
वनकेलौ स्मराश्वत्थदलं भूपतितं प्रति ।
देहि मह्यमुदस्येति मद्गिरा व्रीडितासि यत् ॥ ९६ ॥
इति तस्या रहस्यानि प्रिये शंसति सान्तरा ।
पाणिभ्यां पिदधे सख्याः श्रवसी ह्रीवशीकृता ॥ ९७ ॥
कर्णौ पीडयति सख्या वीक्ष्य नेत्रासितोत्पले ।
अप्यपीडयतां भैमीकरकोकनदे तु(नु) तौ ॥ ९८ ॥
तत्प्रविष्टं सखीकर्णौ पत्युरालपितं ह्रिया ।
पिदधाविव वैदर्भी स्वरहस्याभिसंधिना ॥ ९९ ॥
तमालोक्य प्रियाकेलिं नले सोत्प्रासहासिनि ।
आरात्तत्त्वमबुद्धवापिसख्यः सिष्मियिरेऽपराः ॥१००॥
दम्पत्योरुपरि प्रोत्था ता धराप्सरसस्तयोः ।
ववृषुः स्मितपुष्पाणि सुरभीणि मुखानिलैः ॥१०१॥
तदास्यहसिताज्जातं स्मितमासामभासत ।
आलोकादिव शीतांशोः कुमुदश्रेणिजृम्भणम् ॥१०२॥
प्रत्यभिज्ञाय विज्ञाऽथ स्वरं हासविकस्वरम् ।
सख्यास्तासु स्वपक्षायाः कला जातबलाऽजनि ॥१०३॥

साहूयोच्चैरथाचे तामेहि स्वर्गेण वञ्चिते ! ।
पिब वाणीः सुधावेणीर्नृपचन्द्रस्य सुन्दरि ! ॥१०४॥
साऽशृणोत्तस्य वाग्भागमनत्यासक्तिमत्यपि ।
कल्पग्रामाल्पनिर्घोषं बदरीव कृशोदरी ॥१०५॥
अथ स्वपृष्ठनिष्ठायाः शृण्वत्या नैषधाभिधाः ।
नलमौलिमणौ तस्या भावमाकलयत् कला ॥१०६॥
प्रतिबिम्बेक्षितैः सख्या मुखाकूतैः कलानुमा ।
तद्व्रीडाद्यनुकुर्वाणा शृण्वतीवान्वमायि सा ॥१०७॥
कारं कारं तथाकारमूचे साऽशृणवंतमाम् ।
मिथ्या वेत्थ गिरश्चैतद्व्यर्था स्युर्मम देवताः ॥१०८॥
मत्कर्णभूषणानां तु राजन्निबिडपीडनात् ।
व्यथिष्यमाणपाणिस्ते निषेद्धुमुचिता प्रिया ॥१०९॥
इति सा मोचयांचक्रे कर्णौ सख्याः करग्रहात् ।
पत्युराश्रवतां यान्त्या मुधायासनिषेधिनः ॥११०॥
श्रुतिसंरोधजध्वानसंततिच्छेदतालताम् ।
जगाम झटिति त्यागस्वनस्तत्कर्णयोस्ततः ॥१११॥
सापसृत्य कियद्दूरं मुमुदे सिष्मिये ततः ।
इदं च तां सखीमेत्य ययाचे काकुभिः कला ॥११२॥
अभिधास्ये रहस्यं ते यदश्रावि मयानयोः ।
वर्णयाकर्णितं मह्यमेह्यालि ! विनिमीयताम् ॥११३॥
वयस्याभ्यर्थनेनास्याः प्राक्कूटश्रुतिनाटने ।
विस्मितौ कुरुतः स्मेतौ दम्पती कम्पितं शिरः ॥११४॥
तथालिमालपन्तीं तामभ्यधान्निषधाधिपः ।
आस्स्व तद्वञ्चितौ स्वश्चेन्मिथ्याशपथसाहसात् ॥११५॥
प्रत्यालापीत्कलापीमं कलङ्कः शङ्कितः कुतः ।
प्रियापरिजनोक्तस्य त्वयैवाद्य मृषोद्यता ॥११६॥

सत्यं खलु तदाश्रौषं परं गुमुगुमारवम् ।
शृणोमीत्येव चावोचं न तु त्वद्वाचमित्यपि ॥११७॥
आमन्त्र्य तेन देव ! त्वां तद्वैयर्थ्यं समर्थये ।
शपथः कर्कशोदर्कः सत्यं सत्योऽपि दैवतः ॥११८॥
असंभोगकथारम्भैर्वञ्चयेथे कथं नु माम् ।
हन्त सेयमनर्हन्ती यत्र विप्रलभे युवाम् ॥११९॥
कर्णे कर्णे ततः सख्यौ श्रुतमाचख्यतुर्मिथः ।
मुहुर्विस्मयमाने च स्मयमाने च ते बहु ॥१२०॥
अथाख्यायि कलासख्या कुप्य मे दमयन्ति ! मा ।
कर्णाद्द्वितीयतोऽप्यस्याः संगोप्यैव यदब्रवम् ॥१२१॥
प्रियः प्रियामथाचष्ट दृष्टं कपटपाटवम् ।
वयस्ययोरिदं तेऽस्मान्मा सखीष्वेव विश्वसीः ॥१२२॥
आलापि कलयापीयं पतिर्नालपति क्वचित् ।
वयस्येऽसौ रहस्यं तत्सख्ये विस्रम्भमीदृशी ॥१२३॥
इति व्युत्तिष्ठमानायां तस्यामूचे नलः प्रियाम् ।
भण भैमि ! बहिः कुर्वे दुर्विनीते गृहादमू ॥१२४॥
शिरःकम्पानुमत्याथ सुदत्या प्रीणितः प्रियः ।
चुलुकं तुच्छमुत्सर्प्य सख्योः सलिलमक्षिपत् ॥१२५॥
तच्चित्रदत्तचित्ताभ्यामुच्चैः सिचयसेचनम् ।
ताभ्यामलम्भि दूरेऽपि नलेच्छापूरिभिर्जलैः ॥१२६॥
वरेण वरुणस्यायं सुलभैरम्भसां भरैः ।
एतयोः स्तिमितीचक्रे हृदयं विस्मयैरपि ॥१२७॥
तेनापि नामसर्पन्त्यौ दमयन्तीमयं ततः ।
हर्षेणादर्शयत्पश्य नन्विमे तन्वि ! मे पुरः ॥१२८॥
क्लिन्नीकृत्याम्भसा वस्त्रं जैनप्रव्रजितीकृते ।
सख्यौ सक्षौमभावेऽपि निर्विघ्नस्तनदर्शने ॥१२९॥

अम्बुनः शम्बरत्वेन मायैवाविरभूदियम् ।
यत्पटावृतमप्यङ्गमनयोः कथयत्यदः ॥१३०॥
वाससो वाम्बरत्वेन दृश्यतेऽमुपागमत् ।
चारुहारमणिश्रेणितारवीक्षणलक्षणा ॥१३१॥
ते निरीक्ष्य निजावस्थां ह्रीणे निर्यातुमनसः ।
तयोर्वीक्षारसात्सख्यः सर्वा निश्चक्रमुः क्रमात् ॥१३२॥
ता बहिर्भूय वैदर्भीमूचुनीतावधीतिनि ! ।
उपेक्ष्ये ते पुनः सख्यौ मर्मज्ञे नाधुनाप्यमू ॥१३३॥
उच्चैरूचेऽथ ता राजा सखीयमिदमाह वः ।
श्रुतं मर्म ममैताभ्यां दृष्टं तत्त्व सयानयोः ॥१३४॥
मद्विरोधिनयोर्वाचि न श्रद्धातव्यमेतयो ।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥१३५॥
धौतेऽपि कीर्तिधाराभिश्चरिते चारुणि द्विषः ।
मृषामषोलवैर्लक्ष्म लेखितुं के न शिल्पिनः ॥१३६॥
ते सख्यावाचचक्षाते न किंचिद् ब्रूवहे बहु ।
वक्ष्यावस्तत्परं यस्मै सर्वा निर्वासिता वयम् ॥१३७॥
स्थापयैनं स्म वित्तस्ते वर्षीयस्त्वचलत्करैः ।
कृतामपि तथावाचि करकम्पेन वारणाम् ॥१३८॥
अपयातमितो धृष्टे ! धिग्वामश्लीलशीलताम् ।
इत्युक्ते चोक्तवन्तश्च व्यतिद्राते स्म ते भिया ॥१३९॥
आह स्म तद्गिरा ह्रीणां प्रियां नतमुखीं नलः ।
ईदृग्भण्डसखी क्वापि निस्त्रपा न मनागपि ॥१४०॥
अहो ! नापत्रपाकं ते जातरूपमिदं मुखम् ।
नातितापार्जनेऽपि स्यादितो दुर्वर्णनिर्गमः ॥१४१॥
तामथैष हृदि न्यस्य ददौ तल्पतले तनुम् ।
निमिष्य च तदीयाङ्गसौकुमार्यमसिस्वदत् ॥१४२॥

न्यस्य तस्याः कुचद्वन्द्वे मध्येनीवि निवेश्य च ।
स पाणेः सफलं चक्रे तत्करग्रहणश्रमम् ॥१४३॥
स्थापितामुपरि स्वस्य तां हृदा स मुदा वहन् ।
तदुद्वहनकर्तृत्वमाचष्ट स्पष्टमात्मनः ॥१४४॥
स्विद्यत्कराङ्गुलीलुप्तकस्तूरीलेपमुद्रया ।
पूत्कार्यपीडनौ चक्रे स सखीषु प्रियास्तनौ ॥१४५॥
तत्कुचे नखमारोप्य चमत्कुर्वंस्तयेक्षितः ।
सोऽवादीत्तां हृदिस्थं ते किं मामभिनदेष न ॥१४६॥
अहो ! अनौचितीयं ते हृदि शुद्धेऽप्यशुद्धवत् ।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥१४७॥
यच्चुम्बति नितम्बोरु यदालिङ्गति च स्तनौ ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितम् ॥१४८॥
लीनचीनांशुकं स्वेदि दरालोक्य विलोकयन् ।
तन्नितम्बं स निःश्वस्य निनिन्द दिनदीर्घताम् ॥१४९॥
देशमेव ददंशासौ प्रियादन्तच्छदान्तिकम् ।
चकाराधरपानस्य तत्रैवालीकचापलम् ॥१५०॥
न क्षमे चपलापाङ्गि ! सोढुं स्मरशरव्यथाम् ।
तत्प्रसीद प्रसीदेति स तां प्रीतामकोपयत् ॥१५१॥
नेत्रे निषधनाथस्य प्रियाया वदनाम्बुजम् ।
ततः स्तनतटौ ताभ्यां जघनं घनमीयतुः ॥१५२॥
इत्यधीरतया तस्य हठवृत्तिविशङ्किनी ।
झटित्युत्थाय सोत्कण्ठमसावन्वसरत्सखीः ॥१५३॥
न्यवारीव यथाशक्ति स्पन्दं मन्दं वितन्वता ।
भैमीकुचनितम्बेन नलसंभोगलोभिना ॥१५४॥
अपि श्रोणिभरस्वैरां धर्तुं तामशकन्न सः
तदङ्गसङ्गजस्तम्भो गजस्तम्भोद्दोरपि ॥१५५॥

आलिङ्गयालिङ्गय तन्वङ्गि ! मामित्यर्धगिरं प्रियम् ।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ ॥१५६॥
प्रियस्याप्रियमारभ्य तमन्तर्दूनयाऽनया ।
शेके शालीनयालिभ्यो न गन्तुं न निवर्तितुम् ॥१५७॥
अचकथदथ बन्दिसुन्दरी
द्वाःसविधमुपेत्य नलाय मध्यमह्नः ।
जय नृप ! दिनयौवनोष्म
तप्ताप्लवनजलानि पिपासति क्षितिस्ते ॥१५८॥
उपहृतमधिगङ्गमम्बु
कम्बुच्छवि तव वाञ्छति केशभङ्गिसङ्गात् ।
अनुभवितुमनन्तरं तरङ्गा-
समशमनस्वसृमिश्रभावशोभाम् ॥१५९॥
तपति जगत एव मूर्ध्नि
भूत्वा रविरधुना त्वमिवाद्भुतप्रतापः ।
पुरमथनमुपास्य पश्य
पुण्यैरघरितमेनमनन्तरं त्वदीयैः ॥१६०॥
आनन्दं हठमाहरन्निव हरध्यानार्चनादिक्षण-
स्यासत्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः ।
पक्षद्वारदिशं प्रति प्रतिमुहुर्द्राङ्गिर्गतप्रेयसी-
प्रत्यासत्तिधिया दिशन्दृशमसौ निर्गन्तुमुत्तस्थिवान् ॥१६१॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१६२॥

॥ इति महाकविहर्षविरचिते नैषधीयप्रकाशे
विंशः सर्गः समाप्तः ॥ २० ॥

## ॥ २१ ॥ एकविंशः सर्गः ॥

तं विदर्भरमणीमणिसौधादुज्जिहानमनुदर्शितसेवैः ।
अर्पणान्निजकरस्य नरेन्द्रैरात्मनः करदता पुनरूचे ॥ १ ॥

तस्य चीनसिचयैरपि बद्धा
पद्धतिः पदयुगात्कठिनेति ।
तां व्यधत्त शिरसां खलु माल्यै-
राजराजिरभितः प्रणमन्ती ॥ २ ॥

द्रागुपाह्रियत तस्य नृपैस्तद्दृष्टिदानबहुमानकृतार्थैः ।
स्वस्य दिश्यमथ रत्नमपूर्वं यत्नकल्पितगुणाधिकचित्रम् ॥३॥
अङ्गुलीचलनलोचनभङ्गिभ्रूतरङ्गविनिवेदितदानम् ।
रत्नमन्यनृपढौकितमन्ये तत्प्रसादमलभन्त नृपास्तत् ॥ ४ ॥
तानसौ कुशलसूनृतसेकैस्तर्पितानथ पितेव विसृज्य ।
अस्त्रशस्त्रखुरलीषु विनिन्ये शैष्यकोपनमितानमितौजाः ॥५॥
मर्त्यदुष्प्रचरमस्त्रविचारं चारुशिष्यजनतामनुशिष्य ।
स्वेदबिन्दुकितगौधिरधीरं स श्वसन्नभवदाप्लवनेच्छुः ॥ ६ ॥
यक्षकर्दममृदून्मृदिताङ्गं प्राक्कुरङ्गमदमीलितमौलिम् ।
गन्धवारिभिरनुबन्धितभृङ्गैरङ्गनाः सिषिचुरुच्चकुचास्तम् ॥७॥
भूभृतं पृथुतपोघनमाप्तस्तं शुचिः स्नपयति स्म पुरोधाः ।
संदधज्जलधरस्खलदोघस्तीर्थवारिलहरीरुपरिष्टात् ॥ ८ ॥
प्रेयसीकुचवियोगहविर्भुग्जन्मधूमविततीरिव बिभ्रत् ।
स्नायिनः करसरोरुहयुग्मं तस्य गर्भधृतदर्भमराजत् ॥ ९ ॥
कल्प्यमानममुनाचमनार्थं गाङ्गमम्बु चुलुकोदरचुम्बि ।
निर्मलत्वमिलितप्रतिबिम्बव्याजमयच्छदुपनीय करे नु ॥ १० ॥
मुक्तमाप्य दमनस्य भगिन्या भूमिरात्मदयितं धृतरागा ।
अङ्गमङ्गमनुकं परिरेभे तं मृदो जलमृदूर्गृहयालुम् ॥ ११ ॥

मूलमध्यशिखरस्थितवेधः-
शौरिशंभुकरङ्किकाग्रशिरःस्थः ।
तस्य मूर्ध्नि चकरे शुचि दर्भै-
र्वारिवान्तमिव गाङ्गतरङ्गैः ॥ १२ ॥

प्राणमायतवतो जलमध्ये मज्जमानमभजन्मुखमस्य ।
आपगापरिवृढोदरपूरे पूर्वकालमुषितस्य सितांशोः ॥ १३ ॥

मर्त्यलोकमदनः सदशत्वं बिभ्रदभ्रविशदद्युतितारम् ।
अम्बरं परिदधे विधुमौलेः स्पर्शयेव दशदिग्वसनस्य ॥ १४ ॥

भीमजामनु चलत्प्रतिवेलं संयियंसुरिव राजऋषीन्द्रः ।
आववार हृदयं न समन्तादुत्तरीयपरिवेषमिषेण ॥ १५ ॥

स्नानवारिघटराजदुरोजा गौरमृत्तिलकबिन्दुमुखेन्दुः ।
केशशेषजलमौक्तिकदन्ता तं बभाज सुभगाप्लवनश्रीः ॥१६॥

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुरक्षीम् ।
वीक्ष्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवासीत् ॥ १७ ॥

राज्ञि भानुमदुपस्थितयेऽस्मि-
न्नात्तमम्बु किरति स्वकरेण ।
भ्रान्तयः स्फुरति तेजसि चक्षु-
स्त्वष्टृतर्कु चलदर्कवितर्कम् ॥ १८ ॥

सम्यगस्य जपतः श्रुतिमन्त्राः
संनिधानमभजन्त कराब्जे ।
शुद्धबीजविशदस्फुटवर्णाः
स्फाटिकाक्षवलयच्छलभाजः ॥ १९ ॥

पाणिपर्वणि यवः पुनराख्य-
द्दैवतर्पणयवार्पणमस्य ।

न्युप्यमानजलयोगितिलौघैः
स द्विरुक्तकरकालतिलोऽभूत् ॥ २० ॥

पूतपाणिचरणः शुचिनोच्चैरध्वनानितरपादहतेन ।
ब्रह्मचारिपरिचारि सुरार्चावेश्म राजऋषिरेष विवेश ॥२१॥

क्वापि यन्नभसि धूपजधूमैर्मेचकागुरुभवैर्भ्रमराणाम् ।
भूयते स्म सुमनःसुमनःस्रग्दामधामपटले पटलेन ॥ २२ ॥

साङ्कुरेव रुचिपीततमा यै-
र्यैः पुरास्ति रजनी रजनीव ।
ते धृता वितरितुं त्रिदशेभ्यो
यत्र हेमतिलका इव दीपाः ॥ २३ ॥

यत्र मौक्तिकमणेर्विरहेण प्रीतिकामधृतवह्निपदेन ।
कुङ्कुमेन परिपूरितमन्तः शुक्तयः शुशुभिरेऽनुभवन्त्यः ॥२४॥

अङ्कचुम्बिघनचन्दनपङ्कं
यत्र गारुडशिलाजममत्रम् ।
प्राप केलिकवलीभवदिन्दोः
सिंहिकासुतमुखस्य सुखानि ॥ २५ ॥

गर्भमैणमदकर्दमसान्द्रं भाजनानि रजतस्य भजन्ति ।
यत्र साम्यमगमन्नमृतांशोरङ्करङ्कुकलुषीकृतकुक्षेः ॥ २६ ॥

उज्जिहानसुकृताङ्कुरशङ्का
यत्र धर्मगहने खलु तेने ।
भूरिशर्करकरम्भवलीना-
मालिभिः सुगतसौधसखानाम् ॥ २७ ॥

खर्वमाल्यदमरौघनिवासं
पर्वतं क्वचन चम्पकसंपत् ।
मल्लिकाकुसुमराशिरकार्षी-
द्यत्र च स्फटिकसानुमनुच्चम् ॥ २८ ॥

स्वात्मनः प्रियमपि प्रति गुप्तिं कुर्वती कुलवधूमवजग्नौ ।
हृद्यदैवतनिवेद्यनिवेशाद्यत्र भूमिरवकाशदरिद्रा ।। २९ ।।
यत्र कान्तकरपीडितनीलग्रावरश्मिचिकुरामु विरेजुः ।
गात्रमूर्धविधुतेरनुबिम्बात्कुट्टिमक्षितिषु कुट्टिमितानि ।।३०।।
नैकवर्णमणिभूषणपूर्णे स क्षितीन्दुरनवद्यनिवेद्ये ।
अध्यतिष्ठदमलं मणिपीठं तत्र चित्रमिवयोद्धयचारो ।।३१।।
सम्यगर्चति नलेऽर्कमनूर्णं भक्तिगन्धिरमुनाकलि कर्णः ।
श्रद्दधानहृदयप्रति चातः साम्बमम्बरमणिर्निरचैषीत् ।।३२।।
तत्तदर्यमरहस्यजपेषु स्रङ्मयः शयममुष्य बभाज ।
रक्तिमानमिव शिक्षितुमुच्च रक्तचन्दनजबीजसमाजः ।।३३।।
हैमनामकतरुप्रसवेन त्र्यम्बकस्तदुपकल्पितपूजः ।
आत्तया युधि विजित्य रतीश राजितः कुसुमकाहलयेव ।३४।

अर्चयन्हरकरं स्मितभाजा
नागकेसरतरोः प्रसवेन ।
सोऽयमापयदतिर्यगवाग्
दिक्पालपाण्डुरकपालविभूषाम् ।। ३५ ।।
नीलनीररुहमाल्यमयीं स
न्यस्य तस्य गलनालविभूषाम् ।
स्फाटिकीमपि तनुं निरमासी-
न्नीलकण्ठपदसान्वयतायै ।। ३६ ।।

प्रीतिमेष्यति कृतेन ममेदृक्कर्मणा पुररिपुर्मदनारिः ।
तत्पुरः पुरमतोऽयमधाक्षीद्धूपरूपमथ कामशरं च ।। ३७ ।।

तन्मुहूर्तमपि भीमतनूजा-
विप्रयोगमसहिष्णुरिवायम् ।
शूलिमौलिशशिभीततयाऽभू-
द्ध्यानमूर्च्छनिमीलितनेत्रः ।। ३८ ।।

दण्डवद्भुवि लुठन्स ननाम
त्र्यम्बकं शरणभागिव कामः ।
आत्मशस्त्रविशिखासनबाणा-
न्न्यस्य तत्पदयुगे कुसुमानि ॥ ३९ ॥

त्र्यम्बकस्य पदयोः कुसुमानि न्यस्य सैष निजशस्त्रनिभानि ।
दण्डवद्भुवि लुठन्किमु कामस्तं शरण्यमुपगम्य ननाम ॥
व्यापृतस्य शतरुद्रियजप्तौ पाणिमस्य नवपल्लवलीलम् ।
भृङ्गभङ्गिरिव रुद्रपराक्षश्रेणिरश्रयत रुद्रपरस्य ॥ ४० ॥
उत्तमं स महति स्म महीभृत्पूरुषं पुरुषसूक्तविधानैः ।
द्वादशापि च स केशवमूर्तीर्द्वादशाक्षरमुदीर्य ववन्दे ॥ ४१ ॥

मल्लिकाकुसुमदुण्डुभकेन
स भ्रमीवलयितेन कृते तम् ।
आसने निहितमैक्षत साक्षा-
त्कुण्डलीन्द्रतनुकुण्डलभाजम् ॥ ४२ ॥

मेचकोत्पलमयी बलिबन्द्धुस्त-
द्वलिस्रगुरसि स्फुरति स्म ।
कौस्तुभाख्यमणिकुट्टिमवास्तु-
श्रीकटाक्षविकटायितकोटिः ॥ ४३ ॥

स्वर्णकेतकशतानि स हेम्नः पुण्डरीकघटनां रजतस्य ।
मालयारुणमणेः करवीरं तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥४४॥
नाल्पभक्तबलिरत्ननिवेद्यस्तस्य हारिणमदेन स कृष्णः ।
शङ्खचक्रजलजातवदर्चः शङ्खचक्रजलपूजनयाभूत् ॥ ४५ ॥
राज्ञि कृष्णलघुधूपनधूमाः पूजयत्यहिरिपुध्वजमस्मिन् ।
निर्ययुर्भवधृता भुजगा भीदुर्यशोमलिनिता इव जालैः ॥४६॥
अर्घनिःस्वमणिमाल्यविमिश्रैः स्मेरजातिमयदामसहस्रैः ।
तं पिधाय विदधे बहुरत्नक्षीरनीरनिधिमग्नमिवैषः ॥ ४७ ॥

अक्षसूत्रगतपुष्करबीजश्रेणिरस्य करसंकरमेत्य ।
शौरिसूक्तजपितुः पुनरापत्पद्मसद्मचिरवासविलासम् ॥ ४८ ॥
कैटभारिपदयोर्नतमूर्ध्ना सज्जिता विचकिलस्रगनेन ।
जह्नुजेव भुवनप्रभुणाऽभात्सेवितानुनयतायतमाना ॥ ४९ ॥
स्वानुरागमनघः कमलायां
सूचयन्नपि हृदि न्यसनेन ।
गौरवं व्यधित वागधिदेव्याः
श्रीगृहोर्ध्वनिजकण्ठनिवेशात् ॥ ५० ॥
इत्यवेत्य वसुना बहुनापि प्राप्नुवन्न मुदमर्चनया सः ।
सूक्तिमौक्तिकमयैरथ हारैर्भक्तिमैहत हरेरुपहारैः ॥ ५१ ॥
दूरतः स्तुतिरवाग्विषयस्ते रूपमस्मदभिधा तव निन्दा ।
तत्क्षमस्व यदहं प्रलपामीत्युक्तिपूर्वमयमेतदवोचत् ॥ ५२ ॥
स्वप्रकाश ! जड एष जनस्ते
वर्णनं यदभिलष्यति कर्तुम् ।
नन्वहर्पतिमहः प्रति स स्यान्न
प्रकाशनरसस्तमसः किम् ॥ ५३ ॥
नैव वाङ्मनसयोर्विषयो भू-
स्त्वां पुनर्न कथमुद्दिशतां ते ।
उत्कचातकयुगस्य घनः स्या-
त्तृप्तये घनमनाप्नुवतोऽपि ॥ ५४ ॥
छद्ममत्स्यवपुषस्तव पुच्छास्फालनाज्जलमिवोद्धतमब्धेः ।
श्वैत्यमेत्य गगनाङ्गणसङ्गादाविरस्ति विबुधालयगङ्गा ॥५५॥
भूरिसृष्टिकृतभूवलयानां
पृष्ठसीमनि किणैरिव चक्रैः ।
चुम्बितावतु जगत्क्षितिरक्षा-
कर्मठस्य कमठस्तव मूर्तिः ॥ ५६ ॥

दिक्षु यत्खुरचतुष्टयमुद्रा-
मभ्यवैमि चतुरोऽपि समुद्रान् ।
तस्य पोत्रिवपुषस्तव दंष्ट्रा
तुष्टयेऽस्तु मम वास्तु जगत्याः ॥ ५७ ॥
उद्धृतिस्खलदिलापरिरम्भा-
ल्लोमभिर्बहिरितैर्बहुहृष्टैः ।
ब्राह्ममण्डमभवद्वलिनीपं
केलिकोल ! तव तत्र न मातः ॥ ५८ ॥
दानवाद्यगहनप्रभवस्त्वं सिंह ! मामव रवैर्घनघोरैः ।
वैरिदारिदिविषत्सुकृतास्त्रग्रामसंभवभवन्मनुजार्धः ॥ ५९ ॥
दैत्यभर्तुरुदरान्धुनिविष्टां
शक्रसंपदमिवोद्धरतस्ते ।
पातु पाणिशृणिपञ्चकमस्मा-
ञ्छिन्नरज्जुनिभलग्नतदन्त्रम् ॥ ६० ॥
स्वेन पूर्यत इयं सकलाशा
भो बले ! न मम किं भवतेति ।
त्वं बटुः कपटवाचि पटीया-
न्देहि वामन ! मनःप्रमदं नः ॥ ६१ ॥
दानवारिरसिकायविभूतेर्वश्मि तेऽस्मि सुतरां प्रतिपत्तिम् ।
इत्युदग्रपुलकं बलिनोक्तं त्वां नमामि कृतवामनमायम् ॥६२॥
भोगिभिः क्षितितले दिवि वासं,
बन्धमेष्यसि चिरं ध्रियमाणः ।
पाणिरेष भुवनं वितरेति
छद्मवाग्भिरव वामन ! विश्वम् ॥ ६३ ॥
आशयस्य विवृतिः क्रियते किं दित्सु-
रस्मि हि भवच्चरणेभ्यः ।

विश्वमित्यभिहितो बलिनास्मा-
न्वामन ! प्रणतपावन ! पायाः ॥ ६४ ॥
क्षत्रजातिरुदियाय भुजाभ्यां
या तवैव भुवनं सृजतः प्राक् ।
जामदग्न्यवपुषस्तव तस्या-
स्तौ लयार्थमुचितौ विजयेताम् ॥ ६५ ॥
पांसुला बहुपतिर्नियतं या वेधसारचि रुषा नवखण्डा ।
तां भुवं कृतवतो द्विजभुक्तां युक्तकारितरता तव जीयात् ॥६६॥
कार्तवीर्यभिदुरेण दशास्ये रैणुकेय ! भवता सुखनाश्ये ।
कालभेदविरहादसमाधिं नौमि रामपुनरुक्तिमहं ते ॥ ६७ ॥
हस्तलेखमसृजत्खलु जन्मस्थानरेणुकमसौ भवदर्थम् ।
राम ! राममधरीकृततत्तल्लेखकः प्रथममेव विधाता ॥ ६८ ॥
उद्भवाजतनुजादज ! कामं विश्वभूषण ! न दूषणमत्र ।
दूषणप्रशमनाय समर्थं येन देव ! तव वैभवमेव ॥ ६९ ॥
नो ददासि यदि तत्त्वधियं मे यच्छ मोहमपि तं रघुवीर ! ।
येन रावणचमूर्युधि मूढा त्वन्मयं जगदपश्यदशेषम् ॥ ७० ॥
आज्ञया च पितुरज्ञभिया च श्रीरहीयत महीप्रभया द्विः ।
लङ्घितश्च भवता किमु न द्विर्वारिराशिरुदकाङ्कगलङ्कः ॥७१॥
कामदेवविशिखैः खलु नेशं मार्पयज्जनकजामिति रक्षः ।
दैवतादमरणे वरवाक्यं तथ्ययंस्त्वमपुनाद्भवदस्त्रैः ॥ ७२ ॥
तद्यशो हसति कम्बुकदम्बं शम्बुकस्य न किमम्बुधिचुम्बि ।
नामशेषितससैन्यदशास्यादस्तमाप यदसौ तव हस्तात् ॥७३॥
मृत्युभीतिकरपुण्यजनेन्द्रत्रासदानजमुपार्ज्य यशस्तत् ।
ह्रीणवानसि कथं न विहायक्षुद्रदुर्जनभिया निजदारान् ॥७४॥
इष्टदारविरहौर्वपयोधि-
स्त्वं शरण्य ! शरणं स ममैधि ।

लक्ष्मणक्षणवियोगकृशानौ
यः स्वजीविततृणाहुतियज्वा ॥ ७५ ॥
क्रौञ्चदुःखमपि वीक्ष्य शुचा यः
श्लोकमेकमसृजत्कविराद्यः ।
स त्वदुत्थकरुणः खलु काव्य-
श्लोकसिन्धुमुचितं प्रबबन्ध ॥ ७६ ॥
विश्रवःपितृकयाप्तुमनर्हं
सश्रवस्त्वमनयेत्युचितज्ञः ।
किं चकर्तिथ न शूर्पणखाया-
लक्ष्मणेन वपुषा श्रवसी वा ॥ ७७ ॥
ते हरन्तु दुरितव्रततिं मे यैः स कल्पविटपी तव दोर्भिः ।
छद्मयादवतनोरुदपाटि स्पर्धमान इव दानमदेन ॥ ७८ ॥
बालकेलिषु तदा यदलावीः
कर्परीभिरभिहत्य तरङ्गान् ।
भाविबाणभुजभेदनलीला-
सूत्रपात्र इव पातु तदस्मान् ॥ ७९ ॥
कर्णशक्तिमफलां खलु कर्तुं
सज्जितार्जुनरथाय नमस्ते ।
केतनेन कपिनोरसिशक्ति-
लक्ष्मणं कृतवता हृतशल्यम् ॥ ८० ॥
नापगेयमनयः सशरीरं द्यां वरेण नितरामपि भक्तम् ।
मा स भूत्सुरवधूसुरतज्ञो दिव्यपि व्रतविलोपभियेति ॥ ८१ ॥
घातिताऽर्कसुतकर्णदयालुर्जैत्रितेन्दुकुलपार्थकृतार्थः ।
अर्धदुःखसुखमभ्यनयस्त्वं सास्रुभानुविहसद्विधुनेत्रः ॥ ८२ ॥
प्राणवत्प्रणयिराध ! न राधा-
पुत्रशत्रुसखिता सदृशी ते ।

श्रीप्रियस्य सदृशेव तव श्री-
वत्समात्महृदि धर्तुमजस्रम् ॥ ८३ ॥
तावकापरतनोः सितकेशस्त्वं हली किल स एव च शेषः ।
साध्वसावव्रतरस्तव धत्ते सज्जरश्चिकुरनालविलासः ॥ ८४ ॥
हृद्यगन्धवह !–भोगवतीशः शेषरूपमपि बिभ्रदशेषः ।
भोगभूतिमदिरारुचिरश्रीरुल्लसत्कुमुदबन्धुरुचिस्त्वम् ॥८५॥
रेवतीश !–सुषमा किल नीलस्याम्बरस्य रुचिरा तनुभासा ।
कामपाल ! भवतः कुमुदाविर्भावभावितरुचे रुचितेव ॥८६॥
एकचित्ततिरद्वयवादि-
त्र्त्रयीपरिचितोऽथ बुधस्त्वम् ।
पाहि मां विधुतकोटिचतुष्कः
पञ्चबाणविजयी षडभिज्ञः ॥ ८७ ॥
तत्र मारजयिनि त्वयि साक्षात्कुर्वति क्षणिकतात्मनिषेधौ ।
पुष्पवृष्टिरपतत्सुरहस्तात्पुष्पशस्त्रशरसंततिरेव ॥ ८८ ॥
तावके हृदि निपात्य कृतेयं
मन्मथेन दृढधैर्यतनुत्रे ।
कुण्ठनाददितमां कुसुमानां
छत्रमित्रमुखतेव शराणाम् ॥ ८९ ॥
यत्तव स्तवविधौ विधिरास्ये
चातुरीं चरति तच्चतुरास्यः ।
त्वय्यशेषविदि जाग्रति शर्वः
सर्वविद्ब्रुवतया शितिकण्ठः ॥ ९० ॥
धूमवत्कलयता युधि कालं म्लेच्छकल्पशिखिना करवालम् ।
कल्किना दशतयं मम कल्कं त्वं व्युदस्य दशमावतरेण ॥९१॥
देहिनेव यशसा भ्रमतोर्व्यां
पाण्डुरेण रणरेणुभिरुच्चैः ।

विष्णुना जनयितुर्भवताभू-
नाम विष्णुयशसश्च सदर्थम् ॥ ९२ ॥

सन्तमद्वयमयेऽध्वनि दत्तात्रेयमर्जुनयशोर्जनबीजम् ।
नौमि योगजयितानघसंज्ञं त्वामलर्कभवमोहतमोर्कम् ॥ ९३ ॥

भानुसूनुमनुगृह्य जय त्वं
राममूर्तिहतवृत्रहपुत्रः ।
इन्द्रनन्दनसपक्षमपि त्वां
नौमि कृष्ण !–निहितार्कतनूजम् ॥ ९४ ॥

वामनादणुतमादनु जीया-
स्त्वं त्रिविक्रमतनूभृतदिक्कः ।
वीतहिंसनकथादथ बुद्धा-
त्कल्किना हृतसमस्त ! नमस्ते ॥ ९५ ॥

मां त्रिविक्रम ! पुनीहि पदे ते
किं लगन्नजनि राहुरुपानत् ।
किं प्रदक्षिणनकृद्भ्रमिपाशं
जाम्बवानदित ते बलिबन्धे ॥ ९६ ॥

अर्धचक्रवपुषार्जुनबाहू-
न्योऽलुनात्परशुनाथ सहस्रम् ।
तेन किं सकलचक्रविलूने
बाणबाहुनिचयेऽञ्चति चित्रम् ॥ ९७ ॥

पाञ्चजन्यमधिगत्य करेणा-
पाञ्चजन्यमसुरानिति वक्षि ।
चेतनाः स्थ किल पश्यत किं ना-
चेतनोऽपि मयि मुक्तविरोधः ॥ ९८ ॥

तावकोरसि लसद्वनमाले
श्रीफलद्विफलशालिकयेव ।

स्थीयते कमलया त्वदजस्र-
स्पर्शकण्टकितयोत्कुचया च ॥ ९९ ॥
त्यज्यते न जलजेन करस्ते
शिक्षितुं सुभगभूयमिवोच्चैः ।
आननं च नयनायितबिम्बः
सेवते कुमुदहासकरांशुः ॥१००॥
ये हिरण्यकशिपुं रिपुमुच्चै-
र्रावणं च कुरुवीरचयं च ।
हन्त हन्तुमभवंस्तव योगा-
स्ते नरस्य च हरेश्च जयन्ति ॥१०१॥
केयमर्धभवता भवतोहे
मायिना ननु भवः सकलस्त्वम् ।
शेषतामपि भजन्तमशेषं
वेद वेदनयनो हि जनस्त्वाम् ॥१०२॥
प्रागभवैरुदगुदग्भवगुम्फा-
न्मुक्तियुक्तिविहताविह तावत् ।
नापरः स्फुरति कस्यचनापि
त्वत्समाधिमवधूय समाधिः ॥१०३॥
ऊर्ध्वदिक्कदलनां द्विरकार्षीः
किं तनुं हरिहरीभवनाय ।
किं च तिर्यगभिनो नृहरित्वे
कः स्वतन्त्रमनु नन्वनुयोगः ॥१०४॥
आप्तकाम ! सृजसि त्रिजगत्किं
किं भिनत्सि यदि निर्मितमेव ।
पासि चेदमवतीर्य मुहुः किं
स्वात्मनापि यदवश्यविनाश्यम् ॥१०५॥

जाह्नवीजलजकौस्तुभचन्द्रा-
न्पादपाणिहृदयेक्षणवृत्तीन् ।
उत्थिताब्धिसलिलास्त्वयि लीला
किं स्थिता परिचितान्परिचिन्त्य ॥१०६॥
वस्तु वास्तु घटते न भिदाना यौक्तिनैकविधबाधविरोधैः ।
तत्त्वदोहितविजृम्भिततत्तद्भेदमेतदिति तत्त्वनिरुक्तिः ।१०७।
वस्तु विश्वमुदरे तव दृष्ट्वा
बाह्यवत्किल मृकण्डुतनूजः ।
स्वं विमिश्रमुभयं न विविञ्च-
न्निर्ययौ स कतमस्त्वमवैषि ॥१०८॥
ब्रह्मणोऽस्तु तव शक्तिलतायां मूर्ध्नि विश्वमथ पत्युरहीनाम् ।
बालतां कलयतो जठरे वा सर्वथासि जगतामवलम्बः ।१०९।
धर्मबीजसलिला सरिदङ्घ्रावर्थमूलमुरसि स्फुरति श्रीः ।
कामदेवतमपि प्रसवस्ते ब्रह्म मुक्तिदमसि स्वयमेव ॥११०॥
लीलयापि तव नाम जना ये
गृह्णते नरकनाशकरस्य ।
तेभ्य एव नरकैरुचिता भी-
स्ते तु बिभ्यतु कथं नरकेभ्यः ॥१११॥
मृत्युहेतुषु न वज्रनिपाता-
द्भीतिमर्हति जनस्त्वयि भक्तः ।
यत्तदोच्चरति वैष्णवकण्ठा-
न्निष्प्रयत्नमपि नाम तव द्राक् ॥११२॥
सर्वथापि शुचिनि क्रियमाणे
मन्दिरोदर इवावकरा ये ।
उद्भवन्ति भविनां हृदि तेषां
शोधनी भवदनुस्मृतिधारा ॥११३॥

अस्मदाद्यविषयेऽपि विशेषे
रामनाम तव धाम गुणानाम् ।
अन्वबन्धि भवतैव तु कस्मा-
दन्यथा ननु जनुस्त्वक्षयेऽपि ॥११४॥

भक्तिभाजमनुगृह्य दृशा मां
भास्करेण कुरु वीततमस्कम् ।
अर्पितेन मम नाथ ! न तापं
लोचनेन विधुना विधुनासि ॥११५॥

लङ्घयन्नहरहर्भवदाज्ञा-
मस्मि हा विधिनिषेधमयीं यः ।
दुर्लभं स तपसापि गिरैव
त्वत्प्रसादमहमिच्छुरलज्जः ॥११६॥

विश्वरूप ! कृतविश्व ! कियत्ते
वैभवाद्भुतमणौ हृदि कुर्वे ।
हेम नह्यति कियन्निजचोरे
काञ्चनाद्रिमधिगत्य दरिद्रः ॥११७॥

इत्युदीर्य स हरिं प्रति संप्र-
ज्ञातवासिततमः समपादि ।
भावनाबलविलोकितविष्णो
प्रीतिभक्तिसदृशानि चरिष्णुः ॥११८॥

विप्रपाणिषु भृशं वसुवर्षी पात्रसात्कृतपितृक्रतुकव्यः ।
श्रेयसा हरिहरं परिपूज्य प्रह्व एष शरणं प्रविवेश ॥११९॥

माध्यंदिनादनु विधेर्वसुधासुधांशु-
रास्वादितामृतमयौदनमोदमानः ।
प्राञ्चं स चित्रमविदूरितवैजयन्त
वेश्माचलं निजरुचीभिरलंचकार ॥१२०॥

भीमात्मजापि कृतदैवतभक्तिपूजा
पत्यौ च भुक्तवति भुक्तवती ततोऽनु ।
तस्याङ्कमङ्कुरिततत्परिरिप्समध्य-
मध्यास्त भूषणभरातिभरालसाङ्गी ॥१२१॥
तामन्वगादशितबिम्बविपाकचञ्चोः
स्पष्टं शलाटुपरिणत्युचितच्छदस्य ।
कीरस्य कापि करवारिरुहे वहन्ती
सौन्दर्यपुञ्जमिव पञ्जरमेकमाली ॥१२२॥
कूजायुजा बहुलपक्षशितिम्नि सीम्ना
स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन ।
तिर्यग्धृतस्फटिकदण्डकवर्तिनैका
तामन्ववर्तत पिकेन मदाधिकेन ॥१२३॥
शिष्याः कलाविधिषु भीमभुवो वयस्या
वीणामृदुक्वणनकर्मणि याः प्रवीणाः ।
आसीनमेनमुपवीणयितुं ययुस्ता
गन्धर्वराजतनुजा मनुजाधिराजम् ॥१२४॥
तासामभासत कुरङ्गदृशां विपञ्ची
किंचित्पुरः कलितनिष्कलकाकलीका ।
भैमीतथामधुरकण्ठलतोपकण्ठे
शब्दायितुं प्रथममप्रतिभावतीव ॥१२५॥
सा यद्धृताखिलकलागुणभूमभूमी
भैमीतुलाधिगतये स्वरसंगतासीत् ।
तं प्रागसावविनयं परिवादमेत्य
लोकेऽधुनापि विदिता परिवादिनीति ॥१२६॥
नादं निषादमधुरं ततमुज्जगार
साभ्यासभागवनिभृत्कुलकुञ्जरस्य ।

स्तम्बेरमीव कृतसश्रुतिमूर्धकम्पा
वीणा विचित्रकरचापलमाभजन्ती ॥१२७॥
आकृष्य सारमखिलं किमु वल्लकीनां
तस्या मृदुस्वरमसर्जि न कण्ठनालम् ।
तेनान्तरं तरलभावमवाप्य वीणा
ह्रीणा न कोणममुचत्किमु वालयेषु ॥१२८॥
तद्दम्पतिश्रुतिमधून्यथ चाटुगाथा
वीणास्तथा जगुरतिस्फुटवर्णबन्धम् ।
इत्थं यथा वसुमतीरतिगृह्यकस्ताः
कीरः किरन्मुदमुदीरयति स्म विश्वाः ॥१२९॥
अस्माकमुक्तिभिरवैष्यथ एव बुद्धे-
र्गाधं युवामतिमती स्तुमहे तथापि ।
ज्ञानं हि वागवसरावचनाद्र्ध्ववद्ध्या-
मेतावदप्यनवधारितमेव न स्यात् ॥१३०॥
भूभृद्भवाङ्कभुविराजशिखामणेः सा
त्वं चास्य भोगसुभगस्य समः क्रमोऽयम् ।
यन्नाकपालकलनाकलितस्य भर्तु-
रत्रापि जन्मनि सती भवती स भेदः ॥१३१॥
एषा रतिः स्फुरति चेतसि कस्य यस्याः
सूते रतिं द्युतिरथ त्वयि वा तनोति ।
त्रैयक्षवीक्षणखिलीकृतनिर्जरत्व-
सिद्धायुरध्वमकरध्वजसंशयं कः ॥१३२॥
एतां धरामिव सरिच्छविहारिहारा-
मुल्लासितस्त्वमिदमाननचन्द्रभासा ।
बिभ्रद्विभासि पयसामिव राशिरन्त-
र्वेदिश्रियं जनमनःप्रियमध्यदेशाम् ॥१३३॥

दत्ते जये जनितपत्रनिवेशनेयं
साक्षीकृतेन्दुवदना मदनाय तन्वी ।
मध्यस्थदुर्बलतमत्वफलं किमेत-
द्भुक्तिर्यदत्र तव भर्त्सितमत्स्यकेतोः ॥१३४॥
चेतोभवस्य भवती कुचपत्रराज-
धानीयकेतुमकरा ननु राजधानी ।
अस्यां महोदयमहस्पृशि मीनकेतोः
के तोरणं तरुणि ! न ब्रुवते भ्रुवौ ते ॥१३५॥
अस्या भवन्तमनिशं भवतस्तथैनां
कामः श्रमं न कथमृच्छति नाम गच्छन् ।
छायैव वामथ गतागतमाचरिष्णो-
स्तस्याध्वजश्रमहरा मकरध्वजस्य ॥१३६॥
स्वेदाप्लवप्रणयिनी नवरोमराजी
रत्यै यदाचरति जागरितव्रतानि ।
आभासितेन नरनाथ ! मधूत्थसान्द्र-
मग्नासमेषुशरकेशरदन्तुराङ्गः ॥१३७॥
प्राप्ता तवापि नृप ! जीवितदेवतेयं
घर्माम्बुशीकरकरम्बनमम्बुजाक्षी ।
ते ते यथा रतिपतेः कुसुमानि बाणाः
स्वेदस्तथैव किमु तस्य शरक्षतास्रम् ॥१३८॥
रागं प्रतीत्य युवयोस्तमिमं प्रतीची
भानुश्च किं द्वयमजायत रक्तमेतत् ।
तद्वीक्ष्य वां किमिह केलिसरित्सरोजैः
कामेषुतोचितमुखत्वमधीयमानम् ॥१३९॥
अन्योन्यरागवशयोर्युवयोर्विलास-
स्वच्छन्दताच्छिदपयातु तदालिवर्गः ।

अत्याजयन्सिचयमाजिमकारयन्वा
दन्तैर्नखैश्च मदनो मदनः कथं स्यात् ॥१४०॥

इति पठति शुके मृषा ययुस्ता
बहु नृपकृत्यमवेत्य सांधिवेलम् ।
कुपितनिजसखीदृशार्धदृष्टाः
कमलतयेव तदा निकोचवत्या ॥१४१॥

अकृत परभृतः स्तुहि स्तुहीति
श्रुतवचनस्रगनूक्तिचुञ्चुचञ्चुः ।
पठितनलनुति प्रतीव कीरं
तमिव नृपं प्रति जातनेत्ररागः ॥१४२॥

तुङ्गप्रासादवासादथ भृशकृशतामायतीं केलिकुल्या-
मद्राक्षीदर्कबिम्बप्रतिकृतिमणिना भीमजा राजमानाम् ।
वक्रं वक्रं व्रजन्तीं फणियुवतिमिति त्रस्नुभिर्व्यक्तमुक्ता-
न्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामतिरुत्या ।१४३।

अथ रथचरणौ विलोक्य रक्ता-
वतिविरहासहताहताविवास्तैः ।
अपि तमकृत पद्मसुप्तिकालं
श्वसनविकीर्णसरोजसौरभं सा ॥१४४॥

अभिलषति पतिं प्रति स्म भैमी
सदय ! विलोकय कोकयोरवस्थाम् ।
मम हृदयमिमौ च भिन्दतीं हा
क इव विलोक्य नरो न रोदितीमाम् ॥१४५॥

कुमुदमुदमुदेष्यतीमसोढा
रविरविलम्बितुकामतामतानीत् ।
प्रतितरु विरुवन्ति किं शकुन्ताः
स्वहृदि निवेशितकोककाकुकुन्ताः ॥१४६॥

अपि विरहमनिष्टमाचरन्ता-
वधिगमपूर्वकपूर्वसर्वचेष्टौ ।
इदमहह निदर्शनं विहगौ
विधिवशचेतनचेष्टनानुमाने ॥१४७॥

अङ्घ्रिस्थारुणिमेष्टकाविसरणैः शोणः कृपाणः स्फुटं
कालोऽयं विधिना रथाङ्गमिथुनं विच्छेत्तुमन्विच्छता ।
रश्मिग्राहिगरुत्मदग्रजसमारब्धाविरामभ्रमौ
दण्डभ्राजिनि भानुशाणवलये संसज्य किं निज्यते ॥१४८॥

इति स विधुमुखीमुखेन मुग्धा-
लपितसुधासवमर्पितं निपीय ।
स्मितशबलवलन्मुखोऽवदत्तां
स्फुटमिदमीदृशमीदृशं यथात्थ ॥१४९॥

स्त्रीपुंसौ प्रविभज्य जेतुमखिलावालोचितौचित्ययो-
र्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं तद्भ्रुवौ ।
त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकमुक्त्येषिणो-
स्त्वन्निःश्वासलते मधुश्वसनजं वायव्यमस्त्रं तयोः ॥१५०॥

पीतो वर्णगुणः स चातिमधुरः कायेऽपि तेऽयं यथा
यं बिभ्रत्कनकं सुवर्णमिति कैरादृतं नोत्कीर्त्यते ।
का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य-
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥१५१॥

खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणा-
त्कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत्पुण्ड्रकः ।
स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्प्रत्ययः ॥१५२॥

उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीर्जयन्
दानान्तःश्रुतशर्कराचलमथः स्वेनामृतान्धाः स्मरः ।

नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत्सा भव-
ज्जिह्वाया: कृतिमाह्वयेत परमां मत्कर्णयो: पारणाम् ।१५३।
आस्ये या तव भारती वसति तल्लीलारविन्दोल्लस-
द्वामे तत्कलवैणनिक्वणमिलद्वाणीविलासामृते ।
तत्केलिभ्रमणाङ्गगैरिकसुधानिर्माणहर्म्याधरे
तन्मुक्तामणिहार एव किमयं दन्तस्रजो राजत: ॥१५४॥
वाणी मन्मथतीर्थमुज्ज्वलरसस्रोतस्वती कापि ते
खण्ड: खण्ड इतीदमोघपुलिनस्यालप्यते वालुका ।
एतत्तीरमृदैव किं विरचिता: पूता: सिताश्चक्रिका:
किं पीयूषमिदंपयांसि किमिदंतीरे तवैवाधरौ ॥१५५॥
परभृतयुवतीनां सम्यगायाति गानं
न तव तरुणि ! वाणीयं सुधासिन्धुवेणी ।
कति न रसिककण्ठे कर्तुमभ्यस्यतेऽसौ
भववुर्वाविपिनाम्रे ताभिराम्रेडितेन ॥१५६॥
ऊर्ध्वस्ते रदनच्छद: स्मरधनुर्बन्धूकमालामयं
मौर्वी तत्र तवाधराधरतटाध:सीमलेखालता ।
एषा वागपि तात्त्विकी ननु धनुर्वेद: प्रिये ! मान्मथ:
सोऽयं कोणधनुष्मतीभिरुचितं वीणाभिरभ्यस्यते ॥१५७॥
स ग्राम्य: स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां
तं च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे ! विगानोन्मुखा: ।
य: किं मध्विति नाधरं तव कथं हेमेति न त्वद्वपु:
कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरम् ।१५८।
मध्ये बद्धाणिमा यत्सगरिममहिमश्रोणिवक्षोजयुग्मा
जाग्रच्चेतोवशित्वा स्मितधृतलघिमा मां प्रतीशित्वमेषि ।
सूक्तौ प्राकाम्यरम्या दिशि विदिशि यशोलब्धकामावसाया
भूतीरष्टावपीशस्तददित मुदित: स्वस्य शिल्पाय तुभ्यम् ।१५९।

त्वद्वाचः स्तुतये वयं न पटवः पीयूषमेव स्तुम-
स्तस्यार्थे गरुडामरेन्द्रसमरः स्थाने स जानेऽजनि ।
द्राक्षापानकमानमर्दनसृजा क्षीरे इक्षावज्ञया
यस्मिन्नाम धृतोऽनया निजपदप्रक्षालनानुग्रहः ॥१६०॥
शोकश्चेत्कोकयोस्त्वां सुदति ! तुदति तद्व्याहराज्ञाकरस्ते
गत्वा कुल्यामनस्तं व्रजितुमनुनये भानुमेतज्जलस्थम् ।
बद्धे यद्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं
दत्त्वैताभ्यां तदम्भोञ्जलिमिह भवतीं पश्य भामेष्यमाणम् १६१
तदानन्दाय त्वत्परिहसितकन्दाय भवती
निजालीनां लीनां स्थितिमिह मुहूर्तं मृगयताम् ।
इति व्याजात्कृत्वालिषु चलितचित्तां सहचरीं
स्वयं सोऽयं सायंतनविधिविधित्सुर्बहिरभूत् ॥१६२॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्यागादयमेकविंशगणनः काव्येऽतिनव्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः ॥१६३॥

॥ इति महाकविहर्षप्रणीते नैषधीयप्रकाशे
एकविंशः सर्गः समाप्तः ॥ २१ ॥

## ॥ २२ ॥ द्वाविंशः सर्गः ॥

उपास्य सांध्यं विधिमन्तिमाशा-
रागेण कान्ताधरचुम्बिचेताः ।
अवाप्तवान् सप्तमभूमिभागे
भैमीधरं सौधमसौ धरेन्द्रः ॥ १ ॥
प्रत्युद्व्रजन्त्या प्रियया विमुक्तं
पर्यङ्कमङ्कस्थितसज्जशय्यम् ।
अध्यास्य तामप्यधिवास्य सोऽयं
संध्यामुपश्लोकयति स्म सायम् ॥ २ ॥
विलोकनेनानुगृहाण तावद्दिशं जलानामधिपस्य दारान् ।
अकालि लाक्षापयसेव येयमपूरि पङ्कैरिव कुङ्कुमस्य ॥ ३ ॥
उच्चैस्तरादम्बरशैलमौलेश्च्युतो रविर्गैरिकगण्डशैलः ।
तस्यैव पातेन विचूर्णितस्य संध्यारजोराजिरिहोज्जिहीते ॥४॥
अस्ताद्रिचूडालयपक्वणालि-
च्छेकस्य किं कुक्कुटपेटकस्य ।
यामान्तकूजोल्लसितैः शिखौघै-
र्दिग्वारुणी द्रागरुणीकृतेयम् ॥ ५ ॥
पश्य द्रुतास्तंगतसूर्यनिर्य-
त्करावलीहैङ्गुलवेत्रयात्र ।
निषिध्यमानाहनि संध्ययापि
रात्रिप्रतीहारपदेऽधिकारम् ॥ ६ ॥
महानटः किं नु सभानुरागे
सध्याय संध्यां कुनटीमपीशाम् ।
तनोति तन्वा वियतापि तार-
श्रेणिस्रजा सांप्रतमङ्ग !-हारम् ॥ ७ ॥

भूषास्थिदाम्नस्त्रुटितस्य नाट्या-
त्पश्योडुकोटीकपटं वहद्भिः ।
दिङ्मण्डलं मण्डयतीह खण्डैः
सायंनटस्तारकराट्किरीटः ॥ ८ ॥

कालः किरातः स्फुटपद्मकस्य
वधं व्यधाद्यस्य दिनद्विपस्य ।
तस्यैव संध्या रुचिरास्रधारा
ताराश्च कुम्भस्थलमौक्तिकानि ॥ ९ ॥

संध्यासरागः ककुभो विभागः शिवाविवाहे विभुनायमेव ।
दिग्वाससा पूर्वमवैमि पुष्पसिन्दूरिकापर्वणि पर्यधायि ॥ १० ॥

सतीमुमामुद्वहता च पुष्प-
सिन्दूरिकार्थं वसने सुनेत्रे ! ।
दिशौ द्विसंधोमभि रागशोभे
दिग्वाससोमे किमलम्भिषाताम् ॥ ११ ॥

आदाय दण्डं सकलासु दिक्षु
योऽयं परिभ्राम्यति भानुभिक्षुः ।
अब्धौ निमज्जन्निव तापसोऽयं
संध्याभ्रकाषायमधत्त सायम् ॥ १२ ॥

अस्ताचलेऽस्मिन्निकषोपलाभे
संध्याकषोल्लेखपरीक्षितो यः ।
विक्रीय तं हेलिहिरण्यपिण्डं
तारावराटानियमादित द्यौः ॥ १३ ॥

पचेलिमं दाडिममर्कबिम्ब-
मुत्तार्य संध्या त्वगिवोज्झितास्य ।
तारामयं बीजभुजादसीयं
कालेन निष्ठ्यूतमिवास्थियूथम् ॥ १४ ॥

ताराततिर्बीजमिवादमाद-
मियं निरष्ठेवि यदस्थियूथम् ।
तन्निष्कुलाकृत्य रविं त्वगेषा
संध्योज्झिता पाकिमदाडिमं वा ।।
संध्यावशेषे धृतताण्डवस्य
चण्डीपतेः पत्पतनाभिघातात् ।
कैलासशैलस्फटिकाश्मखण्डै-
रमण्डि पश्योत्पतयालुभिर्द्यौः ।। १५ ।।
इत्थं ह्रिया वर्णनजन्मनेव
संध्यामपक्रान्तवतीं प्रतीत्य ।
तारातमोदन्तुरमन्तरिक्षं
निरीक्षमाणः स पुनर्बभाषे ।। १६ ।।
रामेषुमर्मव्रणनार्तिवेगा-
द्रत्नाकरः प्रागयमुत्पपात ।
ग्राहौघकिर्मीरितमीनकम्बु
नभो न भोः कामशरासनभ्रु ! ।। १७ ।।
मोहाय देवाप्सरसां विमुक्ता-
स्ताराः शराः पुष्पशरेण शङ्के ।
पञ्चास्यवत्पञ्चशरस्य नाम्नि
प्रपञ्चवाची ननु पञ्चशब्दः ।। १८ ।।
नभोनदीकूलकुलायचक्री-
कुलस्य नक्तं विरहाकुलस्य ।
दृशोरपां सन्ति पृषन्ति ताराः
पतन्ति तत्संक्रमणानि धाराः ।। १९ ।।
अमूनि मन्येऽमरनिर्झरिण्या यादांसि गोधा मकरः कुलीरः ।
तत्पूरखेलत्सुरभीतिदूरमग्नान्यधः स्पष्टमितः प्रतीमः ।।२०।।

स्मरस्य कम्बुः किमयं चकास्ति दिवि त्रिलोकीजयवादनीयः ।
कस्यापरस्योडुमयैः प्रसूनैर्वादित्रशक्तिर्घटते भटस्य ॥ २१ ॥

किं योगिनीयं रजनी रतीशं
याऽजीजिवत्पद्ममम्मुहच्च ।
योगर्द्धिमस्या महतीमलग्न-
मिदं वदत्यम्बरचुम्बि कम्बु ॥ २२ ॥

प्रबोधकालेऽह्नि बाधितानि
ताराः खपुष्पाणि निदर्शयन्ती ।
निशाह शून्याध्वनि योगिनीयं
मृषा जगद्दृष्टमपि स्फुटाभम् ॥ २३ ॥

एणः स्मरेणाङ्कमयः सपत्रा-
कृतो भवद्भ्रूयुगधन्वना यः ।
मुखे तवेन्दौ लसता स तारा-
पुष्पालिबाणानुगतो गतोऽयम् ॥ २४ ॥

लोकाश्रयो मण्डपमादिसृष्टि
ब्रह्माण्डमाभात्यनुकाष्ठमस्य ।
स्वकान्तिरेणूत्करवान्तिमन्ति
घुणव्रणद्वारनिभानि भानि ॥ २५ ॥

शचीसपत्न्यां दिशि पश्य भैमि ! शक्रेभदानद्रवनिर्झरस्य ।
पोप्लूयते वासरसेतुनाशादुच्छृङ्खलः पूर इवान्धकारः ॥२६॥

रामालिरोमावलिदिग्विगाहि
ध्वान्तायते वाहनमन्तकस्य ।
यद्वीक्ष्य दूरादिव बिभ्यतः स्वान-
श्वान्गृहीत्वापसृतो विवस्वान् ॥ २७ ॥

पक्वं महाकालफलं किलासी-
त्प्रत्यग्गिरेः सानुनि भानुबिम्बम् ।

भिन्नस्य तस्यैव दृषन्निपाता-
द्वीजानि जानामितमां तमांसि ॥ २८ ॥
पत्युर्गिरीणामयशः सुमेरु-
प्रदक्षिणाद्भास्वदनादृतस्य ।
दिशस्तमश्चैत्ररथान्यनाम-
पत्रच्छटाया मृगनाभिशोभि ॥ २९ ॥
ऊर्ध्वं धृतं व्योम सहस्ररश्मे-
र्दिवा सहस्रेण करैरिवासीत् ।
पतत्तदेवांशुमता विनेदं
नेदिष्ठतामेति कुतस्तमिस्रम् ॥ ३० ॥
ऊर्ध्वापितन्युब्जकटाहकल्पे
यद्व्योम्नि दीपेन दिनाधिपेन ।
न्यधायि तद्भूमिलद्गुरुत्वं
भूमौ तमः कज्जलमस्खलत्किम् ॥ ३१ ॥
ध्वान्तैणनाभ्या शितिनाम्बरेण
दिशः शरैः सूनशरस्य तारैः ।
मन्दाक्षलक्ष्या निशि मामनिन्दौ
सेर्ष्या भवायान्त्यभिसारिकाभाः ॥ ३२ ॥
भास्वन्मयीं मीलयतो दृशं द्रा-
ङ्मथोमिलद्व्यञ्चलमादिपुंसः ।
आचक्ष्महे तन्वि ! तमांसि पक्ष्म
श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म । ॥ ३३ ॥
विवस्वतानायिषतेव मिश्राः
स्वर्गोसहस्रेण समं जनानाम् ।
गावोऽपि नेत्रापरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः ॥ ३४ ॥

ध्वान्तस्य वामोरु ! विचारणायां वैशेषिकं चारु मतं मतं मे ।
औलूकमाहुः खलु दर्शनं तत्क्षमं तमस्तत्त्वनिरूपणाय ।।३५।।

म्लानिस्पृशः स्पर्शनिषेधभूमेः
सेयं त्रिशङ्कोरिव संपदस्य ।
न किंचिदन्यत्प्रति कौशिकीये
दृशौ विहाय प्रियमातनोति ।। ३६ ।।

मूर्धाभिषिक्तः खलु यो ग्रहाणां तद्भासमास्कन्दितऋक्षशोभम् ।
दिवान्धकारं स्फुटलब्धरूपमालोकतालोकमुलूकलोकः ।।३७।।

दिने मम द्वेषिणि कीदृगेषां
प्रचार इत्याकलनाय चारीः ।
छाया विधाय प्रतिवस्तुलग्नाः
प्रावेशयत्प्रष्टुमिवान्धकारः ।। ३८ ।।

ध्वान्तस्य तेन क्रियमाणयेत्थं द्विषः शशी वर्णनयाऽथ रुष्टः ।
उद्यन्नुपाश्लोकि जपारुणश्रीर्नराधिपेनानुनयेच्छयेव ।। ३९ ।।

पश्यावृतोऽप्येष निमेषमद्रे-
रधित्यकाभूमितिरस्करिण्या ।
प्रवर्षति प्रेयसि ! चन्द्रिकाभि-
श्चकोरचञ्चूचुलुकप्रमिन्दुः ।। ४० ।।

ध्वान्ते द्रुमान्तानभिसारिकास्त्वं
शङ्कस्व सङ्केतनिकेतमाप्ताः ।
छायाच्छलादुज्झितनीलचेला
ज्योत्स्नानुकूलैश्चरिता दुकूलैः ।। ४१ ।।

त्वदास्यलक्ष्मीमुकुरं चकोरैः
स्वकौमुदीमादयमानमिन्दुम् ।
दृशा निशेन्दीवरचारुभासा
पिबोरु रम्भातरुपीवरोरु ! ।। ४२ ।।

असंशयं सागरभागुदस्था-
स्पृथ्वीधरादेव मथः पुरायम् ।
अमुष्य यस्मादधुनापि सिन्धौ
स्थितस्य शैलादुदयं प्रतीमः ॥ ४३ ॥
निजानुजेनातिथितामुपेतः
प्राचीपतेर्वाहनवारणेन ।
सिन्दूरसान्द्रे किमकारि मूर्ध्नि
तेनारुणश्रीरयमुज्जिहीते ॥ ४४ ॥
यत्प्रीतिमद्भिर्वदनैः स्वसाम्या-
दचुम्बि नाकाधिपनायिकानाम् ।
ततस्तदीयाधरयावयोगा-
दुदेतिबिम्बारुणबिम्ब एषः ॥ ४५ ॥
विलोमिताङ्कोत्किरणाद्दृरुह-
दृगादिना दृश्यविलोचनादि ।
विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥ ४६ ॥
अनेन वेधा विपरीतरूपविनिर्मिताङ्कोत्किरणाङ्कितेन ।
त्वदाननं दृश्यदृगाद्यलक्ष्यदृगादिनेवाकृत सञ्चकेन ॥
अस्याः सुराधीशदिशः पुरासीद्यदम्बरं पीतमिदं रजन्या ।
चन्द्रांशुचूर्णव्यतिचुम्बितेन तेनाधुना नूनमलोहितायि ॥४७॥
तानीव गत्वा पितृलोकमेन-
मरञ्जयन्यानि स जामदग्न्यः ।
छित्त्वा शिरोऽस्राणि सहस्रबाहो-
र्विस्राणि विश्राणितवान्पितृभ्यः ॥ ४८ ॥
अकर्णनासस्त्रपले मुखं ते
पश्यन्न सीतास्यमिवाभिरामम् ।

रक्तोस्रवर्षी बत लक्ष्मणाभि-
भूतः शशी शूर्पणखामुखाभः ॥ ४९ ॥
आदत्त दीप्रं मणिमम्बरस्य दत्त्वा यदस्मै खलु सायधूर्तः ।
रज्यत्तुषारद्युतिकूटहेम तत्पाण्डु जातं रजतं क्षणेन ॥ ५० ॥

बालेन नक्तंसमयेन मुक्तं
रौप्यं लसद्बिम्बमिवेन्दुबिम्बम् ।
भ्रमिक्रमादुज्झितपट्टसूत्र-
नेत्रावृति मुञ्चति शोणिमानम् ॥ ५१ ॥
ताराक्षरैर्यामसिते कठिन्या
निशालिखद्व्योम्नि तमःप्रशस्तिम् ।
विलुप्य तामल्पयतोऽरुणेऽपि
जातः करे पाण्डरिमा हिमांशोः ॥ ५२ ॥
सितो यदाप्येष तदान्यदेशे
चकास्ति रज्यच्छविरुज्जिहानः ।
तदित्थमेतस्य निधेः कलानां
को वेद वा रागविरागतत्त्वम् ॥ ५३ ॥
काश्मीरजैं रश्मिभिरौपसंध्ये-
र्मृष्टं धृतध्वान्तकुरङ्गनाभि ।
चन्द्रांशुना चन्दनचारुणाङ्गं
क्रमात्समालम्भि दिगङ्गनाभिः ॥ ५४ ॥
विधिस्तुषारर्तुदिनानि कर्तुं
कर्तुं विनिर्मांति तदन्तभित्तेः ।
ज्योत्स्नीर्न चेत्तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥ ५५ ॥
इत्युक्तिशेषे स वधूं बभाषे
सूक्तिश्रुतासक्तिनिबद्धमौनाम् ।

मुखाम्यसूयानुशयादिवेन्दौ
केयं तव प्रेयसि ! मूकमुद्रा ॥ ५६ ॥
शृङ्गारभृङ्गारसुधाकरेण
वर्णस्रजानूपय कर्णकूपौ ।
त्वच्चारुवाणीरसवेणितीर-
तृणानुकारः खलु कोषकारः ॥ ५७ ॥
अत्रैव वाणीमधुमा तवापि
श्रोतुं समीहे मधुनः सनाभिम् ।
इति प्रियप्रेरितया तयाथ
प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥ ५८ ॥
पूरं विधुर्वर्धयितुं पयोधेः
शङ्केऽयमेणाङ्कमणिं कियन्ति ।
पयांसि दोग्धि प्रियविप्रयोग-
सशोककोकीनयने कियन्ति ॥ ५९ ॥
ज्योत्स्नामयं रात्रिकलिन्दकन्या-
पूरानुकारेऽपसृतेऽन्धकारे ।
परिस्फुरन्निर्मलदीप्तिदीपं
व्यक्तायते सैकतमन्तरीपम् ॥ ६० ॥
हासत्विषैवाखिलकैरवाणां
विश्वं त्रिशङ्केऽजनि दुग्धमुग्धम् ।
यतो दिवा बद्धमुखेषु तेषु
स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ ६१ ॥
मृत्युंजयस्यैष वसञ्जटायां न क्षीयते तद्भयदूरमृत्युः ।
न वर्धते च स्वसुधाप्तजीवस्रग्मुण्डराहूद्भवभीरतीव ॥ ६२ ॥
त्विषं चकोराय सुधां सुराय कलामपि स्वावयवं हराय ।
ददज्जयत्येष समस्तमस्य कल्पद्रुमभ्रातुरथाल्पमेतत् ॥ ६३ ॥

अङ्कैणनाभेर्विषकृष्णकण्ठः
सुधाप्तशुद्धः कटभस्मपाण्डुः ।
अर्हन्नपीन्दोर्निजमौलिधाना-
न्मृडःकलामर्हति षोडशीं न ॥ ६४ ॥
पुष्पायुधस्यास्थिभिरर्धदग्धैः
सितासितश्रीरघटि द्विजेन्द्रः ।
स्मरारिणा मूर्धनि यद्धृतोऽपि
तनोति तत्तौष्टिकपौष्टिकानि ॥ ६५ ॥
मृगस्य लोभात्खलु सिंहिकायाः
सूनुर्मृगाङ्कं कवलीकरोति ।
स्वस्यापि दानादमुमङ्कसुप्तं
नोज्झन्मुदा तेन च मुच्यतेऽयम् ॥ ६६ ॥
सुधाभुजो यत्परिपीय तुच्छ-
मेतं वितन्वन्ति तदर्हमेव ।
पुरा निपीयास्य पितापि सिन्धु-
रकारि तुच्छः कलशोद्भवेन ॥ ६७ ॥
चतुर्दिगन्तीं परिपूरयन्ती ज्योत्स्नेव कृत्स्ना सुरसिन्धुबन्धुः ।
क्षीरोदपूरोदरवासहार्दवैरस्यमेतस्य निरस्यतीयम् ॥ ६८ ॥
पुत्री विधोस्ताण्डविकास्तु सिन्धो-
रश्या चकोरस्य दृशोर्वयस्या ।
तथापि सेयं कुमुदस्य कापि
ब्रवीति नामैव हि कौमुदीति ॥ ६९ ॥
ज्योत्स्नापयःक्ष्मातटवास्तुवस्तु-
च्छायाच्छलच्छिद्रधरा धरायाम् ।
शुभ्रांशुशुभ्रांशकराः कलङ्क-
नीलप्रभामिश्रविभा विभान्ति ॥ ७० ॥

क्रियान्यथानेन वियद्विभाग-
स्तमोनिरासाद्विशदीकृतोऽयम् ।
अद्भिस्तथा लावणसैन्धवीभि-
रुल्लासिताभिः शितिरप्यकारि ॥ ७१ ॥

गुणौ पयोधेर्निजकारणस्य
न हानिवृद्धी कथमेतु चन्द्रः ।
चिरेण सोऽयं भजते तु यत्ते
न नित्यमम्भोधिरिवात्र चित्रम् ॥ ७२ ॥

आदर्शदृश्यत्वमपि श्रितोऽयमादर्शदृश्यां न बिभर्ति मूर्तिम् ।
त्रिनेत्रभूरप्ययमत्रिनेत्रादुत्पादमासादयति स्म चित्रम् ॥७३॥

इज्येव देवव्रजभोज्यऋद्धिः
शुद्धा सुधादीधितिमण्डलीयम् ।
हिंसां यथा सैव तथाङ्कमेषा
कलङ्कमेकं मलिनं बिभर्ति ॥ ७४ ॥

एकः पिपासुः प्रवहानिलस्य
च्युतो रथाद्वाहनरङ्कुरेषः ।
अस्त्यम्बरेऽनम्बुनि लेलिहास्यः
पिबन्नमुष्यामृतबिन्दुवृन्दम् ॥ ७५ ॥

अस्मिञ्शशी न स्थित एव रङ्कु-
र्यूनि प्रियाभिर्विहितोपदायम् ।
आरण्यसंदेश इवौषधीभि-
रङ्के स शङ्के विधुना न्यधायि ॥ ७६ ॥

अस्यैव सेवार्थमुपागतानामास्वादयन्पल्लवमोषधीनाम् ।
धयन्नमुष्यैव सुधाजलानि सुखं वसत्येष कलङ्करङ्कुः ॥७७॥

रुद्रेषुविद्रावितमार्तमारा-
त्तारामृगं व्योमनि वीक्ष्य बिभ्यत् ।

मन्येऽयमन्यः शरणं विवेश
मत्वेशचूडामणिमिन्दुमेणः ॥ ७८ ॥
पृष्ठेऽपि किं तिष्ठति नाथ नाथ !
रङ्कुर्विधोरङ्क इवेति शङ्का ।
तत्त्वाय तिष्ठस्व मुखे स्व एवं
यद्द्वैरथे पृष्ठमपश्यदस्य ॥ ७९ ॥
उत्तानमेवास्य वलक्षकुक्षि
देवस्य युक्तिः शशमङ्कमाह ।
तेनाधिकं देवगवेष्वपि स्यां
श्रद्धालुरुत्तानगतौ श्रुतायाम् ॥ ८० ॥
दूरस्थितैर्वस्तुनि रक्तनीले
विलोक्यते केवलनीलिमा यत् ।
शशस्य तिष्ठन्नपि पृष्ठलोम्नां
तन्नः परोक्षः खलु रागभागः ॥ ८१ ॥
भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं
पदप्रयोगाध्वनि लोक एषः ।
शशो यदस्यास्ति शशी ततोऽय-
मेवं मृगोऽस्यास्ति मृगीति नोक्तः ॥ ८२ ॥
यावन्तमिन्दुं प्रतिपत् प्रसूते
प्रासावि तावानयमब्धिनापि ।
तत्कालमीशेन धृतस्य मूर्ध्नि
विधोरणीयस्त्वमिहास्ति लिङ्गम् ॥ ८३ ॥
आरोप्यते चेदिह केतकत्व-
मिन्दौ दलाकारकलाकलापे ।
तत्संवदत्यङ्कमृगस्य नाभि-
कस्तूरिका सौरभवासनाभिः ॥ ८४ ॥

आसीद्यथाज्यौतिषमेष गोलः शशी समक्षं चिपिटस्ततोऽभूत् ।
स्वर्भानुदंष्ट्रायुगयन्त्रकृष्टपीयूषपिण्याकदशावशेषः ॥ ८५ ॥

असावसाम्याद्धितनोः सखा नो कर्पूरमिन्दुः खलु तस्य मित्रम् ।
दग्धौ हि तौ द्वावपि पूर्वरूपाद्यद्वीर्यवत्तामधिकां दधाते ॥८६॥

स्थाने विधोर्वा मदनस्य सख्यं
स शंभुनेत्रे ज्वलति प्रलीनः ।
अयं लयं गच्छति दर्शभाजि
भास्वन्मये चक्षुषि चादिपुंसः ॥ ८७ ॥

नेत्रारविन्दत्वमगान्मृगाङ्कः
पुरा पुराणस्य यदेष पुंसः ।
अस्याङ्क एवायमगात्तदानीं
कनीनिकेन्दिन्दिरसुन्दरत्वम् ॥ ८८ ॥

देवेन तेनैव च काश्यपिश्च
साम्यं समीक्ष्योभयपक्षभाजौ ।
द्विजाधिराजौ हरिणाश्रितौ च
युक्तं नियुक्तौ नयनक्रियायाम् ॥ ८९ ॥

यैरन्वमायि ज्वलनस्तुषारे
सरोजिनीदाहविकारहेतोः ।
तदीयधूमौघतया हिमांशौ
शङ्के कलङ्कोऽपि समर्थितस्तैः ॥ ९० ॥

स्वेदस्य धाराभिरिवापगाभि-
र्व्याप्ता जगद्भारपरिश्रमार्ता ।
छायापदेशाद्वसुधा निमज्ज्य
सुधाम्बुधावुज्झति खेदमत्र ॥ ९१ ॥

ममानुमेवं बहुकालनीली-
निपातनीलः खलु हेमशैलः ।

इन्दोर्जगच्छायमये प्रतीके
पीतोऽपि भागः प्रतिबिम्बितःस्यात् ॥ ९२ ॥
मायापदुन्निद्रसरोजपूजाश्रियं शशी पद्मनिमीलितेजाः ।
अक्षिद्वयेनैव निजाङ्करङ्कोरलंकृतस्तामयमेति मन्ये ॥ ९३ ॥

य एष जागर्ति शशः शशाङ्के
बुधो विधत्ते क इवात्र चित्रम् ।
अन्तः किलैतत्पितुरम्बुराशे-
रासीत्तुरङ्गोऽपि मतङ्गजोऽपि ॥ ९४ ॥

गौरे प्रिये भातितमां तमिस्रा
ज्योत्स्नी च नीले दयिता यदस्मिन् ।
शोभाप्तिलोभादुभयोस्तयोर्वा
सितासितां मूर्तिमयं बिभर्ति ॥ ९५ ॥
वर्षातपानावरणं चिराय काष्ठौघमालम्ब्य समुत्थितेषु ।
बालेषु ताराकवकेष्विहैकं विकस्वरीभूतमवैमि चन्द्रम् ॥९६॥
दिनावसाने तरणेरकस्मान्निमज्जनाद्विभ्यविलोचनानि ।
अस्य प्रसादादुडुपस्य नक्तं तमोविपद्द्वीपवतीं तरन्ति ॥९७॥

किं नाक्षिणो नोऽपि क्षणिकोऽणुकोऽयं
भानस्ति तेजोमयबिन्दुरिन्दुः ।
अत्रेस्तु नेत्रे घटते यदासी-
न्मासेन नाशी महतो महीयान् ॥ ९८ ॥
त्रातुं पतिं नौषधयः स्वशक्त्या मन्त्रेण विप्राः क्षयिणं न शेकुः ।
एनं पयोधिर्मणिभिर्न पुत्रं सुधा प्रभावैर्न निजाश्रयं वा ।९९।
मृषा निशानाथमहः सुधा वा हरेदसौ वा न जराविनाशी ।
पीत्वा कथं नापरथा चकोरा विधोर्मरीचीनजरामराः स्युः ॥
वाणीभिराभिः परिपक्त्रिमाभिर्नरेन्द्रमानन्दजडं चकार ।
मुहूर्तमाश्चर्यरसेन भैमीहैमीव वृष्टिः स्तिमितं च तं सा ।१०१।

इतो मुखाद्वागियमाविरासी-
त्पीयूषधारामधुरेति जल्पन् ।
अचुम्बदस्याः स मुखेन्दुबिम्बं
संवावदूकश्रियमम्बुजानाम् ॥१०२॥
प्रियेण सार्थं प्रियमेवमुक्ता
विदर्भभूमीपतिवंशमुक्ता ।
स्मितांशुजालं विततार तारा
दिवः स्फुरन्तीव कृतावतारा ॥१०३॥
स्ववर्णना न स्वयमर्हतीति
नियुज्य मां त्वन्मुखमिन्दुरूपम् ।
स्थानेऽत्युदास्ते शशिनः प्रशस्तौ
धरातुरासाहमिति स्म साह ॥१०४॥
तयेरितः प्राणसमः सुमुख्या
गिरं परीहासरसोत्किरां सः ।
भूलोकसारः स्मितवाक् तुषार-
भानुं भणिष्यन्सुभगां बभाण ॥१०५॥
तवानने जातचरीं निपीय गीतिं तदाकर्णनलोलुपोऽयम् ।
हातुं न जातु स्पृहयत्यवैमि विधुं मृगस्त्वद्वदनभ्रमेण ॥१०६॥
इन्दोर्भ्रमेणोपगमाय योग्ये
जिह्वा तवास्ये विधुषास्तुमन्तम् ।
गीत्या मृगं कर्षतु भन्त्स्यता किं
पाशीबभूवे श्रवणद्वयेन ॥१०७॥
आप्यायनाद्वा रुचिभिः सुधांशोः
शैत्यात्तमःकाननजन्मनो -वा ।
यावन्निशायामथ घर्मदुःस्थ-
स्तावद्व्रजत्यह्नि न शब्दपान्थः ॥१०८॥

दूरेऽपि तत्तावकगानपाना-
ल्लब्धावधिः स्वादुरसोपभोगे ।
अवज्ञयैव क्षिपति क्षपायाः
पतिः खलु स्वान्यमृतानि भासः ॥१०९॥

अस्मिन्न विस्मापयतेऽयमस्मांश्चक्षुर्बभूवैष यदादिपुंसः ।
तदत्रिनेत्रादुदितस्य तन्वि ! कुलानुरूपं किल रूपमस्य ।११०।

आभिर्मृगेन्द्रोदरि ! कौमुदीभिः क्षीरस्य धाराभिरिव क्षणेन ।
अक्षालि नीला रुचिरम्बरस्था तमोमयीयं रजनीरजक्या १११

पयोमुचां मेचकिमानमुच्चै-
रुच्चाटयामास ऋतुः शरद्या ।
अपारि वामोरु ! तयापि किंचि-
न्नप्रोञ्छितुं लाञ्छनकालिमास्य ॥११२॥

एकादशैकादशरुद्रमौलीनस्तं यतो यान्ति कलाः किमस्य ।
प्रविश्य शेषास्तु भवन्ति पञ्चपञ्चेषुतूणीमिषतोऽर्धचन्द्राः ११३

निरन्तरत्वेन निधाय तन्वि ! तारासहस्राणि यदि श्रियेत ।
सुधांशुरन्यः स कलङ्कमुक्तस्तदा त्वदास्यश्रियमाश्रयेत ।११४।

यत्पद्ममादित्सु तवाननीयां कुरङ्गलक्ष्मा च मृगाक्षि ! लक्ष्मीम् ।
एकार्थलिप्साकृत एष शङ्के शशाङ्कपङ्केरुहयोर्विरोधः ११५

लब्धं न लेखप्रभुणापि पातुं पीत्वा मुखेन्दोरधरामृतं ते ।
निपीय देवैर्विघसीकृतायां घृणां विधोरस्य दधे सुधायाम् ११६

एनं स बिभ्रद्विधुमुत्तमाङ्गे
गिरीन्द्रपुत्रीपतिरोषधीशम् ।
अश्नाति घोरं विषमब्धिजन्म
धत्ते भुजङ्गं च विमुक्तशङ्कः ॥११७॥

नास्य द्विजेन्द्रस्य बभूव पश्य दारान्गुरोर्यातवतोऽपि पातः ।
प्रवृत्तयोऽप्यात्ममयप्रकाशान्नघ्नन्ति न ह्यन्तिमदेहमाप्तान् ॥

स्वधाकृतं यत्तनयैः पितृभ्यः श्रद्धापवित्रं तिलचित्रमम्भः ।
चन्द्रं पितृस्थानतयोपतस्थे तदङ्करोचिःखचिता सुधेव ॥११९॥

पश्यौकसौधस्थितिसौख्यलक्ष्ये
त्वत्केलिकुल्याम्बुनि बिम्बमिन्दोः ।
चिरं निमज्ज्येह सतः प्रियस्य
भ्रमेण यच्चुम्बति राजहंसी ॥१२०॥

सौवर्गवर्गैरमृतं निपीय
कृतोऽह्नि तुच्छः शशलाञ्छनोऽयम् ।
पूर्णोऽमृतानां निशि तेऽत्र नद्यां
मग्नः पुनः स्यात्प्रतिमाच्छलेन ॥१२१॥

समं समेते शशिनः करेण प्रसूनपाणाविह कैरविण्याः ।
विवाहलीलामनयोरिवाह मधुच्छलत्यागजलाभिषेकः ॥१२२॥

विकासिनीलायतपुष्पनेत्रा मृगीयमिन्दीवरिणी वनस्था ।
विलोकते कान्तमिहोपरिष्टान्मृगं तवैषाननचन्द्रभाजम् ॥१२३॥

तपस्यतामम्बुनि कैरवाणां
समाधिभङ्गे विबुधाङ्गनायाः ।
अवैमि रात्रेरमृताधरोष्ठं
मुखं मयूखस्मितचारु चन्द्रम् ॥१२४॥

अल्पाङ्कपङ्का विधुमण्डलीयं
पीयूषनीरा सरसी स्मरस्य ।
पानात्सुधानामजलेऽप्यमृत्युं
चिह्नं बिभर्त्यत्रभवं स मीनम् ॥१२५॥

तारास्थिभूषा शशिजह्नुजाभृच्चन्द्रांशुपांशुच्छुरितद्युतिद्यौः ।
छायापथच्छद्मफणीन्द्रहारा स्वं मूर्तिमाह स्फुटमष्टमूर्तेः ॥१२६॥

एकैव तारा मुनिलोचनस्य-
जाता किलैतज्जनकस्य तस्य ।

तातािधिका संपदभूदियं तु
सप्तान्विता विंशतिरस्य यत्ताः ॥१२७॥
मृगाक्षि ! यन्मण्डलमेतदिन्दोः
स्मरस्य तत्पाण्डुरमातपत्रम् ।
यः पूर्णिमानन्तरमस्य भङ्गः
सच्छत्रभङ्गः खलु मन्मथस्य ॥ १२८ ॥
दशाननेनापि जगन्ति जित्वा-
योऽयं पुराऽपारि न जातु जेतुम् ।
म्लानिर्विधोर्मानिनि ! संगतेयं
तस्य त्वदेकाननिर्जितस्य ॥ १२९ ॥
दृष्टो निजां तावदियन्त्यहानि जयश्रयं पूर्वदशां शशाङ्कः ।
पूर्णस्त्वदास्येन तुलां गतश्चेदनन्तरं द्रक्ष्यसि भङ्गमस्य ॥१३०॥
क्षत्राणि रामः परिभूय रामात्क्षत्राद्यथाभज्यत स द्विजेन्द्र ।
तथैव पद्मानभिभूय सर्वांस्त्वद्वक्त्रपद्मात्परिभूतिमेति ॥१३१॥
अन्तः सलक्ष्मीक्रियते सुधांशो रूपेण पश्ये ! हरिणेन पश्य ।
इत्येष भैमीमददर्शदस्य कदाचिदन्तं स कदाचिदन्तः ॥१३२॥
सागरान्मुनिविलोचनोदराद्यद्द्वयादजनि तेन किं द्विजः ।
एवमेव च भवश्रयं द्विजःपर्यवस्यति विधुः किमत्रिजः ॥१३३॥
ताराविहारभुवि चन्द्रमयीं चकार
यन्मण्डलीं हिमभुवं मृगनाभिवासम् ।
तेनैव तन्वि ! सुकृतेन मते जिनस्य
स्वर्लोकलोकतिलकत्वमवाप धाता ॥ १३४ ॥
इन्दुं मुखाद्द्रुहतृणं तव यद्गृणन्ति
नैनं मृगस्त्यजति तन्मृगतृष्णयेव ।
अत्येति मोहमहिमा न हिमांशुबिम्ब-
लक्ष्मीविडम्बिमुखि ! वित्तिषु पाशवीषु ॥१३५॥

स्वर्भानुना प्रसभपानविभीषिकाभि-
र्दुःखाकृतैनमवधूय सुधा सुधांशुम् ।
स्वं निह्नुते शितिमचिह्नममुष्य रागै-
स्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठम् ॥१३६॥

हर्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं
जातस्फीततनोरमुष्य हरिता सूतस्य पत्न्या हरेः ।
भङ्गस्त्वद्वदनाम्बुजादजनि यत्पश्चात्तदेकाकिनः
स्यादेकः पुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः ॥ १३७ ॥

यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात्पद्मभू-
र्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये ! तावकम् ।
कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थल-
स्थास्नुस्वस्तटिनीतटावनिवनीवानीरवासी बकः ॥ १३८ ॥

जातं शातक्रतव्यां हरिति विहरतः काकतालीयमस्या-
मश्यामत्वैकमत्यस्थितसकलकलानिर्मितेर्निर्मलस्य ।
इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्ड-
द्वन्द्वापादानदानद्रवलवलगनादङ्कमङ्के विशङ्के ॥१३९॥

अंशं षोडशमामनन्ति रजनीभर्तुः कलां वृत्तय-
न्त्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्धिष्णवः ।
या शेषा पुनरुद्धृता तिथिमृते सा किं हरालंकृति-
स्तस्याः स्थानबिलं कलङ्कमिह किं पश्यामि सश्यामिकम् ॥

ज्योत्स्नामादयते चकोरशिशुना द्राघीयसी लोचने
लिप्सुर्मूलमिवोपजीवितुमितः संतर्पणात्मीकृतात् ।
अङ्के रङ्कुमयं करोति च परिस्प्रष्टुं तदेवादत-
स्त्वद्वक्त्रं नयनश्रियाप्यनधिकं मुग्धे ! विधित्सुर्विधुः ॥१४१॥

लावण्येन तवास्यमेव बहुना तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण तु ।

निर्माय द्वयमेतदप्सु विधिना पाणी खलु क्षालितौ
तल्लेशैरधुनापि नीरनिलयैरम्भोजमारभ्यते ।। १४२ ।।
लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण यः ।
तल्लेखापि शिखामणिः सुषमयाऽहंकृत्य शंभोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मं च सद्म श्रियः ।। १४३ ।।
सपीतैः संप्रीतेरजनि रजनीशः परिषदा
परीतस्ताराणां दिनमणिमणिग्रावमणिकः ।
प्रिये ! पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः
सुधामभ्युद्धर्तुं धृतशशकनीलाश्मचषकः ।। १४४ ।।
आस्यं शीतमयूखमण्डलगुणानाकृष्य ते निर्मितं
शङ्के सुन्दरि ! शर्वरीपरिवृढस्तेनैष दोषाकरः ।
आदायेन्दुमृगादपीह निहिते पश्यामि सारं दृशौ
त्वद्वक्त्रे सति वा विधौ धृतिमयं दध्यादनन्धः कुतः ।। १४५ ।।
शुचिरुचिमुडुगणनणमगममुमति-
कलयसि कृशतनु ! न गगनतटमनु ।
प्रतिनिशशशितलविगलदमृतभृत-
रविरथहयचयखुरबिलकुलमिव ।। १४६ ।।
उपनतमुडुपुष्पजातमास्ते
भवतु जनः परिचारकस्तवायम् ।
तिलतिलकितपर्पटाभमिन्दुं
वितर निवेद्यमुपास्स्व पञ्चबाणम् ।। १४७ ।।

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः ।
पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ।। १४८ ।।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ।। १४९ ।।

यथा यूनस्तद्वत्परमरमणीयापि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः ।। १५० ।।

दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं
तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बराम् ।
स परमपरः क्षीरोदन्वान् यदीयमुदीयते
मथितुरमृतं खेदच्छेदि प्रमोदनमोदनम् ।। १५१ ।।

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती मास्मिन्खलः खेलतु ।
श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ।। १५२ ।।

ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरा-
द्यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम् ।
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ।। १५३ ।।

।। इति महाकविहर्षप्रणीते नैषधीयप्रकाशे
द्वाविंशः सर्गः समाप्तः ।। २२ ।।

**समाप्तश्चायं ग्रन्थः ।।**

卐

॥ अर्हम् ॥

पूज्याचार्यदेव श्रीविजयामृतसूरिभ्यो नमः

महाकवि—कालिदासकृत

# ॥ मेघदूतम् ॥

## पूर्वमेघः ।

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

प्रत्यासन्ने नभसि दयिताजीविताालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥
जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥
संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥
त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥
तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥
कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।

आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥
आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥
मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥ १३ ॥
अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥ १४ ॥
रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥
त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कर्षणसुरभि क्षेत्रमारुह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥
त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ।। १८ ।।
स्थित्वा तस्मिन्वनचरवधूभुक्तकुंजे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।। १९ ।।
तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।। २० ।।
नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभि गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।। २१ ।।
उत्पश्यामि द्रुनमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ।। २२ ।।
पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ।। २३ ।।
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।

तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मा-
त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २४ ॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥
विश्रान्तः सन्व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २६ ॥
वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २७ ॥
वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥
वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥
प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-
न्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३० ॥

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ॥ ३२ ॥
भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ॥
अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३४ ॥
पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥ ३५ ॥
पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ॥
गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।

सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ ३७ ॥
तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३८ ॥
तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ३९ ॥
गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४० ॥
तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४१ ॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४२ ॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४३ ॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४४ ॥
आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४५ ॥
त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४६ ॥
तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥ ४७ ॥
ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां सितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ४८ ॥
हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ४९ ॥
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।

गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ।। ५० ।।
तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ।। ५१ ।।
आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एवं प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ।। ५२ ।।
तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ।।५३।।
ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मि-
न्मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ।।५४।।
तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ।।५५।।
शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।५६।।

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ।।५७।।
गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ।।५८।।
उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ।।५९।।
हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ।।६०।।
तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाषयेस्ताः ।।६१।।
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ।।६२।।
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६३ ॥

इति महाकविश्रीकालिदासविरचिते मेघदूते काव्ये
पूर्वमेघः समाप्तः ।

## ॥ उत्तरमेघः ॥

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥
हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥३॥
मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥४॥
नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।

अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥५॥
नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशो जालमार्गै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥६॥
यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासिताना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७॥
अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥८॥
गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥९॥
मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥१०॥
वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥११॥

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥१२॥
वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥१३॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥१४॥
रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥१५॥
तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥१६॥
एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥१७॥
गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।

अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥१८॥
तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥१९॥
तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥२०॥
नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥२१॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥२२॥
उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥२३॥
शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥२४॥

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥२५॥
आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥२६॥
पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥२७॥
निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम् ।
मत्संभोगः कथमुपनयेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥२८॥
आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥२९॥
सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥३०॥
जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।

वाचालं मां न खलु सुभगं मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥३१॥
रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥३२॥
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥३३॥
तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचि-
त्सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥३४॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥३५॥
भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥३६॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम् ।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः संगमात्किंचिदूनः ॥३७॥

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं
ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ।।३८।।
अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ।।३९।।
शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ।।४०।।
श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति ।।४१।।
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगम नौ कृतान्तः ।।४२।।
मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ।।४३।।
भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।

आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४४॥
संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥४५॥
नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४६॥
शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥४७॥
भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदति सस्वनं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥४८॥
एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥४९॥
आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।

साभिज्ञान-प्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥५०॥

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५१॥

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्धया।
इष्टान्देशाञ्जलद विचर प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥५२॥

॥ महाकविश्रीकालिदासविरचिते मेघदूते
काव्ये उत्तरमेघः समाप्तः ॥

॥ इति काव्यषट्कम् ॥

ॐ

# गुरुपरम्परा–पट्टावलिः

श्रियेऽस्तु संघस्य स वर्द्धमानः शुभैर्गुणौघैः परिवर्द्धमानः।
यस्य प्रसादेन शिवं श्रयन्ति भव्या जना नैव भवे भ्रमन्ति ॥ १ ॥
श्री गौतमो लब्धिमहासमुद्रः श्रीमान् सुधर्मा हत-मोहनिद्रः।
जम्बूमुनिर्भग्न-महाकषायः संघस्य भूयात्प्रभवः शिवाय ॥ २ ॥
शय्यंभवोऽर्हत्प्रतिमाप्रबुद्धः सूरिर्यशोभद्र इति प्रसिद्धः ।
संभूत-सूरिः श्रुत-भृल्ललामा श्रीभद्रबाहुः सुगृहीतनामा ॥ ३ ॥
श्री स्थूलभद्र-कृतभूरिभद्रः सलीलशीलव्रतवाःसमुद्रः ।
महागिरिः सूरिरघापहारी भूयात्सुहस्ती दशपूर्वधारी ॥ ४ ॥
श्रीवज्रसूरिर्गुणलक्षधारी श्रीजैनधर्मोन्नतिकर्मकारी ।
अनेकधालब्धि महानिधानं करोतु संघस्य शुभ प्रदानम् ॥ ५ ॥
श्री आर्यरक्षितमुनीश्वरवृद्धवादि, श्री सिद्धसेनजिनभद्रकपादलिप्ता।
श्री देवसूरिर्नृपबोधकहेमचंद्र मुख्याः कृतप्रवचनोन्नतयो जयन्तु ॥६॥
श्रीमज्जगच्चन्द्रमुनीन्द्र पट्ट-सरोज हंसावुभयौ हि शिष्यौ ।
देवेन्द्रनामा प्रथमोऽत्र सूरिर्द्वितीयकः श्रीविजयेन्दुसूरिः ॥ ७ ॥
तयोरभूतामुभये च शाखे क्रमेण निर्वाणसुखाभिलाषे ।
तत्रादिशाखा प्रभवा हि विद्या-नंदादयः श्रीगुरवो बभूवुः ॥ ८ ॥
श्रीमान् विद्यानन्द-सूरीश्वरोऽभूत्प्रादुर्भूतप्रातिभा-द्वैत-शोभः।
ज्योतिश्छन्दस्तर्कसाहित्यसिद्धान्तालंकाराः सौहृदं यत्र चक्रुः ॥ ९ ॥
श्री धर्मघोषगुरवः स्फुरित-प्रभावा,
विज्ञातविस्तृतनिजान्यमत–स्वभावाः ।
चारित्रवंत इह निर्मितचारुशास्त्राः,
श्रेयःश्रियं प्रवितरन्तु पवित्रगात्राः ॥ १० ॥
शर्वशैलशिखरो-परिस्फुरद्बद्धमौलिमुकुटेन्दुरश्मिभिः ।
पूरिते सरसि मानसे सदा कैरवाणि विकसंति वासरे ॥ ११ ॥

घण सज्जण नन्दण सुग्गहं संदण सुहयर वन्दण सीलधणा।
मुणिसत्तमनायग सुसमय-वायग उवसमदायग सुद्धमणा।
हियकर पर अप्पह बहुदेहप्पह सिरि सोमप्पह सूरिवरा,
नन्दंतु निरञ्जण वंजण भवभयभंजण दुरियहरा ॥ १२ ॥

श्रीविमलप्रभसूरिर्भूरियशःपूरपूरितदशाशः ।
कुशलाय, देशनाजलनिर्णाशित-मोह-मल-पटलः ॥ १३ ॥
श्रीमान् परमानन्दः परमानन्दं ददातु संघस्य ।
सूरिः सुभूरिविद्यावदातमतिवैभवावासः ॥ १४ ॥
श्री पद्मतिलकसूरिर्दूरित-दुर्दांत-मदनमदकंदः ।
शम-दम-संयम-लक्ष्मी-कटाक्षितः क्षेमकृतयेऽस्तु ॥ १५ ॥

येषां प्रसादादहमस्मि किञ्चिच्छास्त्रादिकं वाचयितुं प्रवृत्तः।
परोपकारैकपरायणास्ते चारित्रवंतः सुचिरं जयंतु ॥ १६ ॥
स्पर्शाश्मना स्पृष्टमयोऽपि यद्वत्, सुवर्णभावं भजतेऽत्र तद्वत् ।
श्रीमत्प्रभूणामुपदेशलेशा-न्मूर्खोऽपि शिष्यो विदुषां धुरि स्यात् ॥१७॥

विद्वच्चक्रचकोरचित्तपरमप्रीतिप्रतन्वन्नलं
गोवृन्देन सुधामयेन सततं स कैरवानन्दकः ।
जीयाच्चन्द्रसमः ससोमतिलकः सूरीश्वरः किं त्वसौ
नित्यं पूर्णकलः कलंकविकलश्चाथो न दोषाकरः ॥ १८ ॥
यदत्र कूटं मतिमांद्यदोषात्प्रवाचितं किंचन पुस्तकस्थम् ।
व्याख्यानितं वा विपरीत रूपं मिथ्यात्र मे दुष्कृतमस्तु शस्तम् ॥१६॥
यत्संबंधनिवेदना न विदधे कस्यापि कस्यापि य-
न्नालापः प्रथितो मयोज्ज्वलदृशा नालोकितः कश्चन ।
यत्कोऽपि प्रतिपादितः कटुगिरा नो धर्मलाभो ददे
यत्कस्मैचिदयं जनस्तदधुना सर्वं मम क्षाम्यतु ॥ २० ॥
यद्व्याख्यानमसंगतं यदुचित प्रभ्रष्ट-मालापितं
यन्नोच्चैर्न हि वीक्षितं यदुदिता नो धर्मलाभाशिषः ।

यच्चक्रे किल नानुवंदनविधिः साधुव्रजे सर्वत-
स्तच्क्षन्तव्यमहो महोत्सवरिपोर्मोहस्य विस्फूर्जितम् ॥२१॥

ॐ

# पुस्तकारंभविधिः

जीवानां वल्लभं सौख्यं तच्च मोक्षं विना न हि ।
साध्यो ज्ञानक्रियाभ्यां स यतध्वं तत्र सज्जनाः ॥ १ ॥
पश्यन् ज्ञानेन न सूभ्रा वटे पतति जातुचित् ।
कुमार्गं त्यजति प्राज्ञो मार्गं श्रयति तात्त्विकम् ॥ २ ॥
चिलातीनंदनः श्रुत्वा पदमेकं मुनेर्मुखात् ।
उपशांतो विविक्तात्मा संवृतश्चाभवत्क्षणात् ॥ ३ ॥
श्री वीराद्वासनाशून्यं श्रुतयाप्येकगाथया ।
मुक्तोभवद्दुव्यानर्थैः रौहिणेयो दिवंगतः ॥ ४ ॥
क्षेत्रपालेन बालेन कृताः कुंभकृतोऽपि च ।
गाथा गुणाय संजाता जवराजऋषेस्तथा ॥ ५ ॥
यदि गाथापदं चैकं गुणाय महते भवेत् ।
धन्याः श्रृण्वन्ति ते ज्ञानं सम्यगाराधयंत्यहो ॥ ६ ॥
जिनोदितं सदा शास्त्रं वाचनीयं सुबुद्धिभिः ।
श्रोतव्यमुत्तमैर्ज्ञानं तृतीयं नेत्रमिच्छता ॥ ७ ॥
मंगलमभिधेयं च संबन्धोऽपि प्रयोजनम् ।
चत्वारिकथनीयानि शास्त्रस्य धुरि धीमता ॥ ८ ॥
विघ्नोपशान्तये वाच्यं मंगलं तद्द्विधा भवेत् ।
द्रव्यतो भावतस्तत्रादिमं मंगलमुच्यते ॥ ९ ॥
सानुकूलग्रहस्वप्न-पूज्याशीः शकुनोत्सवाः ।
दधिदूर्वाक्षतादीनि वस्तूनि द्रव्यमंगलम् ॥ १० ॥
द्रव्य मंगलतः श्रेयः पुंसां भवति वा न वा ।
प्रतिक्षणमवश्यं तत् जाप्यते भावमंगलम् ॥ ११ ॥

तद् भावमगलं ज्ञेयं सद्देवादिप्रणामतः ।
देवस्तु स चतुस्त्रिंशद्वरातिशयशोभितः ॥ १२ ॥
अभिधेयं पुस्तकान्तर्वक्तव्यार्थप्रकाशनम् ।
संबन्धोऽयं कथं जज्ञे ग्रंथ इत्यादिभाषणम् ॥ १३ ॥
श्रोतुः प्रयोजनं पाप- त्यागो ज्ञानं विवेकिता ।
श्रद्धा वृद्धिमती धर्म-क्रमात् स्वर्मोक्षगं सुखम् ॥ १४ ॥
तच्च वाचयितुर्ज्ञानोपकारौ शर्म—निर्वृतम् ।
फलं तस्य हि शृण्वन्तु यो वाचयति पुस्तकम् ॥ १५ ॥
श्रियः सफलता सम्यग्वात्सल्यं गुणशालिषु ।
दिगंतं प्रापिता कीर्त्तिर्वाच्यते येन पुस्तकम् ॥ १६ ॥
सदोत्थापयतः श्रोतॄन् स्वव्याख्यायां बुभुक्षितान् ।
श्रीपूज्यान् मन्यते नैव कस्कः कृपणचक्रिणः ॥ १७ ॥
व्याख्ययाप्येकया सर्वश्रोतॄनध्यापयंश्चिरम् ।
धीमद्भिधुर्यु दाराणां स्थाप्यपकोऽहमेव हि ॥ १८ ॥
पुंसैकेन विना द्वाभ्यां स्त्रीभ्यामेकं च बालकम् ।
सभा निमंत्र्यमाणास्ति व्याख्यानावसरे सदा ॥ १९ ॥

स ज्ञानं वरमासनं निरुपमस्थालं शुभाभाषणं
बोधिः पाणिः शुचिः फलानि विविधस्वादूनि तत्त्वानि च ।
पक्वान्नानि महाव्रतानि सततं शाल्योदनं मार्दवम्,
क्षान्तिर्दालिरकृत्रिमा जिनमते वाक्यानुरागो घृतम् ॥ २० ॥
एला यत्र दया क्षमा च लवली सत्यं लवंगं परं
कारुण्यं क्रमुकी फलानि विदितश्चूर्णः सुतत्त्वोदयः ।
कर्पूरं मुनिदानमुत्तमगुणं शीलं सुपत्रोच्चयो
गृह्णीध्वं गुणवज्जनैर्निगदितं ताम्बूलमेतज्जनाः ॥ २१ ॥
शालितुषमात्र भारो मध्ये पोट्टलिकमुंदिरोऽपि यथा ।
मादृगपि व्याख्याता हास्याय भवी तथा विदुषी ॥ २२ ॥

द्रुमाद् द्रुममूर्ध्वगतौ न शक्ता यद्वानरा अप्युदधिं तरन्ति ।
श्रीरामदेवस्य विभोः प्रभावं, मन्वन्ति तत्रोत्तमबुद्धिभाजः ॥२३॥
यद्दर्दुरः सर्पशिरोऽधिरुह्य निःशंकचेता रमते यथेच्छम् ।
प्रपोस्फुरीति प्रकटः प्रभावः कस्यापि तत्रोत्तममांत्रिकस्य ॥ २४ ॥
व्याख्यास्तु दूरे यदहं निवेष्टुमप्यासनेऽलं परिषद्गतः स्याम् ।
अचिंत्यमाहात्म्यवतां प्रभावः श्रीमत्प्रभूणामयमत्र सर्वः ॥ २५ ॥
चारित्रं चारु येषां समय चतुरता गोचरा नैव वाचां
दक्पातः क्षीरनीरालयलहरिसमः साम्यरम्या च मूर्त्तिः ।
वाक्यं पीयूषधारामधुमधुरतरं धीमयं धर्मकृत्यं
श्रीसोमप्रभाख्या भुवि शुभ गुरवस्ते न हर्षाय कस्मै ॥ २६ ॥
श्री जम्बूमुनिविश्वविश्वविदितश्रीस्थूलभद्रादयः
स्मार्यास्ते मुनिनामुनैष न मृगः पुंस्त्वावतारी हरिः ।
मा कार्षीर्विधवां च मामपसरेऽत्युक्तोऽपि रत्या पुन-
र्युध्यन्नाम्न्यवशेष्ययैर्विरचितोऽनंगो यथार्थाभिधः ॥ २७ ॥
लक्ष्मीसमाकर्षणनामधेयान् विश्वाधिपत्यप्रदभागधेयान् ।
भव्याक्षि-भाग्यावधि-रूप धेयान् विज्ञाततत्त्वसमयाभिधेयान् ॥२८॥
श्रीसंघचित्तगगनांगणसूर्यकल्पान्
कर्पूरपूरजयकारिगुणैरनल्पान् ।
श्रीपूर्वसोमतिलकाभिधसूरिराजान्
संस्तौमि तान् सविधसंज्ञि सुधी समाजान् ॥ २९ ॥
नक्षत्रा-क्षत-पूरितं मरकत-स्थालं विशालं नभः
पीयूषद्युतिनालिकेरकलितं चन्द्रप्रभाचन्दनम् ।
यावन्मेरुगिरेर्गभस्तिकटके धत्ते धरित्रीवधू
स्तावन्नंदतु धर्मकर्मनिरतः श्रीसंघभट्टारकः ॥ ३० ॥
[१]न्यग्मुखता [२]पुनरुक्ति[३]द्रुतता[४]स्थिरता[५]नवसरवेदितत्वम् ।
[६]निष्फलशब्दाश्च तथा, व्याख्यातुर्दोषषट्कमिदम् ॥ १ ॥